

KIRIT GRAPHICS
09898490091

P 14446

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

आ. श्रीॐकारसूरिज्ञानमंदिर ग्रंथावली - ४८/१

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम् भाग २

## (उद्देश २-३)

आगमप्रभाकर मुनिश्री पुण्यविजयजी सज्जीकृत सामग्रीसहायेन

संपादकः
आचार्य विजय मुनिचन्द्रसूरिः
सहायकः मुनि दिव्यरत्नविजयः

प्रकाशक
आचार्यश्री ॐकारसूरिज्ञानमंदिर, सुभाषचोक, गोपीपुरा, सूरत.

For Private and Personal Use Only

Vyavahara Sootraṁ part - 2
Editor Ac. Munichandrasoori

प्रथम संस्करण
वि. सं. २०६६, ई. स. '२०१०
नकल : २५०

**प्राप्तिस्थान**

आचार्य श्रीॐकारसूरिज्ञानमंदिर
आचार्य श्रीॐकारसूरिआराधनाभवन
सुभाषचोक, गोपीपुरा, सूरत.
फोन : ९८२४१५२७२७
E-Mali : omkarsuri@rediffmail.com
mehta_sevantilal@yahoo.co.in

आचार्य श्रीॐकारसूरिगुरुमंदिर
वावपथकनी वाडी,
दशापोरवाड सोसायटी,
पालडी चाररस्ता, अमदावाद-७
फोन : ( ०७९ ) २६५८६२९३

विजयभद्रचेरिटेबल ट्रस्ट
पार्श्वभक्तिनगर, नेशनल हाईवे १४,
भीलडीयाजी जि. बनासकांठा. पीन-३८५५३५.
फोन : ०२७४४-२३३१२९, २३४१२९

मुद्रक :-
किरीट ग्राफिक्स २०९ आनंद शोपींग सेन्टर, रतनपोल, गोलवाड, अहमदाबाद-०१ फोन : ९८९८४९००१



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય
રામચન્દ્ર - ભદ્રંકર - કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન
વર્ધમાનતપોનિધિ ૧૦૦ + ૬૭ ઓળીના આરાધક
પૂ. ગણિવર્યશ્રી નયભદ્ર વિ.મ.સા.ની પ્રેરણાથી
શ્રી દેવકીનગર જૈન સંઘ બોરીવલી વેસ્ટ મુંબઈ.
શ્રી વર્ધમાનભક્તિ શ્વે.મૂ. ઈરાનીવાડી જૈન સંઘ કાંદીવલી, (વેસ્ટ) મુંબઈ.
શ્રી ધર્મવર્ધક શ્વે.મૂ.પૂ. જૈન સંઘ મધુપાર્ક
કાર્ટરરોડ નં. ૧ બોરીવલી ઇસ્ટ મુંબઈ આદિએ
જ્ઞાનદ્રવ્યમાંથી સુંદર લાભ લીધો છે.

અનુમોદના....અનુમોદના....અનુમોદના....



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# પ્રકાશકીય

પૂ.આ.ભ. **શ્રીઅરવિંદસૂરિ** મ.સા. અને પૂ.આ.ભ.શ્રી **યશોવિજયસૂરિ** મ.સા.ના આશીર્વાદ અને માર્ગદર્શન પૂર્વક આ ગ્રંથમાળામાં નવા નવા ગ્રંથો પ્રગટ થતા રહે છે.

વ્યવહારસૂત્ર નિર્યુક્તિ-ભાષ્ય અને પૂ.આ.શ્રી મલયગિરિસૂરિ મ.સા.ની ટીકા સાથે ઘણાં વર્ષો બાદ પ્રગટ થઈ રહ્યું છે.

તાડપત્રીય વગેરે વિવિધ પ્રતો અને આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા.એ તૈયાર કરાવેલ સામગ્રીના આધારે પૂ.આ.ભ. શ્રીમુનિચન્દ્રસૂરિ મ.સા.એ સંશોધન-સંપાદન કાર્ય કર્યું છે.

વ્યવહારસૂત્ર છેદગ્રંથ છે. સાધુ-સાધ્વીજીના પ્રાયશ્ચિત્ત વગેરે વિષયો આમાં આવતા હોવાથી એનું વાંચન-પઠન અધિકારપ્રાપ્ત મુનિઓ જ ગુરુ આજ્ઞા મુજબ કરી શકે.

ગ્રંથ ઘણો વિશાળ હોવાથી એ છ ભાગોમાં બહાર પડે છે. વિહારમાં વાંચન કરતાં પૂ. મુનિ ભગવંતોની જરૂરિયાતને ધ્યાનમાં લઈ પ્રતાકારે પણ થોડી નકલો પ્રકાશિત થઈ રહી છે.



For Private and Personal Use Only

આ અતિ મહત્ત્વના ગ્રંથનું સારી રીતે સંશોધન થાય એ માટે સંપાદક આચાર્યશ્રીએ જુદા જુદા વિદ્વાન આચાર્ય ભગંવતો આદિને વિનંતી કરી હતી. સદ્ભાગ્યે વિવિધ વિદ્વાનોએ આ ગ્રંથને આત્મીયભાવે તપાસી આપ્યો છે. પૂ.આ.ભ.શ્રી રાજશેખરસૂરિ મ.સા. (પૂ. આ.ભ.શ્રી રામચન્દ્રસૂરિ મ.સા. સમુદાય), પૂ. આ.ભ.શ્રી કુલચન્દ્રસૂરિ મ.સા., પૂ.આ.શ્રી પુણ્યરત્નસૂરિ મ.સા., પૂ.આ.શ્રી યશોરત્નસૂરિ મ.સા.(પૂ. આ.શ્રી ભુવનભાનુસૂરિ મ.સા. સમુદાય), પં. મુક્તિચન્દ્ર વિ. ગણી., પં. મુનિચન્દ્ર વિ. ગણી (પૂ.આ.ભ.શ્રી કલાપૂર્ણસૂરિ મ.સા. સમુદાય) આદિએ ગ્રંથ સંશોધનમાં સહકાર આપ્યો છે. આમ અનેક વિદ્વાનોના સહકારથી સંશોધિત થતાં આ આગમગ્રંથને પ્રકાશન કરતાં અમે ગૌરવ અનુભવીએ છીએ.

અનેક સંઘોએ જ્ઞાનદ્રવ્યમાંથી પ્રકાશનનો લાભ લીધો છે. તે બધાના અમો આભારી છીએ.

**લી. ટ્રસ્ટીગણ,**

**આ.ૐકારસૂરિ આરાધના ભવન.**

# સંપાદકીય

વ્યવહારસૂત્ર(સટીક)ના આ બીજા ભાગમાં વ્યવહારસૂત્રનો પ્રથમ ઉદેશ એના ઉપરની નિર્યુક્તિ-ભાષ્ય ગાથા. ૧૮૩ થી ૯૬૩ અને તેના ઉપરની આ. શ્રી મલયગિરિસૂરિ મહારાજે રચેલી ટીકા વગેરે પ્રસિદ્ધ થઈ રહ્યા છે.

સંપાદન માટે ઉપયુક્ત હસ્તલિખિત પ્રતો વગેરેનો પરિચય અને ગ્રંથ-ગ્રંથકાર વિષેનો સંક્ષિપ્ત પરિચય વગેરે પ્રથમભાગના સંપાદકીયમાં આપવામાં આવ્યા છે. જિજ્ઞાસુઓએ ત્યાંથી જોઈ લેવા વિનંતી.

## ઋણસ્વીકાર

પ્રસ્તુત વ્યવહારસૂત્રના સંશોધનમાં પાઠ શુદ્ધીકરણ વગેરેમાં જેઓએ આત્મીયભાવે સહાય કરી છે -

પૂ. આ. ભ. રાજશેખરસૂરિમ.સા., આ.શ્રી કુલચન્દ્રસૂરિ મ.સા., આ. શ્રી પુણ્યરત્નસૂરિમ.સા. આ.શ્રી. યશોરત્નસૂરિ મ.સા., પં. શ્રી મુક્તિચન્દ્રવિ. ગણી, પં. શ્રી મુનિચન્દ્રવિ. ગણી આદિના અમે ખૂબ ખૂબ ઋણી છીએ. આભાર.

લી.

પૂ. આ.ભ.શ્રી **ભદ્રસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન
પૂ. મુનિરાજશ્રી **જિનચન્દ્રવિજય** મ.સા.ના વિનેય
આ. વિજય **મુનિચન્દ્રસૂરિ.**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## વિશેષ સૂચના

પોથી આકારે પ્રગટ થતાં આ ગ્રંથમાં પુસ્તક આકારના એક પેજનું મેટર બે પેજમાં લેવામાં આવ્યું છે. એટલે અનુક્રમણિકા વગેરેમાં પેજ નંબર બન્ને સંસ્કરણમાં સમાન રહે તે માટે પોથીમાં પેજ નંબર **A - B** એ પ્રમાણે આપ્યા છે.

એટલે પુસ્તકનું પેજ ૨= પોથીનું પેજ ૨**A** - ૨**B** સમજવું.

પરિશિષ્ટોમાં જ્યાં પંક્તિ નંબર દર્શાવ્યા છે. તે પોથીના **A - B** બાજુમાં સળંગ પંક્તિ નંબર ગણવાથી મળી રહેશે.

જેમ કે અવતરણસૂચિમાં 'तृस्त्रोऽवात्' પૃષ્ઠ ૬ પંક્તિ ૨માં છે તે પોથીમાં ૬**A** બાજુમાં છે 'શબ્દપ્રથા' પૃષ્ઠ ૬ પંક્તિ ૧૮માં બતાવેલ છે તે ૬**B** બાજુમાં છે.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# विषयानुक्रमः भाग-२

## उद्देश : २


| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १ | वैयावृत्त्यार्थं परिहारतपःस्थापना | ५१३ |
| ९६४-९६५ | सूत्रसम्बन्धः | ५१२-३ |
| ९६६-९७२ | द्विशब्दनिक्षेपाः | ५१३-५१७ |
| ९७३-९८० | साधर्मिकनिक्षेपाः १२ | ५१७-५२३ |
| ९७८-९८० | चतुर्भङ्ग्यः लिङ्ग-प्रवचनादीनाम् | ५१९-५२३ |
| ९८१-९८२ | विहारशब्दनिक्षेपाः | ५२३-५२४ |
| ९८३-९८६ | गीतार्थ-गीतार्थनिश्रितविहारादिः | ५२४-५२६ |
| ९८७-९९२ | अगीतार्थस्य विहारे दोषाः | ५२६-५२८ |
| ९९३-९९५ | विहारप्रकारौ समाप्ताऽसमाप्तकल्पौ | ५२९ |
| ९९६-१००६ | द्वयोः विहारे दोषाः | ५२९-५३५ |
| ९९८ | वसतिशून्यकरणे दोषाः | ५३०-५३२ |
| ९९९-१००६ | ग्लानस्य एकाकीमोचने दोषाः | ५३२-५३५ |




For Private and Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| १००७-१०१३ | द्विकविहारे प्रयोजनानि यतना च | ५३५-५३८ |
| सूत्र २-३ | पारिहारिकसामाचारी | ५३८ |
| सूत्र ४ | प्रायश्चित्तविधिः | ५३९ |
| १०१७-१०१८ | पारिहारिकसामाचारी | ५४०-५४१ |
| सूत्र ५ | प्रायश्चित्तविधिः | ५४१ |
| १०२१-१०२९ | प्रायश्चित्तकारणानि दृष्टान्तश्च | ५४२-५४६ |
| १०३०-१०३१ | आलोचकसामाचारी | ५४६ |
| १०३२-१०३३ | अनुपारिहारिककर्तव्यम् | ५४६-५४७ |
| सूत्र ६ | ग्लानपारिहारिकसामाचारी | ५४७-५४८ |
| १०३९ | पारिहारिकस्य पुनरागमनकारणानि | ५४९ |
| १०४०-१०४७ | अशिवगृहीतपारिहारिकसामाचारी | ५५०-५५३ |
| १०४८-१०५३ | यथालघुकादिव्यवहारः | ५५३-५५५ |
| सूत्र ७ | ग्लानालोचकं प्रति व्यवहारः | ५५५ |
| सूत्र ८ | ग्लानपाराश्चिकं प्रति व्यवहारः | ५५६ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| १०५५-१०५८ | अनवस्थाप्य-पाराञ्चितस्वरूपम् | ५५६-५५७ |
| सूत्र ९ | क्षिप्तचित्तस्य वैयावृत्त्यम् | ५५७ |
| १०६०-१०६१ | क्षिप्तचित्ते प्ररूपणा | ५५८ |
| १०६२-१०६५ | क्षिप्तचित्ते उदाहरणानि | ५५८-५५९ |
| १०६६-१०७२ | क्षिप्तचित्तस्य प्रगुणीकरणम् | ५६०-५६२ |
| १०७१-१०८७ | क्षिप्तचित्ते यतना | ५६१-५६८ |
| १०८८-११०५ | क्षिप्तचित्ते प्रायश्चित्ताभावः | ५६८-५७३ |
| १०९८-११०० | प्रायश्चित्ताभावे उदाहरणादिः | ५७२ |
| ११००-११०५ | प्रायश्चित्ते आदेशत्रिकम् | ५७२-५७३ |
| सूत्र १० | दीप्तचित्ते सामाचारी | ५७३ |
| ११०७ | दीप्तचित्तप्रयोजनानि | ५७४ |
| ११०९-१११४ | शातवाहनदृष्टान्तम् | ५७४-५७६ |
| १११५-१११७ | दीप्ते लोकोत्तरिकोदाहरणानि | ५७६-५७७ |
| १११८-११२२ | दीप्तचित्ते यतना | ५७७-५७९ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | | विषयः | पेज |
|---|---|---|---|
| | सूत्र ११ | यक्षाविष्टे सामाचारी | ५७९ |
| ११२३-११२८ | | यक्षाविष्टे कारणानि उदाहरणानि | ५७९-५८१ |
| ११२९ | | छलितस्य यतना | ५८१ |
| | सूत्र १२ | उन्मादे सामाचारी | ५८२ |
| ११३०-११३५ | | उन्मादप्ररूपणा | ५८२-५८४ |
| | सूत्र १३ | उपसर्गप्राप्तस्य प्ररूपणा | ५८४ |
| ११३६-११३७ | | उपसर्गभेदादिः | ५८४ |
| ११३८-११४५ | | उपसर्गे सामाचारी | ५८५-५८७ |
| | सूत्र १४ | अधिकरणसहितसामाचारी | ५८७ |
| | सूत्र १५ | सप्रायश्चित्ते सामाचारी | ५८८ |
| | सूत्र १६ | भक्तपानप्रत्याख्याने सामाचारी | ५८९ |
| | सूत्र १७ | अर्थजाते सामाचारी | ५९१ |
| ११५७-११६० | | अर्थजातस्य प्रयोजनादीनि | ५९२-५९३ |
| ११६१-११८७ | | अर्थजातप्ररूपणा | ५९३-६०२ |




For Private and Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| ११६५-११७१ | अर्थजातस्य मोचने विधिः | ५९४-५९७ |
| ११७२ | अर्थजाते यतना | ५९७ |
| सूत्र १८-१९ | अनवस्थाप्ये सामाचारी | ६०२ |
| सूत्र २०-२१ | पाराञ्चिते सामाचारी | ६०३ |
| सूत्र २२ | अनवस्थाप्ये विशेषविधिः | ६०४ |
| ११९३ | अनवस्थाप्ये ग्रहीभूतस्योपस्थापनादिः | ६०५ |
| ११९४-१२०१ | पाराञ्चिते आचार्यकर्तव्यादिः | ६०५-६०८ |
| १२०२ | राजद्वारे गमनादिः | ६०८-६१० |
| १२०९-१२१९ | राज्ञः कोपनिवारणादिः | ६१०-६१३ |
| सूत्र २३ | अभ्याख्याने सामाचारी | ६१३-६१४ |
| १२२२-१२२५ | अभ्याख्यानप्रयोजनादिः | ६१५-६१७ |
| १२२६-१२३१ | अभ्याख्याने सत्यज्ञानोपायाः | ६१७-६१९ |
| सूत्र २४ | अवधावने सामाचारी | ६२० |
| १२३४-१२३५ | उत्प्रव्रजनकारणानि | ६२१-६२२ |

| गाथा | विषयः | पेज |
|---|---|---|
| १२३६-१२८० | **अवधावने शोधिः** | ६२२-२६७ |
| १२३७-१२६६ | निवर्त्तने प्रायश्चित्तनानात्वम् | ६२३-६३३ |
| १२६१ | रोहिणेयदृष्टान्तम् | ६३१-६३२ |
| १२७२ | उपधेः उपघातः | ६३५ |
| सूत्र २५ | एकपाक्षिकस्य आचार्यादिपदस्थापना | ६२७ |
| १२८२-१२८५ | एकपाक्षिकादिस्वरूपम् | ६३८-६४० |
| १२८४ | पदस्थापनासामाचारी | ६३९ |
| १२८६-१२९४ | पदस्थापने भङ्गाः | ६३९-६४३ |
| १२८८-१२९२ | इत्वरस्थापना यावत्कथिकस्थापना | ६४१-६४२ |
| १२९३-१२९४ | पदस्थापने अपवादाः | ६४२-६४३ |
| १२९५-१३०४ | आभवनव्यवहारः | ६४३-६४६ |
| १३०५-१३०९ | आचार्यपदस्थापने विधिः | ६४६-६४७ |
| १३१० | आचार्याय उपकरणदानम् | ६४७ |
| १३१३-१३१६ | समकं विहारायोपदेशः | ६४८-६५० |

| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र २७ | पारिहारिकादिभिः सह भोजनविधिः | ६५० |
| १३१९-१३२५ | परिहारकल्पे भोजनविधिः | ६५१-६५५ |
| सूत्र २८ | परिहारकल्पे भोजनदानविधिः | ६५५ |
| १३२७-१३३३ | भोजनदाने कारणानि | ६५६-६५७ |
| सूत्र २९ | पारिहारिकस्य पात्रे अन्यस्य भोजननिषेधः | ६५८ |
| सूत्र ३० | पारिहारिकस्य पात्रे भोजननिषेधः | ६५९-६६० |
| १३३५-१३३८ | एकपात्रे भिक्षाऽऽनयने विधिः | ६६१-६६२ |
| १३३९ | समकं भोजने विधिः | ६६२ |

॥ द्वितीय उद्देशः सम्पूर्णः॥

उद्देश : ३

| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १ | गणधारणसामाचारी | ६६३ |
| १३४२-१३४४ | गणधारणयोग्यतादिः | ६६४-६६५ |
| १३४५-१३५१ | इच्छा-स्थापना-गणशब्दानां निक्षेपाः | ६६५-६६८ |
| १३५२-१३५४ | गणधारकगुणाः | ६६९ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१३५५-१३५८ ..........................गणधारकलक्षणे दृष्टान्ताः ५ .................................. ६६९-६७१
१३५९-१३६८ ..........................गणधारणयोग्याऽयोग्ये दृष्टान्ताः .............................. ६७१-६७७
१३६९-१३८२ ..........................दृष्टान्तानां भङ्गेषु योजना ........................................ ६७७-६८२
१३८३ .........................................गणधारणप्रयोजनम् ................................................ ६८२
१३८४-१३८६ ..........................गणधारकस्य पूजादयः ................................................ ६८२-६८३
१३८७ .........................................पूजादौ दोषाभावः ...................................................... ६८४
१३८८-१३८९ ..........................गणधारके शिष्यप्रदानम् ............................................ ६८४
१३९०-१३९९ ..........................चतुर्भङ्ग्यां विशेषः....................................................... ६८४-६८८
१३९५-१३९७ ..........................वज्रभूतिसूरिः .............................................................. ६८६-६८७
१४००-१४०२ ..........................अयोग्यस्य गणधारणे प्रायश्चित्तम्.............................. ६८८-६८९
१४०३-१४१५ ..........................शुद्धभङ्गस्य स्वरूप-परीक्षादिः.................................. ६८९-६९३
१४१६-१४२२ ..........................आचार्यस्य लक्षणानि .................................................. ६९४-६९५
१४२३-१४४६ ..........................आचार्यस्य अयोग्याः .................................................. ६९५-७०३
१४३०-१४४६ ..........................जुङ्गिकादिस्वरूपम् .................................................. ६९८-६९९
१४४८-१४५२ ..........................आभवनस्वरूपम् ........................................................ ७०४-६
.................. सूत्र २ ...............गणधारणविधिः........................................................ ७०६



For Private and Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| १४५३-१४५८ | गणधारणे स्थविरपृच्छा | ७०६-७०८ |
| सूत्र ३-८ | पदधारणयोग्यतादिः | ७०८ |
| १४६०-१५०४ | योग्यतालक्षणानि | ७१०-७२४ |
| १४६३-१४७० | आचारकुशलता | ७१२-७१४ |
| १४७१-१४७६ | संयमकुशलता | ७१४-७१६ |
| १४७७-१४८० | प्रवचनकुशलता | ७१६-७१७ |
| १४८१-१४८७ | प्रज्ञप्तिकुशलता | ७१७-७१९ |
| १४८८-१४९६ | संग्रहकुशलता | ७१९-७२१ |
| १४९७-१५०१ | उपग्रहकुशलता | ७२२-७२३ |
| १५०२-१५०४ | अक्षताचारादयः | ७२३-७२४ |
| १५०५-१५०६ | आचार प्रकल्पधरत्वम् | ७२४-७२५ |
| १५०७-१५२१ | पुष्करिण्यादयः दृष्टान्ताः | ७२५-७२९ |
| १५२२-१५२३ | पर्यायेण पदधारणयोग्यता | ७२९-३० |
| सूत्र ९ | पदप्रदाने अपवादः | ७३० |

| गाथा | विषयः | पेज |
|---|---|---|
| १५२५-१५४२ | पदप्रदानप्रयोजनानि | ७३१-७३७ |
| सूत्र १० | असमाप्तश्रुते पदप्रदानम् | ७३७ |
| १५४४-१५४५ | पदयोग्यलक्षणादिः | ७३८ |
| १५४६-१५४७ | पदायोग्याः | ७३९ |
| १५४८-१५४९ | नृपयोग्यलक्षणाः | ७३९-७४० |
| १५५० | सत्क्षणे पदप्रदानम् | ७४० |
| १५५१-१५५७ | श्रुतग्रहणविधिः | ७४०-७४३ |
| सूत्र ११ | श्रमणेन द्विसंग्रहे स्थेयम् | ७४३ |
| १५५९ | नव-डहर-तरुण-स्थविराः | ७४३-७४४ |
| १५६०-१५६२ | आचार्योपाध्यायसंग्रहस्यानिवार्यता | ७४४-७४५ |
| १५६३ | आचार्ये कालगते सामाचारी | ७४५ |
| १५६३-१५६९ | नूतनाचार्यस्थापनापूर्वं हि कालगतप्रकाशने दोषाः | ७४५-७४७ |
| सूत्र १२ | श्रमण्या त्रिसंग्रहे स्थेयम् | ७४७ |
| १५७० | आचार्योपाध्यायसंग्रहे गुणाः | ७४७-७४८ |

| गाथा | | विषयः | पेज |
|---|---|---|---|
| १५७१-१५७६ | | प्रवर्तनीसंग्रहे गुणाः | ७४८-७४९ |
| १५७२-१५७३ | | लोकेऽपि त्रिविधः संग्रहः | ७४८-७४९ |
| | सूत्र १३ | पदग्रहणाऽयोग्यत्वम् | ७४९-७५० |
| १५७७-१५९३ | | ब्रह्मचर्योपायाः | ७५०-७५४ |
| १५८७-१५९३ | | लिङ्गचतुर्भङ्गीभजना | ७५४-७५६ |
| | सूत्र १४-१७ | पदग्रहणयोग्यायोग्यत्वम् | ७५६-७५७ |
| १५९५-१५९७ | | दृष्टान्ताः | ७५७-७५९ |
| | सूत्र १८ | भिक्षोः पदयोग्याऽयोग्यता | ७५९ |
| | सूत्र १९-२२ | पदग्रहणयोग्याऽयोग्यत्वम् | ७६० |
| १५९९-१६११ | | यतना | ७६०-७६४ |
| १६१२-१६१६ | | यावज्जीवं पदाऽनर्हाः | ७६४-७६५ |
| | सूत्र २३-९ | मृषावादादिदोषे पदायोग्यत्वं | ७६५-७६६ |
| १६१७-१६२३ | | बहुशः व्रतातिचारे पदानर्हाः | ७६६-७६९ |
| १६२४-१६२५ | | अशुचिः | ७६९ |

| गाथा | विषयः | पेज |
|---|---|---|
| १६२६-१६३२ | पदानर्हाः | ७६९-७७१ |
| १६३३-१६३६ | व्यवहार-दुर्व्यवहारादिः | ७७१-७७२ |
| १६३७-१६४१ | संघकार्ये घोषणादिः | ७७२-७७३ |
| १६४२-१६६८ | दुर्व्यवहारनिवारणादिः | ७७३-७८० |
| १६६९-१६७४ | सङ्घमहिमा | ७८०-७८१ |
| १६७५-१६८७ | व्यवहारकरणयोग्यतादिः | ७८२०७८५ |
| १६७८-१६८७ | अव्यवहारिण : ८ | ७८३-७८५ |
| १६८७-१६९० | व्यवहारिण : ८ | ७८५-७८६ |
| १६९१-१७०० | व्यवहारिस्वरूपम् | ७८६-७८९ |
| १७०१-१७०८ | गौरवत्याग : ८ | ७८९-७९१ |
| १७०९-१७१० | उपसंहारः | ७९१-७९२ |


॥ तृतीय उद्देशः संपूर्णः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# व्यवहारसूत्रग्रन्थस्य विभागव्यवस्था



| भाग | ग्रन्थः | भाष्यगाथाटीकासहिता | पृष्ठ |
|---|---|---|---|
| १ | पीठिका | गाथा १-१८२ | १-१०८ |
| २ | उद्देश १ | गाथा १८३-९६३ | १०९-५१२ |
| ३ | उद्देश २-३ | गाथा ९६४-१७१० | ५१३-७९२ |
| ४ | उद्देश ४-५-६ | गाथा १७११-२८१३ | ७९३-११६८ |
| ५ | उद्देश ७-८-९ | गाथा २८१४-३८०९ | ११६९-१४८४ |
| ६ | उद्देश १० | गाथा ३८१०-४६७५ | १४८५-१७२५ |





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## भाग २

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥
॥ ॐ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ द्वितीय उद्देशकः ॥



For Private and Personal Use Only

व्याख्यातः प्रथमोद्देशकः। साम्प्रतं द्वितीय आरभ्यते। तस्य चेदमादिसूत्रम्—

**सूत्रम्— दो साहम्मिया एगओ विहरंति तत्थेगे अण्णतरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, ठवणिज्जं ठवइत्ता करणिज्जं वेयावडियं ॥ १ ॥**

"दो साहम्मिया एगतो विहरंति" इत्यादि, अथास्य सूत्रस्य कः सम्बन्ध? उच्यते—

**अब्भुट्ठियस्स पासम्मि, वहंतो जइ कयाइ आवज्जे।**
**अ[1]त्थेण एस जोगो, पढमाओ होति बितियस्स ॥ ९६४ ॥**

योऽसौ पार्श्वस्थादिः प्रायश्चित्तदान[2]तपोवाहनार्थमभ्युत्थितस्तस्य **अभ्युत्थितस्य पार्श्वे** प्रायश्चित्ततपो **वहन् यदि कदाचिद्भू**योऽपि तपोऽर्हं प्रायश्चित्त**मापद्यते** तदपि नियमादालोचयितव्यमिति तदालोचनाऽनेन प्रतिपाद्यते। **एषोऽर्थेन** अर्थमाश्रित्य **प्रथमा**दुद्देशकादनन्तरस्यास्य **द्वितीयस्यो**द्देशकस्य **योगः** सम्बन्धः ॥९६४॥ अत्रैव प्रकारान्तरमाह—

---

१. अत्थेण व उ जोगो - मु . भाष्यप्रतिषु ॥ २. तपोदानवहना॰ पु. प्रे. ॥

**अहवा एगस्स विही, उत्तो णेगाण होइ अयमण्णो।**
**आइण्णविगडिए वा, पट्ठवणा एस संबंधो ॥ ९६५ ॥**

**अथवे**ति सम्बन्धस्य प्रकारान्तरतोपप्रदर्शने । पूर्व**मेकस्य** प्रायश्चित्तदान**विधिरुक्तः**। साम्प्रतमय**मनेकेषामन्यः** प्रायश्चित्तदानविधिः। अथवा **यदाचीर्णं** प्रतिसेवितं तस्मिन् **विकटिते** आलोचिते **प्रस्थापना** प्रायश्चित्तदानं भवति। ततः प्रायश्चित्तदानप्रस्तावादस्य सूत्रस्योपनिपात **इत्येष सम्बन्धः** ॥ ९६५ ॥ अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**द्वौ साधर्मिकौ** संविग्न-साम्भोगिकादिरूपा**वेकत** एकस्मिन् स्थाने समुदितौ **विहरतः**। **तत्रैकोऽन्यतरत् अकृत्यस्थानं प्रतिसेव्य आलोचयेत्**। तत्र यद्यगीतार्थः प्रतिसेवितवान् ततस्तस्मै शुद्धतपो दातव्यम्, अथ गीतार्थस्तर्हि यदि परिहारतपोयोगमापन्नस्ततः परिहार-तपो दद्यात्। तदनन्तरं स्थाप्यते विविक्तं कृत्वा प्ररूप्यते इति **स्थापनीयं** परिहारतपो योग्यमनुष्ठानं, तत् **स्थापयित्वा** प्ररूप्य य आपन्नः स परिहारतपः प्रतिपद्यते इतरः कल्पस्थितो भवति, स एव च तस्यानुपारिहारिकः, ततस्तेन तस्य **करणीयं वैयावृत्त्य**-मित्येष सूत्रसङ्क्षेपार्थः। अधुना **निर्युक्तिविस्तरः**—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**[1]दो साहम्मिय छब्बारसेव, लिंगम्मि होइ चउभंगो।**
**चत्तारि विहारम्मि उ, दुविहो भावम्मि भेदो उ ॥ ९६६ ॥**

**द्विशब्दस्य साधर्मिक**शब्दस्य च यथाक्रमं **षट् द्वादश** नामादयो निक्षेपाः, द्विशब्दस्य षट्कः साधर्मिकशब्दस्य द्वादशको निक्षेप इत्यर्थः। **लिङ्गे** लिङ्गविषये **चतुर्भङ्गी भवति**। सूत्रे च पुंस्त्वनिर्देशः प्राकृतत्वात्। तथा **विहारे चत्वारो** नामादयो निक्षेपाः। तत्र भावे द्विविधो भेदः। एष द्वारगाथासङ्क्षेपार्थः ॥९६६ ॥

व्यासार्थं तु प्रतिपदमभिधित्सुः प्रथमतो द्विशब्दस्य षट्कनिक्षेपमाह—

**नामं ठवणा दविए, खेत्ते काले य होइ बोधव्वो।**
**भावे य दुगे एसो, निक्खेवो छव्विहो होइ ॥ ९६७ ॥**

**नामद्विकं स्थापनाद्विकम्**, **द्रव्ये** द्रव्यविषयं द्विकं द्रव्यद्विकम्, एवं **क्षेत्रद्विकं कालद्विकं**

---

१. एतद्गाथायाः स्थाने लाडनू संस्करणे पृ. १७ टि. ८ मध्ये (अ. स. प्रतिषु) एषा गाथोपलभ्यते— ''दुयगम्मि निक्खेवो, उक्कोसा धम्मि ते य बारसगो । चउभेदो य विहारे, णेयव्वा आणुपुव्वीए ॥ खं भा. प्रतिषु भिन्ना गाथा उपलभ्यते इति पु. प्रे. मध्ये लिखितमस्ति॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**च भवति बोद्धव्यम्**। तथा **भावे च** भावविषयं च **द्विकम्। एष द्विके** द्विशब्दस्य **षट्को भवति निक्षेपः**। तत्र नामद्विकं द्वे नामनी, अथवा यस्य द्विकमिति नाम तन्नामद्विकम्। स्थापनाद्विकं द्वे स्थापने द्विकस्य स्थापना वा स्थापनाद्विकम्॥ ९६७॥

सम्प्रति द्रव्य-क्षेत्र-कालद्विकप्रतिपादनार्थमाह—

**चित्तमचित्तं एक्केक्कयस्स, जे जत्तिया उ दुयभेया।**
**खेत्ते दुपएसादी, दुसमयमादी उ कालम्मि ॥ ९६८ ॥**

द्रव्यद्विकं द्विविधम्-आगमतो नोआगमतश्च। तत्रागमतो द्विकशब्दार्थज्ञाता तत्र चानुपयुक्तः। नोआगमतस्त्रिविधं ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्। तत्र ज्ञशरीर-भव्यशरीरे प्राग्वत्। तद्व्यतिरिक्तं **सचित्तमचित्तं** च, **एकैकस्य ये यावन्तो द्विकभेदाः** सम्भवन्ति ते सर्वे वक्तव्याः। ते चेमे-सचित्तं द्रव्यद्विकं द्विधा-संसारस्थं निर्वृतं च। संसारस्थं द्विधा एकेन्द्रियमनेकेन्द्रियं च। तत्रैकेन्द्रियं पञ्च प्रकारं— पृथिव्यप्तेजोवायु-वनस्पतिभेदात्। एकैकमपि द्विधा—पर्याप्तमपर्याप्तं च। अनेकेन्द्रियं द्विधा—विकलेन्द्रियं पञ्चेन्द्रियं च।



For Private and Personal Use Only

विकलेन्द्रियं त्रिधा द्वित्रिचतुरिन्द्रियभेदात्। पुनः प्रत्येकं द्विधा पर्याप्तमपर्याप्तं च। पञ्चेन्द्रियं द्विधा सङ्ख्यातवर्षायुष्कमसङ्ख्यातवर्षायुष्कं च। एकैकं द्विधा पर्याप्तमपर्याप्तं च। निर्वृतमपि द्विधा—अनन्तरसिद्धं परम्परसिद्धं च। अथवा सचित्तं त्रिविधम्, तद्यथा— द्विपदं चतुष्पदमपदं च। तत्र द्विपदं द्वौ पुरुषावित्यादि, चतुष्पदं द्वौ बलीवर्दावित्यादि, अपदं द्वौ वृक्षावित्यादि। अचित्तं द्वौ परमाणू, द्वौ द्विप्रदेशिकौ, त्रिप्रदेशिकौ यावत् द्वौ सङ्ख्यात-प्रदेशिकौ द्वौ असङ्ख्यातप्रदेशिकौ, द्वावनन्तप्रदेशिकौ, सङ्ख्यातस्य सङ्ख्याता भेदाः, असङ्ख्यातस्य असङ्ख्याता, अनन्तस्य अनन्ताः। उक्तं द्रव्यद्विकम्। अधुना क्षेत्रद्विकमाह- **खेत्ते दुपदेसादी, क्षेत्रे** क्षेत्रविषयं द्विकं **द्विप्रदेशादि** द्वावाकाशप्रदेशौ। आदिशब्दात् द्विप्रदेशावगाढं वा क्षेत्रद्विकम्, क्षेत्रद्विके तस्यावस्थानात्। यदि वा द्वे भारते द्वे ऐरावते इत्यादिपरिग्रहः। उक्तं क्षेत्रद्विकम्। अधुना कालद्विकमाह- **द्विसमयादिकं** द्वौ समयौ, आदिशब्दात् द्वे आवलिके, द्वौ मुहूर्त्तावित्यादिपरिग्रहः। अथवा द्विसमयस्थितिकं द्रव्यम्, कालद्विकेऽवस्थानात् कालद्विकम्। आदिशब्दात् द्व्यावलिकास्थितिकादिपरिग्रहः ॥९६८॥

उक्तं कालद्विकमधुना भावद्विकमाह—

**[१]भावे पसत्थमियरं, होइ पसत्थं तु णाणि णोणाणे।**
**केवलि छउमं णाणे, णोणाणे दिट्ठि चरणे य ॥ १६९ ॥**

भावद्विकं द्विधा आगमतो नोआगमतश्च। तत्रागमतो द्विकशब्दार्थज्ञाता तत्र चोपयुक्तः, 'उपयोगो भावनिक्षेप' इतिवचनात्। नोआगमतो द्विधा, तद्यथा- **प्रशस्तमितरच्च**। इतरन्नामाऽप्रशस्तम्। तच्चेदं रागो द्वेषश्च। **प्रशस्तं** द्विधा—**ज्ञानं नोज्ञानं** च। तत्र **ज्ञाने**

---

१. गाथा १६९-१७० स्थाने खंभा. अ. स. प्रतिषु चत्वारो गाथा उपलभ्यन्ते । अ. स. प्रत्यनुसारं जैन विश्वभारती प्रकाशन प्रकाशित लाडनु संस्करणे व्यवहारभाष्ये इत्थं गाथा चतुष्कं—

भावे अपसत्थ-पसत्थगं च दुविधं तु होति णायव्वं ।
आविरय-पमायमेव य अपसत्थं होति दुविधं तु ॥ ९८३-१ ॥
णाणे णोणाणे या, होति पसत्थम्मि ताव दुविधं तु ।
णाणे खओवसमितं, खइयं च जहा मुणेयव्वं ॥ ९८३-२ ॥
णोणाणे विय दिट्ठी, चरणे एक्केक्कयं तिधा मुणेयव्वं ।
मीसं तधोवसमितं, खइयं च तधा मुणेयव्वं ॥ ९८३-३ ॥
णाणादिसुं तीसु वि, सट्ठाणे णत्थि खइय अतिचारो ।
उवसमिए वि दोसुं, दिट्ठी चरणे य सट्ठाणे ॥ ९८३-४ ॥

ज्ञानविषयं द्विकमिदम्, तद्यथा— **कैवलिकं छाद्मस्थिकं** च। **नोज्ञाने** नोज्ञानविषयं द्विकं **दृष्टिश्चरणं च**। दृष्टिः सम्यक्त्वं, चरणं चारित्रम्॥९६९॥ एतदेव सप्रभेदं प्ररूपयति—

**एक्केक्कं पि य तिविहं, सट्ठाणे नत्थि खइय अइयारो ।**
**उवसामिएवि दोसुं, अइयारो होज्ज सेसेसु ॥ ९७० ॥**

**एकैकमपि** दर्शनं चरणं च प्रत्येकमित्यर्थः, **त्रिविधं** त्रिप्रकारम्। तद्यथा—क्षायिकम् औपशमिकं क्षायोपशमिकं च। तत्र क्षायिकं सम्यक्त्वं क्षायिकसम्यग्दृष्टेः। औपशमिकमुपशमश्रेण्याम्। शेषकालं क्षायोपशमिकम्। चरणमपि क्षायिकं क्षपकनिर्ग्रन्थस्य, औपशमिकमुपशमश्रेण्याम्, अन्यदा क्षायोपशमिकम्। तत्र **क्षायिके** ज्ञाने दर्शने चारित्रे च **स्वस्थाने नास्त्यतीचारः**। तथाहि— केवलिनस्त्रिष्वपि ज्ञानदर्शनचारित्रेषु क्षायिकेषु वर्तमानस्य न तद्विषया काचिदपि विराधना, परस्थाने तु सम्भवेदपि, तथाहि– श्रुतकेवल्यादेः क्षायिके दर्शने वर्तमानस्य दर्शने नास्ति विराधना, ज्ञानचरणयोस्तु भजनेति। **उवसामिए वि दोसुं** ति द्वयोर्दर्शनचरणयोरौपशमिके भावे वर्तमानयोः स्वस्थाने नास्त्यतीचारः। औपशमिकं हि दर्शनं चारित्रं च नियमादुपशमश्रेण्यां भवति, तत्र च कषायाणाम्-

पशान्तत्वान्नास्ति कश्चिदतिचारसम्भवः, ज्ञानविराधना तु सम्भवेदपि, अनुपयोगतोऽन्यथा प्ररूपणा-चिन्तनादिसम्भवात्। उपशमश्रेणितः पाते तु भवत्यतीचारः औदयिकभावे वर्तमानत्वात्, **शेषेषु** पुनः क्षायोपशमिकेषु ज्ञानदर्शनचारित्रेषु स्वस्थाने परस्थाने चा**ऽतीचारो भवेत्** क्षायोपशमिकत्वाद् ॥१७०॥ एतदेवाह—

**सट्ठाणपरट्ठाणे, खओवसमिएसु तीसु वी भयणा।**
**दंसण-उवसम-खतिए परट्ठाणे होइ भयणा उ ॥ १७१ ॥**

**क्षायोपशमिके** भावे वर्तमानेषु **त्रिष्वपि** ज्ञानादिषु **स्वस्थाने परस्थाने** चातीचारस्य **भजना,** कदाचिद्भवति कदाचिन्न भवतीत्यर्थः। **दर्शने** उपलक्षणमेतत्, चरणे च **औपशमिके क्षायिके** च स्वस्थाने अतीचारो न भवति, **परस्थाने तु भजना**॥१७१॥

अत्र येन येन द्विकेनाधिकारस्तदभिधित्सुराह—

**दव्वदुए दुपएणं, सच्चित्तेणं च एत्थ अहियारो।**
**मीसेणोदइएणं,भावम्मि वि होति दोहिं पि ॥ १७२ ॥**

**अत्र** द्रव्यद्विकेन भावद्विकेन **चाधिकारः**। तत्र **द्रव्यद्विकेन सचित्तेना**पि च द्विपदेन साधर्मिकद्वयस्य चिन्त्यमानत्वात् । **भावे मिश्रेण** क्षायोपशमिकेन **औदयिकेन** चेति **द्वाभ्यां** भावाभ्यामधिकारः। अनयोरेव द्वयोर्भावयोर्वर्तमानस्यातीचारसम्भवात्॥९७२॥

उक्तो द्विकस्य षट्को निक्षेपः । सम्प्रति साधर्मिकस्य द्वादशकं निक्षेपमाह—

**नामं[१] ठवणा दविए, खेत्ते काले य पवयणे लिंगे।**
**दंसण-नाण-चरित्ते, अभिग्गहे भावणाए य ॥ ९७३ ॥**

**नाम**साधर्मिकः,**स्थापना**साधर्मिकः,**द्रव्य**साधर्मिकः, **क्षेत्र**साधर्मिकः, **काल**साधर्मिकः, **प्रवचन**साधर्मिकः, **लिङ्ग**साधर्मिकः,**दर्शन**साधर्मिकः, **ज्ञान**साधर्मिकः, **चारित्र**साधर्मिकः, **अभिग्रह**साधर्मिकः, **भावना**साधर्मिकः ॥९७३॥

तत्र नाम-स्थापनाद्रव्यसाधर्मिक-प्रतिपादनार्थमाह—

---

१. अत्र ९७३ गाथातः ९७९ पर्यन्तगाथासु विव्रियमाणं साधर्मिकस्वरूपं तत्सम्बद्धामनेकविधानां चतुर्भङ्गीनां स्वरूपं च सविस्तरं किञ्चित् प्रकारान्तरेणापि च जिज्ञासुभिः पिण्डनिर्युक्तिगाथा १३८ तः १५८ पर्यन्त-गाथानां श्री मलयगिरिपादैर्विनिर्मिता वृत्तिरवश्यमेवावलोकनीय पत्र ५२तः ५८

**नामम्मि सरिसनामो, ठवणाए कट्ठकम्ममादीसु।**
**दव्वम्मि जो उ भविओ, साहम्मिसरीरगं चेव॥ १७४ ॥**

**नाम्नि** नामविषये साधर्मिकः यः **सदृशनामा**, यथा देवदत्तो देवदत्तस्य। **स्थापनया** साधर्मिकः **काष्ठकर्मादिषु** स्थाप्यमानः, यथा **वारत्तर्षिः**, आदिशब्दात् पुस्तकर्माऽक्षवराटकादिपरिग्रहः। द्रव्ये द्रव्यरूपतया साधर्मिको यो **भव्यः**-भावी, स च त्रिप्रकारः। तद्यथा—एकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्च। अमीषां च भावना द्रव्यभिक्षुवद्भावनीया। यच्च **साधर्मिकशरीरं** व्यपगतजीवितं सिद्धशिलातलादिगतं तद् द्रव्यसाधर्मिकः। द्रव्यता चास्य भूतभावत्वात् ॥१७४॥ क्षेत्र-काल-प्रवचन-लिङ्गसाधर्मिकानाह—

**खेत्ते समाणदेसी, कालम्मि उ एक्ककालसंभूतो।**
**पवयणसंघेगयरो, लिंगे रयहरण-मुहपोत्ती ॥ १७५॥**

**क्षेत्रे** क्षेत्रतः साधर्मिकः **समानदेशीयः**, यथा **सौराष्ट्रः** सौराष्ट्रस्य। **काले** कालतः साधर्मिकः **एककालसम्भूतो** यथा वर्षाजातो वर्षाजातस्य। **प्रवचन**मिति प्रवचनतः

साधर्मिकः **सङ्घमध्ये एकतरः** श्रमणः श्रमणी श्रावकः श्राविका चेति। **लिङ्गे** लिङ्गतः साधर्मिकः **रयहरण-मुहपोत्तित्ति** रजोहरणमुखपोत्तिकायुक्तः ॥ १७५ ॥ सम्प्रति दर्शनादिसाधर्मिकानाह—

**दंसण-णाणे चरणे, तिगपणपण तिविह होइ उ चरित्ते।**
**दव्वादी तु अभिग्गह, अह भावणमो अणिच्चाई ॥ १७६ ॥**

**दर्शनतः** साधर्मिकः **तिगत्ति** त्रिविधः, तद्यथा-क्षायिकदर्शनिनः क्षायिकदर्शनी, औपशमिकदर्शनिनः औपशमिकदर्शनी, क्षायोपशमिकदर्शनिनः क्षायोपशमिकदर्शनी। **अन्ये** पुनराहुरेवं त्रिविधः, तद्यथा-सम्यग्दृष्टेः सम्यग्दृष्टिः, मिथ्यादृष्टेः मिथ्यादृष्टिः, मिश्रस्य मिश्रः। **ज्ञानतः** साधर्मिकः **पण**त्ति पञ्चविधः। तद्यथा-आभिनिबोधिकज्ञानी आभिनिबोधिकज्ञानिनः, एवं श्रुतावधि-मनःपर्यायकेवलेष्वपि भावनीयम्। **चरणतः** साधर्मिकः **पण**त्ति पञ्चप्रकारः, तद्यथा- सामायिकचारित्रिणः सामायिकचारित्री। एवं छेदोपस्थापन-परिहारविशुद्धि-सूक्ष्मसम्पराय-यथाख्यातेष्वपि वाच्यम्। **तिविहो होइ उ चरित्ते** इति त्रिविधः त्रिप्रकारो भवति, चारित्रे चारित्रतः साधर्मिकः, तद्यथा-क्षायिकचारित्री क्षायिक-

चारित्रिण इत्यादि। **दव्वादी उ अभिग्गह**त्ति अभिग्रहतः साधर्मिको द्रव्यादौ वेदितव्यः, तद्यथा-द्रव्याऽभिग्रही द्रव्याभिग्रहिणः। एवं क्षेत्र-काल-भावेष्वपि[1] भाव्यम्। **तुशब्दः** अनुक्तसमुच्चयार्थः, तेन षष्ठादिक्षपणाभिग्रही षष्ठादिक्षपणाभिग्रहिणः इत्याद्यपि द्रष्टव्यम्। भावनातः साधर्मिकोऽनित्यत्वादौ, यथा एकोऽप्यनित्यत्वभावनां भावयत्यपरोऽप्यनित्यत्व-भावनामिति अनित्यत्वभावनासाधर्मिकः, एवं शेषास्वपि भावनासु द्रष्टव्यम्॥ १७६ ॥ तदेवमुक्तः साधर्मिकस्य द्वादशको निक्षेपः। सम्प्रति यदुक्तं 'लिङ्गे भवन्ति भङ्गाश्चत्वारः' इति तदेतद् व्याचिख्यासुराह—

**साहम्मिएहिं कहिएहिं लिंगादी होइ चउभंगो।**
**नामं ठवणा दविए, भावविहारे य चत्तारि ॥ १७७ ॥**

**साधर्मिकेषु कथितेषु** सत्सु, गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वात्, **लिङ्गादौ** प्रवचनादिभिः सह **भवति** प्रत्येकं **चतुर्भङ्गी**, गाथायां पुंस्त्वमार्षत्वात्। विहारे च ये **चत्वारो** भेदाः प्रागुक्तास्ते इमे, तद्यथा- **नाम**विहारः **स्थापना**विहारो **द्रव्य**विहारो **भाव**-



१. °पि वाच्यम् - वा. पु. मु. ॥

**विहारश्च** ॥१७७॥ तत्र लिङ्गादिषु प्रवचनादिभिः सह प्रत्येकं चतुर्भङ्गीं विभावयिषुः प्रथमतो लिङ्गप्रवचनचतुर्भङ्गीसूचामाह—

**[1]लिंगेण उ साहम्मी, नो पवयणतो य निण्हगा सव्वे।**
**पवयणसाहम्मी पुण, न लिंगे दस होंति ससिहागा ॥ १७८॥**

**लिङ्गेन** रजोहरणादिना **साधर्मिकः नो** नैव **प्रवचनत** इत्येको भङ्गः, के ते? इत्याह **सर्वे निह्नवाः**, तेषां सङ्घबाह्यत्वात् रजोहरणादिलिङ्गोपेतत्वाच्च१, तथा **प्रवचनतः साधर्मिको न पुनः लिङ्गे** लिङ्गतः एष द्वितीयः। के ते एवम्भूताः? इत्याह—**दश भवन्ति सशिखाकाः** अमुण्डितशिरस्काः, श्रावका इति गम्यते। श्रावका हि दर्शनव्रतादि-प्रतिमाभेदेन एकादशविधा भवन्ति। तत्र दश सकेशाः, एकादशप्रतिमाप्रतिपन्नस्तु लुञ्चित-शिराः श्रमणभूतो भवति। ततस्तद्व्यवच्छेदाय सशिखाकग्रहणम्, एते हि दश सशिखाकाः



---

१. लाडनू टिप्पणे पृ. १८ टि. १३ अ. स. प्रतिषु: ३७८ गाथास्थाने अन्य गाथो पलभ्यते- 'पवयणतो लिंगेण य चउभंगो एत्थ होति णायव्वो । जो जत्थ निवडति तहिं भगंम्मि सो उ कायव्वो ॥ जे.भा. खंभा. प्रत्योरपि एका गाथा अधिका वर्तते इति-पु. प्रे. ॥

श्रावकाः प्रवचनतः साधर्मिका भवन्ति। तेषां सङ्घान्तर्भूतत्वात्, न तु लिङ्गतः रजोहरणादिलिङ्गरहितत्वात् २। तृतीय-चतुर्थौ[1] तु भङ्गौ सुप्रतीतत्वान्नोक्तौ। तौ चेमौ-प्रवचनतोऽपि साधर्मिको लिङ्गतोऽपि साधर्मिकः साधुः एष तृतीयः३। न प्रवचनतो नापि लिङ्गत इति चतुर्थः, एष[2] शून्यो भङ्गः४। ॥९७८॥ तदेवं लिङ्गस्य प्रवचनेन सह चतुर्भङ्गिकोक्ता । सम्प्रति दर्शनादिभिः सह चतुर्भङ्गिकाप्रतिपादनार्थमाह—

**एमेव[3] य लिंगेण उ, दंसणमादीसु होंति भंगा उ।**
**भइएसु उवरिमेसुं, हेट्ठेल्लपयं तु छड्डेज्जा ॥ ९७९ ॥**

**एवमेव** प्रवचनगतेन प्रकारेण **लिङ्गेन** सह **दर्शनादिषु भङ्गा भवन्ति** ज्ञातव्याः। **भक्तेषु** च **उपरितनेषु** सर्वेष्वपि भावनापर्यन्तेषु **अधस्तनं** लिङ्गलक्षण**पदं त्यजेत्**, त्यक्त्वा च तदनन्तरं द्वितीयपदमभिगृह्णीयात्, अभिगृह्य च तेनापि सह चतुर्भङ्गिकाः क्रमेण

१. जेभा. खंभा. प्रत्योः तृतीय-चतुर्थभङ्गदर्शिका गाथा ९७८ पश्चाद् वर्तते ॥ २. पिंडनि. वृत्तौ श्री मलयगिरिसूरिणैव चतुर्थभङ्गो दर्शितोऽस्ति । ३.इतः ७७९ गाथा पूर्वं लाडनू संस्करणे एषा गाथोपलभ्यते- 'साधू तु लिंग पवयण, णोभयतो कुतित्थ-तित्थयरमादी । उववज्जिऊण एवं, भावेतव्वो तु सव्वे वी ॥९९२॥

योजयेत् । तत्राप्युपरितनेषु सर्वेषु **भक्तेषु** तदधस्तनं पदं त्यजेत्, अग्रेतनमनन्तरमाश्रयेत्, तत्राप्ययमेव क्रमः। एवं तावद्वाच्यं यावदन्तिमपदद्वयचतुर्भङ्गिका। इह लिङ्गेन सह दर्शनादिषु भङ्गसूचा कृता, तत्र लिङ्गग्रहणमुपलक्षणम्, ततः प्रवचनेनापि सह भङ्गा द्रष्टव्याः। ते चामी—

प्रवचनतः साधर्मिको न दर्शनतः, एकः क्षायिके [एकः] औपशमिके क्षायोपशमिके वा। उक्तं च '**विसरिसदंसणजुत्ता पवयणसाहम्मिया न दंसणतो**' [ **पिण्ड. नि.**गा.१४७ पू.] इति १। दर्शनतः साधर्मिको न प्रवचनतः, तीर्थकराः प्रत्येकबुद्धाश्च, तेषां सङ्घानन्तर्वर्तित्वाद्। आह च- '**तित्थयरा पत्तेया नो पवयण दंसण साहम्मी**' [ **पि.नि.**गा.१४७ उत्त.] प्रवचनतोऽपि साधर्मिको दर्शनतोऽपि, समानदर्शनी सङ्घमध्यवर्तीति ३। न प्रवचनतो नापि दर्शनत इति चतुर्थः, एष शून्यः ४। उक्ता प्रवचनेन सह दर्शनस्य चतुर्भङ्गिका। सम्प्रति ज्ञानस्योच्यते- प्रवचनतः साधर्मिको न ज्ञानतः, एको द्विज्ञानी एकस्त्रिज्ञानी चतुर्ज्ञानी केवलज्ञानी वा १। ज्ञानतः साधर्मिको न प्रवचनतः तीर्थकरः प्रत्येकबुद्धो वा २। प्रवचनतोऽपि ज्ञानतोऽपि इति तृतीयः,[साधुः श्रावको वा समानज्ञानी]३। न प्रवचनतो

नापि ज्ञानतः इति चतुर्थः, एष शून्यः ४। तथा प्रवचनतः साधर्मिको न चारित्रतः, श्रावकः१। चारित्रतो न प्रवचनतः तीर्थकरः प्रत्येकबुद्धो वा २। प्रवचनतोऽपि चारित्रतोऽपि, साधुः३। न प्रवचनतो नापि चारित्रतः, एष शून्यः४। तथा प्रवचनतः साधर्मिको नाभिग्रहतः, श्रावको यतिर्वा, उभयोरप्यन्यान्याभिग्रहयुक्तत्वात् १। अभिग्रहतो न प्रवचनतः, निह्नवस्तीर्थकरः प्रत्येकबुद्धो वा, उक्तं च— **'साहम्मभिग्गहेणं नो पवयणनिण्ह तित्थ पत्तेया'** [**पिण्डनि.** गा. १४९ पू०] इति २। प्रवचनतोऽप्यभिग्रहतोऽपि, श्रावको यतिर्वा समानाभिग्रहः ३। न प्रवचनतो नाप्यभिग्रहत इति शून्यः ४। तथा प्रवचनतः साधर्मिको न भावनातः, भिन्नभावनाकः श्रावको यतिर्वा १। भावनातः साधर्मिको न प्रवचनतः, समानभावनाकस्तीर्थकरः प्रत्येकबुद्धो निह्नवो वा २। प्रवचनतोऽपि भावनातोऽपि समानभावनाकः श्रावको यतिर्वा ३। न प्रवचनतोऽपि न भावनातः, एष शून्यः ४। उक्ता प्रवचनेन सह दर्शनादिषु भङ्गाः।

सम्प्रति लिङ्गेन सहोच्यन्ते– लिङ्गतः साधर्मिको न दर्शनतः, निह्नवः१। दर्शनतः साधर्मिको न लिङ्गतः, प्रत्येकबुद्धस्तीर्थकरो वा २। लिङ्गतोऽपि दर्शनतोऽपि, समानदर्शनी साधुः ३। न लिङ्गतोऽपि नापि दर्शनतः, एष शून्यः ४। तथा लिङ्गतः साधर्मिको न

ज्ञानतः, निह्नवो विभिन्नज्ञानी वा साधुः१। ज्ञानतो न लिङ्गतः, समानज्ञानी श्रावकः प्रत्येकबुद्धस्तीर्थकरो वा २। लिङ्गतोऽपि ज्ञानतोपि, समानज्ञानी साधुः ३। न लिङ्गतोऽपि नापि ज्ञानतः, एष शून्यः ४। तथा लिङ्गतो न चारित्रतः, निह्नवो विषमचारित्री वा साधुः १। चारित्रतो न लिङ्गतः, प्रत्येकबुद्धस्तीर्थकरो वा २। चारित्रतोऽपि लिङ्गतोऽपि, समानचारित्री साधुः३। न लिङ्गतो नापि चारित्रतः, एष शून्यः४। तथा लिङ्गतो नाभिग्रहतः, विचित्राभिग्रही साधुर्निह्नवो वा १ अभिग्रहतो न लिङ्गतः, समानाभिग्रही श्रावकः प्रत्येकबुद्धस्तीर्थकरो वा २। लिङ्गतोऽप्यभिग्रहतोऽपि, समानाभिग्रही साधुः ३ न लिङ्गतो नाप्यभिग्रहतः, एष शून्यः ४। तथा लिङ्गतः, साधर्मिको न भावनातः, विषमभावनाकः साधुः निह्नवो वा १। भावनातो न लिङ्गतः, समानभावनाकः श्रावकः प्रत्येकबुद्धस्तीर्थकरो वा २। लिङ्गतोऽपि भावनातोऽपि समानभावनाकः साधुः, न लिङ्गतो नापि भावनातः, एष शून्यः ४। तदेवमुक्ता लिङ्गेन सह दर्शनादिषु भङ्गाः।

सम्प्रति तद् लिङ्गपदं त्यक्त्वा दर्शनपदमभिगृह्य तेन सह ज्ञानादिषु उच्यन्ते—दर्शनतः साधर्मिको न ज्ञानतः, क्षायिकदर्शनी एकः केवलज्ञानी एको द्विज्ञानीति १। ज्ञानतः

साधर्मिको न दर्शनतः, समानज्ञानी विभिन्नदर्शनी २। दर्शनतोऽपि ज्ञानतोऽपि, समानदर्शनज्ञानी ३। न दर्शनतो नापि ज्ञानतः, शून्यो भङ्गः ४। तथा दर्शनतः साधर्मिको न चारित्रतः, समानदर्शनी श्रावकः १। चारित्रतो न दर्शनतः, समानचारित्री विभिन्नदर्शनी साधुः २। चारित्रतोऽपि दर्शनतोऽपि समानदर्शनचारित्री साधुः ३। न चारित्रतो नापि दर्शनतः, एष शून्यः ४। तथा दर्शनतो साधर्मिको न अभिग्रहतः, समानदर्शनी विचित्राभिग्रहः श्रावकः साधुर्वा १। अभिग्रहतो न दर्शनतः, समानाभिग्रही विचित्रदर्शनः श्रावकादिः २। दर्शनतोऽपि अभिग्रहतोऽपि समानदर्शनाभिग्रही श्रावकादिः ३। न दर्शनतो नाप्यभिग्रहतः, एषः शून्यः ४। तथा दर्शनतो न भावनातः, समानदर्शनो विचित्रभावनाकः श्रावकादिः१। भावनातो न दर्शनतः, समानभावनाको विचित्रदर्शनः श्रावकादिः३। दर्शनतोऽपि भावनातोऽपि समानदर्शन-भावनाकः श्रावकादिः ३। न दर्शनतो नापि भावनातः, एष शून्यः ४। तदेवमुक्ता दर्शनेनापि सह ज्ञानादिषु भङ्गाः।

अधुना दर्शनपदमपहाय ज्ञानपदमभिगृह्य तेन सह चारित्रादिषु प्रदर्श्यन्ते- ज्ञानतः साधर्मिको न चारित्रतः, समानज्ञानो विचित्रचारित्रः साधुः यदि वा श्रावकः१। चारित्रतः

साधर्मिको न ज्ञानतः, समानचारित्री एकः केवली एकश्छद्मस्थः२। ज्ञानतोऽपि चारित्रतोऽपि समानज्ञान-चारित्री साधुः३। न ज्ञानतो नापि चारित्रतः शून्यः ४। तथा ज्ञानतो नाभिग्रहतः, समानज्ञानो विचित्राभिग्रहः श्रावकादिः १। अभिग्रहतो न ज्ञानतः, समानाभिग्रहो विचित्रज्ञानी साधुस्तीर्थंकरः प्रत्येकबुद्धो वा २। ज्ञानतोऽप्यभिग्रहतोऽपि समानज्ञानाभिग्रही साध्वादिः ३। न ज्ञानतो नाप्यभिग्रहतः, एष शून्यः ४। तथा ज्ञानतो न भावनातः, समानज्ञानो विचित्रभावनाकः श्रावकादिः १। भावनातो न ज्ञानतः, समानभावनाको विचित्रज्ञानी श्रावकादिः २। ज्ञानतोपि भावनातोऽपि, समानज्ञानभावनाकः श्रावकादिः३। न ज्ञानतो नापि भावनातः, एष शून्यः ४। उक्ता ज्ञानेन सह चारित्रादिषु भङ्गाः।

सम्प्रति ज्ञानपदं विमुच्य चारित्रपदं गृहीत्वा तेन सहाभिग्रहभावनयोर्भङ्गा उच्यन्ते-चरणतः साधर्मिको नाभिग्रहतः, समानचरणो विचित्राभिग्रहः साधुः १। अभिग्रहतः साधर्मिको न चरणतः, श्रावकादिः२। चरणतोऽपि अभिग्रहतोऽपि, साधुः३। न चरणतो नाप्यभिग्रहतः, एष शून्यः ४। तथा चरणतो न भावनातः, विचित्रभावनाकः साधुः १। भावनातो न चरणतः, श्रावकः समानभावनाकः साधुर्वा विसदृशचरणः २। चरणतोऽपि भावनातोऽपि समानचरण-भावनाकः साधुः ३। न चरणतो नापि भावनातः, एष शून्यः ४।

सम्प्रत्यभिग्रहेण सह भावनाया भङ्गाः— अभिग्रहतः साधर्मिको न भावनातः, समानाभिग्रहो विचित्रभावनाकः श्रावकादिः१ भावनातः साधर्मिको नाभिग्रहतः, विचित्राभिग्रहः श्रावकादिः२। अभिग्रहतोऽपि भावनातोऽपि समानाभिग्रह-भावनाकः श्रावकादिः३। नाभिग्रहतो नापि भावनातः एष भङ्गः शून्यः ४॥ ९७९॥ तदेवमुक्ता भङ्गाः। साम्प्रतममीषां भङ्गानां विषयविशेषप्रतिपादनार्थमाह—

**पत्तेयबुद्ध निण्हव उवासए केवली य आसज्ज।**
**खइयाइए य भावे, पडुच्च भंगे उ जोएज्जा ॥ ९८० ॥**

**प्रत्येकबुद्धान् निह्नवान् उपासकान् केवलिनश्चाऽऽश्रित्य** तथा **क्षायिकादींश्च भावान् प्रतीत्य** आश्रित्य **भङ्गकान्** अनन्तरोदितान् **योजयेत्**। तद्यथा- न प्रवचनतः साधर्मिको न लिङ्गतः, एष भङ्गः प्रत्येकबुद्धान् केवलिनश्च जिनानाश्रित्य योजनीयः। लिङ्गतो न प्रवचनत इत्ययं निह्नवान्, प्रवचनतो न लिङ्गत इत्येष श्रावकान्, प्रवचनतो न दर्शनत इत्यादयस्तु क्षायिक-क्षायोपशमिकदर्शन-ज्ञान-चारित्रादीन्याश्रित्य योजयितव्याः, ते च तथैव यथास्थानं योजिता एवेति ॥९८०॥ सम्प्रति ये विहारे नामादयो भेदा उक्तास्तान्

विवरीषुः पुनरुच्चरति—

**नामं ठवणा दविए, भावे य चउव्विहो विहारो होइ।**
**विविहपगारेहिं रयं, हरई जम्हा विहारो उ ॥ ९८१ ॥**

**नाम**विहारः, **स्थापना**विहारः, **द्रव्ये** द्रव्यनिमित्तं द्रव्यभूतो वा विहारो द्रव्यविहारः, **भावे** भावविहारः। एवमेष विहार**श्चतुर्विधो भवति**। इह च नोआगमतो भावविहारेण गीतार्थेनाधिकारः न शेषैः, [१]ततस्तमधिकृत्य व्युत्पत्तिमाह-**यस्माद् विविधैः** अनेकैः **प्रकारैः रजः** कर्म **हरति तस्माद्विहार** इत्युच्यते। विविधं ह्रियते [**मलय०** कृ० ५०३] रजः कर्मानेनेति विहारः,अकर्तरि घञिति व्युत्पत्तेः॥ ९८१॥ सम्प्रति नामादिभेदा व्याख्येयास्तत्र यस्य विहार इति नाम स नामविहारः। स्थापनाविहारश्चित्रकर्मण्यन्यत्र वा आलिख्यमानः स्थापनाविहारः। द्रव्यविहारो द्विधा आगमतो नोआगमतश्च। तत्रागमतो विहारशब्दार्थज्ञाता तत्र चानुपयुक्तः। नोआगमतस्त्रिधा-ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्। तत्र ज्ञशरीर-भव्यशरीरे प्राग्वत्। तद्व्यतिरिक्तमाह—

गाथा ९८०-९८१ विहारशब्दस्य निक्षेपाः

---

**१. ततस्तानधिकृत्य - वा. पु. मु. ॥**



For Private and Personal Use Only

**आहारादीणऽट्ठा जो उ, विहारो अगीय पासत्थे।**
**जो यावि अणुवउत्तो, विहरति दव्वे विहारो उ ॥ १८२ ॥**

यो नाम **आहारादीनाम्** आहारोपधिप्रभृतीनाम**र्थाय** उत्पादनाय **अगीताना**मगीतार्थानां **पार्श्वस्थानां** च, गाथायां समाहारो द्वन्द्वः, षष्ठीसप्तम्योरर्थं प्रत्यभेदाच्च सप्तम्या निर्देशः, तथा **योऽप्यनुपयुक्तः** सन् **विहरति** एष सर्वोऽपि **द्रव्ये विहारः**। आद्यो द्रव्यनिमित्तत्वाद् द्रव्यविहारः, द्वितीयोऽनुपयुक्तत्वादिति ॥१८२॥ उक्तो द्रव्यविहारः। भावविहारो द्विधा आगमतो नोआगमतश्च। तत्राऽऽगमतो विहारशब्दार्थज्ञाता तत्र चोपयुक्तः, नोआगमतो भावविहारो द्विधा गीतार्थो गीतार्थनिश्रितश्च। तथा चाह—

**गीयत्थो य विहारो, बीओ गीयत्थनिस्सितो होति।**
**एत्तो तत्तिय विहारो, नाणुण्णातो जिणवरेहिं ॥ १८३ ॥**

**विहारः** प्रथमो **भवति गीतार्थः** गीतार्थसाध्वात्मकः। **द्वितीयो गीतार्थनिश्रितः।** गीतार्थस्य निश्रा आश्रयणं गीतार्थनिश्रा सा सञ्जाता अस्येति गीतार्थनिश्रितः। **पाठान्तरम्**

''गीतार्थमिश्रित'' इति, तत्र गीतार्थसंयुक्त इति व्याख्येयम्, इतः आभ्यां गीतार्थ-गीतार्थनिश्रिताभ्यामन्यस्**तृतीयो विहारो नानुज्ञातो जिनवरेन्द्रैः** ॥ ९८३॥ तत्र गीतार्थं गीतार्थनिश्रितं च विहारमाह—

**जिणकप्पितो उ गीयत्थो, परिहारविसुद्धितो वि गीयत्थो।**
**गीयत्थे इड्ढिदुगं, सेसा गीयत्थनिस्साए ॥ ९८४ ॥**

गीतार्था द्विविधाः, तद्यथा—गच्छगता गच्छनिर्गताश्च। तत्र गच्छनिर्गता इमे **जिनकल्पिको गीतार्थः, परिहारविशुद्धिकोऽपि गीतार्थः**। अपि शब्दाद्यथालन्दकोऽपि प्रतिमाप्रतिपन्नोऽपि च गीतार्थः। अमीषां विहारो गीतार्थः। **गीयत्थि**त्ति गच्छवासे गीतार्थे गीतार्थविषये **ऋद्धिद्विकम्,** तद्यथा-आचार्य उपाध्यायश्च अथवा आचार्यः, शेषं च चतुष्टयमुपाध्याय-प्रवर्त्ति-स्थविर-गणावच्छेदिरूपम्। एतच्च द्विकं स्थाननियुक्तमिति व्यवह्रियते, स्वस्वव्यापारे तेषां नियुक्तत्वात् **शेषाः** सर्वे अनियुक्ताः। ते यदि गीतार्था यदि वा अगीतार्थाः। सर्वै**र्गीतार्थनिश्रया** विहर्तव्यम्॥९८४॥ अत्र पर आह—

**चोएइ अगीयत्थे, किं कारण मो निसिज्झइ विहारो ?।**
**सुण दिट्ठंतं चोयग! सिद्धिकरं तिण्हवेएसिं ॥ ९८५ ॥**

**चोदयति** प्रश्नं करोति **अगीतार्थे** अगीतार्थस्य **किं कारणं** किं निमित्तं **मो** इति पादपूरणे **निषिध्यते विहारः**? सूरिराह- हे **चोदक ! त्रयाणामप्येतेषां** गीतार्थ-गीतार्थनिश्रिताऽगीतार्थानां **सिद्धिकरं दृष्टान्तं श्रृणु** ॥९८५॥ तमेवाह —

**[1]तिविहे संगिल्लम्मी, जाणंते निस्सिए अजाणंते।**
**पाणंधि छित्त कुरणे अडवि जले सावए तेणा ॥ ९८६ ॥**

**संगिल्ले** नाम-गोसमुदायः,तस्मिन् रक्षणीये **त्रिविधे**। रक्षको दृष्टान्तः। तद्यथा- **जानन् निश्रितोऽजानंश्च** एषोऽक्षरार्थः। भावार्थस्त्वयम्—

१. गाथा ९८६ अनन्तरं लाडनू संस्करणे एतद्गाथाद्वयमुपलभ्यते-
एते सव्वे दोसा जो जेण उ निस्सितो य परिहरति । निवऽइ दोसेसु पुण, अयाणतो नियमया तेसु ॥ १००१ ॥
एवं उत्तरियम्मि वि, अयाणतो निवडई तु दोसेसुं। मग्गाईसु, इमेसु, ण य होती णिज्जराभागी ॥ १००२ ॥

एगो रक्खगो नगरस्स गावीणं। सो जेहिं ओगासेहिं गावीतो जंतीओ एंतीओ य खेत्ताईणं अवरोहं न करेंति तेसिं ओगासेहिं नेइ आणेइ य, जत्थ य तेणाइभयं नत्थि तत्थ चारेइ, अन्नया दो पुरिसा गाविओ रक्खामित्ति उवट्ठिया। अम्हे भइयाए गावीओ रक्खामोत्ति। नागरगा चिंतंति सो एगो न तरइ सव्वस्स नगरस्स गाविओ रक्खिउं तम्हा एए विनिजुज्जंतु त्ति भणिया- रक्खह। तत्थ एगो तस्स पुराणस्स संखेडिपालगस्स निस्साए गावीतो नेइ आणेइ य, अजाणतोत्ति काउं तस्सम्मएण चंकमइ। बितितो संखेडिपालतो चिंतेइ- अहमन्नस्स निस्साए न चारेमि सयमेव अहं रक्खिउं समत्थो । सो वरातो अजाणतो इमाणि ठाणाणि न याणइ पाणंधि इत्यादि।

**पाणंधी**ति देशीपदमेतद् वर्तिनीवाचकम्, ततोऽयमर्थः- क्षेत्रे क्षेत्रसङ्कुलेषु प्रदेशेषु नगरप्रवेश-निर्गमनयोग्या वर्तिन्यः **क्षेत्रपाणन्धयः**, ता न जानाति। अजानंश्च ताभिर्गा नयति आनयति च[यत्र] क्षेत्रेषु च शाल्यादय उप्तास्तिष्ठन्ति। गावश्च गच्छन्त्य आगच्छन्त्यश्च रक्षमाणा अपि शाल्यादि चरन्ति,। ततः क्षेत्रस्वामिभिर्गा धृत्वा गोस्वामिनः क्षेत्रोपद्रवमूल्यं याच्यन्ते।

एवं **कुरणे**ऽपि दोषा वाच्याः। कुरणं नाम राजकीयमन्यदीयं वा वीतं तथा **अडवि** त्ति स वराकोऽजानन् गा अटवीमपि प्रवेशयति। तत्र पुलिन्द्रादिभिर्गावो मार्यन्ते। तथा **जले**त्ति सोऽजानन् नद्यादिषु तत्र प्रदेशे गाः पाययति, यत्र ग्राहादिभिर्जलचरैर्गाव आकृष्यन्ते। **सावए** इति स मूढो वराकस्तत्र प्रदेशे नयति। यत्र व्याघ्रादयो दुष्टश्वापदाः, तैश्च गाव उपद्रूयन्ते। **तेण**त्ति तेषु तेषु निकुञ्जादिषु नयति यत्र स्तेनानां प्रसरः, ततः स्तेनास्ता अपहरन्ति। एवं सोऽजानन् गा विनाशयति इतरस्तु ज्ञाता एतानि सर्वाण्यापत्स्थानानि परिहरति। योऽपि निश्रितस्तमपि परिहारयति। एषः दृष्टान्तः, अयमर्थोपनयः- यो गीतार्थः स सर्वानपि दोषान् स्वयं परिहरति। यस्तु निश्रितस्तं परिहारयति। यः पुनः स्वयमगीतार्थः, यश्चागीतार्थनिश्रितस्तयोरात्मविराधना संयमविराधना च भवति॥९८६॥ तानेवात्मविराधनादिदोषान् विवक्षुर्द्वारगाथामाह—

गाथा ९८७-९९० अगीतार्थस्य विहारे दोषाः

**मग्गे१ सेह२विहारे३ मिच्छत्ते४ एसणादिविसमे५ य।**
**सोहि ६ गिलाणमादी७, तेणा दुविहा व तिविहा वा८ ॥ ९८७ ॥** दारगाहा ॥

**मार्गे** मार्गविषये१ तथा **शैक्षे** शैक्षककुलविषये२ एवं **विहारे३ मिथ्यात्वे४ एषणादौ**

**विषमे**५ **शोधौ**६ **ग्लानादौ** दोषाः७, तथा **स्तेना द्विविधास्त्रिविधा वा** ये भवन्ति तेभ्योऽपि दोषा भवेयुः८। एष द्वारगाथासङ्क्षेपार्थः ॥९८७॥ साम्प्रतमेनामेव द्वारगाथां विवरीषुः प्रथमतो मार्गद्वारं शैक्षद्वारं चाह—

**मग्गं सद्दव रीयइ, पाउस उम्मग्ग अजयणाए व।** द्वारं १
**सेहकुलेसु य विहरति, नऽणुयत्तति ते ण गाहेइ ॥ ९८८ ॥** द्वारं २

**मार्गं** पन्थानं सोऽजानन् अगीतार्थः **सद्रवं** द्रवचारितया **रीयते** गच्छति, तत्र च संयमविराधना कीटादिसत्त्वोपमर्दनात्, आत्मविराधना पादादिविस्खलनात्। तथा अज्ञतया **पाउसत्ति** प्रावृष्यपि काले गच्छति तत्रापि संयमविराधना आत्मविराधना च, तथा मार्गोन्मार्गानभिज्ञतया **उन्मार्गे**ऽपि गच्छति। तत्र स्थाणुकण्टकादिभिरात्मविराधना, सचित्त-पृथिव्याद्युपमर्दनात् संयमविराधना च। तथा ग्रहणशिक्षायामासेवनाशिक्षायां वाऽप्रवीणत्वात् **अयतनया** वा गच्छेत्। अयतनया च संयमात्मविराधना। गतं मार्गद्वारम्१। शैक्षद्वारमाह-**सेहे**त्यादि, **शैक्षकुलानि** अभिनवप्रपन्नधर्माणि कुलानि तेष्वज्ञतया स **विहरति**।

तेभ्योऽयतनया भक्त-पानादिकमुत्पादयतीति भावः। तथा **न** तानि **अनुवर्तयति** नानुवर्त्तना-गुणतः प्रवर्धमानतरधर्मश्रद्धाकानि करोति, अनुवर्तनाया अपरिज्ञानात्। तथा **न ग्राहयति तानि** ग्रहणशिक्षामासेवनाशिक्षां वा श्रावकधर्मोचिताम्, उभयोरपि शिक्षयोस्तस्या-कुशलत्वात्॥ १८८॥ गतं शैक्षद्वारम्। अधुना विहारद्वारं मिथ्यात्वद्वारं चाह—

**दसुदेसे पच्चंते, वइयादि विहार पाणबहुले य।** द्वारं ३।
**अप्पाणं च परं वा, न मुणति मिच्छत्तसंकंतं ॥ १८९ ॥** द्वारं ४।



सोऽज्ञतया **दस्युदेशे** चौरदेशे **विहारं** करोति, यदि वा **प्रत्यन्ते** बहुलम्लेच्छाकुले, अथवा[१] लुब्धतया **व्रजिकादौ**, आदिशब्दात् स्वज्ञातिकादिकुलपरिग्रहः, यदि वा **प्राणबहुले** जीवसंसक्ते देशे, एतेषु च यथायोगमात्मविराधना संयमविराधना च भूयसीति च गतं विहारद्वारम् ३। अधुना मिथ्यात्वद्वारमाह- **अप्पाणं चे**त्यादि, स वराको अजानन् **आत्मान**मपि कुप्ररूपणादिभि**र्मिथ्यात्वसङ्क्रान्तं न जानाति**, नापि **परम्**, ततः आत्मनः

१. °वाऽतुष्टतया - वा. मो. पु. ॥

परस्य च मिथ्यात्वं प्रवर्द्धयतीत्युभयेषामपि संसारप्रवर्धकः ॥१८९॥ गतं मिथ्यात्वद्वारम्। अधुना एषणादिद्वारमाह—

**आहार-उवहि-सेज्जाण, उग्गमुप्पायणेसणकडिल्ले।**
**लग्गइ[१] अवियाणंतो, दोसेसेतेसु सव्वेसु ॥ १९० ॥** द्वारं ५॥

**आहारः** भक्तपानादिरूपः, **उपधिः** कल्पादिलक्षणः, **शय्या** वसतिः, एतासां ग्रहणे इति गम्यते। किंविशिष्टे? इत्याह— **उद्गमेन** उद्गमदोषैः षोडशभिराधाकर्मप्रभृतिभिः, **उत्पादनया** उत्पादनादोषैर्धात्र्यादिभिः षोडशभिः, **एषणाया** गवेषणादिदोषैः शङ्कित-म्रक्षितप्रभृतिभिः संयोजना-प्रमाणाऽङ्गार-धूमैः काक-शृगालादिभक्षितैश्च। **कडिल्ले** इति महागहने सति **सोऽविजानन् एतेषु** अनन्तरोदितेषु **दोषेषु सर्वेषु लगति**। द्वारगाथायाम् एषणादौ इति य आदिशब्दः स समस्तोद्गमादिदोषपरिग्रहार्थः। तथा विसमे इति विषमे च पर्वतजलादौ या यतना तां स न जानाति। **अजानं**श्चात्मविराधनां संयमविराधनां चाप्नोति ५ ॥ १९० ॥ सम्प्रति शोधिद्वारमाह—

गाथा १८७-१९० अगीतार्थस्य विहारे दोषाः

---

१. लाडूनसंस्करणे पृ. १०० गा. १००६ टि. ११ अ. स. प्रतिषु उत्तज्ञर्द्धमित्थं - खलितस्स य पच्छित्तं, अमुणंतो णासए चरणं ॥ जेभा. खंभा. प्रत्योरपि प्रायः एवम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





[१]**मूलगुण उत्तरगुणे, आवन्नस्स य न याणई सोहिं।** द्वारं ६।

**पडिसिद्धत्ति न कुणति, गिलाणमादीण तेगिच्छं ॥ ९९१ ॥** द्वारं ७।

**मूलगुण**विषये **उत्तरगुण**विषये **च** प्रायश्चित्त**मापन्नस्य** यस्य यादृशी यस्मिन्नपराधे दातव्या **शोधिस्तस्य** तादृशीं तस्मिन्नपराधे **न जानाति**। अजानानश्चाप्रायश्चित्तेऽपि प्रायश्चित्तं, प्रायश्चित्तेऽपि अतिप्रभूतं प्रायश्चित्तं दद्यादिति महदाशातनाभाग्। गतं शोधिद्वारम् ६। अधुना ग्लानादिद्वारमाह— **पडिसिद्धे**त्यादि, '**प्रतिषिद्धा** खलु चिकित्सा, षड्जीवनिकायविराधनापत्तेः' इतिवचनमेकान्तेनाङ्गीकुर्वन् ग्लानादीनाम्,आदिशब्दः स्वगतानेकभेदसूचकः, आगाढाऽनागाढसहा-ऽसह-बाल-तरुण-**ग्लानादीनां चिकित्सां न करोति**। न च तद्विषयां यतनां जानाति, ततश्चिकित्सायाः यतनायाश्च अकरणे भूयांसो दोषाः, ते च प्रागेव प्रथमोद्देशकेऽभिहिताः ॥९९१ ॥

सम्प्रति "तेणा दुविहा व तिविहा वा"[गा.९९३] इति व्याख्यानयति—

**१. लाडनू पृ. १०० टि. १४ अ. स. प्रतिषु ९९१ गाथा स्थाने एषा गाथा- पडिसिद्धत्ति न कुणते, तेइच्छं कुणति वा विवच्चासं । असिवोम-रायदुट्ठत्ति, मद्धजतणादिगहणेणं ॥ जेभा. खंभा. प्रत्योरपि प्रायः एवम् ॥**

For Private and Personal Use Only

**अप्पसुयत्ति य काउं, वुग्गाहेउं हरंति खुड्डादी।**
**तेणा सपक्ख इयरे, सलिंगि गिहि [१]अन्नहा तिविहा ॥ ९९२ ॥** द्वारं ८।

**स्तेना** द्विविधाः **स्वपक्षाः** परपक्षाश्च। तत्रः स्वपक्षाः द्विविधाः- गीतार्थाः पार्श्वस्थादयश्च। तत्र गीतार्था इदं चिन्तयन्ति- अमी **अल्पश्रुताः**, अल्पश्रुतत्वाच्चागीतार्था न चागीतार्थानां क्षेत्रमस्ति। तत एतत् चिन्तयित्वा तेषां सचित्तादि गीतार्था अपहरन्ति। पार्श्वस्थादयः पुनः क्षुल्लकादीन् व्युद्ग्राहयन्ति, यथा- दुष्करा चर्याऽमीषाम्, न च दुष्करचर्यायाः सम्प्रति देश-कालौ, तस्मादत्रागच्छतेति। एवं **व्युद्ग्राह्य क्षुल्लकादीन्,** आदिशब्दात्तरुणादिपरिग्रहः, **अपहरन्ति**। परपक्षाः मिथ्यादृष्टयस्तेऽपि क्षुल्लकादीन् व्युद्ग्राह्य अपहरन्ति। अथवा **त्रिविधाः** स्तेनाः, तद्यथा—**स्वलिङ्गाः** पार्श्वस्थादयस्ते च पूर्ववत्। **गृहिण**स्तस्करास्ते उपधिप्रभृतीनपहरन्ति। अन्ये वा स्वलिङ्ग-गृहिभ्यो व्यतिरिक्ताः, ते च भिक्षुकादयोऽवगन्तव्याः, ते क्षुल्लकादीन् व्युद्ग्राह्यापहरन्ति॥ ९९२॥

---

१. अन्ना वा- ला. पाठभेदः॥

**एए चेव य ठाणे, गीयत्थो निस्सितो उ वज्जेइ।**
**भावविहारो एसो, दुविहो उ समासतो भणितो ॥ ९९३ ॥**

**एतान्येव** अनन्तरोदितानि **स्थानानि गीतार्थो** गीतार्थ**निश्रितश्च वर्जयति**। तत्र गीतार्थः स्वयं कुशलत्वात्, गीतार्थनिश्रितस्तु गीतार्थोपदेशेन। **एष भावविहारो द्विविधो भणितः समासतः** सङ्क्षेपेण ॥९९३॥

**सो पुण होई दुविहो, समत्तकप्पो तहेव असमत्तो।**
**तत्थ समत्तो इणमो, जहण्णमुक्कोसतो होइ ॥ ९९४ ॥**

**स पुन**र्भावविहारो **द्विविधो**ऽपि भूयो **द्विविधो भवति**। तद्यथा—**समाप्तकल्पस्तथैव असमाप्तः** असमाप्तकल्पः। **तत्रायं समाप्तः** समाप्तकल्पो द्विविधो **भवति**। तद्यथा—**जघन्य उत्कृष्ट**श्च ॥९९४॥ अनयोरेव प्रमाणमाह—

**गीयत्थाणं तिण्हं, समत्तकप्पो जहण्णतो होति।**
**बत्तीससहस्साइं, हवंति उक्कोसओ एस ॥ ९९५॥**

**गीतार्थानां त्रयाणां** विहारः **समाप्तकल्पो जघन्यो भवति। उत्कृष्टस्त्वेष** समाप्तकल्पो **द्वात्रिंशत् सहस्राणि भवन्ति** ॥९९५॥

**तिण्ह समत्तो कप्पो, जहण्णओ दोण्णि ऊ जया विहरे।**
**गीयत्थाण वि लहुओ, अगीए गुरुगा इमे दोसा ॥ ९९६॥**

**त्रयाणां** किल **समाप्तकल्पो जघन्यो** भवति ततो **यदा द्वौ विहरतस्तदा** द्वयो**र्गीतार्थयो**र्विहरतो**र्लघुका** मासाः प्रायश्चित्तम्। **अगीतार्थयो**श्चत्वारो **गुरुकाः**। द्वयोश्च विहरतो **इमे** वक्ष्यमाणा **दोषाः** ॥९९६॥ तानेवाह—

**[1]दोण्हवि विहरंताणं, सलिंग-गिहिलिंग-अन्नलिंगे य।**
**होइ बहुदोस वसही, गिलाण१मरणे२ य सल्ले३ य ॥ ९९७ ॥**

**द्वयोर्विहरतोः स्वलिङ्गा-ऽन्यलिङ्ग-गृहिलिङ्गा**नधिकृत्य भूयांसो दोषाः। तद्यथा-एको

१. एतद् ९९७ गाथानन्तरं लाडनूसंस्करणे ( गा.१०१४ ) एषा गाथोपलभ्यते- 'एगस्स सलिंगादी वसहीए हिंडतो य साणाही । दोसा दोण्ह वि हिंडतगाण वसधीय होंति इमे ॥१०१४।। जेभा. खंभा. प्रत्योरपि प्राय एवम् ॥

वसतिपालः, एको भिक्षार्थं गतः। तत्र यो भिक्षार्थं गतस्तस्य स्वलिङ्गे संयत्या आलापादिकं पृच्छन्त्याः आत्म-परोभयसमुत्था दोषाः। परलिङ्गे चरिकादिकाया, गृहिलिङ्गे स्त्रियाः प्रोषितभर्तृकादिकायाः। **होइ बहुदोस वसहि** त्ति हिण्डमानाद्वसतिर्बहुदोषा भवति। किमुक्तं भवति? वसतिपालस्य हिण्डमानापेक्षया भूयांसो दोषाः। एकान्तमिति कृत्वा स्वलिङ्गि-न्यादीनामुपपातसम्भवात् प्रदीपनके च लग्ने एकाकी स कथं करोति? अथैतै दोषा मा भूवन्निति शून्यां वसतिं कृत्वा निर्गच्छतः, तदानीं वक्ष्यमाणा बहवो दोषाः। तद्यथा-द्वयोर्विहरतोर्यद्येको **ग्लानो** भवति तदा तस्य ग्लानस्य एकाकिनो मोचने पिपासादि-सम्भवतः, तथा **मरणे** मरणकाले शल्यं नोद्धृतमिति **शल्ये च** तथाऽवस्थिते सति गरीयांसो दोषाः ॥९९७॥ तत्र द्वयोर्निर्गमने दोषानाह—



**मिच्छत्त१ बडुय२ चारण३ भडे४ य मरणं तिरिक्खमणुयाणं५।**
**आएस६ वाल७निक्केयणे८, य सुण्णे भवे दोसा ॥ ९९८ ॥**

उत्सर्गतस्तावदियं सामाचारी- शून्या वसतिर्न कर्तव्या। यदि पुनस्तौ शून्यां वसतिं कुरुतस्ततस्तयोः प्रत्येकं प्रायश्चित्तं चतुर्लघु तपसा कालेन च गुरु। उक्तं च-"**सुन्नं जति वसहिं करेंति चउ लहुया दोहि वि गुरुगा**"[ ] इति, अन्ये च बहवो दोषाः। तथाहि—

तौ साधू सर्वमात्मीयं भाण्डमादाय शून्यां वसतिं कृत्वा गतौ, शय्यातरेण च बहिरागतेन शून्या वसतिर्दृष्टा, ततः स पृच्छति क्व गतौ साधू? इति। गृहमानुषाणि भणन्ति- न जानीमः, नूनं गतौ भविष्यतः। एतत् श्रुत्वा यदि स प्रीतिकं करोति, यथा यदि गतौ ततो गताविति, तदा तयोः प्रायश्चित्तं चतुर्लघु, अथाऽप्रीतिं करोति, यथा- अकृतज्ञास्ते निःस्नेहाः, ततोऽनापृच्छ्य गताः, अथवा- निर्दाक्षिण्यास्ते, एतमप्युपचारं न जानन्ति, यथा- आपृच्छ्य गन्तव्यमिति, तदा चतुर्गुरुकाः। तथा सोऽप्रीतिकोत्पत्तिवशात्तयोरन्येषां वा साधूनां तद्द्रव्या-ऽन्यद्रव्यव्यवच्छेदं कुर्यात्, ततो भृतैर्भाजनैरागतयोस्तयोः शय्यातरो न स्थानं दद्यात्। कोपावेशाद् यदि दिवा निष्काशयति ततश्चतुर्लघु। तैश्च भृतैर्भाजनैरन्यां वसतिं याचमानयोर्या आगाढादिपरितापना तन्निष्पन्नं चतुर्लघु। लोके च गर्होपजायते कुत्सितमाभ्यां किमप्याचरितम्, अन्यथा कथमकाण्ड एवाकृतभोजनौ निष्कासितौ? इति। एवं चान्यत्रापि तौ वसतिं न लभेते। ततो वसतिमलभमानौ तावन्यत्र गच्छतः, ततो मासकल्पभेदः। तथा च सति या तत्र विराधना तन्निष्पन्नमपि तयोः प्रायश्चित्तम्। अपि चान्ये साधवो विहारादिनिर्गतास्तत्राऽऽगताः, अन्या च वसतिस्तत्र न विद्यते, स च शय्यातरः

गाथा ११८ शून्यवसति करणे दोषाः



For Private and Personal Use Only

तत्कृताऽप्रीतिवशतस्तेषामपि वसतिं न ददाति, ततो यत्ते श्वापदस्तेनादिभिः प्राप्नुवन्ति तन्निष्पन्नमपि तयोः प्रायश्चित्तम्। एते तावद्दोषा भिक्षामटित्वा तत्क्षणमागतयोरुक्ताः। यदि पुनर्बहिर्भुक्त्वा रात्रावागतौ वसतिं न लभेते तदा चतुर्लघु सविशेषतराश्च गर्हादयो दोषाः, विनाशः श्वापदादिभ्यः। अथवा सम्यग्दृष्टिभूतः सन् पश्चाद् 'अनापृच्छ्य तौ गतौ' इत्यप्रीतिकोत्पत्तिवशतो **मिथ्यात्वं** यायात्१।

**बडुय**त्ति शून्यां वसतिं दृष्ट्वा बटुकैः शय्यातरो याचितः यथा- वयमत्र तिष्ठामः। शय्यातरः प्राह— श्रमणौ तिष्ठतः। तैरुक्तम्- गतौ तौ श्रमणौ। शय्यातरो ब्रूते तिष्ठत, यदि वा गतौ श्रमणौ, ते स्थिताः। श्रमणावागतौ प्रवेष्टुं प्रवृत्तौ, बटुकैर्निरुद्धौ, ततोऽसङ्खडमभवत्, बटुका ब्रुवते- वसतिरियमस्माकं स्वामिना दत्ता। इतरावपि ब्रूतः अस्माकमपि स्वामिना दत्ता। एवं कलहायमानौ साधू शय्यातरसमीपं गतौ। स वदति यूयमनापृच्छया शून्यां वसतिं कृत्वा गताः मया ज्ञातम्, यथा- यूयं गताः, येन शून्या कृता वसतिर्दृश्यते, ततो मया बटुकानां प्रदत्ता तस्मात्परस्परं साम्मत्येनैकत्र तिष्ठत, न पुनरहमात्मानमलीकं करोमि। तत्र यदि परस्परं साम्मत्येन तिष्ठन्ति ततः पठतां प्रतिलेखनां च कुर्वतां

गाथा ११८ शून्यवसति करणे दोषाः



For Private and Personal Use Only

संयतभाषाश्च श्रुत्वा ताभिरुपहासं[1] कुर्वन्ति ततः कलहभावतोऽधिकरणदोषः। अथवा शय्यातरः संयतानां भद्रक इति तान् बटुकान्निष्काशयेत्ततः 'संयतप्रयोगवशतोऽनेन दुष्टेन वयं निष्कासिताः' इति शय्यातरस्य संयतानां च विषये स्तेनप्रयोगतोऽग्निप्रक्षेपादिना वा यमुपद्रवं कुर्वन्ति तन्निष्पन्नं प्रायश्चित्तं तौ श्रमणौ प्राप्नुतः२।

**चारणे**त्ति एवं चारणेऽपि दोषा वक्तव्याः। नवरमधिकतराः, यतस्ते संयतान् प्रपञ्च्य याचित्वा वा यत्तद् गृह्णन्ति, ततस्तैः सह एकत्र सर्वथा न वस्तव्यम्, एते एव दोषा **भटे**ऽपि, यतस्तेपि बटुका इव प्रद्विष्टाः सन्तः शय्यातरस्य संयतानां च विषये स्तेनप्रयोगतोऽग्निप्रक्षेपादिना वा प्रभूतमुपद्रवं कुर्वन्ति ४।



**मरणं तिरिक्ख-मणुयाण**मिति शून्यां वसतिमभिसमीक्ष्य गवादिस्तिर्यङ् अनाथमनुष्यो वा प्रविश्य म्रियते, तं यदि गृहस्थैरसंयतैः परिष्ठापयन्ति ततः षड्जीवनिकायविराधना, यदि स्वयं त्यजन्ति ततः प्रवचनस्योड्डाहः। कोऽप्येवमाशङ्केत- एतैरेवायं मारितः, लोकेऽपि स्वयं तत्त्यजने महती गर्हा अशुचय एते इति। अथैतद्दोषभयान्न स्वयं त्यजन्ति नापि



१. **'ताभिः' संयतभाषाभिः, तदनुवादेनेति पु. प्रे.।।**

गृहस्थैस्त्याजयन्ति ततो रुधिरगन्धेन तयोः श्रमणयोर्नाशाऽर्शांस्युपजायन्ते। अथास्वाध्यायिकमिति कृत्वा सूत्रपौरुषीं न कुरुतस्ततो मासलघु, अर्थपौरुषीं न कुरुतो मासगुरु, सूत्रपौरुषीमकुर्वतोः सूत्रं चेन्नश्यति ततश्चतुर्लघु, अर्थपौरुषीमकुर्वतोरर्थनाशे चतुर्गुरु। अवर्णश्च लोके समुच्छलति, यथैते पिशाचमूर्तयः श्मशाने प्रियाः श्मशाने तिष्ठन्तीति ४।

**आदेस**त्ति आदेशा नाम प्राघूर्णकाः, ते भिक्षागतयोः तयोः श्रमणयोः समागताः, शय्यातरेण च शून्यां वसतिमुपलभ्य गतौ तौ श्रमणाविति विचिन्त्य सा वसतिस्तेषां दत्ता। ततो यथा बटुक-चारण-भटेषु दोषा उक्तास्तथात्रापि द्रष्टव्याः ६।

**वाल**त्ति व्यालो नाम सर्पः, स शून्यं दृष्ट्वा वसतौ प्रविशेत्। ततो यद्यागतौ तौ श्रमणौ निष्काशयतस्ततो हरितकायमध्येन तस्य गच्छतोऽधिकरणदोषः। अन्यस्मिन् वा गृहे प्रविष्टस्तन्मानुषाणि दशेत्, स वा तैर्मार्येत। अथैतद्दोषभयान्न निष्काशयतस्ततस्तेन भक्षिते आत्मविराधना ७।

**निक्केयणे**त्ति शून्यां वसतिं दृष्ट्वा तिरश्ची अनाथमानुषी वा समागत्य प्रसूते। तत्र यदि तिरश्ची शुनी प्रभृतिका नवप्रसूता निष्काश्यते निष्काशनेन निराश्रया क्रियते तदा

सद्योजातपिल्लकमरणमात्मविराधना च। अथ मानुषी प्रसूता ततः 'इयमेतयोरेव, इति प्रवचनोड्डाहः। निष्काशनेऽधिकरणं लोको ब्रूयान्निरनुकम्पा अमी, चेडरूपं वा म्रियेत। अथवा सा प्रसूता चेडरूपं त्यक्त्वा व्रजेत्। ततः तस्योज्झने निरनुकम्पा इति गर्हा,अनुज्झने उड्डाहः ८। एते **शून्यवसतिकरणे दोषाः** ॥९९८॥

सम्प्रति ग्लानस्य एकाकिनो मोचने तस्य मरणे च दोषानाह—

**गेलण्ण सुण्णकरणे, खद्धाइयणे गिलाण अणुकंपा।**
**साणाऽतियण दुगुंछा, तस्सट्ठ गयम्मि कालगए।। ९९९॥**



ग्लानार्थमात्मार्थं वा निर्गमने ग्लानः शून्यो भवेत्, तस्य च **ग्लानस्य शून्यस्य करणे** पिपासा तदनु बुभुक्षा वा जायेत, पिपासितो बुभुक्षितश्च महता शब्देन व्याहरेत्, व्याहारश्रवणाच्च गृहस्था आगच्छेयुः, ते च गृहस्थाः समागता यद्याचते **ग्लानः** पथ्यमपथ्यं वा तत्सर्व**मनुकम्पया** ददति। तत्र पथ्यस्यापथ्यस्य वा **खद्धस्य** प्रचुरस्य **अइयणे** इति अदने भक्षणे वमनं भूयात्, स च न किमपि कर्तुं समर्थो ग्लानत्वादिति वमनेन मुख-

हृदयादिकं सर्वं खरण्टयेत्। तं च तथा वमन्तं दृष्ट्वा **श्वानः** समागत्य तद् वम्यमानं भक्षयन्ति। भक्षयन्तश्च मुखहृदयादिकं च लिहन्ति। एवं शुनाम् **अतियणो**त्ति अदने भक्षणे लोके **जुगुप्सा** निन्दा समुपजायते। यथा- धिगेतेषां धर्मस्तपो वा, यदित्थमिहलोकेऽपि फलमनुभवन्ति इति। गतं ग्लानद्वारम्।

अधुना मरणद्वारमाह- **तस्सट्ठे**त्यादि, तस्य ग्लानस्यार्थाय वैद्यौषधादिसमानयन-प्रयोजनाय ग्रामान्तरादौ **गते** यदि स ग्लानः **कालगतो** भवेत् तदा अमी दोषाः ॥९९९॥ तानेवाह—



**गिहि गोण मल्ल राउल-निवेयणा पाणकड्ढणुड्डाहे।**
**छक्कायाण विराहण, झामिय मुक्के य वावन्ने ॥ १००० ॥**

यदि स ग्लानो मृतः सन् **गृहस्थै**र्निष्कास्येत। यदि वा **बलीवर्दैः** आकृष्येत। अथवा **मल्लैः** निष्कास्येत। यदि वा केनापि **राजकुले निवेदना** क्रियेत यथा- एको व्रती अनाथो मृत इति, ततो राज्ञा स निष्कास्येत। यदि वा केचित् **पाणानां** चण्डालानां मूल्यं दत्त्वा

तैर्निष्काशयेयुः। इत्थं तस्य ग्लानस्य **कर्षणे** निष्काशने प्रवचनस्य **उड्डाहः** मालिन्यम्। तथा न गृहस्थादयो यतनया गच्छन्ति ततस्तैर्नीयमाने **षण्णां जीवनिकायानां विराधना** संघट्टन-परितापना-ऽपद्रावणरूपा। तथा यत्र तस्याग्निसंस्कारः कर्तव्यस्तत् स्थण्डिलम् अस्थण्डिलं वेति न परिभावयन्ति। ततस्तस्मिन्नस्थण्डिले **ध्यामिते** दग्धे षड्जीवनिकाय-विराधना। अथ नाग्निसंस्कारं कुर्वन्ति किन्त्वेवमेव **मुञ्चन्ति** तत्राप्यस्थण्डिले मुक्ते षड्जीवनिकायविराधना। अन्यच्च यदि तस्य ग्लानस्य शरीरं क्वचित् प्रदेशेषु **व्यापन्नं** कुथितं भवेत् ततस्तस्मिन् **व्यापन्ने** अयतनया नीयमाने द्वीन्द्रियविराधना ॥१००० ॥ अत्रैव च प्रायश्चित्तविधिमाह—

**गोण-निव-साणेसु य, गुरुगा सेसेसु चउलहू होंति।**
**उड्डाहोत्ति य काउं, निव वज्जेसुं भवे लहुगा ॥ १००१ ॥**

यदि गृहस्था **बलीवर्दाभ्यां** निष्कासितवन्तः, यदि वा **राजा** निष्काशितवान्, **श्वानो** वा ग्लानावस्थायां वमने मुखहृदयादिकं लिहन्ति, तदा एतेषु त्रिषु स्थानेषु प्रायश्चित्तं प्रत्येकं चत्वारो **गुरुका** मासाः। **शेषेषु** च सर्वेष्वपि स्थानेषु प्रत्येकं **चत्वारो लघुमासा**

**भवन्ति।** अथवा राज्ञा निष्कासिते चत्वारो गुरुकाः, शेषेषु च सर्वेष्वपि स्थानेषु **उड्डाहः** संवृत्त इति प्रत्येकं चत्वारो लघुकाः। यच्चाऽयतनया निष्कासिते षण्णां जीवनिकायानां संघट्टन-परितापना-ऽपद्रावणरूपं विराधनं यच्चास्थण्डिले मोचनम् अग्निसंस्कारकरणं वा, या च कुथिते नीयमाने द्वीन्द्रियविराधना तन्निमित्तं च प्रायश्चित्तमिति ॥१००१॥ सम्प्रति यदुक्तं 'गृहस्थादिभिः कर्षणे उड्डाहः' इति तत्र तमेवोड्डाहं कथयति—

**बिंति य मिच्छादिट्ठी, कत्तो धम्मो तवो व एसिं तु?।**
**इहलोए फलमेयं, परलोए मंगुलतरागं ॥ १००२ ॥**

**ब्रुवते मिथ्यादृष्टयः- कुतो धर्मस्तपो वा एतेषाम्?** नैव कुतश्चिदपीति भावः। तथाहि- **इहलोके** तावत्**फलमेतत्,** यदित्थं निष्काशनम्, **परलोके** एतस्मादपि फलात् फलं **मङ्गुलतर**मशुभतरमिति ॥१००२॥ तथा—

**जइ एरिसाणि पावेंति, दिक्खिया किं खु अम्ह दिक्खाए?।**
**पव्वज्जाभिमुहाणं, पुणरावत्ती भवे दुविहा ॥ १००३ ॥** दारं २।

**यदि दीक्षिता** अपि **ईदृशानि** विडम्बनानि **प्राप्नुवन्ति,** ततः **किमस्माकं खु** निश्चितं **दीक्षया ?,** नैव तया किञ्चित्प्रयोजनमिति भावः। एवं **प्रव्रज्याभिमुखानां पुनरावृत्तिः** पुनः पश्चाद्वलनं **द्विविधा** द्रव्यतो भावतश्च भवेत् ॥ १००३॥ गतं मरणद्वारम्। अधुना शल्यद्वारमाह—

**वालेण विप्परद्धे, सल्लो वाघातो मरणभीयस्स।**
**एवं दुग्गतिभीए, वाघातो सल्ल मोक्खट्ठा ॥ १००४ ॥**

एगो पुरिसो नगरं पत्थितो, अन्नेहिं वारितो- 'मा गच्छ, पंथे सप्पो चिट्ठति, सो धाविऊण खाति,' सो भणति- 'अहं नस्सीहामि, न मे सो सप्पो अम्माहिती'। ततो सो चलितो। पंथे वच्चंतो सप्पेण दिट्ठो। ततो पहावितो सो सप्पो। सो सिग्घयरं नासेउं पवत्तो। तस्स तहा नस्संतस्स पाए कंटगो लग्गो। तेण वाघाएण सप्पेण अम्मेउं खतितो, मतो य।

ततो यथा तस्य **व्यालेन** दुष्टेन सर्पेण **विप्रारब्धे** जीवितप्रयोगाय प्रकर्षेण खादितु-मारब्धस्य **मरणभीतस्य** मरणभीतत्वादेव शीघ्रं पलायमानस्य **शल्यं व्याघातः,** व्याहन्यते

गमनमनेनेति व्याघातो गमनव्याघातकरणमभवत्। **एवं दुर्गतिभीते** षष्ठीसप्तम्योरर्थं प्रत्यभेदात् दुर्गतिभीतस्य **मोक्षार्थं** व्रजतः **शल्यम्** अपराधलक्षणं मोक्षगमन**व्याघात**कारि जातम् ॥१००४॥ ततः किम्? इत्याह—

**मरिउं ससल्लमरणं, संसाराडविमहाकडिल्लम्मि।**
**सुचिरं भमंति जीवा, अणोरपारम्मि ओइण्णा ॥ १००५ ॥**

उक्तप्रकारेण **सशल्यं मरणं** यथा भवति एवं **मृत्वा संसाराटवीमहाकडिल्ले** संसाराटवीमहागहने **अनर्वाक्पारे अवतीर्णा जीवाः सुचिरम्** अनन्तमपि कालं यावद् **भ्रमन्ति** ॥१००५॥ अत्रोपसंहारमाह—

**जम्हा एते दोसा, तम्हा दोण्हं न कप्पति विहारो।**
**एयं सुत्तं अफलं, अह सफलं निरत्थओ अत्थो ॥ १००६ ॥**

**यस्माद्** द्वयोः विहारे **एते** अनन्तरोदिता **दोषास्तस्मान्न कल्पते द्वयोर्विहारः।** अत्र पर आह— ननु **एतत् सूत्रमफलम्,** द्वयोर्विहारस्यैवासम्भवात्, **अथ सफलं** तर्हि द्वयोरपि विहारः सूत्रेणानुज्ञात इति योऽयमर्थतः प्रतिषिद्धो भवद्भिर्द्वयोर्विहारः **सोऽर्थो निरर्थकः**

सूत्रेण बाधितत्वात् ॥१००६॥ आचार्य आह—

**मा वय सुत्त[1] निरत्थं, न निरत्थगवाइणो जओ थेरा।**

**कारणियं पुण सुत्तं, इमे य ते कारणा होंति। १००७ ॥**

**मा वद** मा ब्रूहि त्वं चोदक! यत् **सूत्रं निरर्थकम्, यतः स्थविरा** भगवन्तो **न निरर्थकवादिनो** भवन्ति, तेषां श्रुतकेवलित्वात्। यद्येवमर्थतः प्रतिषिद्धो द्वयोर्विहारः,अथ च सूत्रेण प्रतिपादित इति कथम्? अत आह—**सूत्रं पुनः** कारणेषु भवं कारणैर्निर्वृत्तं वा **कारणिकम्,** कारणान्यधिकृत्य प्रवृत्तमिति भावः। **तानि च कारणान्यमूनि** वक्ष्यमाणलक्षणानि ॥१००७॥ तान्येवाह—

गाथा १००२-१००८

**असिवे ओमोयरिए, राया संदेसणे जयंता वा।**

**अज्जाणगुरुनियोगा, पव्वज्जा नातिवग्ग दुवे ॥ १००८ ॥**

**अशिवं** क्षुद्रदेवताकृत उपद्रवः, तस्मिन् द्वयोर्विहारः। तथा **अवमौदर्य**-दुर्भिक्षं तस्मिन्।



---

१ सुत्तमणत्थं- जे. भा. खंभा. ॥

For Private and Personal Use Only

अथवा **राजा** प्रद्विष्टो भवेत् ततो द्वयोर्विहारः। **संदेसण**त्ति आचार्यप्रेषणेन द्वौ विहरेयाताम्। **जयंता वा** इति यतमाना नाम ज्ञाननिमित्तं दर्शननिमित्तं वा प्रयत्नवन्तः। इयमत्र भावना-विषमशास्त्राणि सम्प्रतिकालगृहीतानि, तानि च यदि नाभ्यस्तानि क्रियन्ते ततो विस्मृतिमुपयान्ति। गच्छे च सबालवृद्धाकुले भिक्षाचर्यादिना व्याघातस्तत आचार्याना-पृच्छ्य तैर्विसृष्टौ द्वावन्यत्र गच्छेयाताम्। एवं दर्शनप्रभावकशास्त्रनिमित्तमपि द्वयोर्विहारो भावनीयः। **आर्याणां** वा एकस्मात्क्षेत्रादन्यस्मिन् क्षेत्रे नयने सङ्घाटस्य **गुरुनियोगात्** द्वयोर्विहारो भवेत्। यदि वा **प्रव्रज्या**भिमुखः कोऽपि सञ्जातस्ततस्तस्य स्थिरीकरणार्थं सङ्घाटकप्रेषणम्। यदि वा **ज्ञातिवर्गः** स्वजनवर्गः कस्यापि साधोर्वन्दापनीयो जातः, ततस्तद्वन्दापनार्थं च **द्वौ** विहरेयातामिति ॥१००८॥

तत्र यतनामाह—

**समयं[१] भिक्खग्गहणं, निक्खमण-पवेसणं अणुण्णवणं।**
**एक्को कहमावण्णो?, एक्को व कहं न आवण्णो ॥ १००९ ॥**

---

१. समगं - जेभा. खंभा. ॥

यौ नाम प्रागुक्तकारणवशाद् विहृतौ तौ द्वावपि **समकं** युगपद् **भिक्षाग्रहणं** कुरुतः, समकं भिक्षानिमित्तं हिण्डेते इत्यर्थः। एवं समकमेव शेषप्रयोजननिमित्तमपि **निष्क्रामतः** व्रजतः। समकमेव च **प्रविशतः** गत्वा प्रत्यागच्छतः तथा समकमेव**ानुज्ञापनं** कुरुतः। किमुक्तं भवति ? समकमेव नैषेधिक्यादिकं शय्यातरादिकमनुज्ञापयतः तत एकाकिनः सतो ये प्रागुक्ता दोषास्ते प्रायो न सम्भवन्ति। पर आह यद्येवं समकभिक्षाग्रहणादिकरणं ततः कथ**मेकः** प्रायश्चित्तस्थानमापन्नः ? **एको वा कथं नापन्नः ?** इति ॥१००९॥ सूरिराह—

**एगस्स खमण भाणस्स धोवणं बहि य इंदियत्थेहिं।**
**एएहिं कारणेहिं, आवन्नो वा अणावन्नो ॥ १०१० ॥**



**एकस्य क्षपणं** अभक्तार्थोऽभवेत्; एकेन तु क्षपणं न कृतम्। तत्र यदि क्षपणकारी शक्नोति ततो द्वावपि समकं भिक्षानिमित्तं हिण्डेते। अथ क्षपणकृद् न शक्नोति तत एको भिक्षार्थं गच्छति, एकस्तूपाश्रय एव तिष्ठति। एवं द्वयोरप्येकाकित्वसम्भवः। तथा **भाणस्स धोवणं**ति अथवा एको भाजनस्य धावनार्थमुपाश्रयाद् **बहिर्विनिर्गतः**, एकस्तूपाश्रय-

स्यैवान्तस्तिष्ठति, एवमेकाकिनौ जातौ। ततो यो भिक्षागतः यो वा भाजनप्रक्षालनार्थं बहिर्विनिर्गतः, यो वा वसताववतिष्ठते सः **इन्द्रियार्थैः** रूप-रसादिभिरिष्टाऽनिष्टैः समापतितै रागं द्वेषं वा प्रयाति, राग-द्वेषगमनाच्च प्रायश्चित्तस्थानमापद्यते। तत एवमनन्त-रोदितैः **कारणैरेकः** प्रायश्चित्तस्थान**मापन्नो** भवति, एकस्तु **अनापन्न** इति। अथवा यद्यपि नाम भिक्षाग्रहणादिनिमित्तं समकं हिण्डेते तथाप्येक आपद्यते प्रायश्चित्तस्थानम्, अपरो नैव ॥१०१०॥ तथा चाह—

**तुल्ले वि इंदियत्थे, एगो सज्जइ विरज्जई बितितो।**
**अज्झत्थं तु पमाणं, न इंदियत्था जिणा बेंति ॥ १०११ ॥**



**तुल्येऽपि** समानेऽपि **इन्द्रियार्थे** इन्द्रियविषये रूपादौ रागहेता**वेकः रज्यते** रागमुप-गच्छति, **द्वितीयो विरज्यते** विषयपरिणामस्य च दारुणतां भावयन् विरक्तो भवति। तस्मात्प्रायश्चित्तापत्त्यनापत्तिविषये **अध्यात्म**मान्तरः परिणामः स **प्रमाणम्, न इन्द्रियार्था** इति **जिनाः** भगवन्तः सर्वज्ञा **ब्रुवते**। ततः समकहिण्डनेऽप्येको घटते प्रायश्चित्तमापन्नोऽपरो नेति ॥१०११॥ इतश्च विषया न प्रमाणम् यत आह—

**मणसा उवेति विसए , मणसा वि य सन्नियत्तए तेसु।**
**इय वि हु अज्झत्थसमो, बंधो विसया न उ पमाणं ॥ १०१२ ॥**

इह विषयोपलब्धिव्यतिरेकेणापि **मनसा** अन्तःकरणेन **विषयान्** इन्द्रियविषयान् रूपादीन् **उपैति,** अध्यवस्यतीति भावः। **मनसैव च तेभ्यः** विषयेभ्यः **सन्निवर्तते,** विरज्यते इत्यर्थः। **इत्यपि** एवमपि **हुः** निश्चितम् **अध्यात्मसमो**ऽध्यात्मानुरूपः, परिणामानुसारी इत्यर्थः **बन्धः** कर्मबन्धः। तस्मान्न **विषयाः प्रमाणम्,** तेषु सत्स्वपि केषाञ्चिद्रागद्वेषासम्भवात्, तदभावेऽपि च केषाञ्चिन्मनसा तत्सम्भवादिति ॥१०१२॥



**एवं खलु आवण्णे, तक्खण आलोयणा उ गीयम्मि।**
**ठवणिज्जं च ठवेत्ता, वेयावडियं करे बितिओ ॥ १०१३ ॥**

**एवम्** उक्तेन प्रकारेण **खलु** निश्चितमेकस्मिन् प्रायश्चित्तस्थान**मापन्ने** तेन **तत्क्षण**मेव तत्कालमेव **गीते** गीतार्थस्य पुरत **आलोचना** दातव्या। तत्र यदि द्वावपि गीतार्थौ विहरतस्ततः **स्थापनीयं** प्रागुक्तस्वरूपं **स्थापयित्वा** यः प्रायश्चित्तस्थानमापन्नः स

परिहारतपः प्रतिपद्यते। **द्वितीयः** कल्पस्थितो भवति, स एव चानुपारिहारिक इति तस्य **वैयावृत्त्यं करोति** ॥१०१३॥

**सूत्रम्— दो साहिम्मिया एगतो विहरंति, ते दोवि अण्णयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, एगं तत्थ कप्पागं ठवइत्ता एगे निव्विसेज्जा, अह पच्छा से वि निव्विसेज्जा ॥ २॥**

'दो साहम्मिया एगओ विहरंति' इत्यादि, **द्वौ साधर्मिकौ एकत** एकत्र स्थाने **विहरतः**, **तौ** च **द्वावप्यन्यतरद् अकृत्यस्थानं प्रतिसेव्य आलोचयेयाताम्**, तत्र यदि द्वावपि गीतार्थौ ततस्तत्र तयोर्द्वयोर्मध्ये **एकं कल्पस्थितं स्थापयित्वा एको निर्विशेत्** परिहारतपः प्रतिपद्येत। यश्च कल्पस्थितः स एव चानुपारिहारिको भवति, अन्यस्याभावात्, ततः स तस्य वैयावृत्त्यं करोति। **अथ** परिहारतपःसमाप्त्यनन्तरं **स** कल्पस्थितः **पश्चान्निर्विशेत्** परिहारतपः प्रतिपद्येत, इतरस्तु परिहारतपःकृतकर्मा कल्पस्थितोऽनुपारिहारिकश्च भवति। एष सूत्रार्थः। एनमेव सूत्रार्थं **भाष्यकृत्** सविशेषमाह—

**बितिए निव्विस एगो, निव्विट्ठे तेण निव्विसे इयरो।**
**एगतरम्मि अगीते, दोसु य सगणेयरे सोही ॥ १०१४ ॥**

**द्वितीये** सूत्रे द्वयोरपि गीतार्थयोरन्यतरद् अकृत्यस्थानमापन्नयोरे**कः निर्विशति** परिहारतपः प्रतिपद्यते, द्वितीयः कल्पस्थितोऽनुपारिहारिकश्च, भवतीति वाक्यशेषः। ततस्**तेन निर्विष्टे** परिहारतपसि कृते **इतरः** द्वितीयो निर्विशति कृतपरिहारतपःकर्मा तु तस्य कल्पस्थितोऽनुपारिहारिकश्चोपजायते। यदि पुन**रेकतरः अगीतः** अगीतार्थो भवति ततः **शोधिः** शुद्धं तपः प्रायश्चित्तदानम्। अथ द्वावप्यगीतार्थौ ततस्तयो**र्द्वयो**रप्यगीतार्थयोः सतोः प्रायश्चित्तस्थानापत्तौ **स्वगणे इतरस्मिन्** परगणे वा गीतार्थानां मिलित्वा ताभ्यां शोधिः शुद्धं तपः प्रतिपद्यते, अगीतार्थत्वेन परिहारतपोयोग्यताया अभावात्॥१०१४॥

**सूत्रम्— बहवे साहम्मिया एगतो विहरंति, एगे तत्थ अण्णयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, ठवणिज्जं ठवइत्ता करणिज्जं वेयावडियं ॥ ३॥**

'बहवे साहम्मिया एगओ, विहरंति' इत्यादि, **बहवः साधर्मिकाः एकतः** एकत्र

स्थाने **विहरन्ति। तत्र** तेषां मध्ये **एको** गीतार्थोऽन्यतरद् **अकृत्यस्थानं प्रतिसेव्य आलोचयेत्,** आलोचनानन्तरं परिहारतपोदाने **स्थापनीयं** प्रागुक्तस्वरूपं **स्थापयित्वा** अनुपारिहारिकेण तस्य **करणीयं वैयावृत्त्यमि**त्येषः सूत्रार्थः। एनमेव **भाष्यकृत्** सविशेषमाह—

**एमेव तइयसुत्ते, जइ[1] एगो बहुगमज्झे आवज्जे।**

**आलोयण गीयत्थे, सुद्धं परिहार जह पुव्विं ॥ १०१५॥**

**एवमेव** अनेनैव प्रागुक्तेन प्रकारेण **यद्येको बहुषु मध्ये** अवतिष्ठमानः प्रायश्चित्तस्थान**मापद्येत।** ततस्तेन तत्क्षणं **गीतार्थे** गीतार्थस्य पुरत **आलोचना** दातव्या। तत्र यदि सोऽगीतार्थो भवति तदा **शुद्धं** तपस्तस्मै दातव्यम्। अथ गीतार्थस्ततः **परिहारतपः**, तच्च **यथा** स्थापनीयस्थापनापुरस्सरं **पूर्व**मुक्तं तथाऽत्रापि वक्तव्यम्। इयमत्र भावना- ते बहवः साधर्मिका गीतार्था वा भवेयुः गीतार्थमिश्रा वा। तत्र गीतार्थमिश्रेषु जघन्येनैको गीतार्थो भवेत्, उत्कर्षतो द्वि-त्रादिकाः, तत्र यदि सर्वे गीतार्था यदि वा द्वित्रादिका गीतार्थाः प्राप्यन्ते तदा एकः कल्पस्थितः क्रियते, एकोऽनुपारिहारिकः। अथ सर्वे आचार्यव्यतिरेकेणागीतार्थास्ततः शुद्धं तपो देयम्। अथवाचार्य एव प्रायश्चित्तस्थानमापन्नस्ततः सोऽन्यत्र गच्छे

१. बहुमज्झे जाति तु एगोजेमा. खंभा. ॥

गत्वा परिहारतपः प्रतिपद्यते। अथ समस्ता अप्याचार्यप्रभृतयोऽगीतार्थास्ततोऽन्यत्र गच्छान्तरे ते सर्वे गत्वा यः प्रायश्चित्तमापन्नः स शुद्धं तपः प्रतिपद्यते ॥१०१५॥

**सूत्रम्— बहवे साहम्मिया एगओ[1] विहरंति, सव्वे वि ते अण्णयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, एगं तत्थ कप्पागं ठवइत्ता अवसेसा णिव्विसिज्जा, अह पच्छा से वि निव्विसेज्जा[2]॥ ४॥**

'बहवे साहम्मिया' इत्यादि, अथास्य सूत्रस्य कः सम्बन्धः? उच्यते—

**सरिसम्मि असरिसेसु व, अवराहपएसु जइ गणो लग्गे।**
**बहुयकयम्मि वि दोसित्ति, होइ सुत्तस्स संबंधो ॥ १०१६॥**

सदृशमपराधपदं नाम यथा सर्वैरपि प्राणातिपातः कृत इति। असदृशान्यपराधपदानि मूलगुणानां प्राणातिपातविरत्यादीनां मध्ये किमपि केनाप्यपराद्धम्, तत्र **यदि गणः सदृशे**ऽपराधे यदि वा **असदृशेष्वपराधेषु लगेत्** तथापि यथा लोके "**शतमदण्ड्यम् सहस्रमवन्ध्यं**" तथात्रापि प्रतिपत्तिर्माभूत्। किन्तु **बहुकैरपि कृते**ऽपराधे **दोषः**। किमुक्तं

१. एगतओचूर्ण्यवतरणे २. °सह खंसू-जेसू. संसू. ॥

भवति? बहवोऽप्यपराधकारिणो नियमतः प्रायश्चित्तमापद्यन्ते इत्यस्यार्थस्य ख्यापनार्थमिदं सूत्रमित्येष **सूत्रस्य सम्बन्धः** ॥१०१६॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**बहवः साधर्मिका एकतो विहरन्ति,** ते च तथा विहरन्तः **सर्वेऽप्यन्यतरत् अकृत्यस्थानं प्रतिसेव्याऽऽलोचयेयुः,** आलोच्य च **एकं तत्र कल्पस्थितं** कृत्वा **अवशेषाः** सर्वेऽपि **निर्विशन्ति,** परिहारतपः प्रतिपद्यन्ते इत्यर्थः । ततस्तेषां परिहार-तपःसमाप्त्यनन्तरं **पश्चात्स** कल्पस्थितो **निर्विशेत्,** स परिहारतपः प्रतिपद्येतेति भावः। तस्यैकोऽनुपारिहारिको दीयते । एषः सूत्रसङ्क्षेपार्थः ॥ व्यासार्थं तु भाष्यकृदाह

**सव्वे वा गीयत्था, मीसा व जहन्न एग गीयत्थो।**
**परिहारियआलवणाइ भत्तं देंता य गेण्हंता ॥ १०१७ ॥**

**लहु गुरु लहुगा गुरुगा, सुद्धतवाणं च होइ पण्णवणा।**
**अह होंति अगीयत्था अन्नगणे सोहणं कुज्जा ॥ १०१८ ॥**

ते बहवः साधर्मिकाः कदाचित् **सर्वेऽपि गीतार्था** भवेयुः कदाचिद् गीतार्थ**मिश्राः** ।

तत्र यदि **जघन्येनैको गीतार्थः**, तत्राचार्यो गीतार्थः, शेषाः सर्वे अगीतार्था इति । य एको गीतार्थः प्रायश्चित्तस्थानमापन्नस्तस्य[स] एवाचार्यः कल्पस्थितः स एव चानुपारिहारिकः। यदि पुनर्बहवो गीतार्थाः प्राप्यन्ते यदि वा सर्वे गीतार्थाः तत एकं कल्पस्थितं कृत्वा बहवः पारिहारिका भवन्ति, तेषां च पारिहारिकाणामनुपारिहारिकाः कर्त्तव्याः, पारिहारिकैश्च परिहारतपसि व्यूढे अनुपारिहारिकाः परिहारतपः प्रतिपद्यन्ते, कृतपरिहारतपःकर्माणस्तु तेषामनुपारिहारिका भवन्ति। कल्पस्थितोऽपि परिहारतपो वहति, तस्याप्यनुपारिहारिक एको दातव्यः। यदि पुनराचार्यः परिहारतपोयोग्यं प्रायश्चित्तस्थानमापन्नो भवति, शेषास्तु सर्वेऽप्यगीतार्थाः ततः सोऽन्यगणं गत्वा परिहारतपः प्रतिपद्यते। **परिहारियेत्यादि**, परिहारिकस्य यदि शेषाः साधव **आलापनादिकं** कुर्वन्ति, आदिशब्दात्सूत्रवाचनादि-परिग्रहः, ततस्तेषां प्रायश्चित्तं चत्वारो **लघवः**। अथ **भक्तं ददति** तदा चत्वारो **गुरवः**। अथ पारिहारिकाद्भक्तं **गृह्णन्ति** तदा चत्वारो **लघवः** । यदि पुनः पारिहारिक एवाऽऽलापनादिकं करोति भक्तं वा ददाति गृह्णाति वा तदा सर्वत्र प्रत्येकं चत्वारो **गुरुकाः**। ये पुनर-गीतार्थास्तेभ्यः **शुद्धं तपो** दातव्यम्, अगीतार्थतया तेषां परिहारतपोऽनर्हत्वात्[1]। अथ



---

**१. तपो योग्यत्वा भावात् । अथ वा. मो. पु. मु. ॥**

कीदृशाः परिहारतपोऽर्हाः? कीदृशाश्च शुद्धतपोयोग्या? इति शिष्यप्रश्नावकाशमाशङ्क्य शुद्धतपसां शुद्धतपोयोग्यानां चशब्दात् परिहारतपोयोग्यानां च **प्रज्ञापना** प्ररूपणा कर्त्तव्या। अत्रापि तत्प्ररूपणायाः स्थानत्वात् सा च प्रागेव कृतेति, न भूयः क्रियते । **अथ** सर्वेऽ**प्यगीतार्था** भवेयुस्ततस्ते **अन्यस्मिन् गणे** गत्वा **शोधनं कुर्युः**, आलोचनां दत्त्वा शुद्धतपः प्रतिपद्येरन्निति भावः ॥ १०१७-१८ ॥

**सूत्रम्— परिहारकप्पट्ठिते भिक्खू गिलायमाणे अन्नयरं अकिच्चट्ठाणं पडिसेवित्ता आलोएज्जा, से य संथरेज्जा, ठवणिज्जं ठवइत्ता करणिज्जं वेयावडियं ॥ ५ ॥**

**से य नो संथरेज्जा, अणुपरिहारिएणं तस्स करणिज्जं वेयावडियं, से य संते बले अणुपरिहारिएणं कीरमाणं वेयावडियं साइज्जेज्जा, से य कसिणे तत्थेव आरुहेयव्वे सिया ॥ ५ ॥**

'परिहारकप्पट्ठिए भिक्खू गिलायमाणे' इत्यादिसूत्रद्वयम्, **परिहारकल्पस्थितो भिक्षु-ग्लायन्** ग्लानिमुपागच्छन् **अन्यतरदकृत्यस्थानं प्रतिसेव्य आलोचयेत्। स च** तेनाऽकृत्य-प्रतिसेवनेन **संस्तरेत्** परिहारतपोवहने समर्थो भवेत् ततः **स्थापनीयं स्थापयित्वा**

अनुपारिहारिकस्तस्य स्थापयितव्यः, तेन तस्य **करणीयं वैयावृत्त्य**मितीदमेकं सूत्रम्, द्वितीयं सूत्रमाह—'**से य न संथरेज्जा**' इत्यादि, **सः** अधिकृतः पारिहारिको ग्लायन्नकृत्य-प्रतिसेवनेनापि **न संस्तरेत्** न परिहारतपोयोग्यमनुष्ठानं विधातुमलम्, ततः **तस्यानुपारि-हारिकेण वैयावृत्त्यं करणीयम्**, तच्च यथा करणीयं तथा **भाष्यकृद्** दर्शयिष्यति। यदि पुनः **सत्यपि बलेऽनुपारिहारिकेण क्रियमाणं वैयावृत्त्यं साइज्जेज्ज**त्ति स्वादयेद् अनुमन्येत, तदपि प्रायश्चित्तं **कृत्स्नं तत्रैव** उह्यमाने परिहारतपसि अनुग्रह-कृत्स्नेनाऽऽ**रोपयितव्यं स्यादि**ति सूत्रद्वयसङ्क्षेपार्थः॥ व्यासार्थं तु **भाष्यकृत्**प्रतिपादयति—

**परिहारियाहिगारे, अणुवत्तंते अयं विसेसो उ।**
**आवण्ण दाण संथरमसंथरे चेव नाणत्तं ॥ १०१९ ॥**

**पारिहारिकाधिकारे** पारिहारिके प्रकृते **अनुवर्तमाने अयं** वक्ष्यमाणलक्षणो **विशेषः** पारिहारिकविधिगतः आभ्यां सूत्राभ्यामभिधीयते। को विशेषः? इत्यत आह-**आवन्न दाण संथरे**त्ति, परिहारतपःप्रायश्चित्तमापन्नस्य परिहारतपोदाने कृते सति तद्वहतो ग्लानिमुपगतस्य अन्यतरदकृत्यस्थानं प्रतिसेव्य तेन संस्तरतः **प्रथमसूत्रेण** विधिरभिधीयते, **द्वितीयसूत्रेण**

पुनस्तेनाप्य**संस्तरत** इति सूत्रद्वयस्य परस्परं पूर्वानन्तरसूत्राच्च **नानात्वं** विशेष इति ॥१०१९॥ अत्र पर आह—

**उभयबलं परियागं, सुत्तऽत्थाऽभिग्गहे य वण्णेत्ता ।**
**न हु जुज्जइ वोत्तुं जे, जं तदवत्थो वि आवज्जे ॥ १०२० ॥**

ननु तस्य पारिहारिकस्य पूर्व**मुभयं** धृति-संहननरूपं **बलं** वर्णितं **पर्यायश्च** गृहि-यतिपर्यायरूप उभयो वर्णितः, **सूत्राऽर्थाव**पि तस्य यावत्प्रमाणौ भवतस्तावत्प्रमाणौ वर्णितौ **अभिग्रहा** अपि च तस्य द्रव्य-क्षेत्रादिविषयाः पूर्वमभ्यस्ता व्यावर्णिताः, तत उभयं बलमुभयं पर्यायं सूत्रार्थावभिग्रहांश्च **वर्णयित्वा न हु** नैव युष्माकं **युज्यते वक्तुम्, जे** इति पादपूरणे, **यत् तदवस्थोऽपि** परिहारतपः प्रतिपन्नोऽप्याऽऽ**पद्यते** प्रायश्चित्तस्थानमिति, उभयबलादियुक्तस्य भूयः प्रायश्चित्तस्थानापत्त्यसम्भवात् ॥ १०२०॥ अत्र सूरिराह—

**दोहि वि गिलायमाणो, पडिसेवंते मएण दिट्ठंतो।**
**अलोयणा अफरुसे, जोहे वसहे य दिट्ठंतो ॥ १०२१ ॥**

**द्वाभ्याम्** आद्याभ्यां परीषहाभ्यां क्षुत्पिपासालक्षणाभ्यां **ग्लायन्** ग्लानिमुपगच्छन् गुरु-लाघवचिन्तया अनेषणादिकमपि प्रतिसेवेत तस्मिंश्च तथा **प्रतिसेवमाने दृष्टान्तो मृगेण** वेदितव्यः। स च तथा प्रतिसेव्याऽऽलोचयेत्। **आलोचनायां** च तेन दीयमानायां **अपरुषं**[1] भाषणीयम्। यदि पुनः परुषं भाषते ततः प्रायश्चित्तं चत्वारो गुरुका मासाः, आज्ञाऽनवस्था-मिथ्यात्व-विराधनाश्च दोषाः। अत्रार्थे योधान् दृष्टान्तीकुर्याद् , यदि वा **वृषभेण दृष्टान्तः** कर्तव्य इति। तत्र मृगदृष्टान्तोऽयम्—



एगो मिगो गिम्हकाले संपत्ते तण्हाए अभिभूतो पाणियत्थाणं गतो पासति कोदंडकंडधरियहत्थं वाहं । ततो मिगो इमं चिंतेइ-जइ न पियामि तो खिप्पं मरीहामि, पीते सुहंसुहेण मरिज्जामि, अवि य पीए कयाइ बलियत्तणगुणेण पलाइज्जा वि एवं चिंतिऊणं सो अन्नेणं ओगासेणं खिप्पं पाणीयं पाउं लग्गो। जाव सो वाहो तं ओगासं पावति ताव कइ वि पाणीयं घोट्टे करित्ता पलातो। एवं सो वि पारिहारिओ चिंतेइ— जइ न पडिसेवामि तो मरामि, अवूढे च पायच्छित्ते अन्नमवि कम्मनिज्जरणं न काहामि,

१. °रुषं परुषं न भा° वा. मो. पु. ॥

पडिसेविए पुण पच्छित्तं च जं च अवूढं तं च वहिस्सामि, अण्णं च कम्मनिज्जरणं चिरं जीवंतो करिस्सामि लवसत्तमदेवदिट्ठंतेणं, कयाइ सिज्झेजामि वि, जुत्तं एयं । जओ भणियं —

*अप्पेण बहुमेसेज्जा, एयं पंडियलक्खणं ।*
*सव्वासु पडिसेवासु, एयं अट्ठापयं विदू ॥ १ ॥ [ ]*

अत्रोत्तरार्द्धाक्षरगमनिका-सर्वासु प्रतिसेवासु प्रतिसेवनासु एतदनन्तरोदितमल्पेन च बह्वेषणमर्थपदं सार्थकमपवादपदं विदुर्जानन्ति पूर्वमहर्षयः ॥ १०२१ ॥ एनमेव मृगदृष्टान्तं भावयति—

**गिम्हे स मोक्खिएसुं, दट्ठुं वाहं गतो जलोयारो ।**
**चिंतेइ जइ न पाहं, तोयं तो मे धुवं मरणं ॥ १०२२ ॥**

**पाउं मरिउं पि सुहं, कयाइ वि सचेट्ठतो पलाएज्जा।**
**इति चिंतेउं पाउं, नोल्लेउं तो गतो वाहं ॥ १०२३ ॥**

**ग्रीष्मे** ग्रीष्मकाले **स** मृगो जलावतारे **गतो, व्याधं मोक्षितेषुं** मोक्षितो मोक्तुमिष्ट इषुर्बाणो येन स तथा तं **दृष्ट्वा चिन्तयति-यदि न पास्यामि तोयं** जलं **ततो मे ध्रुवं मरणम्,** अपि च-पानीयं **पीत्वा मर्तुमपि मे सुखम्** तथा **कदाचित्**पानीयपानेन **सचेष्टाकः** सन् **पलायेयम**पि **इति चिन्तयित्वा** पानीयमन्यस्मिन्नवकाशे **पीत्वा** वेगबलेन **व्याधं नुदित्वा** प्रेर्य **गतो** मृगः स्वस्थानम् ॥ १०२२-२३ ॥ उक्तो मृगदृष्टान्तः। सम्प्रति दार्ष्टान्तिकयोजनामाह—

**मिग सामाणो साहू, दगपाणसमा अकप्पपडिसेवा।**
**वाहोवमो य बंधो, पडिसेविय तं पणोल्लेइ ॥ १०२४ ॥**

**मृगसमानः** मृगसदृशः **साधुः उदकपानसमा** उदकाभ्यवहारसमा **अकल्पप्रतिसेवा** । **व्याधोपमः** व्याधस्थानीयः **बन्धः** कर्मबन्धः। **तं** कर्मबन्धमकल्प्यं **प्रतिसेव्य** मृग इव पानीयं पीत्वा व्याधं **प्रणुदति** प्रेरयति॥ १०२४ ॥ सम्प्रति आलोचनाया अपरुषभाषणे यो योधदृष्टान्त उपन्यस्तः स भाव्यते—

एगो राया, सो परबलेणं अभिभूतो । तेण जोहा संदिट्ठा-जुज्झह। ते जुज्झंता परबलेण पहारेहिं परितावििया भग्गा। ततो आगया अप्पणिज्जगस्स रण्णो पायमूलं तेण वायासरेहिं तज्जिया- तुब्भे मम वित्तिं खाइत्ता किं पहाराणां भीया पडिआगता, ताहे ते जोहा परबलममिभविउमसमत्था इमं चिंतंति-जुज्झंताण आउहपहारेहिं भग्गाणं पडिआगयाणं वायासरप्पहारा बंधण-मारणादीणि विसेसंति, कीस अप्पा न परिचत्तो? त्ति चिंतिऊणं तेहिं जोधेहिं राया बधिउं परबलरण्णो दिन्नो ॥ एनमेवार्थमाह—

**परबलपहारचइया, वायासरतोइया य ते पहुणा।**
**परपच्चूहासत्ता, तस्सेव हवंति घायाय ॥ १०२५ ॥**



योधाः **परबल**कृतैः **प्रहारैस्त्याजिताः** सङ्ग्रामाध्यवसायं मोचिताः, ततः प्रत्यागताः सन्तस्ते **प्रभुणा** स्वकीयेन राज्ञा **वाक्छरैस्तोदिताः** अतिशयेन पीडिताः **परप्रत्यूहाशक्ताः** परबलप्रतिक्षेपं कर्तुमसमर्था**स्तस्यैवा**ऽऽत्मीयस्य राज्ञो **व्याघाताय भवन्ति** ॥ १०३५ ॥ अण्णो राया परबलेणाभिभूतो तहेव जोहे पेसेइ । परबलपहारेहिं भग्गे पडिआगते प्रोत्साहयति । कथम् इत्याह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नामेण य गोत्तेण य, पसंसिया चेव पुव्वकम्मेहिं।**
**भग्गवणिया वि जोहा, जिणंति सत्तुं उदिण्णंपि ॥ १०२६ ॥**

ते **योधाः** प्रत्यागताः सन्तः तेन राज्ञा **नाम्ना** अभिधानेन **गोत्रेण** अन्वयेन तथा **पूर्वकर्मभिः** पूर्वकृतैरनेकैः संविधानैः **प्रशंसिताः** सम्यक् स्तुताः, ततस्तया प्रशंसया उत्कर्षं ग्राहिताः सन्तः **भग्नव्रणिता अपि** व्रणिताः सन्तो भग्ना भग्नव्रणिताः, राजदन्तादिदर्शनाद्भग्नशब्दस्य पूर्वनिपातः। तथाभूता अपि **उदीर्णमपि** प्रबलमपि **शत्रुं जयन्ति**॥ १०२६॥ उक्तो योधदृष्टान्तः। सम्प्रति दार्ष्टान्तिकयोजनामाह—



**इय आउर पडिसेवंत, चोदितो अहव तं निकायंतो ।**
**लिंगाऽऽरोवणचागं, करेज्ज घायं व कलहं वा ॥ १०२७॥**

**इति** एवं योधगतेन प्रकारेण **आतुरः** प्रथम-द्वितीयपरीषहाभिभूतत्वेनाऽऽकु[1]लीकृतोऽनेषणादि **प्रतिसेवमानः** सन् **चोदितः**, **अथवा** प्रतिसेवितं **निकाचयन्** आलोचयन्

१. °ली भूतो- वा मो. पु. ॥

For Private and Personal Use Only

चोदितः यथा- हे निधर्मन्! कीदृशं त्वया कृतम्? इत्यादि, स च तथापरुषभाषणेन रोषं ग्राहितः सन् तां प्रतिचोदनामसहमानो **लिङ्गस्य** वा रजोहरण-मुखवस्त्रिकारूपस्य **आरोपणस्य** वा प्रायश्चित्तस्य **त्यागं कुर्यात्।** यदि **वा घातं** चोदकस्य कुर्यात् । घात-ग्रहणमुपलक्षणम्, पिट्टनं वा लकुटादिभिर्जीविताद्व्यपरोपणं वा कुर्यात्, **कलहं वा** राटिरूपं विदध्यात्, कोपावेशवशतः सर्वस्याप्यकृत्यस्य सम्भवात् ।।१०२७॥

सम्प्रति वृषभदृष्टान्त उच्यते—

केदारेसु साली वाविता। ते य केयारा वतीए परिक्खित्ता कया। तेसिं एक्कं बारं कयं। अन्नया तेण बारेण वसभो पविट्ठो, केयारेसु साली चरइ। केयारसामी आगतो तं वसभं पविट्ठं पासिऊणं तं बारं ढक्कियं। ततो सरमादीहि तं वसभं परितावेति। ताहे तेणं परिताविएणं इमं कयं—

**जं पि न चिण्णं[1]तं तेण, चमढियं पेल्लियं च सहराए।**
**केयारेक्कदुवारे, पोयालेणं निरुद्धेणं ॥ १०२८ ॥**

१. =तदनेन- जेभाटी. ॥

**केदारसत्के** एकस्मिन् **द्वारे** सति तेन द्वारस्थगनतो **निरुद्धेन पोयालेण** साण्डवृषभेण **यदपि** तेषु केदारेषु **न चीर्णं तदपि** शरादिभिः परिताप्यमानेन इतस्ततः परिभ्रमता **चमढियं** ति विनाशितं **पेल्लियं च** इति पातितं च शीघ्रम्॥१०२८॥ एष दृष्टान्तः। अयमर्थोपनयः—

**तणुयम्मि वि अवराहे, कयम्मि अणुवायचोइएणेवं।**
**सेसचरणं पि मलियं, अपसत्थ पसत्थ बिइयं तु ॥ १०२९ ॥**

एवं वृषभदृष्टान्तगतेन प्रकारेण **स्तोकेऽप्यपराधे कृते** अनुपायेन उपायाभावेन यश्चोदितस्तेना**नुपायचोदितेना**धिकृतप्रतिसेवनातः **शेषं** यच्चा**रित्र**मवतिष्ठते तदपि लिङ्गत्यागादिना **मलिनं** क्रियते। इदम**प्रशस्त**मुदाहरणम्। **द्वितीयं** तूदाहरणं **प्रशस्तम्**। तच्चेदम्—

अन्नो केयारसामी वसभं केयारेसुं सालिं चरंतं पासिऊण दुवारस्स एगपासे ठिच्चा सद्दं करेति। ततो सो वसभो भीतो तेण दुवारेण निप्फडइ निप्फडंतो य लेट्ठुमादीहिं आहतो।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं तस्स खेत्तमलणादिया पुव्वुत्ता दोसा न जाया। एवं आयरिएण वि सो उवाएण चोएयव्वो, जहा न रुसति। ततो पुव्वुत्तो एगो वि दोसो न संभवति।।१०२९॥ व्याख्यातं प्रथमं सूत्रम्। अधुना द्वितीयं व्याचिख्यासुः प्रथमतः सूत्रेण सह सम्बन्धमाह—

**तेणेव सेविएणं, असंथरंतो वि संथरो जातो।**
**बितितो पुण [1]सेवंतो, अकप्पियं नेव संथरंति ॥ १०३० ॥**

अनन्तरसूत्राभिहितोऽ**संस्तरन्नपि तेनैव** प्रागुक्तेनाकल्पिकेन **सेवितेन** प्रतिसेवितेन **संस्तरः** विवक्षिताऽनुष्ठानवहनसमर्थो **जातः**। **द्वितीयः पुन**रधिकृतसूत्रोक्तो **अकल्पिक**-मपि प्रति**सेवमानः नैव** संस्तरति नैवाधिकृतानुष्ठानवहनसमर्थ उपजायते। ततोऽसंस्तरतो विधिख्यापनार्थमधिकृतसूत्रारम्भः ॥१०३०॥

**एमेव बीयसुत्ते, नाणत्तं नवरं असंथरंतम्मि।**
**करणं अणुपरिहारे, चोयग गोणीए दिट्ठंतो ॥ १०३१ ॥**

---

१. सेवित्ता- भाष्यप्रतिषु चूर्णौ च । तथा च चूर्णिः- 'अकप्पियं पडिसेवित्ता वि ण संथरिता ॥



For Private and Personal Use Only

यथा प्रागुक्तसूत्रेऽभिहितम् 'उभयबलं परियागं[गा.१०२०] इत्यादि **एमेव** अनेनैव प्रकारेणास्मिन्नप्यधिकृते **द्वितीये सूत्रे** वक्तव्यम्। **नवरमत्र नानात्वमिदम्-असंस्तरति** अकल्पिकप्रतिसेवनेनापि संस्तरणमप्राप्नुवति **करणमनुपरिहारिणः,** यत्र शक्नोति परिहारिकः कर्तुं तद्भणितः सन् करोत्यनुपरिहारिक इति भावः। **चोयग गोणीए दिट्ठंतो** इति पश्चाद् व्याख्येयम्ष॥१०३१॥ सम्प्रति यदनुपरिहारिणा कर्तव्यं तदाह—

**पेहा भिक्खग्गहणे, उट्ठंतनिवेसणे य धुवणे य।**
**जं जं न तरइ काउं, तं तं से करेइ बितिओ उ ॥ १०३२ ॥**

**प्रेक्षायां भिक्षाग्रहणे उत्तिष्ठति** उत्थानं कर्तुमारभमाणे **निवेशने धुवने** चानुपरिहारिणः, करणं भवतीति शेषः। इयमत्र भावना-यदि पारिहारिको भाण्डं प्रत्युपेक्षितुं न शक्नोति ततोऽनुपारिहारिकं ब्रूते 'प्रत्युपेक्षस्वेदं भाण्डमिति, ततोऽनुपारिहारिकस्तस्य भाण्डं प्रत्युपेक्षते, तथा यदि भिक्षानिमित्तं हिण्डितुं न शक्नोति ततो अभिधत्ते भिक्षामट, ततो भिक्षामटित्वा ददाति; एवमुत्थानं यदि कर्तुं न शक्तस्तत उत्थापयति; उपवेष्टुमशक्त-

मुपवेशयति; लेपकृदादिना खरण्टितं पात्रबन्धादि यदि प्रक्षालयितुमशक्तस्तदा तदपि प्रक्षालयति। अत्र "चोयग गोणीए दिट्ठंतो" [गा.१०३१] इत्यस्यावकाशः। चोदकः प्राह- यदि नाम तस्यानुपरिहारिणा कर्तव्यं ततः किमुक्तमात्रमेव करोति? सर्वं कस्मान्न कुरुते?। तथाहि- यथा भिक्षाहिण्डनार्थमुत्थातुमशक्नुवता परिहारिकेणोक्तः- 'मामुत्थापय' इति तमनुपारिहारिक उत्थापयति तथा भिक्षामटित्वा कस्माद्भक्तमानीय न ददाति? यथा वा भणितः सन् भिक्षामटित्वा भक्तमानीय तस्मै प्रयच्छति तथा भाण्डप्रत्युपेक्षणादिकमप्य-भणित एव कस्मान्न करोति? सूरिराह-गोण्यात्र दृष्टान्तः—

यथा कस्यापि गौर्वातादिना भग्नशरीरा, तामुपविष्टामुत्थातुमशक्नुवन्तीं पुच्छे गृहीत्वा गोनायक उत्थापयति। सा चोत्थिता सती स्वयमेव चारिं चरितुं याति। यदि पुनरसमर्था चारिचरणाय गन्तुं तदा चारिं पानीयं चानीय ददाति। एवं च तावत्करोति यावद्बलिष्ठोपजायते। एवं च पारिहारिकोऽपि **यद् यत्कर्तुं न शक्नोति तत्तत् से** तस्य **द्वितीयः** अनुपारिहारिकः **करोति**। यत्पुनः कर्तुमलं तत्स्वयमेवानिगूहितबल-वीर्यः करोति। एवं नाम तेन वीर्याचारोऽनुचीर्णो भवति॥ १०३२॥

सम्प्रति यदुक्तम्— "अणुपरिहारिएणं कीरमाणं वेयावडियं जं साएज्ज" [सू.६] त्ति, तत्र साइज्जणामाह—

[1]**जं से अणुपरिहारी, करेइ तं जइ बलम्मि संतंमि।**
**न निसेहइ सा साइज्जणा, उ तहियं तु सट्ठाणं ॥ १०३३ ॥**

**यत् से** तस्य परिहारिणोऽनुपरिहारी **करोति तद्यदि** तेन क्रियमाणं **सत्यपि बले,** अपिशब्दोऽत्रानुक्तोऽपि सामर्थ्याद् गम्यते। **न निषेधयति** न निवारयति, **सा** नाम **साइज्जणा** स्वादना। **तत्र** च तस्यां च स्वादनायां क्रियमाणायां प्रायश्चित्तं **स्वस्थानम्।** किमुक्तं भवति ? प्रथमोद्देशके येषु स्थानेष्वालापनादिषु लघव उक्तास्तेषु स्थानेष्वस्य गुरुका दातव्याः, अनुमननाऽध्यवसायस्यातिप्रमादहेतुत्वादिति ॥१०३३ ॥

**सूत्रम्— परिहारकप्पट्ठियं भिक्खुं गिलायमाणं णो कप्पइ तस्स गणावच्छेइयस्स**

---

१. एषा १०३३ गाथा जेभा. खंभा. प्रत्योः लाडनूं संस्करणे (गा.१०४७/१) च १०३० गाथानन्तरं वर्तते ॥



For Private and Personal Use Only

**गणओ णिज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं जाव ततो रोगायंकाओ विप्पमुक्को, ततो पच्छा तस्स अहालहुस्सए नामं ववहारे पट्ठवियव्वे सिया ॥ ६ ॥**

"परिहारकप्पट्ठियं भिक्खुं गिलायमाण" मित्यादि, अथास्य सूत्रस्य पूर्वसूत्रेण सह कः सम्बन्धः ? उच्यते—

**तवसोसियस्स वाओ, खुभेज्ज पित्तं व दोवि समगं वा।**
**सण्णऽग्गिपारणम्मी, गेलन्नमयं तु संबंधो ॥ १०३४ ॥**

**तपःशोषितस्य** घोरपरिहारतपसा शोषमुपगतस्य **वातः क्षुभ्येत,** यदि वा **पित्तम्** अथवा **द्वे अपि** वातपित्ते **समकं** क्षुभ्येयाताम्। ततो वातेन पित्तेन वा **सन्ने** विध्याते **अग्नौ पारणे** कृते सति **ग्लानत्व**मुपजायते। ततो ग्लानस्य सतो विधिख्यापनार्थमेतत्सूत्रमुपागतमि**त्येष** सूत्रस्य **सम्बन्धः** ॥१०३४॥ अनेन सम्बन्धेन आयातस्यास्य व्याख्या—

**परिहारकल्पस्थितं भिक्षुं ग्लायन्तं** यस्य सकाशमागतः **तस्य गणावच्छेदिनो न**

**कल्पते निर्यूहितुम्** अपाकर्तुं वैयावृत्त्याकरणादिना, किन्तु **अग्लान्या तस्य करणीयं वैयावृत्त्यं** तावद्यावत्स **रोगातङ्काद्विप्रमुक्तो** भवति। **ततः पश्चात्तस्य** परिहारिणो [अहा] **लहुस्सगत्ति** स्तोको **नाम व्यवहारः** प्रायश्चित्तं **प्रस्थापयितव्यो** दातव्यः **स्यादिति** सूत्रसङ्क्षेपार्थः॥ व्यासार्थं तु **भाष्यकृद्विवक्षुर्यैः** कारणैः स ग्लायति तान्यभिधित्सुराह—

**पढम-बिइएहिं न तरइ, गेलन्नेणं तवोकिलंतो वा।**
**निज्जूहणा अकरणं, ठाणं व न देइ वसहीए ॥ १०३५ ॥**

**प्रथम-द्वितीयाभ्यां** क्षुत्पिपासालक्षणाभ्यां परीषहाभ्यामभिभूतः सन् परिहारी ग्लायति, यदि वा ग्लानत्वेन अथवा **तपसा क्लान्तः** सन्, एतावता 'गिलायमाण'मिति पदं व्याख्यातम्। अधुना 'निज्जूहित्तए' इति व्याचिख्यासुराह-**निर्यूहणा** नाम वैयावृत्त्यस्या-**ऽकरणम्,** यदि वा **वसतौ** दोषाभावे यत्**स्थानं न ददाति** एषा निर्यूहणा, वैयावृत्त्या-करणादिना यत्तस्य अपाकरणं सा निर्यूहणेति भावः॥१०३५॥ यदुक्तम् "अगिलाए तस्स करणिज्जं" इति। तत्र गिलाप्रतिषेधेनाऽगिला ज्ञायते इति गिलाव्याख्यानार्थमाह—

**निववेट्ठिं व कुणंतो, जो कुणई एरिसा गिला होइ।**
**पडिलेहुट्ठवणाई, वेयावडियं तु पुव्वुत्तं ॥ १०३६ ॥**

**यो** नाम **नृपवेष्टिं** राजवेष्टिमिव **कुर्वन्** वैयावृत्यं **करोति एतादृशी भवति गिला** ग्लानिः। गिलायाः प्रतिषेधो अगिला, तया करणीयं वैयावृत्यम्, किं तद्? इत्याह- **प्रतिलेखनोत्थापनादिकं** भाण्डस्य प्रत्युपेक्षणमुपविष्टस्योत्थापनम्, आदिशब्दाद् भिक्षा-नयनादिपरिग्रहः। एतत्**पूर्वोक्तं वैयावृत्यम्** ॥१०३६॥ अत्र **निर्युक्तिविस्तरः**—

**परिहारि कारणम्मी, आगमे निज्जूहणम्मि चउगुरुगा।**
**आणाइया य दोसा, जं सेवति तं च पाविहिति ॥ १०३७ ॥**

**परिहारिणः कारणे** वक्ष्यमाणलक्षणे **आगमे** आगमने सति यदि **निर्यूहणा** अपाकरणं क्रियते तदा तस्य गणावच्छेदिनो निर्यूहितुः प्रायश्चित्तं **चत्वारो गुरुका** मासाः। तथा **आज्ञादयश्च** आज्ञा-ऽनवस्था-मिथ्यात्व-विराधनारूपाश्च तस्य **दोषाः**। तथा **यद्वै**यावृत्त्या-करणतः स्थानालाभेन वा **प्रतिसेवते** परिहारी **तच्च** तन्निमित्तमपि च प्रायश्चित्तं स **प्राप्नोती**ति ॥१०३७॥

सम्प्रति यैः कारणैः परिहारिण आगमनं भवति तान्यभिधित्सुराह—

**कालगतो से सहाओ, असिवे राया व बोहियभए वा।**
**एएहिं कारणेहिं, एगागी होज्ज परिहारी ॥ १०३८ ॥**

**से** तस्य परिहारिणः **सहायः** एकोऽनेको वा **कालगतः**, यदि वा साधूनामशिवमुपस्थितम्, अथवा **राजा** प्रद्विष्टः, **बोहियत्ति** म्लेच्छाः तद्भयं **वा** समुपजातम्, ततः साधूनां वृन्दस्फोट उपजायते, **एतैः कारणैः** स **परिहारी एकाकी भवेत्**। एकाकिनश्च सतः परिहारतपो न निर्वहति, विशेषतो ग्लायतस्तस्य आगमनमिति॥ १०३८॥

**[1]तम्हा कायव्वं से, कप्पट्ठियमणुपरिहारियं ठवेऊणं।**
**बितियपदे असिवादी, अगहिय-गहियम्मि आदेसो ॥ १०३९ ॥**

यस्मादेवं कारणे समागतस्तस्मात् से तस्य परिहारिणः प्रायश्चित्तपरिज्ञाननिमित्तं

१. तम्हा कप्पठि से, अणुपरिहारि च ठावित करेज्जा । - पु. प्रे. ।।

सकलगच्छसमक्षं **कल्पस्थितमनुपरिहारिणं** च **स्थापयित्वा कर्तव्यं** यत् करणीयम्। **द्वितीयपदे अशिवादिलक्षणे** अपवादे निर्यूहतापि परिहारिणं स गणावच्छेदी। अशिवादिभिश्च **गृहीता-ऽगृहीतविषये आदेशः** प्रकारश्चतुर्भङ्ग्यात्मकः ॥१०३९॥ तमेव प्रकारमाह—

**गहिया-ऽगहिए भंगा, चउरो न उ विसति पढमबितिएसु।**
**इच्छाए तइयभंगे, सुद्धो उ चतुत्थओ भंगो ॥ १०४० ॥**

**गृहीता-ऽगृहीते** गृहीता-ऽगृहीतविषये **भङ्गाश्चत्वारः**। तद्यथा—अशिवेन गच्छो गृहीतो न परिहारीति प्रथमो भङ्गः१, परिहारी गृहीतो न गच्छ इति द्वितीयः२, परिहार्यपि गृहीतो गच्छोऽपीति तृतीयः३, न गच्छो न परिहारीति चतुर्थः४। तत्र **प्रथमे द्वितीये** वा भङ्गे **न प्रविशति,** प्रथमभङ्गे परिहारिणो द्वितीयभङ्गे वास्तव्यानामनर्थसम्भवात्। **तृतीयभङ्गे** पुन**रिच्छया** प्रवेशः। यदि सदृशेनाशिवेन गृहीतः परिहारी गच्छश्च ततः प्रवेश्यते। अथ विसदृशेन एकः सोममुखीभिरपरः कालमुखीभी रक्तमुखीभिर्वा तदा न प्रवेश्यते, अन्यतरस्यानर्थसम्भवात् । यस्तु **चतुर्थो भङ्ग** स **शुद्धः** एव॥ १०४०॥

सम्प्रति प्रथमादिषु भङ्गेषु प्रतिषिद्धमपि प्रवेशनं कुर्वतः प्रायश्चित्तविधिमाह—

**अइगमणे चउगुरुगा, साहू [१]सागारि गामबहि ठाति।**
**कप्पट्ठ सिद्ध सन्नी, साहु गिहत्थं व पेसेति॥ १०४१ ॥**

प्रथमादिषु प्रतिषेधमतिक्रम्य गमनं प्रवेशन**मतिगमनं** तस्मिन् प्रायश्चित्तं **चतुर्गुरुकाः** चत्वारो गुरुका मासाः, आज्ञा-ऽनवस्था-मिथ्यात्व-विराधनाश्च दोषाः। तथा यदि प्रथमादिषु भङ्गेषु प्रतिषिद्धेऽपि प्रवेशने कृते **साधु**रेकोऽपि कालं करोति तदा चरमं पाराञ्चितं नाम प्रायश्चित्तम्। अथ **शय्यातरस्य** कालकरणं ततश्चत्वारो गुरुकाः। यत एवं दोषाः एवं च प्रायश्चित्तमतः परिहारिकेण **ग्रामस्य बहिः स्थित्वा** यदि **कल्पस्थकं** पश्यति यदि वा **सिद्ध**त्ति सिद्धपुत्रम् अथवा **संज्ञिनं** श्रावकं **साधुं** वा विचारादिविनिर्गतं **गृहस्थं वा** अन्यं ततः सन्देशं कथयित्वा **प्रेषयति**। यथा- गत्वा साधूनामाचक्ष्व, बहिः प्रव्रजितो युष्मान् द्रष्टुकामस्तिष्ठति। स तथा प्रेषितः साधूनामाख्याति॥ १०४१॥

१. सागारिय चियत्तणेण वहि - जेभा. खंभा. ।

ततः किम्? इत्याह—

**गंतूण पुच्छिऊणं, तस्स य वयणं करेंति न करेंति।**
**एगाऽऽभोगण सव्वे, बहि ठाणं वारणं इयरे ॥ १०४२ ॥**

ग्रामाभ्यन्तरवर्तिनः साधवः परिहारिणः समीपं **गत्वा पृच्छन्ति**— निराबाधं भवतो वर्तते?। तत्र यदि ब्रूते 'गृहीतोऽहमशिवेन' इति। तदा **तस्स य वयणं करेंति न करेंति**त्ति **तस्य** परिहारिकस्य **वचनं** प्रवेशलक्षणं ते **कुर्वन्ति** यदि वा **न कुर्वन्ति**। किमुक्तं भवति? प्रथमे द्वितीये वा भङ्गे न कुर्वन्ति, तृतीयभङ्गे चतुर्थे च कुर्वन्ति। तृतीये भङ्गे यतनामाह— **एगाऽऽभोगणे**त्यादि, तृतीये भङ्गे यदि सदृशमशिवं तत एकस्मिन्नुपाश्रये तं कुर्वन्ति। अथ विसदृशं तर्हि नैकस्मिन्नुपाश्रये स्थापनीयः अन्यतरस्यानर्थसम्भवात्, किन्तु भिन्ने, तस्मिन्नप्यसम्बद्धे। अथ व्यवच्छिन्नं गृहं न किमपि लभ्यते ततः सम्बद्धेऽपि गृहे पृथग् द्वारे स्थापनीयः। **एगाभोगण सव्वे**त्ति **एकस्य** साधोः **आभोगनं**- प्रतिजागरणम्, किमुक्तं भवति? एकः साधुस्तं ग्लायन्तं परिहारिणं प्रतिजागर्ति, शेषाः **सर्वे**ऽपि साधवः तत्प्रायोग्यमौषधादिकं याचन्ते। **बहि ठाण**मिति यदि पुनः परिहारिणो वसतावानयने

शय्यातरोऽप्रीतिं करोति तदा ग्रामस्य **बहिर्वसतेः** दूरे वा योऽन्यो वाटकादिः तत्र परिहारिणः **स्थानं** कर्तव्यम्। **वारणं इयरे** इति अथ सागारिको यस्तं प्रतिचरति यश्च तत्र गत्वा शरीरवार्त्तां पृच्छति तस्मिन् **इतरस्मिन् वारणं** प्रतिषेधं करोति। यथा-यूयमशिवगृहीतस्य समीपं गच्छत आगच्छत, एवं च तेन सह सम्पर्कं कुर्वाणा अस्माकमप्यशिवं सञ्चारयिष्यथ तस्माद् मा कोऽपि युष्मन्मध्ये तत्र यासीत् । तदा यतना कर्तव्या। सा चाग्रे स्वयमेव वक्ष्यते ॥१०४२॥ साम्प्रतम् ''एगाभोयण सव्वे'' इति व्याख्यानयन्नाह—

**वोच्छिन्नघरस्सासइ, पिहदुवारे वसंति संबद्धे।**
**एगो तं पडिजग्गति, जोग्गं सव्वेवि झोसंति ॥ १०४३ ॥**



**व्यवच्छिन्नगृहस्य** असम्बद्धस्योपाश्रयस्य **असति** अभावे **सम्बद्धे**ऽप्युपाश्रये **वसन्ति**। कथम्भूते? इत्याह-**पृथग्द्वारे** विभिन्नद्वारे। तत **एकः** तमिति तं परिहारिणं **प्रतिजागर्ति** प्रतिचरति, शेषाः **सर्वेऽपि** साधवो **योग्यम्** औषधादिकं **झोषन्ति** मार्गयन्ति। आभोगनं मार्गणं झोषणमिति ह्येकार्थाः उक्तं च—'**आभोगणंति वा मग्गणंति वा झोसणंति वा एगट्ठं**' इति ॥१०४३॥ सम्प्रति 'बहिठाण'मिति व्याख्यानयति—

**सागारिय अचियत्ते, बाहिं पडियरण तह वि नेच्छंते।**
**अद्दिट्ठे कुणइ एगो, न पुणो बेंति दिट्ठम्मि ॥ १०४४ ॥**

**सागारिकः** शय्यातरस्तस्य **अचियत्ते** अप्रीतौ ग्रामस्य **बहिर्वसतेर्दूरे** वा योऽन्य उपाश्रयस्तं याचित्वा तं परिहारिणं विमुच्य एकः साधुः **प्रतिचरति**। 'वारणं इयरे' [गा.१०४२] इत्यस्य व्याख्यानमाह—'**तहवि नेच्छंते**' इत्यादि, **तथापि** एवमपि यदि शय्यातरो **नेच्छति** यथा- 'किमिति यूयं गमनाऽऽगमनकरणेनास्माकमप्यशिवं सञ्चारयथ तस्मान्मा कोऽपि तत्र गच्छेद्' इति तदा **एकः** साधुः यथा शय्यातरो **न पश्यति** न जानाति वा तथा प्रतिचरति। यदि पुनः कथमपि शय्यातरेण स्वयं दृष्टो भवेद् ज्ञातो वा ततो वदेत् यथा 'यूयं वारिता अपि न तिष्ठथ' तदा तेन **दृष्टे**, उपलक्षणमेतत्, ज्ञाते वा वारिते चैवं वक्तव्यम् **न भूयो** गमिष्यामः क्षमस्वैकं वारमिति। अथ सागारिकस्य गाढमप्रीतिकरणं ततः सर्वेऽप्यन्यत्र वसतिं याचित्वा अवतिष्ठन्ते॥१०४४॥

**बहुपाउग्ग उवस्सय, असती वसहा दुवेऽहवा तिण्णी।**
**कइयवकलहेणऽण्णहिं, उप्पायण बाहिं संछोभो ॥ १०४५ ॥**

**बहुप्रायोग्योपाश्रयस्य असति** अभावे, किमुक्तं भवति? यत्र सर्वे साधवो मान्ति स उपाश्रयोऽन्यो न लभ्यते, ततो **द्वौ वृषभौ अथवा त्रयः कैतवेन कलहं** कृत्वा अन्यत्र वसत्यन्तरे गच्छन्ति। तत्र स्थिताः परिहारिणः परिचेष्टां कुर्वन्ति। **अन्यतरकै**रपि औषधादीना**मुत्पादनं** कृत्वा औषधादीनि याचित्वा **बहिः सङ्क्षोभः** क्रियते- बहिः परिहारिणः समीपे प्रेष्यते। येऽपि च कैतवकलहं[1] कृत्वा न विनिर्गतास्तेऽप्यभ्यन्तरकैः सह विविक्तप्रदेशे मिलित्वा पारिहारिकयोग्यं गृह्णन्ति॥ १०४५॥

सम्प्रति तद्गतप्रतिचरणविधिमाह—

**ते तस्स सोहियस्स य, उव्वत्तणसंतरं च धोवेज्जा।**
**अच्छिक्कोवहि पेहे, अच्चियलिंगेण जा पउणो ॥ १०४६॥**



**ते** अभ्यन्तरकाः कलहव्याजेन विनिर्गता**स्तस्य शोधितस्य** प्रतिपन्नपरिहारतपः-प्रायश्चित्तस्य **उद्वर्तनम्,** उपलक्षणमेतत् परावर्तनमौषधादिप्रदानं च वस्त्रान्तरितेन हस्तेन

१. कलहेन विनि॰ पुण्यवि. प्रे.।

कुर्वन्ति। वस्त्राणि च तस्य सत्कानि **सान्तरम्** एकान्तरितानि गृह्णाति, सोऽन्यस्मै समर्पयति, सोऽप्यन्यस्मै इति अन्तरितं, **धावयन्ति** प्रक्षालयन्ति। **उपधिम**पि तस्य **प्रत्युपेक्षन्ते अच्छिक्का** अस्पृष्टाः सन्तः, बहुवचनप्रक्रमेऽप्येकवचनं गाथायां प्राकृतत्वात्, वचन-व्यत्ययोऽपि हि प्राकृते यथालक्ष्यं भवतीति। एवं तावत् प्रतिजाग्रति यावत्स प्रगुणो भवति। राजप्रद्वेषे तु यद् यत्रा**ऽर्चितं लिङ्गं** तेन **लिङ्गेन यावत् प्रगुणो** भवति तावत्प्रति-जाग्रति ॥१०४६ ॥

सम्प्रति "तस्स अहालघुस्सगे नामं ववहारे पट्ठवेयव्वे सिया" इति सूत्रं व्याख्यानयन् व्यवहारं यथालघुकं प्रस्थापनं च पर्यायैर्व्याख्यानयति—

**[१]ववहारो आलोयण, सोही पच्छित्तमेव एगट्ठा।**
**थोवो उ अहालहुसो, पट्ठवणा होइ दाणं तु ॥ १०४७ ॥**



---

१. तथा लाडनूसंस्करणे पृ. १०५ टि. २२ एवं अ. स. प्रतिषु १०४१७ गाथा स्थाने एषा गाथोपलभ्यते— थोवे उ अधा लहुसो, ववहारो रोवणा य पच्छित्तं । सोहि त्ति य एगट्ठं, पट्ठवणं होति दाणं तु ॥ जेभा. खंभा प्रत्योरपि प्राय एवम्।।

**व्यवहार आलोचना शोधिः प्रायश्चित्तमित्येकाऽर्थाः**। तथा **यथालघुको** नाम **स्तोकः**, तथा प्रस्थापयितव्यः इति **प्रस्थापना दानं** ततो दातव्य इत्यर्थो वेदितव्यः ॥१०४७॥ यथालघुस्वको व्यवहारः प्रस्थापयितव्य इत्युक्तं ततो यथालघुकादिव्यवहारप्ररूपणार्थमाह—

**गुरुओ गुरुयतरागो, अहागुरूगो य होइ ववहारो।**
**लहुओ लहुयतरागो, अहालहू होइ ववहारो ॥१०४८॥** [बृ. क. भा. ६२३५]

**लहुसो लहुसतरागो अहालहूसो य होइ ववहारो।**
**एएसिं पच्छित्तं, वोच्छामि अहाणुपुव्वीए ॥ १०४९ ॥** [बृ. क. भा. ६२३६]

**व्यवहार**स्त्रिविधः, तद्यथा **गुरुको** लघुको लघुस्वकश्च। तत्र यो गुरुकः स त्रिविधः, तद्यथा गुरुको **गुरुतरको यथागुरुकश्च**। लघुकोपि त्रिविधः, तद्यथा— **लघुः लघुतरो यथालघुश्च** ॥१०४८॥ लघुस्वकोऽपि त्रिविधः, तद्यथा— **लघुस्वो लघुस्वतरको यथालघुस्वकश्च**। एतेषां व्यवहाराणां **यथानुपूर्व्या** यथोक्तपरिपाट्या **प्रायश्चित्तं वक्ष्यामि**।

किमुक्तं भवति?- एतेषु व्यवहारेषु समुपस्थितेषु यथापरिपाट्या प्रायश्चित्तपरिमाणम् अभिधास्ये ॥१०४९॥ यथाप्रतिज्ञातमेव करोति।

**गुरुगो य होइ मासो, गुरुगतरागो भवे चउम्मासो।**
**अहगुरुगो छम्मासो, गुरुगयपक्खम्मि पडिवत्ती ॥ १०५०॥**

[बृ. क. भा. ६२३७]

**गुरुको** नाम व्यवहारः मासः मासपरिमाणः, गुरुके व्यवहारे समापतिते **मास** एकः प्रायश्चित्तं दातव्य इति भावः। एवं **गुरुतरको भवति चतुर्मासः** चतुर्मासपरिमाणः। **यथागुरुकः षण्मासः** षण्मासपरिमाणः। एषा **गुरुकपक्षे** गुरुकव्यवहारे त्रिविधे यथाक्रमं प्रायश्चित्त**प्रतिपत्तिः** ॥१०५०॥

सम्प्रति लघुक-लघुस्वकव्यवहारविषयं प्रायश्चित्तपरिमाणमाह—

**तीसा य पणवीसा, वीसा पन्नरसेव य[१]।**
**दस पंच य दिवसाइं, लहुसगपक्खम्मि पडिवत्ती ॥ १०५१ ॥**

[बृ. क. भा. ६२३८]

१. अत्र १०५१ गाथाया द्वितीयचरणेऽनुष्टुप्छन्दः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लघुको व्यवहारः **त्रिंशः** त्रिंशद्दिवसपरिमाणः। एवं लघुतरकः **पञ्चविंशतिदिनमानः**, यथालघुस्वको **विंशतिः** विंशतिदिनमानः। एषा लघुकव्यवहारे त्रिविधे यथाक्रमं प्रायश्चित्त-प्रतिपत्तिः। तथा लघुस्वको व्यवहारः **पञ्चदश** पञ्चदशदिवसप्रायश्चित्तपरिमाणः, एवं लघुस्वतरको **दशदिवसमानः** यथालघुस्वकः **पञ्च दिवसानि** पञ्चदिवसप्रायश्चित्तपरिमाणः। एषा **लघुस्वकव्यवहारपक्षे** प्रायश्चित्तपरिमाण**प्रतिपत्तिः** ॥१०५१॥ अथ कं व्यवहारं केन तपसा पूरयति? [इति] प्रतिपादनार्थमाह—

**गुरुगं च अट्ठमं खलु, गुरुगतरागं च होइ दसमं तु।**
**अहगुरुग दुवालसगं, गुरुगपक्खम्मि पडिवत्ती ॥ १०५२ ॥**

[बृ. क. भा. ६२३९]

**गुरुकं** व्यवहारं नाम मासपरिमाणम् **अष्टमं** कुर्वन् पूरयति। किमुक्तं भवति ?- गुरुकं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यवहारं मासपरिमाणमष्टमेन वहति। तथा **गुरुतरकं** चतुर्मासप्रमाणं व्यवहारं **दशमं** कुर्वन् पूरयति, दशमेन वहतीत्यर्थः। **यथागुरुकं** षण्मासप्रमाणं व्यवहारं **द्वादशकं** कुर्वन्, द्वादशमेनेत्यर्थः, पूरयति। एषा **गुरुकपक्षे** गुरुकव्यवहारपूरणविषये तपः**प्रतिपत्तिः** ॥ १०५२ ॥

**छट्ठं च चउत्थं वा, आयंबिल एगट्ठाण पुरिमड्ढं।**
**निव्वीयं दायव्वं, अहालहुस्सम्मि[1] सुद्धो वा ॥ १०५३ ॥** [बृ.क.भा. ६२४०]

लघुकं व्यवहारं त्रिंशद्दिनपरिमाणं **षष्ठं** कुर्वन् पूरयति। लघुतरकं पञ्चविंशतिदिवसपरिमाणं व्यवहारं **चतुर्थं** कुर्वन्, यथालघुकं व्यवहारं विंशतिदिवसमान**माचाम्लं** कुर्वन्, एषा लघुकत्रिविधव्यवहारपूरणे तपःप्रतिपत्तिः। तथा [2]लघुस्वकव्यवहारं पञ्चदशदिवसपरिमाण**मेकस्थानकं** कुर्वन् पूरयति। लघुस्वतरकव्यवहारं दशदिवसपरिमाणं **पूर्वार्धं** कुर्वन्, यथालघुस्वकव्यवहारं पञ्चदिनपरिमाणं **निर्विकृतिकं** कुर्वन् पूरयति। तत एतेषु गुरुक-गुरुतरकादिषु व्यवहारेष्वनेनैव क्रमेण तपो **दातव्यं**, यदि वा **यथालघुस्वके**

---

१. °लहुसगम्मि-भाष्ये । २. लघुक स्वभावव्य° वा. मो. पु. ॥



For Private and Personal Use Only

व्यवहारे प्रस्थापयितव्ये स प्रतिपन्नव्यवहारतपःप्रायश्चित्त एवमेवाऽऽलोचनाप्रदानमात्रतः एव **शुद्धः** क्रियते, कारणे यतनया प्रतिसेवनात् ॥१०५३॥

**सूत्रम्— अणवट्ठप्पं भिक्खुं [१]गिलायमाणं नो कप्पइ तस्स गणावच्छेइयस्स निज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं, जाव तओ रोगायंकाओ विप्पमुक्को, तओ पच्छा तस्स अहालहुस्सए नामं ववहारे पट्ठवियव्वे सिया ॥ ७ ॥**

'अणवट्ठप्पं भिक्खुं गिलायमाण'मित्यादि। अथास्य सूत्रस्य कः सम्बन्ध उच्यते—

**पच्छित्तं खलु पगयं, निज्जूहण वाऽणुवत्तए जोगो।**
**होति तवो छेदो वा, गिलाणतुल्लाहिगारो वा ॥ १०५४ ॥**

**योगः** सम्बन्धः पूर्वसूत्रेण सहास्य सूत्रस्यायं भवति-**प्रायश्चित्तं खलु प्रकृतम्** अधिकृतम्, ततः प्रायश्चित्तप्रस्तावादधिकृतस्याप्यनवस्थाप्यसूत्रस्यावकाशः। अथवा प्राक्तन-सूत्रेषु पारिहारिक उक्तः, पारिहारिकस्य गच्छसामाचार्या निर्यूहणं ततो**ऽनुवर्तते। निर्यूहण**-मिति निर्यूहणप्रस्तावादनवस्थाप्यस्यापि निर्यूहस्य विधेः प्ररूपणा यदि वा **तवो छेदो वे**ति

---

१. **गिलाय° तह चेव जाव ववहारे पट्ठवेयव्वे सिया जे. खं. सं. ॥**

प्राक् तपोर्हं प्रायश्चित्तं प्रतिपन्नस्य सूत्रमुक्तम्, इदानीं छेदार्हं प्रतिपन्नस्य वक्तव्यम्। छेदश्च द्विधा—पर्यायव्यवच्छेदो मण्डलीव्यवच्छेदश्च। ततो मण्डल्या व्यवच्छिन्नमनवस्थाप्यमपेक्ष्याधिकृतसूत्रस्योपनिपातः। अथवा पूर्वसूत्रे ग्लायतो विधिरुक्तः अनेनापि ग्लायतो विधिरुच्यते इत्यनेन सम्बन्धेनायातस्यास्य व्याख्या—

**अनवस्थाप्यं** नवमप्रायश्चित्तप्रतिपन्नं **भिक्षुं ग्लायन्तं न कल्पते** यस्य समीपमागतस्तस्य **गणावच्छेदिनो निर्यूहितुं** निराकर्तुम्, किन्तु तस्य **अगिलया** राजवेष्टिमिवाननुमन्यमानेन सर्वज्ञादेशः इति बुद्ध्या कर्मनिर्जरणनिमित्तं **तस्य करणीयम् वैयावृत्त्यं** तावद् **यावद् रोगातङ्काद् विप्रमुक्तो** भवति। **ततः पश्चात्तस्य** प्रगुणीभूतस्य सतो **यथालघुस्वको** यथोदितस्वरूपो **व्यवहारः** प्रायश्चित्तं **प्रस्थापयितव्यो** दातव्यः **स्यात्** ॥

**सूत्रम्— पारंचियं भिक्खुं गिलायमाणं नो कप्पति तस्स गणावच्छेदितस्स निज्जूहित्तए अगिलाए तस्स करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्को, ततो पच्छा तस्स अहालहुस्सए ववहारे पट्ठवियव्वे सिया।** इति ॥ ८ ॥

एवं 'पारंचियं भिक्खुं' अथास्य सूत्रस्य पूर्वसूत्रेण सह कः सम्बन्ध? उच्यते—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सगणे गिलायमाणं, कारणपरगच्छमागयं वावि।**

**मा हु न कुज्जा निज्जूहगो त्ति इइ सुत्तसंबंधो ॥ १०५५ ॥**

यथा अनवस्थाप्यस्य कर्तव्यं तथा प्रतिपन्नपाराञ्चितप्रायश्चित्तस्यापि, न पुनरेषः **निर्यूहितः** निष्काशित इति कृत्वा **स्वगणे ग्लायन्तं** रोगातङ्कवशतो ग्लानिमुपगच्छन्तम् यदि **वा** प्रागुक्तैरशिवादिभिः **कारणैः परगच्छमागतं मा हुः** निश्चितं वैयावृत्यविषयं **न कुर्याद्** न कार्षीत्, किन्तु तस्यापि वैयावृत्त्यमवश्यमगिलया कर्तव्यम्। तत्र स्वगणे क्षेत्रबहिःस्थितस्याऽऽचार्यः स्वयमुदन्तं वहति, परगणेऽपि कारणवशादायातस्य तदीय आचार्यः करोति यथासूत्रं वैयावृत्त्यम्, इत्येषः पूर्वसूत्रेण सहास्य **सूत्रस्य सम्बन्धः** ॥१०५५॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या कर्तव्या। सा च प्राग्वत्। साम्प्रतमनवस्थाप्य-पाराञ्चितयोः स्वरूपमतिदेशत आह—

**अणवट्ठो पारंची, पुव्वं भणितो इमं तु णाणत्तं।**

**कायव्व गिलाणस्स उ, अकरणे गुरुगा य आणादी ॥ १०५६ ॥**



For Private and Personal Use Only

**अनवस्थः** अनवस्थाप्यः **पाराञ्ची** पाराञ्चितः **पूर्वं** **कल्पाध्ययने** **भणितः**। **इदं** **तु** वक्ष्यमाणं **नानात्वम्**- तत्र ग्लानस्य सतश्चिन्ता न कृता, अत्र तु क्रियते। कथम्? इत्याह— **ग्लानस्य** सतो गणावच्छेदिना आचार्येण च यथासूत्रं वैयावृत्त्यं **कर्त्तव्यम्**। यदि पुनर्न कुरुते ततो **अकरणे** चत्वारो **गुरुकाः** गुरुमासाः प्रायश्चित्तम्। तथा **आज्ञादय** आज्ञा-ऽनवस्था-मिथ्यात्वविराधनादोषाः ॥१०५६॥

सम्प्रति पाराञ्चितं प्रत्याचार्यस्य वैयावृत्त्यकरणे शिक्षामाह—

**ओलोयणं गवेसण, आयरिओ कुणति सव्वकालं पि।**
**उप्पण्णे कारणम्मी, सव्वपयत्तेण कायव्वं ॥ १०५७ ॥**

**अवलोकनं** निरीक्षणं क्षेत्रबहिःस्थितस्य पाराञ्चितस्य, **गवेषणं** तद्योग्यस्य भक्तपानादेः, **आचार्यः** सर्वकालमपि यावत् पाराञ्चितावस्थायाः कालस्तावन्तं **सकलमपि** **कालं** यावत्करोति। **उत्पन्ने** **कारणे** ग्लानत्वादिलक्षणे पुनः **सर्वप्रयत्नेन** **कर्तव्य**-माचार्येण ॥१०५७॥

**जो उ उवेहं कुज्जा, आयरितो केणई पमादेणं।**
**आरोवणाउ तस्सा, कायव्वा पुव्वनिद्दिट्ठा ॥ १०५८ ॥**

**यः** पुनः **आचार्यः** किमपि जनव्याक्षेपादिना '**प्रमादेन उपेक्षां कुरुते** ततः **तस्य आरोपणा** प्रायश्चित्तारोपणा **पूर्वनिर्दिष्टा कर्तव्या,** चत्वारो गुरुकास्तस्मै प्रायश्चित्तं दातव्यमिति भावः ॥ १०५८॥

**सूत्रम्— खित्तचित्तं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेइयस्स निज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं, जाव रोगायंकाओ विप्पमुक्को, तओ पच्छा तस्स अहालहुयस्सए नामं ववहारे पट्ठवियव्वे सिया ॥ ९॥**

इति "खित्तचित्तं [भिक्खूं] गिलायमाण"मित्यादिसूत्रम्। अथास्य सूत्रस्य कः सम्बन्ध? उच्यते—



**घोरम्मि तवे दिन्ने, भएण सहसा महविज्ज खित्तो उ।**
**गेलण्णं वा पगयं, अगिलाकरणं च संबंधो ॥ १०५९ ॥**

**घोरे** रौद्रे परिहारादिरूपे **तपसि दत्ते भयेन सहसा भवेत् क्षिप्तः** क्षिप्तचित्तः,

अपहृतचित्त इत्यर्थः। अथवा **ग्लान्यं प्रकृतम्,** क्षिप्तचित्तोऽपि ग्लानकल्पः, ततस्तस्यापि **अगिलया** यथोक्तस्वरूपया **कर्तव्यम्।** इति तत्प्रतिपादनार्थमेष सूत्रोपनिपातः, इत्ययं पूर्वसूत्रेण सहास्य **सम्बन्धः** ॥१०५९॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या सा च प्राग्वत् । सम्प्रति क्षिप्तचित्तप्ररूपणार्थमाह—

**[१] लोइय लोउत्तरिओ, दुविहो खित्तो समासतो होइ।**
**कह पुण हवेज्ज खित्तो?, इमेहिं सुण कारणेहिं तु ॥ १०६० ॥**

**समासतः** सङ्क्षेपतः **द्विविधः** द्विप्रकारः **क्षिप्तो भवति।** तद्यथा-**लौकिको लोकोत्तरिकश्च।** तत्र लोके भवो लौकिकः, अध्यात्मादित्वादिकण्। एवं लोकोत्तरे भवो लोकोत्तरिकः। अथ **कथं** केन प्रकारेण **पुनः क्षिप्तः** क्षिप्तचित्तो **भवेत्?** सूरिराह-**शृणु एभिः** वक्ष्यमाणैः **कारणैर्भवति** ॥१०६०॥ तान्येव कारणान्याह—

**रागेण वा भयेण व, अहवा अवमाणितो नरिंदेण।**
**एएहिं खित्तचित्तो, वणियादि परूविया लोए ॥ १०६१ ॥**

[बृ.क.भा. ६१९५]

१. एषा १०६० गाथा जेभा. खंभा. P अ. स. प्रतिषु नास्ति ॥

**रागेण वा** यदि वा **भयेन अथवा नरेन्द्रेण** प्रजापतिना, उपलक्षणमेतत्, सामान्येन वा प्रभुणा **अपमानितः** अपमानं ग्राहितः, **एतैः** खलु कारणैः **क्षिप्तचित्तो** भवति। ते च **लोके** उदाहरणत्वेन **प्ररूपिता वणिगादयः**। तत्र रागेण क्षिप्तचित्तो यथा वणिग्भार्या। तथाहि—काचिद्वणिग्भार्या भर्तारं मृतं श्रुत्वा क्षिप्तचित्ता जाता ॥ १०६१ ॥ भयेनापमानेन च क्षिप्तचित्तत्वे उदाहरणान्याह—

**भयतो सोमिलबडुओ, सहसोत्थरितो व संजुयादीसु।**
**धणहरणेण पहूण व, विमाणितो लोइया खित्ते ॥ १०६२ ॥**

[बृ.क.भा. ६१९६]

**भयतः** भयेन क्षिप्तचित्तो यथा **गजसुकुमालमारको जनार्दनभयेन सोमिल**नामा **बटुकः** ब्राह्मणः। अथवा **संयुगादिषु** संयुगं संग्रामस्तत्र, आदिशब्दात् परबलधाटीसमापतनादिपरिग्रहः, तैर्गाथायां सप्तमी तृतीयार्थे। **सहसा** अतर्कितः अवस्तृतः समन्ततः

परिगृहीतो भयेन क्षिप्तचित्तो भवति, स च प्रतीत एव। भयेनोदाहरणमुक्तम्। सम्प्रत्यपमानत आह- **प्रभुणा वा** नरेन्द्रेण **धनहरणेन** समस्तद्रव्यापहरणतः **विमानितः** अपमानितः क्षिप्तो भवति । एवमादिकानि **लौकिकान्युदाहरणानि क्षिप्ते** क्षिप्तचित्त-विषयाणि ॥१०६२॥

सम्प्रति लोकोत्तरिकान्यभिधित्सुराह—

**रागम्मि रायखुड्डो, जड्डादि तिरिक्ख चरियवायम्मि।**
**रागेण जहा खित्तो, तमहं वोच्छं समासेण ॥ १०६३ ॥**

[बृ.क.भा. ६१९७]

**रागे** सप्तमी तृतीयार्थे, रागेण क्षिप्तचित्तो यथा **राजक्षुल्लकः** राजपुत्रः क्षुल्लको राज-क्षुल्लकः शाकपार्थिवादिदर्शनाद् मध्यपदलोपी समासः। भयेन यथा **जड्डादीन्** हस्तिप्रभृतीन् **तिरश्चो** दृष्ट्वा। अपमानतो यथा **चरकेण** सह **वादे** पराजितः। तत्र **रागेण यथा** राजक्षुल्लको यः **क्षिप्तचित्तो**ऽभवत्त**मह**ं तथा **समासेन वक्ष्ये**॥१०६३॥ यथाप्रतिज्ञातं करोति—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जियसत्तुनरवइस्सा, पव्वज्जा सिक्खणा विदेसम्मि।**
**काऊण पोयणम्मी, सव्वायं निव्वुतो भयवं ॥ १०६४ ॥**
**एक्को य तस्स भाया, रज्जसिरिं पयहिऊण पव्वइतो।**
**भाउग अणुरागेणं, खित्तो जातो इमो उ विही ॥ १०६५ ॥**

[बृ.क.भा. ६१९८-९९]

**जितशत्रुर्नाम नरपतिः**, तस्य **प्रव्रज्या** अभवत्। धर्मं तथाविधानां स्थविराणामन्तिके श्रुत्वा प्रव्रज्यां स प्रतिपन्नवानित्यर्थः। प्रव्रज्यानन्तरं च तस्य **शिक्षणा** ग्रहणशिक्षा आसेवनाशिक्षा च प्रवृत्ता। कालान्तरे च **पोतनपुरे विदेश**रूपे परतीर्थिभिः सह वाद उपस्थितः। ततस्तैः सह शोभनो वादः **सद्वाद**स्तं दत्त्वा महतीं जिनशासनप्रभावनां **कृत्वा** स **भगवान् निर्वृतः** मुक्तिपदवीमधिरुढः॥ १०६४॥ **एक्को य** इत्यादि। **एकश्च तस्य भ्राता** जितशत्रो राज्ञः प्रव्रजितस्यानुरागेण **राज्यश्रियं प्रहाय** परित्यज्य जितशत्रुप्रव्रज्या-प्रतिपत्त्यनन्तरं कियता कालेन **प्रव्रजितः** प्रव्रज्यां प्रतिपन्नः। स च तं ज्येष्ठभ्रातरं विदेशे **पोत**नपुरे कालगतं श्रुत्वा **भ्रात्रनुरागेण क्षिप्तः** अपहृतचित्तो **जातः**। तत्र चायं वक्ष्यमाण-स्तत्प्रगुणीकरणाय **विधिः** ॥१०६५॥



For Private and Personal Use Only

तमेवाऽऽह—

**तेलोक्कदेवमहिया, तित्थयरा नीरया गया सिद्धिं।**
**थेरा वि गया केई, चरणगुणपहावगा धीरा ॥ १०६६ ॥**

[बृ.क.भा. ६२००]

तस्य भ्रात्रादिमरणं श्रुत्वा क्षिप्तचित्तीभूतस्याऽऽश्वासनार्थमियं देशना कर्त्तव्या। यथा-मरणपर्यवसानो जीवलोकः, तथाहि ये **तीर्थकरा** भगवन्त**स्त्रैलोक्यदेवैः** त्रिभुवननिवासिभिर्भवनपत्यादिभिर्देवै**र्महितास्ते**ऽपि **नीरजसः** विगतसमस्तकर्मपरमाणवः सन्तो **गताः सिद्धिम्**। तथा **स्थविरा अपि केचिद्** महीयांसो **गौतमस्वामि**प्रभृतय**श्चरणगुणप्रभावकाः** चरणं चरित्रं गुणः ज्ञानं ताभ्यां जिनशासनस्य प्रभावकाश्चरणगुणप्रभावकाः **धीराः** महासत्त्वा देव-दानवैरप्यक्षोभ्याः सिद्धिं **गताः**। तद्यदि भगवतामपि तीर्थकृतां महतामपि महर्षीणामीदृशा गतिस्तत्र का कथा शेषजन्तूनां तस्मादेतादृर्शी संसारस्थितिमनुविचिन्त्य न शोकः कर्तव्य इति॥ १०६६॥ अन्यच्च—

**न हु होइ सोइयव्वो, जो कालगतो दढो चरित्तम्मि।**
**सो होइ सोचियव्वो, जो संजमदुब्बलो विहरे ॥ १०६७ ॥**

[बृ.क.भा. ६२०२]

**न हुः** निश्चितं स **शोचयितव्यो भवति, यश्चारित्रे दृढः** सन् **कालगतः। स** खलु **भवति शोचयितव्यो यः संयमे दुर्बलः** सन् **विहृतवान्**॥१०६७॥

स[1] कस्मात् शोचयितव्यः? इत्यत आह—

**जो जह व तह व लद्धं, भुंजइ आहार-उवहिमाईयं।**
**समणगुणमुक्कजोगी, संसारपवड्ढगो भणितो ॥१०६८॥** [बृ.क.भा.६२०३]



**यो** नाम **यथा वा तथा वा,** दोषदुष्टतया न निर्दोषतया इत्यर्थः, **लब्धम् आहारो-पध्यादिकं भुङ्क्ते** उपभोग-परिभोगविषयीकरोति, स श्रमणानां गुणाःमूलगुणोत्तरगुणरूपाः श्रमणगुणास्तैर्मुक्ताः-परित्यक्तास्तद्रहिता ये योगा मनोवाक्कायव्यापारास्ते श्रमणगुणमुक्तयोगाः,

---

१. तर्हि कः शोच° खं. ॥



For Private and Personal Use Only

ते यस्य सन्ति **श्रमणगुणमुक्तयोगी, संसारप्रवर्धको भणित**स्तीर्थकरगणधरैः। ततो यः संयमदुर्बलो विहतवान् स शोच्य एव भवदीयस्तु भ्राता यदि कालगतो दृढचारित्रे, ततः स परलोकेऽपि सुगतिभागिति न करणीयः शोकः ॥१०६८॥ सम्प्रति 'जड्डाइ तिरिक्ख' [गा.१०६३] इत्यस्य व्याख्यानार्थमाह—

**जड्डाई तेरिच्छे, सत्थे अगणीय थणिय विज्जू य।**
**ओमे पडिभीसणया, चरगं पुव्वं परूवेउं ॥ १०६९ ॥**[बृ.क.भा. ६२०४]

**जड्डः** हस्ती **आदि**शब्दात् सिंहादिपरिग्रहः तान् **तिरश्चो** दृष्ट्वा । किमुक्तं भवति?– गजं वा मदोन्मत्तं सिंहं वा गुञ्जन्तं व्याघ्रं वा तीक्ष्ण–खर–नखरविकरालमुखं दृष्ट्वा कोऽपि भयतः क्षिप्तचित्तो भवति। कोऽपि पुनः **शस्त्राणि** खड्गादीन्यायुधानि दृष्ट्वा । इयमत्र भावना– केनापि परिहासेनोद्गीर्णं खड्गं वा कुन्तं वा क्षुरिकादिकं वा दृष्ट्वा कोऽपि 'हा! मारयति मामेषः' इति सहसा क्षिप्तचित्त उपजायते। तथा **अग्नौ** प्रदीपनके च लग्ने कोऽपि भयतः क्षिप्तो भवति। कोऽपि **स्तनितं** मेघगर्जितमाकर्ण्य कोऽपि **विद्युतं** दृष्ट्वा । एवं क्षिप्तचित्तस्य जातस्य **ओमे पडिभीसणया** इति **अवमः** लघुतरः तेन **प्रतिभीषणं** हस्त्यादेः कर्तव्यं येन क्षिप्तचित्तताऽपगच्छति। यदि पुनश्चरकेण वादे पराजितः इति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षिप्तचित्तो भवेत् ततश्चरकं पूर्वं प्ररूप्य प्रज्ञाप्य तदनन्तरं तेन स्वमुखोच्चारितेन वचसा तस्य क्षिप्तचित्ततोत्तारयितव्या ॥१०६९॥ सम्प्रत्यपमानतः क्षिप्तचित्ततां भावयति—

**अवहीरितो व गणिणा, अहव ण सगणेण कम्हिइ पमाए।**
**वायम्मि व चरगादी, पराजितो तत्थिमा जयणा ॥ १०७० ॥**

[बृ.क.भा. ६२०५]

**गणिना** आचार्येण सोऽवधीरितः स्यात्। **अथवा ण**मिति वाक्यालङ्कारे, **स्वगणेन** स्वगच्छेन गणावच्छेद्यादिना **कस्मिंश्चित् प्रमादे** वर्त्तमानः सन् गाढं शिक्षितो भवेत्, ततोऽपमानेन क्षिप्तचित्तो जायेत । यदि वा **चरकादिना** परतीर्थिकेन **वादे पराजित** इत्यपमानतः क्षिप्तचित्तः स्यात्। **तत्र** तस्मिन् क्षिप्तचित्ते **इयं** वक्ष्यमाणा **यतना** ॥ १०७० ॥ तत्र प्रथमतो भयेन क्षिप्तचित्ते यतनामाह—

**कण्णम्मि एस सीहो, गहितो अह धाडितो य सो हत्थी।**
**खुड्डुलतरगेण तुमे, ते वि य गमिया पुरा पाला ॥ १०७१ ॥**

[बृ.क.भा. ६२०६]



For Private and Personal Use Only

इह "**पदै**कदेशे पदसमुदायोपचारात्" **पाला** इत्युक्ते हस्तिपालाः सिंहपाला वा द्रष्टव्याः, **तेऽपि पुरा** पूर्वं **गमिताः** प्रतिबोधिताः कर्त्तव्याः। यथा-अस्माकमेकः क्षुल्लको युष्मदीयं सिंहं हस्तिनं वा दृष्ट्वा क्षोभमुपागतः, ततः स यथा क्षोभं मुञ्चति तथा कर्तव्यम्। एवं तेषु प्रतिबोधितेषु स क्षिप्तचित्तीभूतस्तेषामन्तिके नीयते, नीत्वा च तेषां मध्ये यः क्षुल्लकादपि लघुतरः तेन सिंहः कर्णे धार्यते, हस्ती वा तेन धार्यते, ततः स क्षिप्तचित्तः प्रोच्यते- त्वत्तोऽपि यः **क्षुल्लकतरः** अतिशयेन लघुस्तेन **एष सिंहः कर्णे गृहीतः**। अथवा **स हस्ती** अनेन **धाटितः**,त्वं तु बिभेषि, किं त्वमेतस्मादपि भीरुर्जातः? धार्ष्ट्यमवलम्ब्यताम् इति ॥१०७१ ॥

**सत्थऽग्गिं थंभेउं, पणोल्लणं णस्सए व सो हत्थी।**
**थेरा चम्मविकड्ढण, अलायचक्कं व दोसुं तु ॥ १०७२॥** [बृ.क.भा.६२०७]

यदि **शस्त्रं** यदि वा **अग्निं** दृष्ट्वा क्षिप्तोऽभवत् ततः शस्त्रमग्निं च विद्यया **स्तम्भित्वा तस्य** पादाभ्यां **प्रणोदनं** कर्तव्यं भणितव्यं च तं प्रति 'एषोऽस्माभिरग्निः शस्त्रं च पादाभ्यां

प्रणोद्यते, त्वं पुनरेताभ्यां बिभेषि? इति। यदि वा पानीयेनाऽऽर्द्रीकृत्य हस्तादिभिः सोऽग्निः स्पृश्यते, भण्यते च— एतस्मादपि तव किं भयम्? तथा यतो हस्तिनः तस्य भयमभूत् स हस्ती स्वयं पराङ्मुखो गच्छन् दर्श्यते, यथा- यतस्त्वं बिभेषि **स हस्ती नश्यति** नश्यन् वर्तते, ततः कथं त्वमेवं भीरोरपि भीरुर्जातः ?। तथा यो गर्जितं श्रुत्वा भयमग्रहीत् तं प्रत्युच्यते-**स्थविरा** नभसि शुष्कं **चर्म विकर्षति**- आकर्षति, एवं चोक्त्वा शुष्कचर्मण आकर्षणशब्दः श्राव्यते, ततो भयं जरयति। तथा यद्यग्नेः स्तम्भनं न ज्ञायते तदा **द्वयोः** अग्नौ च विद्युति च भयं प्रपन्नः सन् **अलातचक्रं** पुनरकस्मात्तस्य दर्श्यते यावदुभयोरपि भयं जीर्णं भवति॥१०७२॥ सम्प्रति वादे पराजयादपमानतः क्षिप्तचित्तीभूतस्य यतनामाह—

**एएण जितो मि अहं, तं पुण सहसा न लक्खियं णेण।**
**धिक्कय कइयव लज्जावितो य पउणे ततो खुड्डो ॥१०७३॥**

[बृ.क.भा.६२०८]



इह तावद् येन चरकेण वादे पराजितः स प्रज्ञाप्यते यथोक्तं प्राक्, ततः स आगत्य वदति- **एतेनाहं** वादे **जितोऽस्मि, तत्पुनः** स्वयं जयनमनेन **सहसा न लक्षितम्,** ततो मे

१. **प्रणुन्नः, त्वं तु ततोऽपि बि° खं. ॥**

लोकतो जयप्रवादोऽभवत्। एवमुक्ते स चरको **धिक्कृतेन** धिक्कारणेन **लज्जाप्यते** लज्जां ग्राह्यते, लज्जां च ग्राहितः सन् सोऽपसार्यते, ततः स क्षिप्तो भण्यते- किमिति त्वमपमानं गृहीतवान्?, वादे हि ननु त्वया पराजितः, तदा च त्वत्समक्षमेवैष धिक्कारं ग्राहित इति। एवं यतनायां क्रियमाणायां यदि स **क्षुल्लकः प्रगुणी**भवति **ततः** सुन्दरम् ॥ १०७२॥

**तहवि य अठायमाणे, सारक्खमरक्खणे य चउगुरुगा।**
**आणाइणो य दोसा, जं सेवति जं च पाविहिती ॥ १०७४ ॥**

[बृ.क.भा. ६२०९]



**तथापि च** एवं यतनायामपि च क्रियमाणाया**मतिष्ठति** अनिवर्तमाने क्षिप्तचित्तत्वे **संरक्षणं** वक्ष्यमाणयतनया कर्त्तव्यम्, **अरक्षणे** प्रायश्चित्तं **चत्वारो गुरुका** गुरुमासाः। तथा **आज्ञादय** आज्ञा-ऽनवस्था-मिथ्यात्व-विराधना **दोषाः**। तथा असंरक्ष्यमाणो **यत्सेवते** षड्जीवनिकायविराधनादिकं, **यं च प्राप्स्यत्**यनर्थं तन्निमित्तं च प्रायश्चित्तम्॥१०७४॥

अथ किं सेवते? किं वा प्राप्स्यति? तन्निरूपणार्थमाह—

**छक्कायाण विराहण, झामण तेणाऽतिवायणं चेव।**
**अगडे विसमे य पडितो, तम्हा रक्खंति जयणाए ॥ १०७५ ॥**

[बृ.क.भा. ६२१०]

**षण्णां कायानां** पृथिवीकायिकादीनां **विराधना** क्रियेत। **ध्यापनं** प्रदीपनकं तद्वा कुर्यात्। यदि वा **स्तैन्यम्;** अथवाऽ**तिपातन**मात्मनः परस्य वा विधीयेत। **अवटे** कूपे अथवाऽन्यत्र **विषमे पतितो** भवेत्, तदेवमसंरक्षणे यत इमे दोषा**स्तस्माद् रक्षन्ति यतनया** वक्ष्यमाणया॥ १०७५॥

साम्प्रतमेनामेव गाथां व्याचिख्यासुराह—

**सस्सगिहादीणि डहे, तेणेज्ज वसो सयं वा हीरेज्जा।**
**मारण पिट्टणमुभये, तद्दोसा जं च सेसाणं ॥ १०७६ ॥** [बृ.क.भा. ६२११]

सस्यं धान्यं तद्भृतं गृहं **सस्यगृहं तदादीनि,** आदिशब्दात् शेषगृहाऽऽपणादिपरिग्रहः, **दहेत** क्षिप्तचित्ततया अग्निप्रदानेन भस्मसात्कुर्यात्। एतेन ध्यामनमिति व्याख्यातम्। यदि वा

**स्तेनयेत्** चोरयेत्। अथवा **स स्वयं** केनापि **ह्रियेत** अनेन स्तैन्यं व्याख्यातम्। **मारणं पिट्टनमुभयस्मिन्** स्यात्। किमुक्तं भवति? स क्षिप्तचित्तत्वेन परवश इव स्वयमात्मानं मारयेत् पिट्टयेद् वा यदि वा परं मारयेत् पिट्टयेद् वा, स परेण मार्येत, पिट्येत वा इति। **तद्दोसा जं च सेसाण**मिति, **तस्य** क्षिप्तचित्तस्य **दोषाद् यच्च शेषाणां** साधूनां मारणं पिट्टनं वा। तथाहि–स क्षिप्तचित्तः सन् परान् यदा व्यापादयति पिट्टयति वा तदा परे स्वरूपमजानानाः शेषसाधूनामपि घातप्रहारादिकं कुर्युः, तन्निमित्तमपि प्रायश्चित्तमरक्षणे द्रष्टव्यम्। शेषाणि तु स्थानानि सुगमानीति न व्याख्यानयति ॥१०७६॥ यदुक्तं 'तस्माद्रक्षन्ति यतनया' [गा.१०७५] इति तत्र यतनामाह—



**महिड्ढी १उट्ठनिवेसणा य२, आहार३ विगिंचणा४ विउस्सग्गो५।**
**रक्खंताण य फिडिए, अगवेसणे होंति चउगुरुगा ॥ १०७७ ॥**

[बृ.क.भा.६२१२]

**महर्द्धिको** नाम ग्रामस्य नगरस्य वा रक्षाकारी तस्य कथनीयम् १। तथा **उट्ठनिवेसणा**

इति मृदुबन्धैस्तथा संयमनीयो यथा स्वयमुत्थानं निवेशनं **च** कर्तुमीशो[1] भवति २। तथा यदि वातादिना धातुक्षोभोऽस्याभूदिति ज्ञायते तदा अपथ्याहारपरिहारेण स्निग्ध-मधुरादिरूप **आहारः** प्रदातव्यः३। **विगिंचणत्ति** उच्चारादेस्तस्य परिष्ठापनं कर्तव्यम् ४। यदि पुनर्देवताकृत एष उपद्रव इति ज्ञायते तदा प्रासुकैषणीयेन क्रिया कार्या। तथा **विउस्सग्गो** इति 'किमयं वातादिना क्षोभः? उत देवताकृत उपद्रवः?" इति परिज्ञानाय देवताराधनार्थं कायोत्सर्गः करणीयः ५। ततस्तया आकम्पितया कथिते सति तदनुरूपो यत्नो यथोक्तस्वरूपः करणीयः। एवं **रक्षतामपि** यदि स कथञ्चित् **स्फिटितः** स्यात् ततस्तस्य गवेषणं कर्तव्यम्, अन्यथा **अगवेषणे** प्रायश्चित्तं **चत्वारो गुरुकाः** ६। एष द्वारगाथासङ्क्षेपार्थः ॥ १०७७॥ साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतो महर्द्धिकद्वारं विवृणोति—

**अम्हं एत्थ पिसातो, रक्खंताणंपि फिट्टइ कयाई।**
**सो हु परिरक्खेयव्वो, महड्डिए रक्खिए कहणा ॥ १०७८ ॥**

[बृ.क.भा. ६२१३]

१. कर्तुं समर्थो भ° पु. प्रे. ॥

रक्षा अस्यास्तीति रक्षकः, रक्षायां नियुक्तो राक्षिको वा, तस्मिन् रक्षके **राक्षिके** वा ग्रामस्य नगरस्य वा रक्षाकारिणि **महर्द्धिके कथना** कर्तव्या, तस्मै कथयितव्यमिति भावः। यथा **अत्र** एतस्मिन्नुपाश्रये **अस्माकं रक्षतामपि एष पिशाचः** ग्रथिलः **कदाचित् स्फिटति** अपगच्छति, **स हु:** निश्चितं **परिरक्षितव्यः**, प्रतिपन्नवत्सलत्वादिति ॥१०७८॥ व्याख्यातं महर्द्धिकद्वारम्१। अधुना 'उट्ठनिवेसणा य' इति व्याख्यानयति—

**मिउबंधेहि तहा णं, जमेंति जह सो सयं तु उट्ठेति।**
**उव्वरग सत्थरहिते, बाहि कुदंडे असुण्णं च ॥ १०७९ ॥**

[बृ.क.भा. ६२१४]

**मृदुबन्धैः** कोमलबन्धैस्**तथा णमिति** तं क्षिप्तचित्तं **यमयन्ति** बन्धन्ति **यथा स्वयमुत्तिष्ठति। तु** शब्दस्यानुक्तसमुच्चयार्थत्वान्निविशते च। तथा स तस्मि**न्नपवरके** स्थाप्यते यत्र न किमपि शस्त्रं भवति। अन्यथा स क्षिप्तचित्ततया युक्तमयुक्तं वाऽजानानः शस्त्रं दृष्ट्वा तेनाऽऽत्मानं व्यापादयेत्। तस्य चापवरकस्य द्वारं बहिः **कुदण्डेन** वंशटोक्करादिना बध्यते न येन निर्गत्यापगच्छति। तथा **अशून्यं** यथा भवति एवं स वारेण वारेण प्रतिजाग्रियते, अन्यथा शून्यमात्मानमुपलभ्य बहुतरं क्षिप्तचित्तीभूयात् ॥१०७९॥

**उव्वरयस्स य असती, पुव्वखयाऽसती य खम्मए अगडो।**
**तस्सोवरिं च चक्कं, न फिडइ जह उप्फिडंतो वि ॥ १०८० ॥**

[बृ.क.भा. ६२१५]

**अपवरकस्य असति** अभावे **पूर्वखाते** कूपे निर्जले स प्रक्षिप्यते। तस्याप्यभावे **अवटो** नवः **खन्यते,** खनित्वा च तत्र स प्रक्षिप्यते, प्रक्षिप्य च **तस्याऽ**वटकस्यो**परि चक्रं** रथाङ्गं स्थगनाय दीयते, यथा स **उत्स्फिटन्नपि** उत्प्लवमानोऽपि **न स्फिटति** न बहिर्गच्छति ॥१०८०॥ साम्प्रतम् ''आहारविगिंचणे''त्यादि व्याख्यानयति—

**निद्धमहुरं च भत्तं, करीससेज्जा य नो जहा वाऊ।** दारं ३।
**दिव्विय धातुक्खोभे, नाउं उस्सग्ग तो किरिया ॥ १०८१ ॥** दारं ४।

[बृ.भा. ६२१६]

यदि 'वातादिना धातुक्षोभोऽस्य सञ्जातः' इति ज्ञायते तदा **भक्त**मपथ्यपरिहारेण **स्निग्धं मधुरं** च तस्मै दातव्यम्। **शय्या** च **करीष**मयी कर्त्तव्या, सा हि सोष्णा भवति,

उष्णे च वातश्लेष्मापहारः ३। तथा किमयं **दैविकः** देवेन भूतादिना कृत उपद्रवः? उत **धातुक्षोभजः?** इति **ज्ञातुं** देवताराधनाय **उत्सर्गः** कायोत्सर्गः क्रियते। तस्मिंश्च क्रियमाणे यद् आकम्पितया देवतया कथितं तदनुसारेण **ततः क्रिया** कर्त्तव्या। यदि दैविक इति कथितं तदा प्राशुकैषणीयेनोपचारः, शेषसाधूनां तपोवृद्धिः, तदुपशमनाय मन्त्रादिस्मरण-मिति। अथ वातादिना धातुक्षोभः इति कथितं तदा स्निग्ध मधुराद्युपचार इति ४॥१०८१॥ सम्प्रति "रक्खंताण य फिडिए" इत्यादि व्याख्यानयति—

**अंगडे[1] पलाय मग्गणा, अन्नगणावावि जे ण सारक्खे।**
**गुरुगा य जं च जत्तो, तेसिं च निवेयणाकरणं ॥ १०८२ ॥**

[बृ.क.भा. ६२१७]



---

१. एतद्गाथा १०८२ स्थाने लाडनूसंस्करणे (पृ. १०९ टि. १०) अ प्रतौ एषा गाथोपलभ्यते- 'रक्खंताण य फिडिते, अगवेसणे गुरुगा जो वि अन्नगणे । न वि सारक्खति गुरुगा जं च जो निवेयणं च करे ॥ ब- प्रतौ १०८२ पूर्वं एषा गाथोपलभ्यते- 'उच्चार-विगिंचणया, उद्दुनिवेसण तहा विउस्सग्गो। रक्खंताण य फिडिए, अगवेसणे होंति चउगुरुगा॥ जेभा. खंभा. वाभा. प्रतिषु मध्येऽपि भिन्ना गाथा वर्तते इति पु. प्रे.॥

**अगडे** इति सप्तमी पञ्चम्यर्थे, ततोऽयमर्थः- अवटात् कूपात्, उपलक्षणमेतत्, अपवरकाद्वा यदि **पलायते** कथमपि ततस्तस्य **मार्गण**मन्वेषणं कर्तव्यम्। तथा ये तत्रान्यत्र वा आसन्ने दूरे वा **अन्यगणा** विद्यन्ते **तेषां च निवेदनाकरणम्,** तेषामपि निवेदनं कर्तव्यमिति भावः। यथा-अस्मदीय एकः साधुः क्षिप्तचित्तो नष्टो वर्तते, ततस्तैरपि स गवेषणीयो: दृष्टे च सङ्ग्रहणीयः। यदि पुनर्न गवेषयन्ति **नापि संरक्षन्ति** स्वगणवर्तिनोऽन्य-गणवर्तिनो वा तदा तेषां प्रायश्चित्तं चत्वारो **गुरुका** मासाः। **यच्च** करिष्यति षड्जीवनिकायविराधनादिकम्, यच्च व्याघ्रादिमरणादिकं तन्निमित्तं तेषां प्रायश्चित्तमिति ॥१०८२॥

**छम्मासे पडियरिउं, अणिच्छमाणेसु भुज्जतरगो वि।**
**कुल-गण-संघसमाए, पुव्वगमेणं निवेएज्जा ॥ १०८३ ॥**

[बृ.क.भा. ६२१८]

पूर्वोक्तप्रकारेण तावत्स प्रतिचरणीयो यावत् **षण्मासा** भवन्ति। ततो यदि प्रगुणो जायते तर्हि सुन्दरम्। अथ न प्रगुणीभूतस्ततो भूयस्तरकमपि तस्य प्रतिचरणं विधेयम्। अथ

ते साधवः परिश्रान्ता **भूयस्तरकं** प्रतिचरणं नेच्छन्ति ततस्तेष्व**निच्छत्सु कुल-गण-सङ्घसमवायं** कृत्वा **पूर्वगमेन कल्पो**क्तप्रकारेण तस्मै **निवेदनीयम्,** निवेद्य च तदाज्ञया वर्तितव्यमिति ॥१०८३ ॥

अथ स साधुः कदाचिद्राजादीनां स्वजनः स्यात् तत इयं यतना विधेया—

**रण्णो निवेइयम्मि, तेसिं वयणे गवेसणा होति।**
**ओसह वेज्जा संबंधुवस्सए तीसु वी जयणा ॥ १०८४ ॥**

[बृ.क.भा. ६२१९]

यदि **राज्ञो**ऽन्येषां वा स पुत्रादिको भवेत् ततो **राज्ञः**, उपलक्षणमेतत्, अन्येषां वा स्वजनानां **निवेदनं** क्रियते, यथा- युष्मदीय एष पुत्रादिकः क्षिप्तचित्तो जात इति एवं निवेदिते यदि ब्रुवते राजादयो यथा- मम पुत्रादीनां क्रिया स्वयमेव क्रियमाणा वर्तते, तत इहैव तमप्यानयतेति। ततः स **तेषां वचनेन** तत्र नीयते,नीतस्य च तस्य तत्र **गवेषणा भवति।** अयमत्र भावार्थः- साधवोऽपि तत्र गत्वा **औषध**-भेषजानि प्रयच्छन्ति, प्रतिदिवसं

च शरीरस्योदन्तं वहन्ति, यदि पुनः सम्बन्धिनः स्वजना वदेयुर्वयमौषधानि **वैद्यं** वा सम्प्रयच्छामः, परमस्माकमासन्ने प्रदेशे स्थित्वा यूयं प्रतिचरथ, तत्र यदि शोभनो भावस्तदैवं क्रियते। अथ गृहस्थीकरणाय तेषां भावः तदा न तत्र नयनं, किन्तु **स्वोपाश्रय** एव ध्रियते। तत्र च **त्रिष्वपि** आहारोपधिशय्यासु **यतना** कर्तव्या। एष द्वारगाथासङ्क्षेपार्थः ॥१०८४॥ साम्प्रतमेनामेव विवरीषुः प्रथमतः 'रण्णो निवेइयम्मी' त्येतद्व्याख्यानयति—

**पुत्तादीणं किरियं, सयमेव घरम्मि कोइ कारेज्जा।**
**अणुजाणंते य तहिं, इमे वि गंतुं पडिचरंति ॥ १०८५ ॥**

[बृ.क.भा. ६२२०]



यदि कोऽपि राजा अन्यो वा तस्य क्षिप्तचित्तस्य साधोः स्वजनो **गृहे स्वयमेव** साधुनिवेदनात् प्राग् आत्मनैव **पुत्रादीनां क्रियां** चिकित्सां **कारयति,** तदा तस्मै निवेदिते 'युष्मदीयः क्षिप्तचित्तो जातः' इति कथिते यदि ते **अनुजानन्ति,** यथा- तमत्र समानयतेति, ततः स तत्र नीयते, नीतं **च** सन्तम् **इमेऽपि** गच्छवासिनः साधवोऽपि **गत्वा प्रतिचरन्ति** ॥१०८५॥

**ओसह-वेज्जे देमो, पडिजग्गह णं इहं ठियं चेव।**
**[1]तेसिं विरूवभावं, न देंति मा णं गिहीकुज्जा ॥ १०८६ ॥**

[बृ.क.भा. ६२२१]

कदाचित्स्वजनाः ब्रूयुः, यथा- **औषधानि वैद्यं** च **वयं दद्मः**, केवल**मिह** अस्मिन्नस्माकमासन्ने प्रदेशे **स्थितं णम**त्येनं **प्रतिजाग्रत**। तत्र यदि **तेषां** भावो **विरूपो** गृहस्थीकरणात्मकस्ततः तेषां तथारूपं **भाव**मिङ्गिताकारकुशला ज्ञात्वा **न ददति** न प्रयच्छन्ति न तेषामासन्ने प्रदेशे नयन्तीति भावः। कुतः? इत्याह—**मैनं गृहस्थीकुर्यु**रिति-हेतोः ॥१०८६॥ सम्प्रति 'तीसु वी जयणा[गा.१०८४]' इत्येतद्व्याख्यानयति—

**आहार-उवहि-सेज्जा, उग्गम-उप्पायणादिसु जयंते।**
**वायादिक्खोभम्मि वि, जयंति पत्तेय मिस्सा वा ॥ १०८७ ॥**

[बृ.क.भा. ६२२२]



**आहारे उपधौ शय्यायां** च विषये **उद्गमोत्पादनादिषु** आदिशब्दादेषणादिदोषपरिग्रहः,

१. तेसिं च नाउ भावं - पु. प्रे. ॥

**यतन्ते** प्रयत्नपरा भवन्ति, उद्गमोत्पादनादिदोषविशुद्धाहाराद्युत्पादनेन प्रतिचारका अन्येऽपि च यतमानास्तं प्रतिचरन्तीति भावः। एषा यतना दैविके क्षिप्तचित्तत्वे द्रष्टव्या। एवं **वातादिना** धातुक्षोभेऽपि **प्रत्येकं** साम्भोगिकाः **मिश्रा वा** असाम्भोगिकैः सम्मिश्रा वा पूर्वोक्तप्रकारेण **यतन्ते** ॥ १०८७॥

**पुव्वुद्दिट्ठो उ विही, इह वि करेंताण होति तह चेव।**
**तेगिच्छम्मि कयम्मी, आदेसा तिण्णि सुद्धो वा ॥ १०८८ ॥**

[बृ.क.भा. ६२२३]

यः **पूर्वं कल्पाध्ययने** [प्रथमोद्देशके] ग्लानसूत्रे **उद्दिष्टः** प्रतिपादितो **विधिः** स एव **इहापि क्षिप्तचित्तसूत्रेऽपि** वैयावृत्त्यं **कुर्वता** तथैव **भवति** ज्ञातव्यः। **चैकित्स्ये** च चिकित्सायाः कर्मणि च **कृते** प्रगुणीभूते च तस्मिन् **त्रय आदेशाः**। एके ब्रुवते- गुरुको व्यवहारः प्रस्थापयितव्यः, अपरे ब्रुवते- लघुकः, अन्ये व्याचक्षते- लघुस्वकः। तत्र तृतीय आदेशः प्रमाणः, सूत्रोपदिष्टत्वात्। अथवा सः **शुद्धः** न प्रायश्चित्तभाक्, परवशतया रागद्वेषाभावेन प्रतिसेवनात् ॥१०८८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतदेव विभावयिषुरिदमाह—

**चउरो य हुंति भंगा, तेसिं वयणम्मि होंति पण्णवणा।**

**परिसाए मज्झम्मि, पट्ठवणा होइ पच्छित्ते ॥ १०८९ ॥** [बृ.क.भा. ६२२४]

इह चारित्रविषये वृद्धि-हान्यादिगताश्चत्वारो **भवन्ति भङ्गाः**, ते चाग्रे वक्ष्यन्ते। **तेषां** च भङ्गानां **वचनेन**, गाथायां सप्तमी तृतीयार्थे, **भवति पर्षदो मध्ये प्रज्ञापना** प्ररूपणा, तदनन्तरं यदि भवति शुद्धिमात्रनिमित्तं प्रायश्चित्तं दातव्यं ततस्तस्य **प्रायश्चित्तस्य** लघुस्वकरूपस्य गाथायां सप्तमी षष्ठ्यर्थे **भवति प्रस्थापना**दानमिति ॥१०८९॥ सम्प्रति चतुरो भङ्गान् कथयन् प्रायश्चित्तदानाभावं भावयति—

**वड्ढति१ हायति२ उभयं३, अवट्ठियं४ च चरणं भवे चउहा।**

**खइयं १तहोवसमियं२, मीसं३, अहखाय खित्तं च४ ॥ १०९० ॥**

[बृ.क.भा. ६२२५]



For Private and Personal Use Only

कस्यापि **चारित्रं वर्धते१**, कस्यापि चारित्रं **हीयते२**, कस्यापि चारित्रं [उभयं] वर्धते हीयते च३, कस्यापि **अवस्थितं** न हीयते न च वर्धते। एते **चत्वारो** भङ्गा**श्चारित्रस्य**। साम्प्रतममीषामेव चतुर्णां भङ्गानां यथासङ्ख्येन विषयान् प्रदर्शयति- **खइय**मित्यादि, क्षपकश्रेणिप्रतिपन्नस्य क्षायिकं चरणं वर्धते१। उपशमश्रेणीतः प्रतिपतने **औपशमिकं** चरणं हानिमुपगच्छति २। क्षायोपशमिकं तत्तद्रागद्वेषोत्कर्षाऽपकर्षवशतः क्षीयते परिवर्धते च ३। **यथाख्यातं क्षिप्तं** च "पदैकदेशे पदसमुदायोपचारात्" क्षिप्तचित्तचारित्रमवस्थितम्। यथाख्यातचारित्रे सर्वथा राग-द्वेषोदयाभावात्, क्षिप्तचित्तचारित्रे परवशतया प्रवृत्तेः स्वतो राग-द्वेषाभावात्, तदेवं यतः क्षिप्तचित्ते चारित्रमवस्थितमतो नासौ प्रायश्चित्तभागिति॥१०९०॥ पर आह— ननु स क्षिप्तचित्त आश्रवद्वारेषु चिरकालं प्रवर्तितः, बहुविधं चाऽसमञ्जसं तेन प्रलपितम्, लोक-लोकोत्तरविरुद्धं च समाचरितम्। ततः कथमेष न प्रायश्चित्तभाक्? अत्र सूरिराह—

**कामं आसवदारेसु, वट्टितो पलवियं बहुविहं च।**
**लोगविरुद्धा य पया, लोगोत्तरिया य आइण्णा ॥ १०९१ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न य बंधहेउविगलत्तणेण, कम्मस्स उवचओ होइ।**
**लोगो वि एत्थ सक्खी, जह एस परव्वसो कासी ॥ १०९२ ॥**

[बृ.क.भा. ६२२६-६२२७]

**काम**मित्यनुमतौ, अनुमतमेतत्। यथा- स **आश्रवद्वारेषु** चिरकालं **वर्तितः बहुविधं च** तेन **प्रलपितम्, लोकविरुद्धानि लोकोत्तरिकानि च** लोकोत्तरविरुद्धानि च **पदानि आचीर्णानि** प्रतिसेवितानि ॥१०९१ ॥

तथापि **न च** नैव तस्य क्षिप्तचित्तस्य **बन्धहेतुविकलत्वेन** बन्धहेतवः रागद्वेषादयस्तद्विकलत्वेन तद्रहितत्वेन **कर्मण उपचयो भवति,** कर्मोपचयस्य रागद्वेषा-धीनत्वात् , तस्य च रागद्वेषविकलत्वात्, न च तद्रागद्वेषविकलत्वं वचनमात्रसिद्धम् , यतो **लोकोऽपि अत्र** अस्मिन् विषये **साक्षी यथा एषः** सर्वं **परवशोऽकार्षी**दिति। ततो रागद्वेषाभावान्न कर्मोपचयः, तस्य तदनुगतत्वात् ॥१०९२ ॥ तथा चाऽऽह—

गाथा १०९२-१०९७ क्षिप्तचित्ते कर्मबन्धाभावः

**राग-द्दोसाणुगया, जीवा कम्मस्स बंधगा होंति।**
**रागादिविसेसेण य बंधविसेसो य अविगीतो ॥ १०९३ ॥**

[बृ.क.भा. ६२२८]



For Private and Personal Use Only

राग-द्वेषाभ्यामनुगताः सम्बद्धाः **राग-द्वेषानुगताः** सन्तो **जीवाः कर्मणो बन्धका भवन्ति।** ततो **रागद्वेषविशेषेण** राग-द्वेषतारतम्येन **बन्धविशेषो,** बन्धतरतमभावः **अविगीतः** अविप्रतिपन्नः। ततः क्षिप्तचित्तस्य राग-द्वेषाभावतः कर्मोपचयाभावः ॥१०९३॥ अमुमेवार्थं दृष्टान्तेन द्रढयति—

**कुणमाणी वि य चिट्ठा, परतंता णट्टिया बहुविहा उ।**
**किरियाफलेण जुज्जइ, न जहा एमेव एयं पि ॥ १०९४॥**

[बृ.क.भा. ६२२९]

**यथा नर्तकी** यन्त्रनर्तकी काष्ठमयी **परतन्त्रा** परायत्ता, परप्रयोगत इत्यर्थः। **बहुविधा** बहुप्रकारा अपि, तुशब्दोऽपिशब्दार्थः, **चेष्टाः कुर्वाणा क्रियाफलेन** कर्मणा **न युज्यते। एवमेव** अनेनैव प्रकारेण **एव(न)मपि** क्षिप्तचित्तमनेका अपि विरुद्धाः क्रियाः [१]कुर्वाणं न कर्मोपचयं पश्यतेति ॥१०९४॥

१. कुर्वाणः न क° मु. ॥ टि. यन्त्रनर्तकी जेभा. टि. ॥

अत्र परस्य मतमाशङ्कमान आह—

**जइ इच्छसि सासेरी[१], अचेयणा तेण से चओ नत्थि।**
**जीवपरिग्गहिया पुण बोंदी असमंजसं समया ॥ १०९५ ॥**

[बृ.क.भा. ६२३०]

**यदि** त्वमेत**दिच्छसि** अनुमन्यसे, यथा- **सासेरी**ति देशीवचनमेतत् यन्त्रमयी नर्तकी **अचेतना तेन** कारणेन **से** तस्याः **चय** कर्मोपचयो **नास्ति, बोन्दिः** तनुः **पुनः जीवपरिगृहीता** जीवेनाधिष्ठिता, जीवपरिगृहीतत्वाच्चावश्यं तद्विरुद्धचेष्टातः कर्मोपचयसम्भवः, ततो या सासेरीदृष्टान्तेन **समता** आपादिता सा **असमञ्जसम्** अयुज्यमाना चेतनाऽचेतनत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् ॥१०९५॥ अत्राचार्य आह—

**चेयणमचेयणं वा, परतंत्ततेण दो वि तुल्लाइं।**
**न तया विसेसियं एत्थ किंचि भणती सुण विसेसं ॥ १०९६ ॥**

[बृ.क.भा.६२३१]

---

१. सासेरा - जेभा. खंभा. ॥

[इह वस्तु] **चेतनं** वा स्याद**चेतनं वा,** चेतनत्वा-ऽचेतनत्वविशेषस्यात्राप्रयोजकत्वात्। कथमप्रयोजकत्वम्? अत आह-**परतन्त्रत्वेन** परायत्ततया यतो **द्वे अपि तुल्ये,** ततो न किञ्चिद्वैषम्यम्। पर आह-**न त्वया अत्र** कर्मोपचयचिन्तायां **किञ्चिद**पि मनागपि **विशेषितं** येन जीवपरिगृहीतत्वेऽप्येकत्र कर्मोपचयो भवति, एकत्र नेति प्रतिपद्यामहे। अत्राऽऽचार्यो **भणति** ब्रूते- **शृणु** भण्यमानं **विशेषम्**॥१०९६॥ तमेवाह—

**नणु सो चेव विसेसो, जं एगमचेयणं सचित्तेगं।**
**जह चेयणे विसेसो, तह भणसु इमं निसामेहि ॥ १०९७ ॥**

[बृ.क.भा. ६२३२]

**ननु स एव** [1]यन्त्रनर्त्तकीस्वाभाविकनर्त्तकीदृष्टान्तसूचितो **विशेषः यद् एकं** शरीरं जीवपरिगृहीतमपि परायत्ततया चेष्टमानमप्यचेतनमिवा**ऽचेतनम् एकं** स्वायत्ततया प्रवृत्तेः

१. ''यद् 'एकं शरीरं' यन्त्रनर्तकी सत्कं परायत्तया चेष्टमानमप्यचेतनम्, 'एकं तु' स्वाभाविकनर्तकीशरीरं स्वायत्ततया प्रवृत्तेः 'सचित्तं' सचेतनमिति । पर आह'' इति बृहत्कल्पवृत्तौ पाठः ॥

**सचित्तं** सचेतनमिति। पर आह-**यथैष चेतने विशेषो** निस्सन्दिग्धप्रतिपत्तिविषयो भवति **तथा भणत** प्रतिपादयत। आचार्यः प्राह-तत **इदं** वक्ष्यमाणं **निशामय** आकर्णय॥१०९७॥

तदेवाह—

**जो पेल्लितो परेणं, हेऊ वसणस्स होइ कायाणं।**
**तत्थ न दोसं इच्छसि, लोगेण समं तहा तं च ॥ १०९८ ॥**

[बृ.क.भा. ६२३३]

**यः परेण प्रेरितः** स च **कायादीनां** पृथिव्यादीनां **व्यसनस्य** सङ्घट्टन-परितापनादिरूपस्य **हेतुः** कारणं **भवति, तत्र** तस्मिन् परेण प्रेरिततया कायव्यसनहेतौ तथा **न** त्वं **दोषमिच्छसि,** अनात्मवशतया प्रवृत्तेः। कथं पुनर्दोषं [1]नेच्छसि? इत्यत आह-**लोकेन समं** लोकेन सह, लोके तथादर्शनत इत्यर्थः। तथाहि— लोको यत्रानात्मवशतया प्रवर्तते तत्र निर्दोषमभिमन्यते ततो लोके तथादर्शनतस्तमपि कायव्यसनहेतुं निर्दोषमभिमन्यताम्। यथा च तं निर्दोषमिच्छसि **तथा तमपि च** क्षिप्तचित्तं निर्दोषं पश्य,

१. नेच्छामि ? इ° खं. बृहत्कल्पे च ॥

तस्यापि परायत्ततया तथारूपासु चेष्टासु प्रवृत्तेः ॥१०९८॥ एतदेव सविशेषं भावयति—

**पासंतो वि य काये, अपच्चलो अप्पगं विधारेउं।**
**जह पेल्लितो अदोसो, एमेवमिमंपि पासामो ॥ १०९९ ॥** [बृ.क.भा.६२३४]

**यथा** परेण **प्रेरित आत्मानं विधारयितुं** संस्थापयितुम् **अप्रत्यलः** असमर्थः सन् **पश्यन्नपि कायान्** पृथिवीकायिकादीन् विराधयन् **अन्निकापुत्राचार्य** इव **अदोषः** निर्दोषः। **एवमेव** अनेनैव च प्रकारेण परायत्ततया प्रवृत्तिलक्षणेन **इममपि** क्षिप्तचित्तमदोषं **पश्यामः** ॥१०९९॥ इह पूर्वं प्रगुणीभूतस्य प्रायश्चित्तदानविषये त्रय आदेशा गुरुकादय उक्ताः, ततस्तानेव गुरुकादीन् प्ररूपयति—

**गुरुगो गुरुगतरागो, अहागुरूगो य होइ ववहारो।**
**लहुओ लहुयतरागो अहालहूगो य ववहारो ॥ ११०० ॥**

**लहुसो लहुसतरागो, अहालहूसो य होइ ववहारो।**
**एएसिं पच्छित्तं, वोच्छामि अहाणुपुव्वीए ॥ ११०१ ॥**

गुरुगो य होइ मासो, गुरुयतरागो भवे चउम्मासो।
अहगुरुगो छम्मासो, गुरुगपक्खम्मि पडिवत्ती ॥ ११०२ ॥

तीसा य पण्णवीसा, वीसा पण्णरसेव य।
दस पंच य दिवसाइं, लहुसगपक्खम्मि पडिवत्ती ॥ ११०३ ॥

गुरुगं च अट्ठमं खलु , गुरुगतरागं च होइ दसमं तु।
अहगुरुग दुवालसगं, गुरुगपक्खम्मि पडिवत्ती ॥ ११०४ ॥

छट्ठं च चउत्थं वा, आयंबिल-एगट्ठाण-पुरिमड्ढा।
निव्विइगं दायव्वं, अहालहुसगम्मि सुद्धो वा।। ११०५॥

[बृ.क.भा. ६२३५-४०]

आसां षण्णामपि गाथानां व्याख्या पूर्ववत् [गा. १०४८-१०५३ ]॥ ११००-११०५ ॥

सूत्रम्— ''दित्तचित्तं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं जाव ततो रोगातंकातो विप्पमुक्को, ततो पच्छा तस्स अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया '' इति ॥ १० ॥

अस्य व्याख्या सङ्क्षेपतः प्राग्वत्। सम्प्रति **भाष्यकारो** विस्तरमभिधित्सुराह—

**एसेव गमो नियमा, दित्तादीणं पि होति नायव्वो।**
**जो होइ दित्तचित्तो, सो पलवइ अनिच्छियव्वाइं ॥ ११०६ ॥**

[बृ.क.भा.६२४१]

**एष एव** अनन्तरक्षिप्तचित्तसूत्रगत एव **गमः** प्रकारो लौकिक-लोकोत्तरिकभेदादिरूपो **दीप्तानामपि** दीप्तचित्तप्रभृतीनामपि **नियमाद्** वेदितव्यः। यत् पुनर्नानात्वं तदभिधातव्यम्। तदेवाधिकृतसूत्रेऽभिधित्सुराह— **जो होइ** इत्यादि, **यो भवति दीप्तचित्तः सोऽनीप्सितव्यानि** बहूनि **प्रलपति,** बह्वनीप्सितप्रलपनं तस्य लक्षणम्, क्षिप्तचित्तस्त्वपहृतचित्ततया मौनेनाप्यवतिष्ठते इति परस्परं सूत्रयोर्विशेष इति भावः॥ ११०६॥

अथ कथमेष दीप्तचित्तो भवति इति तत्कारणप्रतिपादनार्थमाह—

**इति एस असम्माणो, खित्तो सम्माणतो उ हवति दित्तो।**
**अग्गी व इंधणेहिं, दिप्पइ चित्तं इमेहिं तु ॥ ११०७ ॥** [बृ.क.भा.६२४२]

**इति** प्रागुक्तेन प्रकारेण **एषः क्षिप्तः** क्षिप्तचित्तोऽ**सम्मानतः** अपमानतो भवति। **दीप्तः** दीप्तचित्तः **पुनः सम्मानतः** विशिष्टसन्मानावासितो **भवति**। दीप्तचित्तो नाम-यस्य दीप्तं चित्तम्, तच्च **चित्तं दीप्यते अग्निरिवेन्धनैः एभिर्वक्ष्यमाणैर्लाभमदादिभिः** ॥११०७॥ तानेवाह—

**लाभमदेण व मत्तो, अहवा जेऊण दुज्जए सत्तू।**
**दित्तम्मि सातवाहणो,तमहं वोच्छं समासेणं ॥ ११०८ ॥** [बृ.क.भा. ६२४३]

**लाभमदेन वा मत्तः** सन् दीप्तचित्तो भवति। **अथवा दुर्जयान् शत्रून् जित्वा** । उभयस्मिन्नपि **दीप्ते** दीप्तचित्ते लौकिको दृष्टान्तः **शातवाहनो** राजा। **तमहं** शातवाहनदृष्टान्तं **समासेन वक्ष्ये**॥ ११०८॥ यथाप्रतिज्ञातमेव करोति—

**महुरा दंडाणत्ती, निग्गय सहसा अपुच्छियं कयरं।**
**तस्स य तिक्खा आणा, दुहा गया दो वि पाडेउं ॥ ११०९ ॥**

[बृ.क.भा.६२४४]

**गोयावरीए** नदीए तडे **पइट्ठाणं** नयरं। तत्थ **सालि**(त)वाहणो राया। तस्स **खरग**ओ अमच्चो। अन्नया सो सालवाहणो राया दंडनायगं आणवेइ। **महुरं** घेत्तूण सिग्घमागच्छह। सो य सहसा अपुच्छिऊणं दंडेहिं सह निग्गतो। ततो चिंता जाया-का महुरा घेतव्वा? दक्खिणमहुरा? उत्तरमहुरा वा? तस्स आणा तिक्खा, पुणो पुच्छिउं न तीरति। ततो दंडा दुहा काऊण दोसु वि पेसिया। गहियातो दोवि महुराओ। ततो वद्धावगो पेसिओ। तेणागंतूण राया वद्धावितो-देव! दोवि महुरातो गहियातो। अन्नो आगतो-देव! पट्टदेवीए पुत्तो जातो। अन्नो आगतो देव! अमुगत्थपदेसे विपुलो निही पायडो जाओ। ततो उवरुवरि कल्लाणवरनिवेयणेण हरिसवसविसप्पमाणहयहियतो परव्वसो जातो। तओ हरिसं धरिउमचायंतो सयणिज्जं कुट्टइ, खंभे आहणइ, कुड्डे विद्दवइ, बहूणि य असमंजसाणि पलवति। ततो खरगेणामच्चेणं तमुवाएण पडिबोहिउकामेण खंभा कुड्डा बहू विद्दविया । रण्णा पुच्छियं केण विद्दवियं? सो भणेइ-तुब्भेहिं। ततो मम सम्मुहमलीयमेवं भणतित्ति

रुट्ठेणं रन्ना खरगो पाएण ताडितो, ततो संकेइयपुरिसेहिं उप्पाडितो, अन्नत्थ संगोविओ य। ततो कम्हि पओयणे समावडिए रण्णा पुच्छिओ- कत्थ अमच्चो चिट्ठति?। संकेतियपुरिसेहिं कहियं-देव 'तुम्हं अविणयकारि'त्ति सो मारितो। राया विसूरिउं पयत्तो-दुट्ठुकयं मए। तयाणिं न किं पि चेइयं ति, ततो सभावत्थओ जातो ताहे संकेइयपुरिसेहिं विण्णवितो-देव! गवेसामि, जइ व कयाइं चंडालेहिं रक्खितो होज्जा। ततो गवेसिऊण आणीतो । राया संतुट्ठो। अमच्चेण सब्भावो कहितो। तुट्ठेण विउला भोगा दिण्णा॥

साम्प्रतमक्षरार्थो विव्रियते-सातवाहनेन राज्ञा **मथुराग्रहणाय** **दण्डस्य** दलस्याऽऽज्ञप्तिः कृता। ते च दण्डाः **सहसा कां** मथुरां गृह्णीमः इत्य**पृष्ट्वा निर्गताः**। **तस्य च** राज्ञ **आज्ञा तीक्ष्णा**। ततो भूयः प्रष्टुं न शक्नुवन्ति। ततस्ते दण्डा द्विधा गताः। **द्विधा** विभज्य एके दक्षिणमथुरायामपरे उत्तरमथुरायां **गता** इत्यर्थः। **द्वे अपि** च मथुरे **पातयित्वा** ते समागताः॥ ११०९ ॥

**सुयजम्म महुरपाडण, निहिलंभ निवेयणा जुगव दित्तो।**
**सयणिज्ज-खंभ-कुड्डे, कुट्टेइ इमाइं पलवंतो ॥१११०॥**[बृ.क.भा. ६२४५]

**सुतस्य जन्म मथुरयोः पातनं निधेर्लाभस्य च युगपन्निवेदनायां** स हर्षवशाद् **दीप्तो** दीप्तचित्तोऽभवत्। दीप्तचित्ततया च इमानि वक्ष्यमाणानि **प्रलपन् शयनीय-स्तम्भ-कुड्यानि कुट्टयति** ॥ १११० ॥ तत्र यानि प्रलपति तान्याह—

**सच्च्वं भण गोयावरि!, पुव्वसमुद्देण साहिया[१] संती।**
**सालाहणकुलसरिसं, जति ते कूले कुलं अत्थि ॥ ११११ ॥**

**उत्तरतो हिमवंतो, दाहिणतो सालवाहणो राया।**
**समभारभरक्कंता, तेण न पलत्थए पुढवी ॥ १११२ ॥** [बृ.क.भा.६२४६-७]

हे **गोदावरि पूर्वसमुद्रेण साधिता[२]** कृतमर्यादा **सती सत्यं भण**-ब्रूहि **यदि तव कूले सातवाहनकुलसदृशं कुलमस्ति** । **उत्तरत** उत्तरस्यां दिशि **हिमवान्** गिरिः **दक्षिणतः सालिवाहनो राजा, तेन समभारभराक्रान्ता** सती **पृथिवी न पर्यस्यति**। अन्यथा यद्यहं दक्षिणतो न स्यां ततो हिमवद्गिरिभाराक्रान्ता नियमतः पर्यस्येत्॥ ११११-१२॥

---

१. साविया - कल्पभाष्ये । २. सेविता - वा. मो. पु. । ''शापिता' दत्तशपथा सती'' इति कल्पवृत्तौ ॥

**एयाणि य अन्नाणि य, पलवियवं सो अभाणियव्वाइं।**
**कुसलेण अमच्चेणं, खरगेणं सो उवाएणं ॥ १११३ ॥** [बृ.क.भा. ६२४८]

**एतानि** अनन्तरोदितानि **अन्यानि च सोऽभणितव्यानि** बहूनि **प्रलपितवान्**। ततः **स कुशलेन खरक**नाम्ना **अमात्येनोपायेन** प्रतिबोधयितुकामेन [इदं विहितम्] ॥ १११९ ॥ किमित्याह—

**विद्दवियं केणं ति य, तुब्भेहिं पायतालणा खरए।**
**कत्थ त्ति मारितो सो, दुट्ठं ति य दंसणे भोगा ॥ १११४ ॥**
[बृ.क.भा. ६२४९]

**विद्रवितं** विनाशितं समस्तं स्तम्भ-कुड्यादि, राज्ञा पृष्टम् **केनेदं** विनाशितं?। अमात्यः सम्मुखीभूय सरोषं निष्ठुरं च वक्ति-**युष्माभिः**। ततो राज्ञा कुपितेन तस्य **पादेन ताडना** कृता। तदनन्तरं सङ्केतितपुरुषैः स उत्पाटितः सङ्गोपितश्च। ततः समागते कस्मिंश्चित् प्रयोजने राज्ञा पृष्टम् '**कुत्रा**मात्यो वर्त्तते' ? सङ्केतितपुरुषैरुक्तम्— देव 'युष्मत्पादानाम-



For Private and Personal Use Only

विनयकारी' इति **मारितः**। ततो[दुष्ठु] दुष्टं कृतं मयेति प्रभूतं विसूरितवान् । स्वस्थीभूते तस्मिन् जाते सङ्केतितपुरुषैरमात्यस्य **दर्शनं** कारितम्। सद्भावकथनानन्तरं राज्ञा तस्मै विपुला **भोगाः** प्रदत्ता इति ॥ १११४॥ उक्तो लौकिको दीप्तचित्तः। लोकोत्तरिकमाह—

**महज्झयण-भत्त-खीरे, कंबलग-पडिग्गहे[1] फलग-सड्ढे।**
**पासाए कप्पट्ठे, वायं काऊण वा दित्तो ॥ १११५ ॥** [बृ.क.भा. ६२५०]

**महाध्ययनं पौण्डरीकादिकं** दिवसेन पौरुष्या वा समागतम्। अथवा **भक्त**मुत्कृष्टं लब्ध्वा नास्मिन् क्षेत्रे भक्तमीदृशं केनापि लब्धपूर्वम्, यदि वा **क्षीरं** चातुर्जातक-सम्मिश्रमवाप्य नैतादृशमुत्कृष्टं क्षीरं केनापि लभ्यते। यदि वा **कम्बल**रत्नमतीवोत्कृष्टम् अथवा विशिष्टवर्णादिगुणोपेतमपलक्षणहीनं **पतद्ग्रहम्, फलग**त्ति यद्वा **फलकं** चम्पक-पट्टादिकम्, अथवा **श्राद्ध**मीश्वरमत्युदारमुपासकत्वेन प्रतिपन्नं लब्ध्वा, यदि वा **प्रासादे** सर्वोत्कृष्टे उपाश्रयत्वेन लब्धे, **कप्पट्ठे** वा इति ईश्वरपुत्रे रूपवति प्रज्ञानिधाने लब्धे प्रमोदते, प्रमोदभरवशाच्च दीप्तचित्तो भवति। एतेन 'लाभमदेन वा मत्त' इति लोकोत्तरे योजितम्।

---

**१. ग्गहे य फलगे य - कल्पभाष्ये ।**

अधुना दुर्जयान् शत्रून् जित्वेत्येतद्योजयति-**वायं काऊण वत्ति** वादं वा परप्रवादिना दुर्जयेन सह कृत्वा तं पराजित्यातिहर्षवशतः **दीप्तः** दीप्तचित्तो भवति ॥ १११५॥ साम्प्रतमेनामेव गाथां विनेयजनानुग्रहाय विवरिषुराह—

**पुंडरियमाइयं खलु, अज्झयणं कड्ढिऊण दिवसेण।**
**हरिसेण दित्तचित्तो, एवं होज्जा हि कोई उ ॥ १११६ ॥**

**कश्चित्पौण्डरीकादिकमध्ययनं खलु दिवसेन,** उपलक्षणमेतत्, पौरुष्यादिना वा **कर्षित्वा** पठित्वा **हर्षेण दीप्तचित्तो भवेत्।** एवमध्ययनलाभेन दीप्तचित्तता ॥ १११६॥

**दुल्लहदव्वे देसे, पडिसेविय[१] तं अलद्धपुव्वं वा।**
**आहारोवहि वसही, अहुणविवाहो व कप्पट्ठो ॥ १११७ ॥**

**दुर्लभद्रव्ये देशे** तद् दुर्लभद्रव्यं केनाप्यलब्धपूर्वं, **वाशब्दः** समुच्चये, **प्रतिसेव्य** लब्ध्वा दीप्तचित्तो भवति। एव**माहारे** भक्त-क्षीरादिके **उपधौ** कम्बलरत्नादिके **वसतौ**

१. पडिसेधिय - जेभा. वाभा. कल्पभाष्ये कल्पवृत्तौ च ॥

प्रासादादिरूपायां लब्धायां यदि वा **कप्पट्ठेत्ति,** ईश्वरपुत्रोऽ**धुना** कृत**वीवाहः** प्रज्ञानिधानं शिष्यत्वेन लब्ध इति हर्षेण दीप्तचित्तो भूयात् ॥ १११७॥

तत्रैतेषु दीप्तचित्तेषु यतनामाह—

**दिवसेण पोरिसीय व, तुमए ठवियं इमेण अद्धेणं।**
**एयस्स नत्थि गव्वो, दुम्मेहतरस्स को तुज्झं? ॥ १११८ ॥**

[बृ.क.भा. ६२५१]

**दिवसेन पौरुष्या वा त्वया** यत् पौण्डरीकादिकमध्ययनं **स्थापितं** पठितं **तदनेन** दिवसस्य पौरुष्या वा **अर्धेन,** तथाप्येतस्य **नास्ति गर्वः। तव** पुन**र्दुर्मेधस्तरकस्य को** गर्वः नैव युक्त इति भावः। एतस्मादपि तव हीनप्रज्ञत्वात् ॥ १११८॥

**तद्दव्वस्स दुगुंछण, दिट्ठंतो भावणा असरिसेणं।**
**पगयम्मि पण्णवेत्ता, विज्जादि विसोहि जा कम्मं ॥ १११९ ॥**

[बृ.क.भा. ६२५२]

यद् दुर्लभं द्रव्यं भक्त-क्षीरादि तेन लब्धं **तस्य द्रव्यस्य जुगुप्सनं** क्रियते, यथा नेदमतिशोभनम्,अमुको वाऽस्य दोष इत्यादि। यदि वा **दृष्टान्तः** 'अन्येनापीदृशमानीतम्' इति प्रदर्शनं क्रियते। तस्य च दृष्टान्तस्य **भावना असदृशेन** तस्मात् शतभागेन सहस्रभागेन वा यो हीनस्तेन कर्तव्या। तथा **पगयम्मी**त्यादि प्रकृते अवमतरस्य विशिष्टे प्रासादादिके सम्पाद्ये तथाविधं श्रावकमितरं वा **प्रज्ञाप्य,** तदभावे कस्यापि महर्द्धिकस्य **विद्यादि,** आदिशब्दाद् मन्त्रचूर्णादिपरिग्रहः, **यावत् कर्मा**पि कार्मणमपि प्रयुज्य ततोऽवमतरस्य विशिष्टप्रासादादि-सम्पादनेनेतरस्यापभ्राजना सम्पादनीया येन प्रगुणो भवति। ततः पश्चाद्विद्यादिप्रयोग-जनितपापविशुद्धये **विशोधिः** प्रायश्चित्तं प्रतिपत्तव्येति॥ १११९॥

साम्प्रतमेतदेव विवरीषुराह—



**उक्कोसबहुविहीयं, आहारोवगरणफलगमादीयं।**
**खुद्देणोमतरेणं, आणीतोभामितो पउणो ॥ ११२०॥**

**उत्कृष्टं बहुविधिकं** बहुभेदमाहारं भक्त-क्षीरादिकम्, **उपकरणं** कम्बलरत्नप्रभृ-

तिकम्, **फलकं**- चम्पकपट्टतिनिसपट्टादिकम्, **आदिशब्दः** स्वगतानेकभेदसूचकः, तथाविधश्राद्धप्रज्ञापनेन विद्यादिप्रयोगेन वा सम्पाद्य **क्षुद्रेण** क्षुल्लकेन गुणतः **अवमतरेण** शतभाग-सहस्रभागादिना हीनेन **आनीतमुपदर्श्य** सोऽ**पभ्राजितः** क्रियते, ततः **प्रगुणो** भवति॥ ११२०॥ प्रासादादिविषये यतनामाह—

**अद्दिट्ठसड्ढकहणं, आउट्टा अभिणवो य पासाओ।**
**कयमेत्ते य विवाहे, सिद्धादिसुया कइयवेणं ॥ ११२१॥**

[बृ.क.भा. ६२५५]

यस्तेन श्राद्धो न दृष्टोऽदृष्टपूर्वस्तस्या**ऽदृष्टस्य श्राद्धस्य** साधुना **कथनं** प्रज्ञापना, उपलक्षणमेतत्, अन्यस्य महर्द्धिकस्य विद्यादिप्रयोगतोऽभिमुखीकरणं वा, ततस्ते **आवृत्ताः** सन्तस्तस्य लब्ध्यभिमानिनः समीपमागत्य ब्रुवते-वयमेतेन क्षुल्लकेन प्रज्ञापिताः, ततो**ऽभिनव** एव कृतमात्र एव, **चः** अवधारणे **प्रासादो** दत्तः। तथा **कैतवेन** कपटेन सिद्धादिसुतः **सिद्धपुत्रादिसुताः कृतमात्र** एव **विवाहे** उत्पादनीयाः। इयमत्र भावना-सिद्धपुत्रादिकेषु प्रज्ञापनमितरस्य प्रज्ञापनं विद्यादिप्रयोगं वा कृत्वा तत्सुताः कृतमात्रवीवाहा

एव व्रतार्थं तत्समक्षमुपस्थापनीयाः, येन तस्यापभ्राजनोपजायते। ततः पश्चाच्छकुनादि-वैगुण्यमुद्भाव्य ते मुच्यन्ते, यदि न स्यात् तात्त्विकी व्रतश्रद्धेति[1]॥ ११२१॥

'वायं काऊण वे'त्यत्र यतनामाह—

**चरगादि पण्णवेउं, पुव्वं तस्स पुरतो जिणावेंति।**
**ओमतरागेण ततो, पगुणत्ति ओभामितो एवं ॥ ११२२ ॥**

**चरकादिकं** प्रचण्डं परवादिनमधिःकृतसाधोर्वादेनासाध्यं **पूर्वं प्रज्ञाप्य [तस्य]** प्ररूपितस्याधिकृतस्य वादाभिमानिनः साधोः पुरतः **अवमतरेण** हीनतरेण तं **चरकादिकं जापयन्ति** वरवृषभाः **ततः** स **एवमपभ्राजितः** सन् **प्रगुणायते** प्रगुणो भवति॥ ११२२॥

**सूत्रम्— जक्खाविट्ठं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए अगिलाए तस्स करणिज्जं वेयावडियं, जाव ततो रोगातंकातो विप्प-मुक्के, ततो पच्छा तस्स अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ॥ ११॥**

---

१. व्रत सिद्धेति – पु. प्रे. ॥

अथास्य सूत्रस्य पूर्वसूत्रेण सह कः सम्बन्ध? उच्यते—

**पोग्गलअसुभसमुदओ, एस अणागंतुगो दुवेण्हं पि।**
**जक्खावेसेणं पुण, नियमा आगंतुगो होइ ॥ ११२३ ॥** [बृ.क.भा. ६२५६]

**द्वयोः** क्षिप्तचित्त-दीप्तचित्तयोः **एष** पीडाहेतुत्वेनानन्तरमुद्दिष्टो**ऽशुभपुद्गलसमुदायोऽनागन्तुकः** स्वशरीरसम्भवी प्रतिपादितः! **यक्षावेशेन पुनः**[1] ग्लायति पीडाहेतुरशुभपुद्गलसमुदयो **नियमादागन्तुको भवति।** ततो[2]ऽयमान्तुकाशुभपुद्गलसमुदयप्रतिपादनार्थमेष सूत्रारम्भः ॥ ११२३ ॥

प्रकारान्तरेण सम्बन्धमाह—

**अहवा भय-सोगजुओ, [3]चिंतद्दण्णो अइहरिसितो वा।**
**आविस्सति जक्खेहिं, इयमण्णो होइ संबंधो ॥ ११२४ ॥**

[बृ.क.भा. ६२५७]

१. पुनर्यो यति° कल्पवृत्तौ ॥ २. ततोऽनागन्तुकाशुभपुद्गलसमुदय-प्रतिपादनार्थमेष सूत्रारम्भः - पु. प्रे. ॥ ३. चित्तद्दण्णो- प्रे. ॥

**अथवेति** प्रकारान्तरोपदर्शने, **भय-शोकयुक्तो** वा **चिन्तार्दितो**[1] वा एतेन क्षिप्तचित्त उक्तः। **अतिहर्षितो वा** अनेन दीप्तचित्तोऽभिहितः। **यक्षैः** परवशहृदयतया **आविश्यते** आलिङ्ग्यते, अतः **क्षिप्तचित्तसूत्रा**नन्तरं **यक्षाविष्टसूत्र**मित्ययमन्यो **भवति सम्बन्धः** ॥११२४॥

अनेनैव सम्बन्धेनायातस्यास्य व्याख्या। सा च प्राग्वत्। सम्प्रति यतो यक्षाविष्टो भवति तत्प्रतिपादनार्थमाह—

**पुव्वभवियवेरेणं, अहवा रागेण रंगितो संतो।**

**एएहिं जक्खविट्ठो, सेट्ठी सज्झिलगवेसादी ॥ ११२५ ॥**[बृ.क.भा. ६२५८]

**पूर्वभविकेन** पूर्वभवभाविना **वैरेण अथवा रागेण रञ्जितः सन् यक्षैरा**विश्यते। **एताभ्यां** द्वेष-रागाभ्यां **यक्षाविष्टो** भवति यथा **श्रेष्ठी** द्वेष्यभार्यया **सज्झिलगत्ति** लघुभ्राता ज्येष्ठभार्यया [कौटुम्बिकः] भृतिकया **द्वेष्यादि**भिरित्यत्रादिशब्दाद् ज्येष्ठभार्या- भृतिकयोः परिग्रहः॥ ११२५॥ तत्र श्रेष्ठ्याद्युदाहरणमाह—

---

१. चित्तार्दितो - पुण्य वि. प्रे. ॥

खुड्डुलगो नेच्छइ, भणइ य-तुमं मम जेट्ठभाउयं धरमाणं न पाससि। तीए चिंतियं- जाव एसो जीवइ ताव मे नत्थि एसो देवरोत्ति। तओ छिद्दं लहिऊण विससंचारेण मारितो निजभत्ता। ततो भणियं जस्स भयं तुमं कासी सो मओ, इयाणिं पूरेहि मे मणोरहं। तेण चिंतियं नूणमेताए मारितो मे जेट्ठभाउगो, धिरत्थु कामभोगाणमिति संवेगतो पव्वइतो। इयरी वि दुहसंतत्ता अकामनिज्जराए मरिऊण वंतरी जाया। ओहिणा पुव्वभवं पासति, दिट्ठो य देवरो सामण्णे ठितो। ततो 'नाहमणेण इच्छिय' त्ति पुव्वभववेरमणुसरंतीए पमत्तो छलितो।

अक्षरयोजना त्वियम् - **ज्येष्ठभ्रातृमहिला क्षुल्लके** लघुभ्रातरि **अध्युपपन्ना** जातानुरागा सा च तेन 'ज्येष्ठो भ्राता **धरन्तं** जीवन्तं न पश्यसि' इति प्रतिषिद्धा। **मारिते** प्रव्रज्याप्रतिपत्तितः **प्रतिषिद्धे**ति **व्यन्तरी जाता**। अत्र पूर्वं रागः पश्चाद् द्वेषः॥ ११३७॥

भृतिकादृष्टान्तमाह—

**भतिया कुडुंबिएणं, पडिसिद्धा वाणमंतरी जाया।**
**सामणम्मि पमत्तं, छलेति तं पुव्ववेरेण॥ ११२८ ॥**

[बृ.क.भा. ६२६०]

एगो उरालसरीरो,एगाए भइगाए ओरालसरीराए पत्थितो, सा तेण नेच्छिया, ततो सा गाढमज्झुववण्णा। तेण सह संपओगमलभमाणी दुक्खसागरमोगाढा अकामनिज्जराए मरिऊणं वंतरी जाया, सो य कोडुंबितो तहारूवाणं थेराणमंतिए पव्वइतो, सो तीए आभोगितो अन्नया पमत्तं दट्ठूण छलियातो। अक्षरार्थस्त्वयम्-**भृतिका** कर्मकरी **कौडुम्बिकेन प्रतिषिद्धा व्यन्तरी जाता।** ततस्तं कौडुम्बिनं **श्रामण्ये** स्थितं **प्रमत्तं** सन्तं **पूर्ववैरेण छलेतित्ति** छलितवती ॥११२८॥ सम्प्रत्येवं छलितस्य यतनामाह

**तस्स उ भूयचिगिच्छा भूयरवावेसणं सयं वावि।**
**नीउत्तमं तु भावं, नाउं किरिया जहा पुव्विं ॥ ११२९ ॥**

[बृ.क.भा. ६२६२]

**तस्य** रागेण द्वेषेण वा व्यन्तरादिना छलितस्य पुनः क्रिया कर्तव्येति योगः, कथमित्याह- तस्य **भूतस्य नीचमुत्तमं तु भावं ज्ञात्वा।** कथं ज्ञात्वेत्यत आह-**यथा**भिहितं **पूर्वं,** किमुक्तं भवति-कायोत्सर्गेण देवतामाकम्प्य तद्वचनतः। का **क्रिया कर्तव्येत्यत**

आह-**भूतचिकित्सा** भूतोच्चाटिनी चिकित्सा भूतचिकित्सा॥ ११२९॥ यक्षाविष्टः किलोन्मादं प्राप्नोति ततो यक्षाविष्टसूत्रानन्तरमुन्मादप्राप्तसूत्रमाह—

**सूत्रम्— उम्मायपत्तं भिक्खुं गिलायमाणं नो कप्पए तस्स गणावच्छेदियस्स निज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं जाव ततो रोगायंकातो विप्पमुक्को, ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ॥ १२॥**

अस्य व्याख्या पूर्ववत्॥ साम्प्रतमुन्मादप्ररूपणार्थं **भाष्यकारः** प्राह—

**उम्मातो खलु दुविहो, जक्खावेसो य मोहणिज्जो य।**
**जक्खावेसो उत्तो, मोहेण इमो उ वोच्छामि ॥११३०॥** [बृ.क.भा. ६२६३]



**उन्मादः खलु** निश्चितं **द्विविधो** द्विप्रकारः। तद्यथा-यक्षावेशहेतुको **यक्षावेशः**, कार्ये कारणोपचारात् १। एवं मोहनीयकर्मोदयहेतुको **मोहनीयः** २,**च**शब्दौ परस्परसमुच्चयार्थौ स्वगतानेकभेदसंसूचकौ वा, तत्र यो **यक्षावेशो** यक्षावेशहेतुकश्च सोऽनन्तरसूत्रे **उक्तः**। यस्तु **मोहेन** मोहनीयोदयेन, मोहनीयं नाम येनाऽऽत्मा मुह्यति। तच्च ज्ञानावरणं मोहनीयं

वा द्रष्टव्यं, द्वाभ्यामप्यात्मनो विपर्यासापादानात् तेनोत्तरत्रोच्यमानम् ''अहव पित्तमुच्छाए'' इत्यादि न विरोधभाक्। **इमोत्ति** अयमनन्तरमेव वक्ष्यमाणतया प्रत्यक्षीभूत इव। तमेवेदानीं **वक्ष्यामि** ॥११३०॥ प्रतिज्ञातमेव निर्वाहयति-

**रूवंगिं दट्ठूणं, उम्मादो अहव पित्तमुच्छाए।**
**कह रूवं दट्ठूणं, हवेज्ज उम्मायपत्तो उ? ॥ ११३१ ॥**

रूपेणातिशायिना युक्तमङ्गं शरीरं यस्याः सा **रूपाङ्गी,** तां **दृष्ट्वा** कस्याप्युन्मादो भवेत्, कोऽप्युन्मादभाग् भूयादिति भावः। **अथवा पित्तमूर्च्छया** पित्तोद्रेकेण उपलक्षणमेतत्, वातोद्रेकवशतो वा स्याद् उन्मादः। पर आह-**कथं रूपं दृष्ट्वा भवेदुन्मादप्राप्तः ?**॥ ११३१ ॥

सूरिराह—

**दट्ठूण नडिं कोई, उत्तरवेउव्वियं मयणमत्तो।**
**तेणेव य रूपेण उ, उड्डंमि कयम्मि निव्विण्णो ॥ ११३२ ॥**

[बृ.क.भा. ६२६५]

**कश्चिदल्पसत्त्वो नटीं दृष्ट्वा,** किंविशिष्टाम्? इत्याह- **उत्तरवैकुर्विकां** उत्तरम्-उत्तरकालभावि, न स्वाभाविकमित्यर्थः। वैकुर्विकं विकुर्वणं विकुर्वः, तेन निर्वृत्तं वैकुर्विकं विशिष्टवस्त्र-विशिष्टाभरण-सुश्लिष्टतत्परिधानसमीचीनकुङ्कुमाद्युपलेपनजनितमतिमनोहारि रामणीयकं यस्याः सा तथा तां दृष्ट्वा **मदनमत्त** उन्मादप्राप्तो भवेत्। तत्रेयं यतना-उत्तरवैकुर्विकरूपापसारणेन **तेनैव** स्वाभाविकेन **रूपेण**[1] सा नटी तस्य निर्ग्रन्थस्य तस्यां **ऊर्ध्वायां कृतायां** वमनं कुर्वत्यां दर्श्यते, गाथायां पुंस्त्वं प्राकृतत्वात्, ततस्तस्या वान्त-स्वरूपदर्शनेन कश्चिदल्पकर्मा **निर्विण्णो** भवति, तद्विषयं विरागमुपपद्यत इत्यर्थः ॥११३२॥

तत एतत्कर्तव्यम्—

**पण्णवियाओ विरूवा, उम्मंडिज्जति य तस्स पुरतो उ।**
**रूववतीए उ भत्तं, दिज्जइ जेणं तु छड्डेइ ॥ ११३३ ॥** [बृ.क.भा. ६२६६]

अन्यच्च यदि सा नटी स्वरूपतो **विरूपा** भवति ततः सा पूर्वं प्रज्ञाप्यते, **प्रज्ञापिता**

---

१. रूपेण तस्यामूर्ध्वायां कृतायां, गाथायां पुंस्त्वं प्राकृतत्वात् मा तस्य ( मानस्व मु. ) रूपदर्शनेन कश्चि° इति रूपः पाठः सर्वेष्वपि वृत्त्यादर्शेषु मुद्रिते च दृश्यते, न खलु अयं पाठः सङ्गच्छते ॥

च सती **तस्य** अधिकृतस्य तां दृष्ट्वा उन्मादप्राप्तस्य **पुरत उन्मड्यते** यत्तस्या मण्डनं तत्सर्वमपनीयते। ततो विरूपरूपदर्शनतस्तस्य विरागो भवति। अथ सा स्वभावतोऽपि **रूपवती** अतिशायिनोद्भटेन रूपेण युक्ता ततस्तस्यास्त**द्रक्तं** मदनफलमिश्रादि **दीयते, येन** तस्य पुरत**श्छर्दयति** उद्वमयति, उद्वमनं च कुर्वती सा किल जुगुप्सनीया भवति, ततः स तां दृष्ट्वा विरज्यते इति ॥ ११३३॥

**गुज्झंगम्मि य वियडं, पज्जावेऊण खरियमादीणं।**
**तद्दायणे विरागो, होज्ज जहाऽऽसाढभूतिस्स ॥ ११३४ ॥**

[बृ.क.भा. ६२६७]

यदि पुनः कस्यापि **गुह्याङ्ग**विषय उन्मादो भवति, न रूपलावण्याद्यपेक्ष्यः, ततः **क्षरिकादिनां** द्व्यक्षरिकादीनां **विकटं** मद्यं **पाययित्वा** प्रसुप्तीकृतानां प्रभूतमद्योद्गाल-खरण्टितसर्वशरीराणाम्, अत एव मक्षिकाभिर्भिणिभिणायमानानां **तद्दायणित्ति** तस्य गुह्याङ्गस्य मद्योद्गालनादिना बीभत्सीभूतस्य दर्शना क्रियते। ततो भवति तद्दर्शनानन्तरं कस्यापि महात्मनो विरागः। यथा **आषाढभूतेः** क्षुल्लकस्य॥११३४॥

वातेन पित्तेन चोन्मादे यतनामाह—

**वाते अब्भंग सिणेहपज्जणादी तहा निवाए य।**

**सक्कर-खीरादीहि य, पित्ततिगिच्छा उ कायव्वा ॥ ११३५ ॥**

**वाते** वातनिमित्ते उन्मादे तैलादिना शरीरस्याऽभ्यङ्गः क्रियते, **स्नेहपायनं** घृतपायनम्, **आदि**शब्दात्तथाविधान्यचिकित्सापरिग्रहः, तत्कार्यते। **तथा निवाते** स्थाप्यते, **पित्त**वशादुन्मत्तीभूतस्य **शर्करा-क्षीरादिभि**स्तस्य **चिकित्सा कर्तव्या** ॥ ११३५ ॥

सूत्रम्— **उवसग्गपत्तं भिक्खुं गिलायमाणं नो कप्पति तस्स गणावच्छेदितस्स निज्जूहित्तए, अगिलाए करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्को, ततो पच्छा तस्स अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ॥ १३ ॥**

अथास्य सूत्रस्य कः सम्बन्धः? उच्यते—

**मोहेण पित्ततो वा, आयासंचेयतो समक्खातो।**

**एसो उ उवस्सग्गो, इमो उ अण्णो परसमुत्थो ॥ ११३६ ॥** [बृ.क.भा. ६२६८]

**मोहेन** मोहनीयोदयेन वेदोदयेनेत्यर्थः, **पित्ततो वा** पित्तोदये उन्मत्तः स **आत्मासञ्चेतकः** आत्मनैवाऽऽत्मनो दुःखोत्पादकः **समाख्यातः**। यच्चाऽऽत्मनैवात्मनो दुःखोत्पादन**मेष** आत्मसञ्चेतनीय **उपसर्गः**, ततः पूर्वमात्मसञ्चेतनीय उपसर्ग उक्तः। तत उपसर्गाधिकारा**दयमन्यः परसमुत्थ** उपसर्गोऽनेन प्रतिपाद्यते इति॥११३६॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या, सा च प्राग्वत्। तत्रोपसर्गप्रतिपादनार्थमाह—

**तिविहो य उवस्सग्गो, दिव्वो१ माणुस्सितो२ तिरिच्छो३ य।**
**दिव्वो उ पुव्वभणितो, माणुसतिरिए अतो वोच्छं ॥ ११३७ ॥**

[बृ.क.भा. ६२६९]

**त्रिविधः** खलु परसमुत्थ **उपसर्गः**। तद्यथा-**दैवो मानुषिकस्तैरश्चश्च**। तत्र **दैवो** देवकृतः **पूर्वम्** अनन्तरसूत्रस्याधस्ता**द्भणितः**। **अतो मानुषं तैरश्चं** च **वक्ष्ये**॥११३७॥

प्रतिज्ञातमेव निर्वाहयति—

**विज्जाए मंतेण व, चुण्णेण व जोइतो अणप्पवसो।**
**अणुसासणा लिहावण, खमए महुरा तिरिक्खाय। ११३८ ॥**

[बृ.क.भा. ६२७०]

**विद्यया वा मन्त्रेण वा चूर्णेन वा योजितः** सम्बन्धितः सन् कश्चि**दनात्मवशो** भूयात्। तत्र **अनुशासना** इति यया रूपलुब्धया विद्यादि प्रयोजितं तस्या अनुशासना क्रियते। यथा-तपस्वी एषः, न वर्तते तव तं प्रतीदृशं कर्तुम्, एवं करणे हि प्रभूतपापोपचयसम्भव इत्यादि। अथैवमनुशासिताऽपि न निवर्तते तर्हि तस्यास्तं प्रति प्रतिविद्यया विद्वेषणमुत्पाद्यते। अथ सा नास्ति तादृशी प्रतिविद्या, तर्हि **लिहावण**त्ति तस्याः सागारिकं विद्याप्रयोगतस्तस्य पुरत आलेखाप्यते, येन स तद् दृष्ट्वा तस्याः सागारिकमिदमतिबीभत्समिति जानानो विरागमुपपद्यते। एष मानुषिक उपसर्गः। **खमगे महुरा** इति **मथुरायां** श्रमणीप्रभृतीनां मानुष उपसर्गोऽभूत्। तं क्षपको निवारितवान्। एषोपि मानुष उपसर्गः। तैरश्चमाह-**तिरिक्खाय** इति तिर्यञ्चो ग्रामेयका आरण्यका वा श्रमणादीनामुपसर्गान् कुर्वन्ति ते यथाशक्ति निराकर्तव्याः॥ ११३८॥ साम्प्रतमेनामेव गाथां विवरीषुराह—

**विज्जा मंते चुण्णे, अभिजोइय बोहियादिगहिए वा।**
**अणुसासणा लिहावण, महुराखमकादि व बलेण॥ ११३९॥**

**विद्यायां मन्त्रे चूर्णे वा अभियोजिते, बोधिका:** स्तेना, **आदिशब्दात्** म्लेच्छादिपरिग्रहस्तैर्वा **गृहीते**। यया विद्यादि योजितं तस्याः प्रागुक्तप्रकारेणाऽ**नुशासना** क्रियते। तथाऽप्यतिष्ठन्त्यां प्रतिविद्याप्रयोगतस्तं प्रति विद्वेषणमुत्पाद्यते, तस्याभावे पूर्वप्रकारेण **लेखापनं** कार्यते, बोधिकादिगृहीते पुनः **मथुराक्षपकादिनेव बलेन** यथाशक्ति बोधिकादेर्निवारणं कर्तव्यम्॥ ११३९॥

विद्याद्यभियोगमेव भेदतः सम्प्रति प्रतिपादयति—

**विज्जादऽभियोगो पुण दुविहो माणुस्सितो य दिव्वो य।**
**तं पुण जाणंति कहं?, जइ नामं गिण्हए तेसिं ॥ ११४० ॥** [बृ.क.भा.६२७१]

**विद्यादिभिरभियोगो**ऽभियुज्यमानता **पुनर्द्विविधो** द्विप्रकारस्तद्यथा **मानुषिको दैवश्च**। तत्र मनुष्येण कृतो मानुषिको, देवस्यायं तेन कृतत्वाद्दैवः। तत्र देवकृतो विद्यादिभिरभियोग

एष एव यत्तस्मिन् दूरस्थितेऽपि तत्प्रभावात् स तथारूप उन्मत्तो जायते। अथ **तं** विद्याद्यभियोगं दैवं मानुषिकं वा **कथं जानन्ति**?। सूरिराह- **तयोर्देवमनुष्ययोर्मध्ये** यस्य **नाम गृह्णाति** तत्कृतः स विद्याद्यभियोगो ज्ञेयः ॥११४०॥

साम्प्रतम् 'अणुसासणा लिहावणे'त्येतद्व्याख्यानयति—

**अणुसासियम्मि अठिए, विद्देसं देंति तह वि य अठंते।**
**जक्खीए कोवीणं, तस्स उ पुरओ लिहावेंति ॥ ११४१ ॥** [बृ.क.भा. ६२७२]

येन सामान्यतः स्त्रिया पुरुषेण वा विद्याद्यभियोजितं तस्यानुशासना क्रियते। **अनुशासितेप्यतिष्ठति** प्रतिविद्याप्रयोगतस्तं विविक्षितं साधुं प्रति तस्य विद्याद्यभियोक्तु**र्विद्वेषं ददत्**युत्पादयन्ति वरवृषभाः, **तथापि च** तस्मिन्न**तिष्ठति यक्ष्याः** शुन्याः **कौपीनं तस्य पुरतो** विद्याप्रयोगतो **लेखापयन्ति**। येन स तद् दृष्ट्वा तस्या इदं सागारिकमिति जानानो विरज्यते॥ ११४१॥

सम्प्रति प्रतिविद्याप्रयोगे दृढादरताख्यापनार्थमाह—

**विसस्स विसमेवेह, ओसहं अग्गिमग्गिणो।**
**मंतस्स पडिमंतो उ, दुज्जणस्स विवज्जणा ॥ ११४२ ॥** [बृ. क.भा. ६२७३]

**विषस्यौषधं विषमेव,** अन्यथा विषानिवृत्तेः। एव**मग्ने**र्भूतादिप्रयुक्तस्यौषध**मग्निः**, **मन्त्रस्य प्रतिमन्त्रः, दुर्जनस्यौ**षधं **विवर्जना** तद्ग्राम-नगरपरित्यागेन परित्यागः। ततो विद्याद्यभियोगे साधु-साध्वीरक्षणार्थं प्रतिविद्यादि प्रयोक्तव्यमिति ॥११४२॥

**जति पुण होज्ज गिलाणो, निरुज्झमाणो ततो से तिगिच्छं।**
**संवरियमसंवरिया, उवालभंते निसिं वसभा ॥ ११४३ ॥**

[बृ.क.भा. ६२७४]

**यदि पुन**र्विद्याद्यभियोजितस्तदभिमुखं गच्छन् **निरुध्यमानो ग्लानो** भवति, **ततः से** तस्य साधोः **चिकित्सां संवृतां** केनाप्यलक्ष्यमाणां कुर्वन्ति। तथा **असंवृता** यया विद्याद्यभियोजितं तस्या प्रत्यक्षीभूय **निशि** रात्रौ **वृषभाः** ताम् **उपालभन्ते** भेषयन्ति पिट्टयन्ति च तावत् यावत् सा मुञ्चतीति ॥११४३॥

"खमए महुरत्ति" [गा.११३८]अस्य व्याख्यानमाह—

**थूभमहे सड्ढि समणी, बोहियहरणं य निवसुयाऽऽतावे।**
**मज्झेण य अक्कंदे, कयम्मि जुद्धेण मोएत्ति ॥११४४॥** [बृ.क.भा. ६२७५]

[1]महुराए नयरीए थूभो देवनिम्मितो। तस्स महिमानिमित्तं सड्ढीतो समणीहिं समं निग्गयातो रायपुत्तो तत्थ अदूरे आयावंतो चिट्ठेइ। ताओ सड्ढी समणीतो बोहिएहिं गहियातो। तेणं तेणं आणीयातो। ताहिं तं साहुं दट्ठुं अक्कंदो कतो। ताओ रायपुत्तेण साहुणा जुद्धं दाऊण मोइयातो।

अक्षरगमनिका त्वियम्- **स्तूपस्य महे** महोत्सवे **श्राद्धिकाः श्रमणीभिः** सह निर्गताः। तासां **बोधिकैश्चौरैर्हरणम्। नृपसुतश्च** तत्रादूरे **आतापयति** बोधिकैश्च तास्तस्य **मध्येन** नीयन्ते। ताभिश्च तं दृष्ट्वा **आक्रन्दे कृते स युद्धेन** तेभ्यस्ता **मोचयति**॥११४४॥ उक्तो मानुषिक उपसर्गः। सम्प्रति तैरश्चमाह—

१. तुला-चैत्यवन्दन सङ्घाचारवृत्तिः पत्र ३८७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**गामेणाऽऽरण्णेण व, अभिभूयं संजयं तु तिरिएणं।**
**थद्धं पकंपियं वा, रक्खेज्ज अरक्खणे गुरुगा ॥ ११४५ ॥**

[बृ.क.भा. ६२७६]

**ग्रामेण आरण्येन वा तिरश्चा अभिभूतम्** आपादिताभिभवं **संयतं** यदि वा **स्तब्धं** तद्भयात् स्तम्भीभूतं **प्रकम्पितं वा** तद्भयतः प्रकम्पमानशरीरं **रक्षेत्।** यदि पुनर्न रक्षति सत्यपि बले ततो**ऽरक्षणे** प्रायश्चित्तं गुरुकाश्चत्वारो **गुरुका** मासाः॥ ११४५॥

**सूत्रम्— साहिगरणं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए, अगिलाए तस्स करणिज्जं वेयावडियं जाव रोगायंकातो विप्पमुक्के, ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया। इति॥ १४॥**

अथास्य सूत्रस्य कः सम्बन्धः? इति सम्बन्धप्रतिपादनार्थमाह—

**अभिभवमाणो समणं, परिग्गहो वा से वारितो कलहो।**
**उवसामेयव्वो ततो, अह कुज्जा दुविहभेयं तु ॥ ११४६ ॥**

**श्रमणं** साधुम**भिभवन्** गृहस्थो यदि **वा से** तस्य गृहस्थस्य **परिग्रहः** परिजनश्चा-



For Private and Personal Use Only

**वारितः** सन् **कलहं** कुर्यात्। **ततः** स कलह **उपशमयितव्यः**। एतत्प्रदर्शनार्थमधिकृतसूत्रारम्भः, अस्य व्याख्या प्राग्वत्। **अथ** सोऽनुपशान्तः सन् **कुर्यात् द्विविधं** द्विप्रकारं **भेदं** संयमभेदं जीवितभेदं चेत्यर्थः ॥११४६॥

तत आह—

**संजम-जीवियभेदे, सारक्खण साहुणो य कायव्वं।**
**पडिवक्खनिराकरणं, तस्स ससत्तीए कायव्वं ॥ ११४७ ॥**

**संयमभेदे जीवितभेदे** वा तेन क्रियमाणे **संरक्षणं साधोः कर्तव्यम्**। तथा तस्य साधोर्यः **प्रतिपक्षस्तस्य निराकरणं स्वशक्त्या कर्तव्यम्** ॥११४७॥

कथं कर्त्तव्यम्? इत्यत आह—

**अणुसासण भेसणया, जा लद्धी जस्स तं न हावेज्जा।**
**किं वा सति सत्तीए, होइ सपक्खे उवेक्खाए? ॥ ११४८ ॥**

तस्य प्रथमतः कोमलवचनैरनुशासनं कर्तव्यं, तथाप्यतिष्ठति **भीषणं** प्रतिभीषण-

मुत्पादनीयम्। तथाप्यतिष्ठति यस्य **या लब्धिः** स **तां न हापयेत्**, प्रयुञ्जीतेत्यर्थः। एतदेव विपक्षे फलभावोपदर्शनेन द्रढयति- **किं वा सत्यां शक्तौ स्वपक्षे** स्वपक्षस्य **उपेक्षया,** नैव किञ्चिदिति भावः। केवलं स्वशक्तिनैष्फल्यमुपेक्षानिमित्ता प्रायश्चित्तापत्तिश्च भवति। तस्मादवश्यं स्वशक्तिः परिस्फोरणीयेति ॥११४८॥

**सूत्रम्— सपायच्छित्तं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए, अगिलाए करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्के, ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया ॥ १५॥**

अथास्य सूत्रस्य कः सम्बन्धः? उच्यते—

**अहिगरणम्मि कयम्मी, खामिय समुवट्ठियस्स पच्छित्तं।**
**तप्पढमया भएण व, होज्जा किलंतो व वहमाणो ॥ ११४९ ॥**

[बृ.क.भा. ६२७९]

**अधिकरणे कृते क्षामिते** च तस्मिन् **समुपस्थितस्य प्रायश्चित्तं** दीयते। ततः

**साधिकरणसूत्रानन्तरं सप्रायश्चित्तं** सूत्रमुक्तमस्य व्याख्या प्राग्वत्। 'सपायच्छित्तं भिक्खुं गिलायमाण'मित्युक्तं तत्र यथा ग्लानिर्भवति तथा प्रतिपादयति-

"**तप्पढमयाए**" इत्यादि, तस्याधिकृतस्य साधोः प्रथमतायां प्रायश्चित्तप्रथमतायां **भयेन** कथमहमेतत् प्रायश्चित्तं वोक्ष्यामि? इत्येवंरूपेण, यदि वा **वहन्** तपसा **क्लान्तः** सन् ग्लानो भवति॥ ११४९॥

तत्रेयं यतना—

**पायच्छित्ते दिन्ने, भीयस्स विसज्जणा किलंतस्स।**
**अणुसट्ठि वहंतस्स उ, भयेण खित्तस्स तेगिच्छं ॥ ११५० ॥**

[बृ.क.भा. ६२८०]

**प्रायश्चित्ते दत्ते** भीतः सन् यदि ग्लायति ततः **भीतस्य** सतः **क्लान्तस्य विसर्जना** क्रियते, प्रायश्चित्तं मुत्कलं क्रियते इति भावः। अथ वहन् क्लाम्यति ततस्तस्य **वहतोऽनुशिष्टिर्दीयते**, यथा-'मा भैषीः बहुगतं स्तोकं तिष्ठति, यदि वा वयं साहाय्यं

करिष्याम' इत्यादि। अथैवमनुशिष्यमाणोऽपि भयेन क्षिप्तचित्तो भूयात् ततस्तस्य **भयेन क्षिप्तचित्तस्य** सतः **चैकित्स्यं** चिकित्साकर्म कारयितव्यमिति ॥११५०॥

**सूत्रम्— भत्तपाणपडियायक्खियं भिक्खुं गिलायमाणं नो कप्पए तस्स गणावच्छेयगस्स निज्जूहित्तए, अगिलाए करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्के, ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया ॥ १७॥**

अस्थास्य सूत्रस्य कः सम्बन्धः ? उच्यते—

**पच्छित्तं इत्तिरितो होइ, तवो वण्णितो उ जो एस।**
**आवकहियं पुण तवो, होइ परिण्णा अणसणं तु ॥ ११५१ ॥**

[बृ.क.भा. ६२८१]

**प्रायश्चित्तं** प्रायश्चित्तरूपं **यदेतत्तपो**ऽनन्तरसूत्रे वर्णितमेतत्तप **इत्वरं भवति,** यत्पुनः **परिज्ञा**रूपं तपो**ऽनशनं** तद् **यावत्कथिकम्,** तत इत्वरतपःप्रतिपादनानन्तरं यावत्कथिकतपः-प्रतिपादनार्थमधिकृतं सूत्रम् ॥ ११५१॥

अथवाऽयं सम्बन्धः—

**अट्ठं वा हेउं वा, समणस्स उ विरहिए कहेमाणो।**
**मुच्छाए विवडियस्स, उ कप्पइ गहणं परिण्णाए ॥ ११५२ ॥**

[बृ.क.भा. ६२८२]

**अर्थं वा** भाविप्रयोजनं **हेतुं वा** कस्यापि प्रयोजनस्य कारणं **श्रमणस्य** आचार्यादेः शेषजन**विरहिते** प्रदेशे **कथयन् मूर्च्छया विपतेत**, तस्य मूर्च्छया पतितस्यात्मानं प्रगुणीभवन्तमननुमन्यमानस्य **कल्पते ग्रहणं परिज्ञायाः** अनशनप्रत्याख्यानस्य। तत एतदर्थ-प्रतिपादनार्थं सप्रायश्चित्तसूत्रानन्तरमिदं **भक्त**पानप्रत्याख्यानसूत्रम् ।।११५२॥ अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या–

भक्तं च पानं च **भक्त–पाने**, ते **प्रत्याख्याते** येन स तथोक्तः, क्तान्तस्य परनिपातः सुखादिदर्शनाद्, **भिक्षुं ग्लायन्त**मित्यादि प्राग्वत्। अत्र वैयावृत्त्यमाह—

**गीयत्थाणं असती, सव्वऽसतीए व कारणपरिण्णा।**
**पाणग भत्त समाही, कहणा आलोग धीरवणा ॥ ११५३॥**

[बृ.क.भा. ६२८३]

**गीतार्थानामसति** अभावे, यदि वा **सर्वस्यापि** साधोरशिवादिकारणतोऽभावे **कारणपरिण्ण**त्ति कारणवशत एकाकिना जातेन परिज्ञाप्रत्याख्यानं भक्तपानस्य कृतम्। ततस्तस्य कृतभक्तप्रत्याख्यानस्य गीतार्थानामभावे, यदि वा कारणत एकस्यापि साधोरभावे सीदतो [१]योग्य**पानक**प्रदानेन चरमेप्सित**भक्त**प्रदानेन च **समाधि**रुत्पादनीया। **कथना** धर्म-कथना यथाशक्ति स्वशरीरानाबाधया कर्तव्या। तथा **आलोकम्** आलोचनं स दापयितव्यः। यदि कथमपि चिरजीवनेन भयमुत्पद्यते, यथा 'नाद्यापि म्रियते किमपि भविष्यति? इति न जानीमः' इति तस्य **धीरापना** कर्तव्या ॥ ११५३॥

**जइ वा न निव्वहेज्जा, असमाही वा से तम्मि गच्छम्मि।**
**करणिज्जऽन्नत्थगते, ववहारो पच्छ सुद्धो वा ॥ ११५४ ॥**

[बृ.क.भा. ६२८४]



---

१. योग पा॰ पु. प्रे.॥

**यदि वा** प्रबलबुभुक्षावेदनीयोदयतया कृतभक्त-पानप्रत्याख्यानतया **न निर्वहेत्**। न यावत्कथिकमनशनं प्रतिपालयितुं[1] क्षम इति यावद्, **असमाधिर्वा तस्मिन् गच्छे** तस्य वर्तते ततोऽ**न्यत्र गते** तस्मिन् यत्कर्त्तव्यं **तत्करणीयम्**, अन्यत्र नीत्वा यद्यदुचितं तत्तस्य करणीयमित्यर्थः। **पश्चादनशनप्रत्याख्यानभङ्गविषयस्तस्य व्यवहारः** प्रायश्चित्तं दातव्यम्। अथ स्वगच्छासमाधिमात्रेणान्यत्र गतस्ततः स मिथ्यादुष्कृतप्रदानमात्रेण **शुद्ध** इति ॥ ११५४॥

**सूत्रम्— अट्ठजायं भिक्खुं गिलायमाणं नो कप्पइ तस्स गणावच्छेदियस्स निज्जूहित्तए, अगिलाए करणिज्जं वेयावडियं जाव रोगातंकातो विप्पमुक्के, ततो पच्छा अहालहुस्सगे नामं ववहारे पट्ठवियव्वे सिया इति ॥ १७॥**

अथास्य सूत्रस्य कः सम्बन्धः? उच्यते—

**वुत्तं हि उत्तमट्ठे, पडियरणट्ठा व दुक्खरे दिक्खा।**
**एत्तो य तस्समीवं, जइ हीरइ अट्ठजायमतो ॥ ११५५ ॥**

[बृ.क.भा. ६२८५]



---

१. क्षमेत - वा. मो. पु. ॥

**उक्तं हि** यस्मात्पूर्वं **कल्पाध्ययने उत्तमार्थे** उत्तमार्थं प्रतिपत्तुकामस्य **द्व्यक्षरे** द्व्यक्षरस्य दासस्य **दीक्षा** दीयते। यदि वा **प्रतिचरणाय** 'एष दीक्षितो मां ग्लानं सन्तं प्रतिचरिष्यति' इति निमित्तम्। **एत्तो य** इत्यादि, इतश्च दीक्षादानानन्तरं **तत्समीपाद्** यस्य समीपे दीक्षा गृहीता तस्य सकाशात्, गाथायां द्वितीया पञ्चम्यर्थे। **यदि ह्रियते अतो अर्थजातं** भवति। प्रयोजनजातमुत्पद्यते। ततस्तं[1] प्रति अर्थजातसूत्रावकाशः।। ११५५॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या— सा च प्राग्वत्। साम्प्रतमर्थजातं भिक्षुं ग्लायन्तमित्यत्र योऽर्थजातशब्दस्तद्व्युत्पत्तिप्रतिपादनार्थमाह—

**अत्थेण जस्स कज्जं, संजायं एस अट्ठजातो उ।**
**सो पुण संजमभावा, चालिज्जंतो परिगिलाइ ॥ ११५६ ॥**

[बृ.क.भा. ६२८६]

**अर्थेन** अर्थितया **जातं कार्यं यस्य,** सम्बन्धविवक्षायामत्र षष्ठी येनेत्यर्थः। **सोऽर्थजातः** गमकत्वादेवमपि समासः। उपलक्षणमेतत्, तेनैवमपि व्युत्पत्तिरवसातव्या अर्थः-

१. ततः सम्प्रति॰ आहोर ७,६४॥

प्रयोजनं जातोऽस्येत्यर्थजातः। पक्षद्वयेऽपि क्तान्तस्य परनिपातः सुखादिदर्शनात्। **स पुनः** कथं ग्लायति? इति चेद् अत आह- स पुनः प्रथमतः प्रथमव्युत्पत्तिसूचितः **संयमभावात् चाल्यमानः** कम्प्यमानः **परिग्लायति**। द्वितीयव्युत्पत्तिपक्षे प्रयोजनानिष्पत्त्या ग्लायति ॥११५६॥

तस्योभयस्यापि अगिलया प्रागुक्तस्वरूपया वक्ष्यमाणं वैयावृत्त्यं करणीयं यावत् रोगातङ्कादिव रोगातङ्कात् संयमभावचलनात् प्रयोजनानिष्पादनाच्च विप्रमुक्तः स्यात्। ततः पश्चाद् यत्किमप्याचरितं भीषणादि तद्विषये यथालघुस्वको व्यवहारः प्रस्थापितः स्यादिति। सम्प्रति **निर्युक्तिकृत्** येषु स्थानेषु संयमस्थितस्याप्यर्थजातमुत्पाद्यते तान्यभिधित्सुराह—

**सेवगपुरिसे१ ओमे२, आवन्न३ अणत्त४बोहिगे तेणे५।**
**एएहिं अट्ठजातं, उप्पज्जइ संजमट्ठियस्स ॥ ११५७ ॥** [बृ.भा. ६२८७]



**सेवकपुरुषे** सेवकपुरुषविषये१, एवम् **ओमे** दुर्भिक्षे२, तथा **आपन्ने** दासत्वं समापन्ने३, तथा विदेशान्तरगमनत उत्तमर्णेनानाप्ते ४, तथा **बोधिकैरपहरणे स्तेनैरपहरणे** च, बोधिका अनार्यम्लेच्छाः, स्तेना आर्यजनपदजाता अपि शरीरापहारिणः५, **एतैः**

कारणैरर्थजातं प्रयोजनजातमुत्पद्यते संयमस्थितस्यापीति एष निर्युक्तिगाथासंक्षेपार्थः ॥११५७॥ साम्प्रतमेनामेव विवरीतुकामः प्रथमतः सेवकपुरुषद्वारमाह—

**अपरिग्गहगणियाए, सेवगपुरिसो उ कोइ आलत्तो।**
**सा तं अतिरेगेणं, पणयए अट्ठजाया य ॥ ११५८ ॥**

**सा रूविणित्ति काउं, रण्णा णीया उ खंधवारेण।**
**इयरो तीए विउत्तो, दुक्खत्तो सो य निक्खंतो ॥ ११५९ ॥**

**पच्चागय तं सोउं, निक्खंतं बेइ गंतूणं तहियं।**
**बहुयं मे उवउत्तं, जइ दिज्जइ तो विसज्जामि ॥ ११६० ॥**



न विद्यते परिग्रहः कस्यापि यस्याः सा अपरिग्रहा, सा चासौ गणिका च **अपरिग्रहगणिका,** तया **कोऽपि** राजादीनां **सेवकः पुरुषः आलप्तः** संभाषितः, आलप्य च स्वगृहमानीतः, ततः **सा अर्थजाता** सती **तं** पुरुषम् **अतिरागेणा**ऽतिरागवशात् **प्रणयते** प्रसादयति ॥ ११५८॥ अन्यदा **सा** गणिका **रूपिणी** अतिशयेन रूपवतीति

**कृत्वा राज्ञा स्कन्धावारेण** कटकेन गच्छता आत्मना सह **नीता, इतरोऽपि च** सेवकपुरुष**स्तया** गणिकया **वियुक्तो दुखार्तः** प्रियाविप्रयोगपीडितो **निष्क्रान्तः** तथारूपाणां स्थविराणामन्तिके प्रव्रज्यां प्रतिपन्नः ॥ ११५९ ॥ सा च वेश्या राज्ञा सह **प्रत्यागता तं** पुरुषं न पश्यति, गवेषयितुमारब्धः। ततः कस्यापि पार्श्वे **तं निष्क्रान्तं श्रुत्वा तत्र** यत्र स तिष्ठति, तस्यां वसतौ **गत्वा** तान् स्थविरान् **ब्रूते— बहुकं** प्रभुतं **मे** मम द्रव्यमनेन **उपयुक्त**मात्मोपयोगं नीतं, भुक्तमित्यर्थः। तद् **यदि दाप्यते ततो विसृजामि** ॥११६० ॥

एवमुक्ते यत्कर्तव्यं स्थविरैस्तदाह—

**सरभेदवण्णभेयं, अंतद्धाणं विरेयणं वावि।**
**[१]वरधणुमयवेस पुस्सभूती कुसलो सुहुमे य झाणंमि ॥११६१ ॥**

[बृ.क.भा. ६२९०]

गुटिकाप्रयोगतस्तस्य **स्वरभेदं वर्णभेदं** वा स्थविराः कुर्वन्ति। यथा सा तं न

१. वरधणुगपुरस्सभूती गलिया सहुमे - पु. प्रे. ॥

प्रत्यभिजानाति, यदि वा ग्रामान्तरादिप्रेषणेन **अन्तर्धानं** व्यवधानं क्रियते, अथवा तथाविधौषधप्रयोगतो विरेचनं कार्यते तेन स ग्लान इव लक्ष्यते, ततः कृच्छ्रेणैष जीवतीति ज्ञात्वा सा तं मुञ्चति। अथवा शक्तौ सत्यां यथा **ब्रह्मदत्तहिण्ड्यां धनु**:पुत्रेण **वरधनुना मृतकवेषकः** कृतस्तथा निश्चलो निरुच्छ्वासः सूक्ष्ममुच्छ्वन् तिष्ठति येन मृत इति ज्ञात्वा तया विसृज्यते, यदि वा यथा **पुष्पभूति**राचार्यः **सूक्ष्मे ध्याने कुशलः** सन् ध्यानवशाद् निश्चलो निरुच्छ्वासोऽतिष्ठन्, तथा तेनापि सूक्ष्मध्यानकुशलेन तथा स्थातव्यं, येन सा मृत इत्यवगम्य विमुञ्चति।।११६१॥ एतेषां प्रयोगाणामभावे—

**अणुसट्ठिं उच्चरती, गमेंति णं मित्त-णायगादीहिं।**
**एवंपि अठायंते, करेंति सुत्तम्मि जं वुत्तं ॥ ११६२ ॥**

[बृ.क.भा. ६२९१]

तस्या गणिकाया यानि **मित्राणि** ये च **ज्ञातयः**, **आदिशब्दात्तदन्यस्तथाविधपरिग्रहः** तैः स्थविरास्तां **गमयन्ति** बोधयन्ति। येनाऽ**नुशिष्टिमुच्चरति**,मुत्कलनं करोतीति भावः।

**एवमपि** [१]**अतिष्ठन्त्यां** तस्यां **यदुक्तं सूत्रे** तत्**कुर्वन्ति**। किमुक्तं भवति स मोक्तव्य इति, सूत्रे मोचनस्याभिधानात्। तथा चोक्तं- "**ताहे सो** [२]**मोक्खेयव्वो, एयं सुत्ते भणियं**" इति ॥ ११६२ ॥

गतं सेवकपुरुषद्वारम्१। अधुना अवमद्वारमाह—

**सुकुटुंबो निक्खंतो, अव्वत्तं दारगं तु निक्खिविउं।**
**मित्तस्स घरे सो विय, कालगतो तोऽवमं जायं ॥ ११६३ ॥**

**तत्थ अणाढिज्जंतो, तस्स उ पुत्तेहिं सो ततो चेडो।**
**घोलंतो आवण्णो, दासत्तं तस्स आगमणं ॥ ११६४ ॥**

मथुरायां किल नगर्यां कोऽपि वणिक् **अव्यक्तं** बालं **दारकं** पुत्रं **मित्रस्य गृहे निक्षिप्य सकुटुम्बो निष्क्रान्तः। सोऽपि** च मित्रभूतः पुरुषः **कालगतः, ततो** तस्मात्तस्य कालगमनानन्तर**मवमं** दुर्भिक्षं **जातम्** ॥११६३॥ तत्र च दुर्भिक्षे **तस्य** मित्रस्य **पुत्रैः स**

**१. अनिच्छन्त्यां - खं ॥ २. मोएयव्वो-वा.मो.पु. ॥**

**चेडोऽनाद्रियमाणो**ऽन्यत्रान्यत्र **घोलयति** परिभ्रमति। स च तथा परिभ्रमन् कस्यापि गृहे **दासत्वमापन्नः**। तस्य च पितुर्यथाविहारक्रमं विहरतस्तस्यामेव **मथुरायामागमनं** जातम्। तेन च सर्वं तद् ज्ञातम्।।११६४।। सम्प्रति तन्मोचने विधिमभिधित्सुराह—

**अणुसास१कहण२ठवियं,३ भीसण४ववहार५लिंग जं जत्थ६।**
**दूराभोगगवेसण,७ पंथे जयणा जा जत्थ८ ॥ ११६५॥** [बृ.क.भा.६२९३]

**पूर्वमनुशासनं** तस्य कर्तव्यम् १। ततो धर्मकथाप्रसङ्गेन **कथनं** स्थापत्यापुत्रादेः करणीयम् २। एवमप्यतिष्ठति यन्निष्क्रामता **स्थापितं** द्रव्यं तद् गृहीत्वा समर्पणीयम् ३, तस्याभावे निजकानां तस्य वा **भीषण**मुत्पादनीयम्४, यदि वा राजकुले गत्वा **व्यवहारः** कार्यः ५। एवमप्यतिष्ठति **यद् यत्र लिङ्गं** पूज्यं तत् तत्र परिगृह्य स मोचनीयः ६। एतस्यापि प्रयोगस्याभावे **दूरेण** उच्छिन्नस्वामिकतया **दूर**देशव्यवधानेन वा यन्निधानं तस्या**ऽऽभोगः** कर्तव्यः। तदनन्तरं तस्य **गवेषणं** साक्षान्निरीक्षणं करणीयं, गवेषणाय च गमने **पथि** मार्गे **यतना** यथा ओघनिर्युक्तावुक्ता तथा कर्तव्या। **या** च **यत्र** यतना सापि तत्र विधेया यथासूत्रमिति द्वारगाथासङ्क्षेपार्थः ॥११६५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साम्प्रतमेनामेव विवरीषुः प्रथमतोऽनुशासन-कथनद्वारमाह—

**नित्थिण्णो तुज्झ घरे, रिसिपुत्तो मुंच होहिइ धम्मो।** दारं १।
**धम्मकहपसंगेणं, कहणं थावच्चपुत्तस्स ॥ ११६६ ॥** दारं २।

एष **ऋषिपुत्रस्तव गृहे**ऽवमादिकं समस्तमपि **निस्तीर्णो**ऽधुना व्रतग्रहणार्थमुद्यत इत्यमुं **मुञ्च**, तव प्रभूतो **धर्मो भविष्यति**, एतावता गतमनुशासनद्वारम् १। तदनन्तरं धर्मकथामारभते **धर्मकथाप्रसङ्गेन** च **कथनं स्थापत्यापुत्रस्य** करणीयं, यथा स स्थापत्यापुत्रो व्रतं जिघृक्षुर्वासुदेवेन महता निष्क्रामणमहिम्ना निष्काश्य पार्श्वस्थितेन व्रतग्रहणं कारित इति। एवं युष्माभिरपि कर्तव्यम् ॥ ११६६॥

**तहविय अठंते ठवियं, भीसण ववहार निक्खमं तेणं।**
**तं घेत्तूणं दिज्जइ,** । दारं ३। **तस्सऽ सईए इमं कुज्जा ॥ ११६७ ॥**

**तथापि च** एवमपि चानुशासने कथने च कृते इत्यर्थः, **अतिष्ठति स्थापितं** च देयं, **भीषणं** वा करणीयं, **व्यवहारे** वा समाकर्षणीयः। तत्र स्थापितं भावयति, तेन पित्रा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निष्क्रामता** यत् किमपि स्थापितं द्रव्यमस्ति **तद् गृहीत्वा** तस्मै **दातव्यम्**। उपलक्षणमेतत्, तेनैतदपि द्रष्टव्यम्-अभिनवः कोऽपि शैक्षक उपस्थितः। तस्य यत् किमप्यर्थजातं स्थापितमस्ति, यदि वा गच्छान्तरे यः कोऽपि शैक्षक उपस्थितस्तस्य हस्ते यद् द्रव्यमवतिष्ठते तद् गृहीत्वा तस्मै **दीयते** ३। तस्य द्रव्यस्याऽ**सति** अभावे **इदं** वक्ष्यमाणं **कुर्यात्** ।।११६७।। तदेवाह—

**नियल्लगाण तस्सेव, भीसणं राउले सयं वा वि।**
**अविरक्का मो अम्हे कहं व लज्जा न तुब्भं ति ।।११६८।।** दारं ४।

[बृ.क.भा.६२९५]

**ववहारेण य अहयं, भागं घेच्छामि बहुतरागं भे।** दारं ५।
**अच्चिय लिंगं व करे, पन्नवणा दावणट्ठाए ।। ११६९ ।।** दारं ६।।



**निजकानाम्** आत्मीयानां स्वजनानां भीषणं कर्तव्यम्। यथा **वयमविरिक्ता** अविभक्तरिक्था वर्तामहे। ततो मोचयत मदीयं पुत्रं, **कथं** वा, केन वा कारणेन **युष्माकं**

For Private and Personal Use Only

**न लज्जा** भूयात् यदेवं मदीयपुत्रो दासत्वमापन्नोऽद्यापीह धृतो वर्तते इति। अथैवमप्युक्ते ते द्रव्यं न प्रयच्छन्ति। तत इदमपि वक्तव्यं— राजकुलं गत्वा **व्यवहारेणाप्यहं भागं बहुतरकं** प्रभूततरकं **ग्रहीष्यामि भे** भवतां तद् वरमिदानीं स्तोकं प्रयच्छथ। एवं तेषां **भीषणं** कर्तव्यम्। यदि वा येन गृहीतो वर्तते तस्य भीषणं विधेयं, यथा— यदि [1]मोचयसि तर्हि मोचय, अन्यथा भवतस्तं शापं दास्यामि येन न त्वं नेदं वा तव कुटुम्बकमिति ४। एवं भीषणेऽपि कृते यदि न मुञ्चति यदि वा ते स्वजनाः किमपि न प्रयच्छन्ति तदा **स्वयं राजकुले** गत्वा निजकैः सह व्यवहारः करणीयः। व्यवहारं च कृत्वा भाग आत्मीयो गृहीत्वा तस्मै दातव्यः। यद्वा स एव राजकुले व्यवहारेणाकृष्यते, तत्र च गत्वा वक्तव्यं यथा—अयमृषिपुत्रो व्रतं जिघृक्षुः केनापि कपटेन धृतोऽनेन वर्तते, यूयं च धर्मव्यापारनिषण्णाः, ततो यथाऽयं धर्ममाचरति यथा चामीषामृषीणां समाधिरुपजायते तथा यतध्वमिति ५। अस्यापि प्रकारस्याभावे यद् यत्र **लिङ्गमर्चितं** तत्परिगृह्णाति। परिगृह्य च **दापनार्थं,** विवक्षितबालकमोचनार्थमित्यर्थः। तल्लिङ्गधारिणां मध्ये ये महान्तस्तेषां **प्रज्ञापना** कर्तव्या। येन ते मोचयन्ति ६ ॥११६८॥११६९॥

**१. मोचनीयं तर्हि - वा. मो. पु. मु. ॥**

सम्प्रति 'दूराभोगे' [गा.११६५]त्यादि व्याख्यानार्थमाह—

**पुट्ठा व अपुट्ठा वा, चुयसामिनिहिं कहिंति ओहादी।**
**घेत्तूण जावदट्ठो पुणरवि सारक्खणा जयणा ॥ ११७० ॥**

[बृ.क.भा.६२९७]

यदि वा **अवध्यादयो** अवधिज्ञानिनः, आदिशब्दात् विशिष्टश्रुतज्ञानिपरिग्रहः **पृष्टा वा अपृष्टा** तथाविधं तस्य प्रयोजनं ज्ञात्वा **च्युतस्वामिनिधिम्** उच्छन्नस्वामिकं निधिं **कथयन्ति**। तदानीं तस्य तेषां तत्कथनस्योचितत्वात्। ततो **यावदर्थः** यावता प्रयोजनं तद् **गृहीत्वा पुनरपि** तस्य निधेः **संरक्षणं** कर्तव्यं, प्रत्यागच्छता च **यतना** विधेया। सा चाग्रे स्वयमेव वक्ष्यते ॥११७०॥

**सोऊण अट्ठजायं, अट्ठं पडिजग्गए उ आयरिओ।**
**संघाडयं च देंती, पडिजग्गइ णं गिलाणंपि ॥ ११७१ ॥**

[बृ.क.भा. ६२९८]

निधिग्रहणाय मार्गे गच्छन्त**मर्थजातं** साधुं **श्रुत्वा** साम्भोगिकोऽसाम्भोगिको वाऽऽ**चार्योऽर्थं प्रतिजागर्ति** उत्पादयति। यदि पुनस्तस्य द्वितीयः संघाटको न विद्यते ततः **सङ्घाटकमपि ददाति**। अथ कथमपि स ग्लानो जायते ततस्तं **ग्लानमपि सन्तं प्रतिजागर्ति,** न तूपेक्षते, जिनाज्ञाविराधनप्रसक्तेः॥ ११७१॥ यदुक्तमनन्तरं यतना प्रत्यागच्छता कर्तव्या, तामाह—

**काउं निसीहियं, अट्ठजायमावेयणं गुरुहत्थे।**
**दाऊण पडिक्कमते, मा पेहेंता मिगा पस्से ॥ ११७२ ॥** दारं ७।

[बृ.क.भा.६२९९]



यत्रान्यगणे[१] स प्राघूर्णिक आयाति, तत्र **नैषेधिकीं कृत्वा** 'नमः क्षमाश्रमणेभ्य' इत्युदित्वा च मध्ये प्रविशति प्रविश्य च **यदर्थजातं** तद्गुरुभ्य **आवेदयति** कथयति। आवेद्य च तदर्थजातं **गुरुहस्ते दत्त्वा प्रतिक्रामति** । कस्मात् गुरुहस्ते दत्त्वा प्रतिक्रामति?। न स्वपार्श्व एव स्थिते? इति चेद् अत आह–**मा प्रेक्षमाणा** निरीक्षमाणा **मृगा** इव **मृगा**

१. °गणात् स प्राघूर्णकः - खं ॥

अगीतार्था क्षुल्लकादयः **पश्येयुः** गुरुहस्ते च स्थितं न निरीक्षन्ते। अस्मद्गुरूणां समर्पितमिति विरूपसङ्कल्पाऽप्रवृत्तेः ७॥११७२॥ सम्प्रति "पंथे जयणा य जा जत्थ" [गा. ११६५] एतद्व्याख्यानार्थमाह—

**सण्णीव सावओ वा, केवइए देज्ज अट्ठजातस्स।**
**पच्चुप्पन्ननिहाणे, कारणजाए गहणसोही ॥ ११७३ ॥** दारं ८।

[बृ.क.भा. ६३००]

यत्र **संज्ञी** सिद्धपुत्रः **श्रावको वा** वर्तते तत्र गत्वा तस्मै स्वरूपं निवेदनीयं प्रज्ञापना च कर्तव्या। ततो यत्तत्र तेन **प्रत्युत्पन्नं नवं निधानं** गृहीतं वर्तते। तस्याऽ**र्थजातस्य** मध्यात्**कतिपयान्** भागान् **दद्यात्** स्वयं, तदानीं [१]प्रज्ञापनातो वा, गीतार्थत्वात्। अस्य प्रकारस्याभावे यन्निधानं दूरमवगाढं वर्तत्ते ततस्तेन उत्खन्य दीयमानमधिकृते **कारणजाते गृह्णानोऽपि शुद्धः** भगवदाज्ञया वर्तनात्। ८ ॥११७३॥

गतमवमद्वारम्२। इदानीमापन्नद्वारमाह—

---

**१. प्रज्ञापितो वा - वा. मो. पु. ॥**

**थोवं पि धरेमाणो, कत्थइ दासत्तमेइ अदलंतो।**
**परदेसम्मि वि लब्भइ, वाणियधम्मो ममेस त्ति ॥ ११७४॥**

[बृ.क.भा.६३०१]

**स्तोकमपि** ऋणशेषं **धारयन् क्वचिद्**देशे कोऽपि पुरुषस्तद् **अदलंतो**त्ति अददानः कालक्रमेण ऋणप्रवृद्ध्या **दासत्वमेति** प्रतिपद्यते, तस्यैवं दासत्वमापन्नस्य स्वदेशे दीक्षा न दातव्या। अथ कदाचित्परदेशे गतः सन्नविदितस्वरूपो अशिवादिकारणतो वा दीक्षितो भवेत्। तत्र वणिजा परदेशे वाणिज्यार्थं गतेन दृष्टो भवेत् तत्राऽयं किल न्यायः- '**परदेशे** गता अपि वणिज आत्मीयं **लभन्ते**'। तत एवं **वणिग्धर्मे** व्यवस्थिते सति स एवं ब्रूयात्- '**मम एष** दास इति न मुञ्चामि अमुमि'ति ॥ ११७४॥

तत्र यत्कर्तव्यं तत्प्रतिपादनार्थं द्वारगाथामाह—

**नाहं विदेस आहरणमाइ विज्जा य मंतजोगा य।**
**नेमित्तरायधम्मे, पासंडगणे धणे चेव ॥ ११७५ ॥** [बृ.क.भा. ६३०२]

यस्तव दासत्वमापन्नो वर्तते, **न सोऽहं**, किन्त्वहमन्यस्मिन् **विदेशे** जातः, त्वं तु सदृक्षतया विप्रलब्धोऽसि। अथ स प्रभूतजनविदितो वर्तते तत एवं न वक्तव्यं, किन्तु स्थापत्यापुत्राद्य**ुदाहरणं** कथनीयम्। यदि कदाचित्तत्श्रवणतः प्रतिबुद्धो मुत्कलयति। **आदि**शब्दात् गुटिकाप्रयोगतः स्वरभेदादि कर्तव्यमिति परिग्रहः, एतेषां प्रयोगाणामभावे **विद्या मन्त्रो योगा वा** ते प्रयोक्तव्याः[1], यैः परिगृहीतः सन् मुत्कलयति, तेषामप्यभावे **निमित्तेना**ऽतीताऽनागतविषयेण **राजा,** उपलक्षणमेतदन्यो वा नगरप्रधान आवर्जनीयः, येन तत्प्रभावात् स प्रेर्यते **धर्मो** वा कथनीयो राजादीनां, येन ते आवृत्ताः सन्तस्तं प्रेरयन्ति। एतस्यापि प्रयोगस्याभावे **पाषण्डान्** सहायान् कुर्याद्, यद्वा यो **गणः सार**स्वतादिको बलीयान् तं सहायं कुर्यात्। तदभावे दूराभोगादिना प्रकारेण **धन**मुत्पाद्य तेन मोचयेत् , एष द्वारगाथासंक्षेपार्थः ॥११७५॥

---

**१. °व्याः, येन तैरभियोजितः सन् - वा. मो. पु. ॥**

साम्प्रतमेनामेव गाथां विवरीषुराह—

**सारक्खएण जंपसि, जातो अन्नत्थ ते वि आमं ति।**
**बहुजणविण्णायम्मि उ, थावच्चसुयादि आहरणं ॥ ११७६ ॥**

[बृ.क.भा. ६३०३]

यदि प्रभूतजनविदितो न भवति यथायं तद्देशजात इति तत एवं ब्रूयात्। अह**मन्यत्र** विदेशे **जातः**, त्वं तु **सादृक्ष्येण** विप्रलब्ध एवमसमञ्जसं **जल्पसि**। एवमुक्ते **तेऽपि** तत्रत्याः ख्याताः **आम**मेवमेतत् यथायं वदतीति साक्षिणो जायन्ते। अथ तद्देशजाततया प्रभूतजनविदितो वर्तते, ततस्तस्मिन् **बहुजनविज्ञाते** पूर्वोक्तं न वक्तव्यं किन्तु प्रबोधनाय **स्थापत्यापुत्राद्याहरणं** कथनीयम् ॥११७६॥

**विज्जादी सरभेयण, अंतद्धाणं विरेयणं वावि।**
**वरधणुय पुस्सभूती, गुलिया सुहुमे य झाणंमि ॥ ११७७ ॥**

[बृ.क.भा. ६३०४]

**विद्यादयो** विद्या-मन्त्र-योगाः प्रयोक्तव्याः, येन तैरभियोजितः सन् मुत्कलयति

आहरणमादीत्यत्र आदिशब्दव्याख्यानार्थमाह— गुटिकाप्रयोगतः **स्वरभेदनम्,** उपलक्षणमेतत् , वर्णभेदं वा कारयेत्। यदि वा **अन्तर्धानं** ग्रामान्तरप्रेषणेन व्यवधानं, **विरेचनं वा** ग्लानतोपदर्शनाय कारयितव्यो येन कृच्छ्रेणैष जीवतीति ज्ञात्वा विसृज्यते यदि वा **वरधनुरिव गुटिका**प्रयोगतः, **पुष्पभूति**राचार्य इव **सूक्ष्मध्यानवशतो** निश्चलो निरुच्छ्वासस्तथा स्याद् येन मृत इति ज्ञात्वा परित्यज्यते॥ ११७७॥

**असतीए विण्णवेंती, रायाणं सो व होज्ज अह भिन्नो।**
**तो से कहिज्जइ धम्मो, अणिच्छमाणे इमं कुज्जा॥ ११७८ ॥**

एतेषां प्रयोगाणा**मसति** अभावे **राजानं विज्ञपयन्ति,** यथा तपस्विनमिहपरलोकनिःस्पृहमेष व्रतात् च्यावयतीति। **अथ सोऽपि** राजा तेन **भिन्नो** व्युद्ग्राहितो वर्तते **ततः से** तस्य राज्ञः प्रतिबोधनाय **धर्मः कथ्यते।** अथ स धर्मं नेच्छति ततस्तस्मिन् धर्म**मनिच्छति,** उपलक्षणमेतत् निमित्तेन वा अतीताऽनागतरूपेण[1] तत्राप्यनाद्रियमाणे **इदं** वक्ष्यमाणं **कुर्यात्**॥११७८॥ तदेवाह—



१. °ण अविद्यमाने इदं - खं. ॥

**पासंडे व सहाए, गेण्हइ तुब्भं पि एरिसं होज्जा।**
**होहामो य सहाया, तुब्भ वि जो वा गणो बलिओ ॥ ११७९॥**

[बृ.क.भा.६३०५]

**पाषण्डान्वा सहायान् गृह्णाति।** अथ ते सहाया न भवन्ति तत इदं तान् प्रति वक्तव्यम्- **युष्माकमपीदृशं** प्रयोजनं **भवेद्** भविष्यति तदा **युष्माकमपि** वयं **सहाया भविष्यामः**। एवं तान् सहायान् कृत्वा तद्बलतः स प्रेरणीयः यदि वा **यो गणो बलीयान्** तं सहायं परिगृह्णीयात् ॥ ११७९॥

**एएसिं असतीए, संता व जया न होंति उ सहाया।**
**ठवणा दूराभोगण, लिंगेण व एसिउं देंति ॥ ११८०॥** [बृ.क.भा.६३०६]

**एतेषां** पाषण्डानां गणानां वा **असति** अभावे ये सन्तः शिष्टास्ते सहायाः कर्तव्याः। **यदा तु सन्तो वा सहाया न भवन्ति,** तदा **ठवण**त्ति निष्क्रामता या द्रव्यस्य स्थापना कृता तद्दानतः स मोचयितव्यः, यदि वा **दूराभोगणेन** प्रागुक्तप्रकारेणैव अथवा यद् यत्र

लिङ्गमर्चितं तेन धन**मेषित्वा** उत्पाद्य **ददति** तस्मै वरवृषभाः ॥११८०॥

गतमापन्नद्वारमिदानीम्[1] अनासद्वारमाह—

**एमेव अणत्तस्स वि, तववतुलणा नवरि एत्थ णाणत्तं।**
**जं जस्स होइ भंडं, सो देति म[2]मंतिगो धम्मो ॥ ११८१ ॥**

**एवमेव** अनेनैव दासत्वापन्नगतेन प्रकारेण **अ[3]नाप्तस्यापि** प्रागुक्तशब्दार्थस्याऽपि मोक्षणे यतना द्रष्टव्या। **नवरमत्र** धनदानचिन्तायां **नानात्वं,** किं तद्? इत्याह—**तपस्तुलना** कर्तव्या। सा चैवं- सो भण्यते, साधवस्तपोधना अहिरण्यसुवर्णाः, लोकेऽपि **यद् यस्य भाण्डं भवति स** तत्तस्मै उत्तमर्णाय **ददाति,** अस्माकं च पार्श्वे **धर्म**स्तस्मात्त्वमपि धर्मं गृहाण॥११८१॥ एवमुक्ते स प्राह—

---

१. नीमृणार्तद्वार° वा. मो. पु. मु. ॥ २. सो देति तगं तिभो धम्मो - पु. प्रे. ॥ बृ. क. भा. ६३०७ गाथायां उत्तरार्द्धं 'बोहिय तेणेहि हिते ठवणादि गवसणे जाव ।' ठवणादि गवसणे जाव ।' इति ३. °ण ऋणार्त्तस्ययपि - वा.मो.पु ।।

**जोऽणेण कतो धम्मो, तं देउ न एत्तियं समं तुलति।**
**हाणी जावेगाहं, तावइयं विज्जथंभणया ॥ ११८२ ॥** [बृ.क.भा.६३०८]

**योऽनेन कृतो धर्मस्तं** सर्वं मह्यं **ददातु**। एवमुक्ते साधुभिर्वक्तव्यं **नैतावत्** दद्मः, यतो नैतावत्**समं तुलति** । स प्राह- एकेन संवत्सरेण हीनं प्रयच्छत, तदपि प्रतिषेधनीयं, 'द्वाभ्यां संवत्सराभ्यां[हीनं]दत्त' इति एवं तावत् विभाषा कर्तव्या, **यावद् 'एकेन दिवसेन** कृतो योऽनेन धर्मस्तं प्रयच्छत' ततो वक्तव्यं नाभ्यधिकं[1] दद्मः, किन्तु यावत्तद् गृहीतं मुहूर्तादिकृतेन धर्मेण तोल्यमानं समं तुलति **तावत्प्रयच्छामः**। एवमुक्ते यदि तोलनाय ढोकते तदा **विद्यादिभिस्तुला स्तम्भनीया,** येन क्षणमात्रकृतेनापि धर्मेण सह न समं तोलयतीति। धर्मतोलनं च धर्माधिकरणिकनीतिशास्त्रप्रसिद्धमिति ततोऽवसातव्यम्॥११८२॥

**जइ पुण नेच्छेज्ज तवं, वाणियधम्मे ताहे सुद्धो उ।**
**को पुण वाणियधम्मो?, सामुद्दे संभमे इणमो ॥ ११८३॥**

१. नास्याधिकं- पु. प्रे. ॥

**वत्थाणाऽऽभरणाणि य, सव्वं छड्डित्तु एगवंदेणं।**
**पोयम्मि विवणम्मि, वाणियधम्मे हवइ सुद्धो ॥ ११८४ ॥**

[बृ.क.भा.६३०९]

**एवं इमो वि साहू, तुज्झं नियगं च सार मोत्तूणं।**
**निक्खंतो तुज्झ घरे, करेउ इण्हिं तु वाणिज्जं ॥ ११८५॥**

**यदि पुनरुक्तप्रकारेण** क्षणमात्रकृतस्यापि धर्मस्यालाभेन **नेच्छेत्तपो** गृहीतुं ततो वक्तव्यम्- एष **वणिग्धर्मेण** वणिग्न्यायेन **शुद्धः** स प्राह-**कः पुनर्वणिग्धर्मो** येनैष **शुद्धः** क्रियते। साधवो वदन्ति- **समुद्रे संभ्रमे** गमने अयं वक्ष्यमाणः॥ ११८३॥

तमेवाह-**वत्थाणाभरणे**त्यादि, यथा वणिक् ऋणं कृत्वा प्रवहणेन समुद्रमवगाढस्तत्र **पोते** प्रवहणे **विपन्ने** आत्मीयानि परकीयानि च प्रभूतानि वस्त्राण्याभरणानि, चशब्दाच्छेषमपि च नानाविधं क्रयाणकं **सर्वं छर्दयित्वा** परित्यज्य **एकवृन्देन** भावप्रधान एकशब्दः एकतैव वृन्दं तेन एकाकी उत्तीर्णो **वणिग्धर्मे** वणिग्न्याये **शुद्धो भवति,** न ऋणं दाप्यते॥११८४॥

**एवमयमपि साधुस्तव** सत्कमात्मीयं च सर्वं **सारं तव गृहे मुक्त्वा निष्क्रान्तः** संसारसमुद्रादुत्तीर्ण इति शुद्धः, न धनिका ऋणमात्मीयं याचितुं लभन्ते। तस्माद् न किञ्चिदत्र तवाऽऽभाव्यमस्तीति **करोत्विदानी**मेष स्वेच्छया तपो**वाणिज्यं** पोतपरिभ्रष्टवणिगिव निर्ऋणो वाणिज्यमिति ॥ ११८५॥

गतमनाप्तद्वारम् ४। अधुना बोधिकस्तेनद्वारप्रतिपादनार्थमाह—

**बोहियतेणेहिं हिए, विमग्गणे साहुणो नियमसो उ।**
**अणुसासणमादीतो, एसेव कमो निरवसेसो ॥ ११८६ ॥** दारं ५ ॥

**बोधिकाः स्तेनाश्च** प्रागुक्तस्वरूपाः। **तैर्हृते** साधौ **नियमशः** नियमेन **साधोर्विमार्गणं** कर्तव्यम्। तस्मिंश्च विमार्गणे कर्तव्ये **अनुशासनादिको** अनुशिष्टिप्रदानादिको धनप्रदान-पर्यन्त **एष एवानन्तरोदितः क्रमो निरवशेषो वेदितव्यः** ५॥ ११८६॥

सम्प्रत्युपसंहारव्याजेन शिक्षामपवादं चाह—

**तम्हा अपरायत्ते, दिक्खिज्जाऽणारिए य वज्जेज्जा।**

**अद्धाण अणाभोगा, विदेस असिवादिसुं दोवि ॥ ११८७ ॥** [बृ.क.भा.६३१०]

**यस्मात्प**रायत्तदीक्षणे अनार्यदेशगमने चैते दोषास्तस्मा**दपरायत्तान् दीक्षयेत्, अनार्यांश्च** देशान् **वर्जयेत्**। अत्रैवापवादमाह-**अद्धाणत्ति** अध्वानं प्रतिपन्नस्य ममोपग्रहमेते करिष्यन्तीति हेतोः परायत्तानपि दीक्षयेत्। यदि **वाऽनाभोगतः** प्रव्राजयेत् **विदेश**स्था वा स्वरूपमजानाना दीक्षयेयुः। **अशिवादिषु** पुनः कारणेषु **दोवित्ति** द्वे अपि परायत्तदीक्षणाऽनार्यदेशगमने अपि कुर्यात्। किमुक्तं भवति?-अशिवादिषु कारणेषु समुपस्थितेषु परायत्तानपि गच्छोपग्रहनिमित्तं दीक्षयेत्, अनार्यानपि च देशान् विहरेदिति।॥ ११८७॥

**सूत्रम्— अणवट्ठप्पं भिक्खुं अगिहिभूयं नो कप्पइ तस्स गणावच्छेइयस्स उवट्ठावेत्तए॥ १८॥ अणवट्ठप्पं भिक्खुं गिहिभूयं कप्पइ तस्स गणावच्छेदियस्स उवट्ठावित्तए ॥ १९॥ इति।**

अथास्य सूत्रस्य कः सम्बन्धः? उच्यते—

**अट्ठस्स कारणेणं, साहम्मियतेणमादि जइ कुज्जा।**
**इय अणवट्ठे जोगो, नवमातो यावि दसमस्स ॥ ११८८ ॥**

**साधर्मिकैः कारणेन** प्रागुक्तेनोत्पादितो योऽर्थस्तस्य **स्तैन्यम्,** आदिशब्दादन्यधार्मिकस्तैन्यादिपरिग्रहः, **यदि कुर्या**त्ततः सोऽनवस्थाप्यो भवति इत्येतदर्थख्यापनार्थमर्थजातसूत्रानन्तरमनवस्थाप्यसूत्रम् **इति** एषो **अनवस्थाप्ये** अनवस्थाप्यसूत्रस्य **योगः** सम्बन्धः। पाराञ्चितसूत्रस्यापि सम्बन्धमाह-नवमात्प्रायश्चित्ताद् अनवस्थाप्यादनन्तरं किल दशमं पाराञ्चितनामकं प्रायश्चित्तं भवति। ततो **नवमाद्** नवमप्रायश्चित्तसूत्रानन्तरं **दशमस्य** दशमप्रायश्चित्तसूत्रस्यारम्भः॥ ११८८॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**अनवस्थाप्यं भिक्षुमगृहीभूत**मगृहस्थीकृतं **नो कल्पते** यस्य समीपेऽवतिष्ठते **तस्य गणावच्छेदिनो** गणस्वामिन **उपस्थापयितुम्**। तथाऽ**नवस्थाप्यं भिक्षुं गृहीभूतं कल्पते तस्य गणावच्छेदिन उपस्थापयितुम्** ॥ सम्प्रति पाराञ्चितसूत्रमाह—

**सूत्रम्— पारांचियं भिक्खुं अगिहिभूयं नो कप्पति तस्स गणावच्छेदियस्स**

**उवट्ठावेत्तए॥ २०॥ पारंचियं भिक्खुं गिहिभूयं कप्पइ तस्स गणावच्छेदियस्स उवट्ठावेत्तए ॥ २१॥**

अस्य सूत्रद्वयस्याक्षरगमनिका प्राग्वत्। सम्प्रति **भाष्यविस्तरः**—

**अणवट्ठो पारंचिय, पुव्वं भणिया इमं तु नाणत्तं।**
**गिहिभूयस्स य करणं, अकरणे गुरुगा य आणादी ॥ ११८९ ॥**

**अनवस्थाप्यः पाराञ्चितः** एतौ द्वावपि **पूर्वं भणितौ। इदं** त्वत्र **नानात्वं गृहीभूतस्य** गृहस्थ[१]रूपसदृशस्य **करणम्**। यदि पुर्नगृहीभूतमकृत्वा तमुपस्थापयति, तदा गृहीभूतस्याऽ**करणे** प्रायश्चित्तं **गुरुका**श्चत्वारो गुरुमासाः। तथा **आज्ञादयः** आज्ञाऽनवस्था-मिथ्यात्व-विराधनादोषाः। अन्यच्च प्रमत्तं सन्तं देवता छलयेत्, गृहीभूतस्य तु छलना न भवति तस्माद् गृहीभूतं कृत्वा तमुपस्थापयेत्॥११८९॥ गृहस्थरूपताकरणमेव भावयति—

**वरनेवत्थं एगे, ण्हाणाविवज्जमवरे जुगलमेत्तं।**
**परिसामज्झे धम्मं, सुणेज्ज कहणा पुणे दिक्खा ॥ ११९० ॥**

---

१. °स्थमूतसद्द° खं. ॥

**एके** आचार्याः[लाटाः] एवं ब्रुवते—**स्नानविवर्जं वरं नेपथ्यं** तस्य क्रियते। **अपरे दाक्षिणात्याः** पुनरेवमाहुः **वस्त्रयुगलमात्रं** परिधाप्यते। ततः **पर्षन्मध्ये** आचार्यसमीपमुपगम्य ब्रूते- 'भगवन्! **धर्मं** श्रोतुमिच्छामि', ततः **कहणत्ति** आचार्या धर्मं कथयन्ति । कथिते च सति सकलजनसमक्षं ब्रूते- 'श्रद्दधामि सम्यग् धर्ममेनमिति मां प्रव्राजयत'। एवमुक्ते तस्य **दीक्षा** लिङ्गसमर्पणम्। लिङ्गसमर्पणानन्तरं च तत्क्षणमेवोपस्थाप्यते॥ ११९०॥

अत्र शिष्यः प्राह कस्मादेष गृहस्थावस्थां प्राप्यते? सूरिराह—

**ओहामितो न कुव्वइ, पुणो वि सो तारिसं अतीयारं।**
**होइ भयं सेसाणं, गिहिरूवे धम्मिया चेव ॥ ११९१ ॥**

**किं वा तस्स न दिज्जति, गिहिलिंगं? जेण भावतो लिंगं।**
**अजढे वि दव्वलिंगे, सलिंगपडिसेवणा विजढं ॥ ११९२ ॥**



**अपभ्राजितो** मानम्लानिमापादितः सन् **पुनरपि स तादृशमतीचारं न करोति। शेषाणामपि** च साधूनां **भयमुत्पादितं भवति** येन तेऽप्येवं न कुर्वते । तस्माद् **गृहरूपे**

गृहस्थतारूपस्य **धर्म्यता** धर्मादनपेता न्याय्या तस्यापाद्यमाना गृहस्थरूपतेति भावः ॥११९१॥ **किं वेत्यादि,** किं वा केन वा कारणेन **तस्य न दीयते गृहिलिङ्गं** ? दातव्यमेव तस्य गृहिलिङ्गमित्यर्थः। **येन** कारणेनाऽपरित्यक्तेऽपि **द्रव्यलिङ्गे स्वलिङ्गे प्रतिसेवनात्। भावतो लिङ्ग विजढं** परित्यक्तमिति॥ ॥११९२॥ सम्प्रति सूत्रकृदेवापवादमाह—

**सूत्रम्— "अणवट्ठप्पं भिक्खुं पारंचियं [ वा ] भिक्खुं गिहिभूयं वा अगिहिभूयं वा कप्पइ तस्स गणावच्छेदितस्स उवट्ठावेत्तए, जहा तस्स गणस्स पत्तियं सिया"** इति ॥ २२॥

**अनवस्थाप्यं भिक्षुं पाराञ्चितं वा भिक्षुं गृहीभूतमगृहीभूतं वा कल्पते तस्य गणावच्छेदिन उपस्थापयितुं,** कथम् ? इत्याह-यथा **तस्य गणस्य प्रीतिकं** प्रीतिकरमुपस्थापनं **स्यात्** तथा कल्पते, नान्यथा॥

इह यो गृहस्थीभूतः स तावदुपस्थाप्यत एव, न तस्यापवादविषयता, यस्त्वगृहीभूतः सोऽपवाद-विषयः, तस्योत्सर्गतः प्रतिषिद्धत्वात्। तत्र यैः कारणैरगृहीभूतोऽप्युपस्थाप्यते तान्यभिधित्सुराह—

**अंगिही[1]भूतो कीरइ, रायणुवत्तिए १पदुट्ठसगणो वा२।**
**परमोयावण३ इच्छा, दोण्ह गणाणं विवादो वा ४॥ ११९३ ॥** दारगाहा।

**अगृहीभूतः** अगृहस्थीभूतः सन् उपस्थाप्यः **क्रियते राजानुवृत्त्या** । यदि वा **प्रद्विष्टः स्वगणः**, अथवा परैर्बलात्कारेण मोचापनं **परमोचापनं**, यद्वा **इच्छा** पूर्वा **द्वयोर्गणयोर्विवादे** । एतैः कारणैरगृहीभूतोऽप्युपस्थाप्यते ॥ ११९३॥

तत्र यथा राजानुवृत्त्या सोऽगृहस्थीभूतोऽप्युपस्थाप्यो भवति तथा भाव्यते। इहानवस्थाप्यं पाराञ्चितं वा कोऽपि प्रतिपन्नस्तस्य चायं कल्पः- यावदनवस्थाप्यं पाराञ्चितं वा वहति तावद्बहिः क्षेत्रादवतिष्ठते। स च बहिर्यावत्तिष्ठति तावन्न गृहस्थः क्रियते किन्त्वागतः करिष्यते। बहिश्चावतिष्ठमानः स जिनकल्पिक इव भिक्षाचर्यामलेपकृद्भक्तादिग्रहणात्मिकां करोति। तस्य च तथा बहिस्तिष्ठतो यदाचार्यः करोति तत् प्रतिपादयति—

**ओलोयणं गवेसण,आयरिओ कुणति सव्वकालंपि।**
**उप्पन्ने कारणम्मि, सव्वपयत्तेण कायव्वं ॥ ११९४ ॥** [बृ.क.भा. ५०३६]

---

१. 'अत्र ११९३ गाथा स्थाने चूर्णौ भिन्ना गाथा दृश्यते'-पु.प्रे. ॥

यस्याऽऽचार्यस्य समीपेऽनवस्थाप्यं पाराञ्चितं वा प्रतिपन्नः स **आचार्यः सर्वकालमपि** यावन्तं कालं तत्प्रायश्चित्तं वहति तावन्तं सकलमपि कालं यावत्प्रतिदिवस**मवलोकनं करोति,** तत्समीपं गत्वा तद्दर्शनं करोतीत्यर्थः। तदनन्तरं **गवेषणं** गतोऽल्पक्लमतया तव दिवसो रात्रिर्वा? इति पृच्छां करोति, **उत्पन्ने** पुनः **कारणे** ग्लानत्वलक्षणे **सर्वप्रयत्नेन** स्वयमाचार्येण **कर्तव्यं** भक्त-पानाऽऽहरणादि॥ ११९८॥

**जो उ उवेहं कुज्जा, आयरिओ केणई पमाएण।**
**आरोवणा उ तस्स, कायव्वा पुव्वनिद्दिट्ठा ॥ ११९५ ॥**

[बृ. क. भा. १९८३, ५०३७ नि. भा. ३०८३]

**यः पुनराचार्यः केनापि प्रमादेन** जनव्याक्षेपादिना **उपेक्षां कुरुते** तत्समीपं गत्वा तच्छरीरस्योदन्तं न वहति, **तस्य आरोपणा** प्रायश्चित्तप्रदानं **पूर्वनिर्दिष्टा कर्तव्या,** चत्वारो गुरुकास्तस्य प्रायश्चित्तमारोपयितव्यमिति भावः॥ ११९५॥ यदुक्तम्- 'उत्पन्ने कारणे सर्वप्रयत्नेन कर्तव्यं' तद्भावयति—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आहरति भत्त-पाणं, उव्वट्टणमादियं पि से कुणति।**
**सयमेव गणाहिवती अह अगिलाणो सयं कुणति॥ ११९६॥**

[बृ.क.भा.५०३८]

अथ सोऽनवस्थाप्यः पाराञ्चितो वा ग्लानो भवेत् ततस्तस्य **गणाधिपति**राचार्यः स्वयमेव **भक्तं पानं** वा **आहरति** आनयति। **उद्वर्तनादिकमपि, आदि**शब्दात् परावर्तनोर्ध्वकरणोपवेशनादिपरिग्रहः **से** तस्य **स्वयं करोति। अथ** जातः **अग्लानो** नीरोगस्ततः स आचार्यं न किमपि कारयति, किन्तु सर्वं **स्वयमेव कुरुते** ॥ ११९६॥ अधुना यदुक्तम् 'ओलोयणं गवेसण'त्ति तद्व्याख्यानार्थमाह—

**उभयंपि दाऊण सपाडिपुच्छं, वोढुं सरीरस्स य वट्टमाणिं।**
**आसासइत्ताण तवो किलंतं, तमेव खेत्तं समुवेंति थेरा॥ ११९७॥**

[बृ.क.भा.५०३९]

**स्थविरा** आचार्याः शिष्याणां प्रातीच्छकानां[1] च **उभयमपि** सूत्रमर्थं चेत्यर्थः। किं

१. प्रती° वा. मो. पु. मु. ॥



For Private and Personal Use Only

विशिष्टम् ? इत्याह- **सप्रतिपृच्छं** पृच्छा प्रश्नः, तस्याः प्रतिवचनं प्रतिपृच्छा, प्रत्युक्तौ प्रतिशब्दः, सह प्रतिपृच्छा यस्य तत् सप्रतिपृच्छं, सूत्रविषये अर्थविषये वा यद् येन पृष्टं तत्र प्रतिवचनमित्यर्थः **दत्त्वा** तत्सकाशमुपगम्य तस्य **शरीरस्य वर्तमानीम्** उदन्तं **वहति**। अल्पक्लामतां पृच्छतीति भावः। सोऽपि चाऽऽचार्यं समागतं 'मस्तकेन वन्दे' इति फेटावन्दनकेन वन्दते। शरीरस्य चोदन्तमूढ्वा यदि **तपसा क्लाम्यति** तत आश्वासयति। **आश्वास्य च तदेव क्षेत्रं** यत्र गच्छोऽवतिष्ठते तत्र **समुपगच्छति** समागच्छति ॥ ११९७॥ कदाचिन्न गच्छेयुरपि तत्रेमानि कारणानि—

**गेलण्णेण व पुट्ठो१, अभिणवमुक्को ततो व रोगातो२।**
**कालम्मि दुब्बले वा, कज्जे अण्णे व वाघातो४ ॥ ११९८ ॥**

[बृ.क.भा.५०४१]

इहैकस्यापि कदाचिदेकवचनं कदाचिच्च बहुवचनं सर्वस्यापि वस्तुन एकानेकरूपताख्यापनार्थमित्यदुष्टम्। स आचार्यो **ग्लानत्वेन[1] वा स्पृष्टः** स्यात् ग्लानो भवेदिति भावः।

१. ग्लान्येन - वा. मो. पु. मु. ॥

अथवा **तस्माद् रोगाद् अभिनवमुक्तः** तत्कालमुक्तः स्यात् ततो न गच्छेत् । यदि वा **काले दुर्बले** न विद्यते बलं गमनाय यस्मिन् गाढातपसम्भवादिना स दुर्बलो ज्येष्ठाऽऽषाढादिकः, दुरशब्दोऽभाववाची, तस्मिन् न गच्छेत्, शरीरक्लेशसम्भवात्। **कज्जे अण्णे व वाघातो** इति, अत्र सप्तमी तृतीयार्थे प्राकृतत्वात्ततोऽयमर्थः- **अन्येन** वा **कार्येण** राज्ञा प्रद्वेषतो निर्विषयत्वाज्ञापनादिना **व्याघातो** भवेत्, ततो न गच्छेदिति। अगमने चोपाध्यायः प्रेषणीयोऽन्यो वा ॥ ११९८॥

तथा चाह—

**पेसेइ उवज्झायं, अन्नं गीयं च जो तहिं जोग्गो।**
**पुट्ठो व अपुट्ठो वा, [1]स यावि दीवेति तं कज्जं ॥ ११९९ ॥** [बृ.क.भा.५०४२]

पूर्वोक्तकारणवशतः स्वयमाचार्यस्य गमनाभावे **उपाध्यायं,** तदभावेऽन्यो वा **यो गीतार्थस्तत्र योग्यस्तं प्रेषयति। स च** तत्र गतः सन् तेन पाराञ्चितेन 'किमिति अद्य

१. स या वि - पु. प्रे. ॥

क्षमाश्रमणा नायाताः' इति **पृष्टो वा** अथवा **न पृष्टस्**तथापि **तत्कार्यं** कारणं **दीपयेत्**-यथा अमुकेन कारणेन नायाता इति॥ ११९९॥

**जाणंता माहप्पं, सयमेव भणंति एत्थ तं जोग्गो।**
**अत्थि मम एत्थ विसओ, अजाणते सो व ते बेति ॥ १२००॥**

[बृ.क.भा.५०४४]

इह यदि ग्लानीभवनादिना कारणेन क्षमाश्रमणानामनागमनं पृष्टेनापृष्टेन वा दीपितं तदा न किमप्यन्यत्तेन[2] पाराञ्चितादिना वक्तव्यम्, किन्तु गुर्वादेश एवोभाभ्यां यथोदितः सम्पादनीयः। अथ राज्ञां प्रद्वेषतो निर्विषयत्वाज्ञापनादिना व्याघातो दीपितस्तत्र यदि ते उपाध्याया अन्ये वा गीतार्थास्तस्य शक्तिं स्वयमवबुध्यन्ते, ततो **जानन्तः स्वयमेव** तस्य **माहात्म्यं** तं ब्रुवते, यथा **अस्मिन्** प्रयोजने **त्वं योग्य** इति क्रियतामुद्यमः। अथ न जानते तस्य शक्तिं ततः **स एव तान् अजानान् ब्रूते** यथा- **अस्ति ममात्र विषय** इति । एतच्च स्वयमुपाध्यायादिभिर्वा भणितो वक्ति॥ १२००॥

१. °प्यनेन वा° वा. मो. पु. ॥

**अच्छउ महाणुभागो, जहासुहं गुणसयागरो संघो।**
**गुरुगं पि इमं कज्जं, मं पप्प भविस्सए लहुयं ॥ १२०१ ॥** [बृ.क.भा.५०४५]

**तिष्ठतु यथासुखं महान् अनुभागो**ऽधिकृतप्रयोजनानुकूला अचिन्त्या शक्तिर्यस्य स तथा गुणशतानामनेकेषां गुणानामाकरो निधानं **गुणशताकरः सङ्घः**, यत **इदं गुरुकमपि कार्यं मां प्राप्य लघुकं** भविष्यति, समर्थोऽहमस्य प्रयोजनस्य लीलयाऽपि साधन इति भावः ॥१२०१ ॥

एवमुक्तः सोऽनुज्ञातः सन् यत्करोति तदेवाह—

**अभिहाण-हेतुकुसलो, बहूसु नीराजितो विउसभासु।**
**गंतूण रायभवणे, भणति तं रायदारट्ठं ॥ १२०२ ॥** [बृ.क.भा.५०४६]

**अभिधान-हेतुकुशलः** इति अभिधानेषु शब्देषु हेतुषु साध्यगमकेषु साधनेषु कुशलो दक्षोऽभिधानहेतुकुशलः, शब्दमार्गे तर्कमार्गे चातीव क्षुण्ण इत्यर्थः। अत एव **बहुषु विद्वत्सभासु नीराजितः** निर्वटितः । इत्थंभूतः सन् **राजभवने गत्वा तं राजद्वारस्थं**

प्रतीहारं **भणति** ॥ १२०२ ॥

किं भणति? इत्याह—

**पडिहाररूवी भण रायरूविं, तमिच्छए संजयरूवि दट्ठुं।**
**निवेदयित्ता य स पत्थिवस्स, जहिं निवो तत्थ तयं पवेसे॥ १२०३॥**

[बृ.क.भा. ५०४७]

हे **प्रतीहाररूपिन्** मध्ये गत्वा **राजरूपिणं** राजानुकारिणं **भण** ब्रूहि, यथा **त्वां संयतरूपी द्रष्टुमिच्छति** एवमुक्तः सन् प्रतीहारस्तथैव **पार्थिवस्य** निवेदयति, **निवेद्य** च राजानुमत्या **यत्र नृपोऽ**वतिष्ठते **तत्र तं** साधुं **प्रवेशयति**॥१२०३॥

**तं पूयइत्ताण सुहासणत्थं, पुच्छिंसु रायाऽऽगयकोउहल्लो।**
**पण्हे उराले असुए कयाई, सयावि आइक्खइ पत्थिवस्स ॥ १२०४ ॥**

[बृ.क.भा ५०४८]

**तं** साधुं प्रविष्टं सन्तं **राजा पूजयित्वा शुभासनस्थं** शुभे आसने निषण्णम् **आगतकुतूहलः**। समुत्पन्नकुतूहलोऽ**प्राक्षीत्**। कान् ? इत्याह-**प्रश्नान् उदारान्** गम्भीरार्थान् **कदाचिदपि अश्रुतान्** प्रतिहाररूपिन् इत्येवमादिकान्। **स चापि** साधुरेवंपृष्टः **पार्थिवस्याऽऽचष्टे**॥ १२०४॥ किमाचष्टे? इत्याह—

**जारिसया आतरक्खा, सक्कादीणं न तारिसो एसो।**
**तुह रायदारपालो, तं पि चक्कीण पडिरूवी ॥१२०५ ॥** [बृ.क.भा.५०४९]

**यादृशकाः** खलु **शक्रादीनाम्** आदिशब्दात् **च**मरादिपरिग्रहः, **आत्मरक्षा न तादृश एष तव** राजन्! **द्वारपालः** तत उक्तं हे प्रतिहाररूपिन् ! तथा **त्वमपि** यादृशश्चक्री चक्रवर्त्ती तादृशो न भवसि, रत्नाद्यभावात्,अत्रान्तरे चक्रवर्त्तिसमृद्धिराख्यातव्या। किन्तु प्रताप-शौर्य-न्यायानुपालनादिना तत्**प्रतिरूपो**ऽसि, तत उक्तं 'राजरूपिणं ब्रूहि' चक्रवर्तिप्रतिरूपमित्यर्थः॥ १२०५॥

एवमुक्ते राजा प्राह- 'त्वं कथं श्रमणानां प्रतिरूपी ?' तत आह—

**समणाणं पडिरूवी, जं पुच्छसि राय तं कहमहं? ति ।**
**निरतीयारा समणा, न तहाऽहं तेण पडिरूवी ॥१२०६ ॥** [बृ.क.भा.५०५०]

**यत्त्वं राजन् पृच्छसि** अथ कथं त्वं **श्रमणानां प्रतिरूपी**? इति **तदहं कथयामि,** यथा श्रमणा भगवन्तो **निरतिचाराः, न तथाहं, तेन** श्रमणानां **प्रतिरूपी,** न तु साक्षात् श्रमण इति॥ १२०६॥

प्रतिरूपित्वमेव भावयति—

**निज्जूढोमि नरीसर, खेत्ते वि जईण अच्छिउं न लभे।**
**अतियारस्स विसोहिं, पकरेमि पमायमूलस्स ॥१२०७ ॥** [बृ.क.भा.५०५१]

हे **नरेश्वर** पृथिवीपते! **प्रमादमूलस्याऽतिचारस्य** सम्प्रति **विशोधिं प्रकरोमि,** तां च कुर्वन् **निर्यूढोऽस्मि** निष्कासितोऽस्मि। तत आस्तामन्यत्, **क्षेत्रेऽपि यतीनामहमास्थातुं न लभे,** ततः श्रमणप्रतिरूप्यहमिति ॥ १२०७॥

राजा प्राह- 'कस्त्वया कृतोऽतीचारः? का च तस्य विशोधिः?' एवं पृष्टे यत्कर्तव्यं तदाह—

**कहणाऽऽउट्टण आगमण, पुच्छणं दीवणा य कज्जस्स।**
**वीसज्जियं ति य मया, हासुस्सलितो[1] भणति राया ॥ १२०८ ॥**

**कथनं** राज्ञा पृष्टस्य सर्वस्याप्यर्थस्य प्रसङ्गतोऽन्यस्यापि यथा प्रवचनप्रभावना भवति। तत **आवर्तनम्** आकम्पनं, राज्ञो भक्तीभवनमिति भावः। तदनन्तरम् **आगमनप्रच्छनम्** आगमनकारणस्य प्रश्नः। 'केन प्रयोजनेन यूयमत्राऽऽगताः स्थ?' अत्रान्तरे येन कार्येण समागतस्तस्य **दीपना** प्रकाशना, ततो **राजा हासुस्सलितो**[2] त्ति हासेन युक्त उत्सृतः- हृष्टो हासोच्छ्रितः हसितमुखः प्रहृष्टश्च सन्नित्यर्थः। **भणति** यथा- **मया विसर्जितं** मुत्कलितमिति॥ १२०८॥

अथ किं तत्कार्यं यस्य राज्ञा मुत्कलनं कृतम् ? इत्यत आह—

**वायपरायणकुवितो१, चेइय२तद्दव्व३संजती गहणे ४।**
**पुव्वुत्ताण चउण्ह वि, कज्जाण हविज्ज अन्नयरं ॥ १२०९ ॥**

---

१. हासुस्सिनो -मु. हासुस्सितो - आहोर ६४॥ २. हासोत्कलितो - आहोर ६४ ॥

**वादे पराजयेन कुपितः** स्यात् १। अथवा **चैत्यं-** जिनायतनं किमपि तेनावष्टब्धं स्यात्, ततस्तन्मोचने क्रुद्धो भवेत् २। यदि वा **तद्द्रव्यस्य** चैत्यद्रव्यस्य ग्रहणे३। अथवा **संयत्या ग्रहणे**४ तथा **पूर्वोक्तानां कल्पाध्ययनो**क्तानां **चतुर्णां** निर्विषयित्वाज्ञापनादीनां **कार्याणामन्यतरत् कार्यं भवेत् ॥ १२०९॥**

**संघो न लहति कज्जं, लद्धं कज्जं महाणुभागेणं।**
**तुज्झं तु विसज्जेमी, सो वि य संघोत्ति पूएइ ॥ १२१० ॥**

निर्विषयित्वाऽऽज्ञापनमुत्कलनादिलक्षणं **कार्यं सङ्घो न लभते।** किन्तु तेनानवस्थाप्येन पाराञ्चितेन वा **महानुभागेन [ कार्यं ] लब्धं,** न च स एवं कार्यलाभेऽपि गर्वमुद्वहति, यत आह-**तुज्झं तु** इत्यादि, राजा प्राह-**युष्माकं तु** निश्चितं प्रभावेनाहं पूर्वग्राहं **विसृजामि,** नान्यथा, **सोऽपि** ब्रूते- 'राजन् कोऽहं? कियन्मात्रो वा ? गरीयान् **सङ्घो** भट्टारकः, तत्प्रभावादहं किञ्चिज्ज्ञः, तस्मात्सङ्घमाहूय क्षमयित्वा च यूयमेवं ब्रूथ-मुत्कलितं मया युष्माकमिति' सङ्घं **पूजयति**॥ १२१०॥

ततः किमित्याह—

**अब्भत्थितो व रण्णा, सयं व संघो विसज्जयति तुट्ठो।**
**आदी-मज्झ-ऽवसाणे, सच्चावि दोसो धुओ होति ॥ १२११ ॥** दारं १।

**अभ्यर्थितो वा राज्ञा** सङ्घो यदि वा **स्वयमपि तुष्टः सङ्घो विसर्जयति** मुत्कलयति। किमुक्तं भवति? यद्व्यूढं तद् व्यूढम्, शेषं सर्वं प्रसादेन मुक्तम्, सोऽगृहस्थीभूत एवोपस्थाप्यत इति। एतदेवाह— **स चापि दोषो धूतः** प्रकम्पितः, प्रसादेन स्फेटित इत्यर्थः। **आदौ मध्ये अवसाने** वा भवति ॥ १२११॥

राजानुवृत्तिद्वारं गतम्१। इदानीं प्रद्विष्टस्वगणद्वारमाह—

**सगणो य पदुट्ठो से, आवण्णो तं च कारणं नत्थि।**
**एएहिं कारणेहिं, अगिहिब्भूते उवट्ठवणा ॥ १२१२ ॥**

**से** तस्याऽऽचार्यस्य **स्वगणः प्रद्विष्टः** सन् ब्रूते, यथा- अमुकेन कारणेनैष पाराञ्चितप्रतिपत्त्या गृहीभूतत्व**मापन्न** इति, **तच्च कारणं** तस्याऽऽचार्यस्य **नास्ति। एताभ्यां कारणाभ्यां** स्वगणप्रद्वेष-कारणाभावलक्षणाभ्याम् **अगृहीभूते** अगृहस्थीभूतस्य **उपस्थापना**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रियते। एष गाथाक्षरार्थः। भावार्थस्त्वयम्—

एगा तरुणी बहुसयणं घेत्तुं पव्वइया, अन्नया ताए संजतीए आयरितो ओभासिओ। आयरिएणं नेच्छिया ताहे सा पदोसमावन्ना आयरियस्स तेसिं सयणपव्वइयाणं कहेइ–मं एस आयरितो उवसग्गेइ, ताहे ते संजतीए नियल्लगपव्वइया आयरियस्स पउट्ठा भणंति-एस आयरितो पारंचिए गिहीभूतो आभवति, ततो आयरितो अन्नं गणं गंतुं सव्वं जहट्ठियं परिकहेइ, सो य जं गणं गतो, ते तं कज्जपरमत्थं जाणित्ता मा तेसिं गम्मतरो होहित्ति, खेत्तस्स बाहिं काऊण ते वि खेत्तस्स बाहिं ठिया, मा तेसिं अब्भक्खाणइत्ताणं मिच्छारूवा इच्छा सफला होउत्ति, अगिहिभूयं केयवेण उवट्ठावेंति॥१२१२॥

एतदेवाह—

**उब्भासणपडिसिद्धा[१], बहुसयणा देज्ज छोभगं वतिणी।**
**तं चाऽऽवण्णं अन्नत्थ, कुणह गिहियं ति ते बेंति ॥ १२१३ ॥**



---

१. खंभा.। ओहासण पु.प्रे.ला. । ओभासण जेमा.वा.भा.॥

For Private and Personal Use Only

**ते नाऊण पउट्ठे, मा होहिति तेसि गम्मतरओ त्ति।**
**मिच्छिच्छा मा सफला होहित्ति, तेसि तो अगिहिभूतो ॥१२१४॥** दारं २।

काचिद् **व्रतिनी बहुस्वजना ओभासणे** याचने, **प्रतिषिद्धा** सती **छोभग**मिति अभ्याख्यानं **दद्यात्।** "**कालत्रयेऽपि सप्तमी**"ति दत्तवती तच्चाभ्याख्यानसम्पादितं प्रायश्चित्त**मन्यत्र** गणे स आचार्यो वहति, ते च संयतीस्वजनाः प्रद्विष्टा **ब्रुवते-कुरुतै**नमाचार्यं गृहिकं गृहस्थीभूतमिति॥ १२१३॥

**ते** च गणान्तरस्थविरास्तान् प्रद्विष्टान् **ज्ञात्वा मा** तेषां गम्यतरः पश्चाद् **भूया**दिति तेऽपि कैतवेन क्षेत्राद्बहिस्तत्समीपे स्थिताः। तथा '**मा** तेषां **मिथ्या**रूपा **इच्छा** सफला **भवेद्**' इति। सोऽगृहीभूत एवोपस्थाप्यते॥ १२१४॥

गतं स्वगणप्रद्विष्टद्वारम्२। अधुना परमोचापनद्वारमाह—

**सो उ गिहिलिंगकरणं, अणुरागेणं भणंतऽगीयत्था।**
**मा गीहियं कुणह गुरुं, अह कुणह इमं निसामेह ॥ १२१५॥**

**विद्धंसामो अम्हे, एवं ओहावणा जइ गुरूणं।**
**एएहिं कारणेहिं, अगिहिब्भूते उवट्ठवणा ॥ १२१६॥** दारं ३।

एगो बहुसिस्सो आयरितो । सो पडिसेवणाए गिहिभुयत्तमावण्णो। सो अन्नं गणं गंतु आलोएइ। तेहिं गिहिभूतो विहिउमाढत्तो ततो तस्स सीसा भणंति-मा अम्ह गुरुं गिहिभूयं कुणह, जइ पुण अम्हं गुरूणमेवं ओहावणा कीरिहिति तो अम्हे सव्वे उन्निक्खमिस्सामो। ततो तेसिं अप्पत्तियं मा होहित्ति अगिहिब्भूतो चेव सो उवट्ठाविज्जइ॥

अत्र अक्षरगमनिका-आचार्यस्य **गृहिलिङ्गकरणं श्रुत्वा** तस्य शिष्या **अगीतार्था अनुरागेण भणन्ति मा गृहिक**मस्मदीयं **गुरुं कुरुत, अथ करिष्यथ** तत **इदं निशमयत** आकर्णयत, एवम**पभ्राजना यदि गुरूणां** ततो **वयं विद्धंसामो**त्ति उन्निष्क्रमिष्यामः। **एतेन** खल्वनन्तरोदितेन **कारणेन अगृहीभूतस्य तस्योपस्थापना**॥ १२१६॥

गतं परमोचापनद्वारम्३। इदानीम् 'इच्छागणद्वयविवादे' इति द्वारमाह—

**अण्णोण्णेसु गणेसुं , वहंति तेसि गुरवो अगीयाणं।**
**ते बेंति अण्णमण्णं, किह काहिह अम्ह थेरेत्ति ॥ १२१७ ॥**

द्वौ गणौ, तयोश्च द्वयोरपि गणयोः साधवोऽगीतार्थाः,तेषां च गुरू उपस्थापनार्हं प्रायश्चित्त-स्थानमापन्नौ नवरमेकोऽगृहीभूतोपस्थापनार्हम्, अपरो गृहीभूतोपस्थापनार्हं, तौ च परस्परं गणयोः प्रतिपद्येते। तद्यथा-एकोऽपरस्मिन् गणे, अपरोऽपि तस्मिन्। **एवमन्योन्यस्य गणयोस्तेषामगीतार्थानां गुरू** प्रायश्चितं **वहतः। ते** गणाः परस्परं **ब्रुवते-कथमस्माकं स्थविरान् करिष्यथ।** किं गृहीभूतान् ? अगृहीभूतान्वा? तत्र यो गृहीभूतोपस्थापनार्हं प्राप्तस्तद्गणं[1] प्रतीतरे ब्रुवते-गृहीभूतं करिष्यामः॥ १२१७॥

**गिहिभूते त्ति य उत्ते, अम्हेवि करेमो तुज्झ गिहिभूतं।**
**अगिहि त्ति दोन्नि वि, मए भणंति थेरा इमं दोवि ॥ १२१८ ॥**
**न विसुज्झेमो अम्हे, अगिहिभूता तहा विऽणिच्छेसु।**
**इच्छा सिं पूरिज्जइ, गणपीतिकारगेहिं तु ॥ १२१९ ॥** दारं ४।

सूत्र २४ गाथा १२१४-१२१९ छोभकसूत्रम् ६१३ (A)

१. गणान् - पु.प्रे॥

**गृहीभूतं** करिष्याम **इत्युक्ते** वदन्ति **वयमपि तवाऽऽचार्य गृहीभूतं** करिष्यामः। तत्रैवं परस्परं विवादे तान् द्वयानपि **मृगान्** अगीतार्थान् **भणन्ति द्वावप्यगृहीभूतौ** वयमुपस्था-पयिष्याम इति॥ १२१८॥

तौ च द्वावाप्याचार्याविदं ब्रूतः **न वयमगृहीभूताः शुद्ध्यामः** तस्माद् गृहीभूता क्रियामहे इति। एवं यद्यप्यगृहीभूतोपस्थापनं ते नेच्छन्ति **तथापि** तेषु तथा **अनिच्छत्स्वपि गणप्रीतिकारकै**र्महद्भिः स्थविरैः **सिं** ति तेषां द्वयानामपि गणसाधूना**मिच्छा पूर्यते**, द्वावप्य-प्रीतिपरिहारार्थमगृहीभूतावुपस्थाप्येते इत्यर्थः ४॥ १२१९॥



**सूत्रम्— दो साहम्मिया एगतो विहरंति, एगे तत्थ अण्णयरं अकिच्चट्ठाणं पडिसेवित्ता आलोइज्जा-अह णं भंते ! अमुएणं साहुणा सद्धिं इमम्मि इमम्मि य कारणम्मि मेहुणपडिसेवी, पच्चयहेउं च सयं पडिसेवियं भणणति, सेय पुच्छियव्वे[१] किं पडिसेवी ? अपडिसेवी ? से य वएज्जा पडिसेवी, परिहारपत्ते सिया, से य**

१. °व्वे सिया किं अज्जे पडि° इति प्रतिलिपि पाठः ॥

**वएज्जा-णो पडिसेवी, णो परिहारपत्ते सिया, जे से पमाणं वदति से य पमाणा ओघेत्तव्वे सिया, से किमाहु भंते ! सच्चपइण्णा ववहारा ॥ २३॥**

"दो साहम्मिया एगतो विहरंति" इत्यादि, अथास्य सूत्रस्य पूर्वसूत्रेण सह कः सम्बन्ध? उच्यते—

**पुव्विं वतेसु ठविए, रायणियत्तं अविसहं कोइ।**
**ओमो भविस्सति इमो, इइ छोभगसुत्तसंबंधो ॥ १२२० ॥**

अनन्तरे **अनवस्थाप्यसूत्रे** द्वयोर्मध्ये कोऽपि **पूर्वं व्रतेषु स्थापितः** स्यात्, उ[1]पस्थापितः स्यादित्यर्थः, अपरं पश्चात् तत्र योऽसौ पूर्वमुपस्थापितः स पश्चादुपस्थापितस्य रत्नाधिको भवति। स च पश्चादुपस्थापितः **कोऽपि** पूर्वं व्रतेषु स्थापितस्य **रत्नाधिकत्वमविषह**-मानस्तस्य छिद्राणि प्रेक्षते। प्रेक्षमाणश्च कदाचिच्छिद्रमुपलभ्यायम् **अवमो** लघुर्मम **भवि-ष्यतीति** बुद्ध्या **छोभक**मभ्याख्यानं ददाति । तत एतदर्थप्रतिपादनार्थमनवस्थाप्यपाराञ्चित-सूत्रानन्तरमधिकृतमभ्याख्यानसूत्रं प्रवृत्तमित्येष **छोभकसूत्रसम्बन्धः** ॥ १२२ ॥ अथवा-[यम]न्यसम्बन्धः

**पीतिय पडिवक्खो वा, अचियत्तं तेण छोभगं देज्जा।**
**पच्चयहेउं च परे, सयं च पडिसेवियं भणइ ॥ १२२१ ॥**

अधस्तनानन्तरसूत्रेऽभिहितमिदं यथा तस्य गणस्य प्रीतिकं भवति तथोपस्थापनीयः, तस्य च प्रीतिकस्य प्रतिपक्षः **वा**शब्दः सम्बन्धप्रकारान्तरतोपदर्शने **अचियत्तम्** अप्रीतिकम् "**अचियत्तं ति वा अपीतियंति वा एगट्ठं**" [**चूर्णौ**] इति वचनात्। **तेन** चाऽप्रीतिकेन **छोभकम्** अभ्याख्यानं **दद्यादिति** पूर्वसूत्रादनन्तरमस्य अभ्याख्यानसूत्रस्योपनिपातः, अनेन सम्बन्धेनायातस्यास्य व्याख्या-

**द्वौ साधर्मिकौ** साम्भोगिका**वेकत** एकेन सङ्घाटकेन **विहरतः। तत्र** तयोर्द्वयोर्मध्ये **एक** इतरस्याऽभ्याख्यानप्रदाननिमित्त**मन्यतरदकृत्यस्थानं** मैथुनादिकं **प्रतिसेव्य** प्रतिसेवितमभ्युपगम्य गुरूणामन्तिके आलोचनाप्रकारमाह- **अहं णं** इति वाक्यालङ्कारे **भदन्त! अमुकेन साधुना सार्धमस्मिन् कारणे मैथुनादिके प्रतिसेवी,** किमुक्तं भवति? तेन तेन मैथुनादिना

१. वा. मो. पु. मु. । उत्थापिताः - पु. प्रे. ।।

कारणेन चारित्रप्रतिकूलक्रियासेवनाभाग् जात इति। अथ स कस्मादात्मानं प्रतिसेवितवन्तमभ्युपगच्छति ? न परस्यैव केवलस्याभ्याख्यानं ददाति? तत आह- **पच्चयहेउं चे**त्यादि, परेषामाचार्याणामन्येषां च साधूनामेष सत्यं वदति, अन्यथा को नामाऽऽत्मानं प्रतिसेवितवन्तमभिमन्यते? इति **प्रत्ययो** विश्वासः स्यादिति हेतोः स्वयमपि च प्रतिसेवितमिति भणति॥ १२२१॥

एवमुक्ते यस्याभ्याख्यानमदायि स प्रष्टव्यः- 'किं भवान् प्रतिसेवी न वा?' तत्र यदि **स वदेत् प्रतिसेवी,** ततः स **परिहारप्राप्तः** स्यात् ,परिहारतपोभाक् क्रियते, उपलक्षणमेतत्, छेदादिप्रायश्चित्तभागपि क्रियते इति द्रष्टव्यः। अथ **स वदेत् 'नाहं प्रतिसेवी'**ति तर्हि **न परिहारप्राप्तः** स्यात् परिहारतपःप्रभृतिप्रायश्चित्तभाक् न क्रियते इति भावः। स च प्रतिसेवी [अप्रतिसेवी]वा यदाऽभ्याख्यानदाता[तदा]से तस्य प्रतिसेवनायां प्रमाणं चरिकादिर्वक्ति, तस्मात्**प्रमाणात् गृहीतव्यो** निश्चेतव्यः, **से** अथ **किं** कस्मात्कारणा**देवमाहु**र्भवन्तो हे **भदन्त**! सूरिराह- **सत्यप्रतिज्ञा व्यवहारा**स्तीर्थकरैः दर्शिताः। ततो न यथाकथञ्चित्प्रतिसेवी अप्रतिसेवी वा क्रियते। एष सूत्राक्षरार्थः॥

अधुना **निर्युक्ति-भाष्यविस्तरः**। तत्र भिक्षाचर्या-विचारभूमिगमन-विहारादिषु यो रत्नाधिकतरः कुतश्चिद्दोषादवमो जातः स तमवमरत्नाधिकं यैः कारणैरभ्याख्यानेन दूषयति तानि प्रतिपादयिषुराह—

**रायणियवायएणं, खलिय-मिलित-पेल्लणाए उदएणं।**
**देउल मेहुण्णंमि य, अब्भक्खाणं कुडंगम्मि ॥ १२२२॥**

**रत्नाधिकवातेन** रत्नाधिकोऽहमिति गर्वेण अवमरत्नाधिकं दशविधचक्रवाल-सामाचार्यामस्**खलित**मपि कषायोदयेन तर्जयति, यथा- 'हे दुष्टशैक्षक! स्खलितोऽसीति,' तथा ऐर्यापथिकीं प्रतिक्रम्य प्रथममेव परावर्तयन्तं यदि वा अग्रिमतरपदं पदेन विच्छिन्नं सूत्रमुच्चारयन्तं 'हा दुष्टशैक्षक! **मिलित**मुच्चारयसी'ति तर्जयति तथा **पेल्लण**त्ति अन्यैः साधुभिर्वार्यमाणोऽपि कषायोदयतस्तं हस्तेन प्रेरयति तर्जयति। ततः सोऽवमरत्नाधिकः कषायितः सन् चिन्तयति-एष रत्नाधिकवातेनेत्थं बहुजनसमक्षं तर्जयति। अथ चैषा सामाचारी 'रत्नाधिकस्य सर्वं क्षन्तव्यमि'ति, तत् तथा करोमि यथैष मम लघुको भवति। एवं चिन्तयित्वा तौ द्वावपि भिक्षाचर्यायै गतौ, तौ च तृषितौ बुभुक्षितौ चेत्येवं चिन्तितवन्तौ

अस्मिन्नार्यादेवकुले वृक्षविषमे वा प्रथमालिकां कृत्वा पानीयं पास्याम इति, एवं चिन्तयित्वा तौ तदभिमुखं प्रस्थितौ। अत्रान्तरे अवमरत्नाधिकः परिव्राजिकामेकां तदभिमुखमागच्छन्तीं दृष्ट्वा स्थितः, लब्ध एष इदानीमिति चिन्तयित्वा तं रत्नाधिकं वदति-अहो ज्येष्ठार्य! कुरु त्वं प्रथमालिकां पानीयं वा पिब, अहं पुनः संज्ञां व्युत्स्रक्ष्यामि, एवमुक्त्वा त्वरितं वसतावागत्य **मैथुने अभ्याख्यानं** ददद् आलोचयति । तथा चाह-**देउले** इत्यादि, देवकुले **आर्यादेवगृहादौ कुडङ्गे** वा वृक्षविषमे प्रदेशे मैथुने अभ्याख्यानं दातुं वसतावागत्य आलोचयति॥ १२२२॥ यथा आलोचयति तथा दर्शयति—

**जेट्ठज्जेण अकज्जं, सज्जं अज्जाघरे कयं अज्ज।**
**उवजीवितो थ भंते! मए वि संसट्ठकप्पोऽत्थ ॥ १२२३॥**

**ज्येष्ठार्येणाद्य सद्यः** इदानीमार्यागृहे [ **अकार्यं** ]मैथुनासेवालक्षणं [ **कृतं** ]ततो **भदन्त** तत्संसर्गतो **मयापि संसृष्टकल्पः** मैथुनप्रतिसेवा अत्राऽस्मिन् प्रस्तावे **उपजीवितः** ॥१२२३॥

**अहवा उच्चारगतो, कुडंगमादीकडिल्लदेसम्मि।**
**बेत्ती कयं अकज्जं, जेट्ठज्जेणं सह मएवि ॥ १२२४॥**

अथवा इत्यभ्याख्यानस्य प्रकारान्तरताप्रदर्शने। **कुडङ्गादौ कडिल्लदेशे** गहनप्रदेशे **उच्चाराय गतः**। तत्र च **ज्येष्ठार्येण सह मयापि कृतमकार्य**मिति। तस्माद् व्रतानि मम साम्प्रतमारोपयत॥ १२२४॥ एवमुक्ते सूरिभिः स एवं वक्तव्यः—

**तम्मागते वयाइं, दाहामो देंति वा तुरंतस्स।**
**भूयत्थे पुण नाए, अलियनिमित्तं न मूलं तु ॥ १२२५ ॥**

योऽसौ त्वया अभ्याख्यातः स यदा आगतो भविष्यति तदा **तस्मिन्नागते व्रतानि** ते **दास्यामः**। अथ स त्वरमाणो ब्रूते- 'भगवन्! कुशाग्रस्थितवाताहतजलबिन्दुरिवातिचञ्चलं जीवितमिति न शक्यते क्षणमात्रमप्यव्रतेन स्थातुमित्यधुनैव मह्यं दीयतां व्रतादीनीति। तस्यैवं **त्वरमाणस्य ददति** व्रतानि। **वा**शब्दो विकल्पार्थः। अत्र पुनर्भूतार्थो गवेषणीयः- किमयं सत्यं ब्रूते उताऽलिकं? तत्र यथा भूतार्थो गवेषणीयस्तथानन्तरमेव वक्ष्यते। **भूतार्थे च ज्ञाते** यदि सत्यं तदा द्वयोर[1]पि मूलं दीयते, अथालीकं ततो योऽभ्याख्यातः स शुद्धः इतरस्य

१. °रपि व्रतं दी° वा. मो. पु. ॥

त्वभ्याख्यातु**र्मूलं न** दीयते किन्तु **अलीकनिमित्तं** मृषावादप्रत्ययं चतुर्गुरुकं प्रायश्चित्तमिति ॥ १२२५ ॥ सम्प्रति यथाभूतार्थो ज्ञायते तथा प्रतिपिपादयिषुर्द्वारगाथामाह—

**चरियापुच्छणपेसण, कावालि१ तवो य२ संघो जं भणति।**
**चउभंगो हि निरिक्खी३, देवया य तहियं विही एसो ॥१२२६॥** दारगाहा।

**तत्र**[1] भूतार्थे ज्ञातव्ये एष विधिः-**चरिका** परिव्राजिका, तस्याः **प्रच्छनाय** वृषभाणां **प्रेषणं**, सा चेत् सत्यवादिनी न मन्यते ततस्तौ द्वावपि पृथगुपाश्रये प्रेष्य तत्र वृषभास्तत्स्वरूपगवेषणाय **कापालिक**[2]वेषेण प्रेष्यन्ते। कापालिकग्रहणमुपलक्षणं, तेन सरजस्कादिरूपेणापीत्यपि द्रष्टव्यम्। एवमपि भूतार्थानिर्णये **तवो**त्ति तपस्वी कायोत्सर्गेण देवतामाकम्प्य पृच्छति, एतस्यापि प्रकारस्याभावे **सङ्घो** मे[3]लयित्वा प्रच्छनीयः, तेन च **निरीक्षणा** निरीक्षकानधिकृत्य **चतुर्भङ्गी,** केचित् तथाभूतं तथाभावेन पश्यन्तीत्यादिरूपा वक्ष्यमाणा प्ररूप्यते, गाथायां पुंस्त्वं प्राकृतत्वात्, सा च चतुर्भङ्गी भद्र-प्रान्त**देवता** आश्रित्य सम्भवति। एष द्वारगाथासंक्षेपार्थः ॥१२२६॥ साम्प्रतमेनामेव गाथां विवरीषुराह—

---

१. तत्र सूत्रार्थे वा. मो. पु. ॥ २. करूपेण - वा. मो. पु. मु. ॥ ३. मीलयित्वा - वा. मो. पु. ॥

**आलोइयम्मि तिउणे, कज्जं से सीसए तयं सव्वं।**
**पडिसिद्धम्मि य इयरो, भणेति बिइयंपि ते नत्थि॥ १२२७ ॥**

अभ्याख्यातः साधुरागतः सन् **आलोचयति** प्रथमालिकादिकं यावद् न जानामि द्वितीयः सङ्घाटकः क्वापि गत इति केवलोऽहमागतोऽस्मि। तत आचार्या ब्रुवते- सम्यगालोचय, ततः स स्मृत्वा द्वितीयमपि वारं तदेवाऽऽलोचयति, ततस्तृतीयमपि वारं स वक्तव्यः:- सम्यगालोचय। ततस्तदनन्तरं सविशेषसावधानो भूत्वा स्मृत्वा आलोचयति यावत्तस्मिन्नपि तृतीये वारे तदेवालोचितं तत**स्त्रिगुणे** त्रिःकृत्वे आलोचिते यदि न प्रतिसेवितमित्यालोचयति। ततो येन कारणेन त्रीन् वारानालोचापितस्तत्**कार्यं** कारणं **सर्वं से** तस्य **शिष्यते** कथ्यते, यथा स एष तव सङ्घाटकस्त्वया सह किञ्चिन्मात्रं हिण्डित्वा समागतो ब्रूते-ज्येष्ठार्येण **आर्यागृहे** वृक्षविषमे वा क्वचित्प्रदेशे कृतमकार्यं तत्संसर्गतो मयापि संसृष्टकल्प उपजीवित इति ततोऽभ्याख्यातः साधुर्वदति न मया प्रतिसेवितमेवं तेन **प्रतिषिद्धे** प्रतिसेविते **इतरो**ऽभ्याख्यानप्रदाता **भणति**-अहो ज्येष्ठार्य! **तव द्वितीयमपि** व्रतं **नास्ति**। आस्तां चतुर्थमित्यपि शब्दार्थः॥ १२२७॥

**दोण्हंपि अणुमएणं, चरियावसहे पुच्छियपमाणं।**

**अन्नत्थ वसह तुब्भे, जा कुणिमो देवउस्सग्गं ॥ १२२८ ॥**



एवं तयो**र्द्वयोरपि** विवदतोरेवमुच्यते-चरिका पृच्छ्यतां, यत्सा वक्ष्यति तत्प्रमाणयिष्यते, एवमुक्ते यदि तौ द्वावप्यनुमन्येते- ततो द्वयोः **अनुमतेन** सम्मत्या इत्यर्थः **वृषभाश्चरिकां** प्रष्टुं प्रेष्यन्ते ते च तत्र गताः प्रथमतश्चरिकां प्रज्ञापयन्ति, प्रज्ञाप्य पृच्छन्ति किमत्र सत्यम् अलीकं वा? एवं **वृषभैश्चरिका पृष्टा** सती यद् ब्रूते तत्**प्रमाणं** कर्तव्यम्। तत्र चरिकयोक्तं भगवन्! अभ्याख्यानं तेन द्वितीयेन तस्मै दत्तमिति। एतच्चोक्तं वृषभा वसतावागत्य गुरवे निवेदयन्ति। तैर्यथावस्थिते निवेदिते यद्यभ्याख्याता वदति- निगूहयति चरिका, न सम्यक्कथयति। तदा गुरवो द्वावपि ब्रुवते— **यूयमन्यत्र** वसतिं याचयित्वा तत्र **वसथ, यावद**द्य रात्रौ **देवता**-राधनार्थं **कायोत्सर्गं कुर्मः**। किमुक्तं भवति? कायोत्सर्गेण देवतामाकम्प्य पृच्छामः कोऽत्र सत्यवादी? को वाऽलीकवादी? इति एवमुक्ते तौ द्वावपि वसत्यन्तरे गतौ ॥१२२८॥

अत्रान्तरे **का**पालिकद्वारोपनिपात इति तदभिधित्सुराह—

**अट्ठिगमादी वसभा, पुव्विं पच्छा व जंति निसि सुणणा।**
**आवस्सग आउट्टणसब्भावे वा असब्भावे ॥ १२२९ ॥**

**अस्थिकाः**- कापालिकाः, **आदि**शब्दात् सरजस्कादिपरिग्रहः, तद्रूपाः सन्तः, किमुक्तं भवति? कापालिकवेषं वा सरजस्कवेषं वा यदि वा **माया**सूनवीयं वेषं कृत्वा यस्यां वसतौ तौ द्वावपि जनौ तिष्ठतस्तत्र **पूर्वं वृषभा** गच्छन्ति, यदि वा तयोर्गतयोः **पश्चा**त्तत्र च गत्वा रात्रौ मातृस्थानेन सुप्ता इव तिष्ठन्तो द्वयोरपि तयोः परस्परमुल्लापं **शृण्वन्ति**। तयोश्चा**ऽऽवश्यकं** कर्तुकामयोर्योऽसाववमरत्नाधिकोऽभ्याख्यानदाता स इतरं प्रति मिथ्यादुष्कृतेनोपस्थितः एतद्वदति त्वं मया असताऽभ्याख्यानेनाभ्याख्यातः, मिथ्यादुष्कृतमिति। ततो रत्नाधिको ब्रूते— किं नाम तवापकृतं मया येनाऽसदभ्याख्यानं मे दत्तम्? इति अवमरत्नाधिको भाषते-त्वं नित्यमेव यत्र तत्र वा कार्ये सम्यक् प्रवर्त्तमानमपि हे दुष्टशैक्षक! इति तर्जयसि तेन मया त्वमसदभ्याख्यानेनाभ्याख्यातः एवम् आवश्यके आवश्यकवेलायामावर्त्तने भावप्रत्यावर्त्तने अलीकाभ्याख्याने सद्भावो ज्ञायते। अथ न परस्परासम्भाषणतः **सद्भावो** ज्ञायते, तदा असद्भावे सद्भावपरिज्ञानाभावे तपस्वी प्रष्टव्य इति शेषः।। १२२९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा चाह—

**सेहोत्ति मं भाससि निच्चमेव, बहूण मज्झम्मि व किं कहेसि?।** दारं १।
**अभासमाणाण परोप्परं वा, दिव्वाणमुस्सग्गतवस्सी कुज्जा ॥१२३०॥**
दारं २।

**नित्यमेव** सर्वकालमेव पदे पदे हा **दुष्टशैक्षक इति मां भाषसे,** तेन त्वमसताऽभ्याख्यानेनाऽभ्याख्यातः। अथ स रत्नाधिकस्तमवमरत्नाधिकं ब्रूयात्-"यदि मया कयापि युवत्या सह कृतमकार्यं ततः **किं** त्वया **बहूनां मध्ये** अहमेवमाख्यातोऽनेन कृता प्रतिसेवनेति? किन्त्वहमेवैकान्ते वक्तव्यो भवामि— यथा दुष्कृतमालोचय गुरूणामन्तिके इति, मम रोषेण त्वयात्मीयमपि विगोपितम्," एवं सद्भावो ज्ञायते। एतावता "आवस्सग आउट्टणसब्भावे वा" [गा.१२२९] इति व्याख्यातम्१। इदानीमसद्भावे इति व्याख्यानयति। **अभासमाणाण परोप्परं वा** इति। अथ कदाचित्तौ रोषतः परस्परं न संलपतः तदा तयोः परस्परमभाषमाणयोर्भूतार्थपरिज्ञानाभावे तपस्वी क्षपको **देवताराधनार्थं कायोत्सर्गं कुर्यात्।** कायोत्सर्गेण च देवतामाकम्प्य पृच्छति— कोऽनयोर्द्वयोर्मध्ये सम्यग्वादी को वा



For Private and Personal Use Only

मिथ्यावादी? इति तत्र यद्देवता ब्रूते तत्प्रमाणम् ॥१२३०॥ एतेन तप इति द्वारं व्याख्यातम् २। अधुना सङ्घद्वारं व्याचिख्यासुरिदमाह—

**किंचि तहाऽतह दीसइ, चउभंगे पंतदेवया भद्दा।**
**अन्नीकरेइ मूलं, इयरे सच्चप्पतिण्णा उ ॥ १२३१ ॥**

पूर्वप्रकारेणाज्ञायमाने भूतार्थे सङ्घसमवायं कृत्वा तस्मै आवेद्यते। रत्नाधिको वदति-नाहं कृतवान् प्रतिसेवनाम्, इतरो ब्रूते- द्वावपि प्रतिसेवितवन्ताविति, तत्र किं कर्तव्यम्? इति तत एवमावेदने कृते ये सङ्घमध्ये गीतार्थास्ते वदन्ति **किञ्चित्तथा**भावं **तथा**भावेन **दृश्यते** १। किञ्चित्तथाभावमन्यथाभावेन दृश्यते २, किञ्चिदन्यथाभावं तथाभावेन ३, किञ्चिदन्यथाभावमन्यथाभावेन ४ एषा चतुर्भङ्गी। अस्यां च **चतुर्भङ्ग्यां** प्रथमो भङ्गः प्रतीतः, द्वितीयभङ्गभावना त्वेवम्- कोऽपि क्वापि वनप्रदेशे परस्त्रिया सह वर्त्तते, तस्मिंश्च प्रदेशे केचिदारक्षका अपन्यायाक्षमा असिव्यग्रहस्ता वल्गन्ति। ततः काचिद्देवता **भद्रिका** मा विनश्यत्वेष पुरुष इति तौ दूरान्तरितौ दर्शयति। तृतीयभङ्गे भगवतो **वर्द्ध**मानस्वामिनः सागारिकमकषायितं **सङ्ग**मकः कषायितं दर्शयति। चतुर्थभङ्गः कस्याञ्चिद्द्विपदि दासं राज्ञा

कारितराजनेपथ्यं विनश्यन्तं दृष्ट्वा काचिद्भद्रदेवता तदनुकम्पया स्त्रियं दर्शयति, एवं **प्रान्ता भद्रा वा देवता** अन्यथाभूतं सद्वस्तु **अन्यीकरोति**। अन्यथाभूतं च दर्शयति। ततो दृष्टमपि यावदप्रमाणम्, अत्र तु न ज्ञायते किमपि दृष्टमवमरत्नाधिकेन। अथ च **सत्य-प्रतिज्ञा** व्यवहारास्तीर्थकृद्भिरुपदिष्टास्तस्माद् यद् रत्नाधिको ब्रूते-न मया प्रतिसेवितमिति ततः स प्रमाणमतः शुद्धः एव न प्रायश्चित्तभागिति, यदपि चावमरत्नाधिको वक्ति- मया प्रतिसेवितमिति तदपि प्रमाणमतस्तस्य **मूलं** प्रायश्चित्तमिति ।। १२३१।।

**सूत्रम्— भिक्खू य गणाओ अवक्कम्म ओहाणुप्पेही वज्जेज्जा[१], से[२] आहच्च अणोहाइतो से य इच्छेज्जा दोच्चं पि तमेव गणं उवसंपज्जित्ताणं विहरित्तए, तत्थ णं थेराणं इमेयारूवे विवाए समुपज्जित्था, इमं अज्जो जाणह किं पडिसेवी अपडिसेवी[३] ? से य पुच्छियव्वे- किं पडिसेवी ? से य वएज्जा पडिसेवी[४], परिहारपत्ते से य वएज्जा नो पडिसेवी[५], नो पडिहारपत्ते। जं से पमाणं वयति से पमाणओ घेत्तव्वे। से किं एवमाहु भंते ! सच्चपइण्णा ववहारा ।। २४।।—**

सूत्र २५, गाथा १२३२-१२३४ अवधावने सामाचारी ६२० (A)

---

१. गच्छेज्जा-प्रतिलिपि, हैद्राबाद॥ २. से य - आगम प्र., श्युब्रींग नास्ति ॥ ३. °वि ओहाविए उदाहु अपडि° प्रतिलिपि॥ ४. °वि ओहाविए प° प्रतिलिपि° ॥ ५. °वि ओधाइए णो प° प्रतिलिपि ॥

'भिक्खू य गणाओ अवक्कम्म ओहाणुप्पेही वज्जेज्जा'[1] इत्यादि अथास्य सूत्रस्य कः सम्बन्धः? तत आह—

**छोभगदिण्णो दाउं, व छोभगं सेवियं व तदकिच्चं।**
**सच्चाओ व असच्चं, ओहावणसुत्तसंबंधो ॥ १२३२ ॥**

[2]छोभकमभ्याख्यानं दत्तं यस्मिन् स **छोभकदत्तः**, क्तान्तस्य परनिपातः प्राकृतत्वात् सुखादिदर्शनाद्वा, सोऽवधावनप्रेक्षी भवेत्। इयमत्र भावना-यस्याभ्याख्यानमदायि स 'कथमहमेवमसताऽभ्याख्यानेनाभ्याख्यातः? कथं वा साम्प्रतमेवमलीककलङ्काङ्कितो जनानां पुरत एवमात्मानं दर्शयामि? इत्यवधावनप्रेक्षी गच्छेत्। अथवा येनाभ्याख्यानं दत्तं स चिन्तयति, यथा- असदभ्याख्यानमेतस्मै दत्तमेतत्, तच्च बहुभिर्जनैर्ज्ञातं यथा— अनेनासदभ्याख्यानमस्मै दत्तमिति, ततः कथमहमेतेषां पुरतः तिष्ठामि! इत्येवं छोभकमभ्याख्यानं **दत्त्वा** लज्जया अवधावनप्रेक्षी गच्छेत्। यदि वा **तदकृत्यं** मैथुनरूपं मोहोदयेन

१. वच्चेज्ज-पुप्रे.॥ २. स्थोभक° मु. ॥

**सेवित्वा** ज्ञातोऽहं सर्वजनैरपीति लज्जया कोऽप्यवधावनप्रेक्षी यायात्। एतदर्थप्रतिपादनार्थं छोभकसूत्रानन्तरमस्य सूत्रस्योपन्यासः। अथवाऽयं सम्बन्धः— **सच्चाओ व असच्च**मिति सत्यं संयमः, स पूर्वसूत्रेष्वभिहितः। सत्याच्चान्यद् असत्यमसंयमः, **अवधान**प्रेक्षी चाऽसंयमं याति, ततोऽसंयमप्रतिपादनार्थमवधावनप्रेक्षिसूत्रम् ॥१२३२॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**भिक्षुश्च गणात्** गच्छाद**पक्रम्य अवधावन**मसंयमगमनं तद**नुप्रेक्षी व्रजेत्** गच्छेत्। **स चाऽनवधावित** एव असंयमगत एव सन् **इच्छेद् द्वितीयमपि** वारं तमेव **गणमुपसम्पद्य विहर्तुं, तत्र स्थविराणामयं** वक्ष्यमाण एतद्रूपोऽनन्तरमेवोच्यमानस्वरूपो **विवादः समुत्पद्येत— इदं भो आचार्या जानीत, किमयं प्रतिसेवी?** किं वा न? इति तत्र **स प्रष्टव्यः किं प्रतिसेवी?** कृतप्रतिसेवनाकः? तत्र यदि **स वदेत् प्रतिसेवी,** ततः **परिहारप्राप्तः** प्रायश्चित्तप्राप्तः स्याद् अथ **वदेत्— न प्रतिसेवी,** तर्हि **नो परिहारप्राप्तो** भवति। **यत् स प्रमाणं वदति** तस्मात् **प्रमाणाद् गृहीतव्यः** सत्योऽसत्यो वा, **अथ कस्मादेवमाहुः भदन्त!** भवन्तः? सूरिराह-**सत्यप्रतिज्ञा व्यवहारा**स्तीर्थकृद्भिर्देशिता इति

कृत्वा। एषा सूत्राक्षरगमनिका। सम्प्रति **निर्युक्तिभाष्यविस्तरः**

**सो पुण लिंगेण समं, ओहावे मोत्तु लिंगमहवावि।**
**किंपुण लिंगेण समं, ओहावइ इमेहिं कज्जेहि ॥ १२३३ ॥**

**स पुनरवधावनानुप्रेक्षी** कोऽपि **लिङ्गेन सममवधावेत, अथवा** कोऽपि **मुक्त्वा लिङ्गम्**। तत्र शिष्यः प्राह—**किं** केन कारणेन **पुनर्लिङ्गेन सममवधावति**? सूरिराह—**एतैर्वक्ष्यमाणैः कार्यैः** कारणैः "**कज्जंति वा कारणंति वा एगट्ठं**" [ ]इति वचनात्, ॥१२३३॥

तान्येव कारणान्यभिधित्सुराह—

**जति जीविहिंति भज्जाइ जइ वा वि धणं धरइ जइ वोच्छंति ।**
**लिंगं मोच्छं संकापविट्ठे वुत्थे व उवहम्मे ॥ १२३४ ॥**

**यदि भार्यादयो मे जीविष्यन्ति,** जीवतो द्रक्ष्यामीति भावः। **यदि वा** तन्मे पितृ-पितामहोपार्जितं स्वभुजोपार्जितं वा **धनं धरति** विद्यमानमवतिष्ठते, **यदि वा वक्ष्यन्ति** मुञ्च

व्रतं, भुङ्क्ष्व विपुलान् भोगानिति। तदाहं **लिङ्गं मोक्ष्यामि,** नान्यथा, एवं[1] शङ्क्या व्रजतस्तस्य सङ्घाटको दातव्यः। किं कारणम्? इति चेत्, उच्यते कदाचित्तेन सङ्घाटकेनाऽन्येन वाऽनुशिष्यमाणः प्रतिनिवर्त्तेतापीतिहेतोः। तथा सङ्घाटके प्रतिनिवृत्ते सति किमुत्प्रव्रजामि? किं वा न? इति **शङ्काप्रविष्टे** रात्रौ व्युषिते उपधि**रुपहन्यते।** वाशब्दान्नियमात् मया उत्प्रव्रजितव्यमिति निःशङ्कितो भूत्वा कथमपि शुभाध्यवसाययोगतः प्रतिनिवर्तमानोऽन्तरा वसति तदाऽप्युपहन्येत तस्योपधिरिति सम्बन्धः ॥१२३४॥

गाथायां यानि अवधावनकारणानि उक्तानि तैर्विनापि वक्ष्यमाणैः कारणैरवधावनं भवेत् तदेव कारणमभिधित्सुराह—

**गच्छम्मि केइ पुरिसा, सीयंते विसयमोहियमईया।**
**ओहावंताण गणा, चउव्विहा तेसिमा सोही ॥ १२३५ ॥**

गाथा १२३५-१२३९ अवधावने शोधिः

**गच्छे केचित्पुरुषा विषयमोहितमतिकाः** रूपादिकविषयविपर्यासितमतयो **गणात्** गच्छाद**वधावन्ति, तेषां** तथा गणादवधावतां केनापि समनुशिष्टानाम्, अथवा न सुन्दरं वयं

१. एवमाश° वा. मो. पु. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुर्म इति स्वयमेव परिभाव्य विनिवृत्तानाम् **इयं** वक्ष्यमाणा **चतुर्विधा** चतुष्प्रकारा **शोधिः** प्रायश्चित्तं भवति।।१२३५॥

तामेवाह—

**दव्वे खेत्ते काले, भावे सोही उ तत्थिमा दव्वे।**
**राया जुवे अमच्चे, पुरोहियकुमार कुलपुत्ते ॥ १२३६ ॥**

**द्रव्ये** द्रव्यतः **क्षेत्रतः कालतो भावतश्च**। **तत्र** तासु चतसृषु **शोधिषु** मध्ये द्रव्ये द्रव्यविषया **इयं** वक्ष्यमाणा अन्ये[1] पुनरिदं वदन्ति-द्विविधाः द्रव्यतः शोधिः सचित्तविषया अचित्तविषया च। तत्र सचित्तविषया "**छक्काय चउसु लहुगा**" [ ] इत्यादिका पूर्ववर्णिता, अचित्तविषया उद्गमोत्पादनादिदोषनिष्पन्ना यच्चाकल्पिकं यच्च कल्पनीयमपि सूत्रेण प्रतिषिद्धं तद्विषया सर्वापि शोधिर्द्रव्यत इति, **भाष्यकारः** स्वप्रतिज्ञातां द्रव्यशोधिमाह-**राया** इत्यादि, राजा प्रतीतः, तस्मिन् **युवराज्ये अमात्ये पुरोहिते कुमारे कुलपुत्रे** द्रव्य-शोधिरिति वाक्यशेषः ।।१२३६॥

---

१. चूर्णौ १२३७-१२३८ गाथाद्वयं नास्ति । १२३६ गाथायामपि भिन्नता अस्ति -पु. प्रे. टि.॥



For Private and Personal Use Only

कथमेतद्विषया द्रव्यशोधिः? अत आह—

**एएसिं रिद्धीतो, दट्ठुं लोभाओ सन्नियत्तंते।**
**पणगादीया सोही, बोधव्वा मासलहुअंता ॥ १२३७ ॥**

**एतेषां** राजादीनाम् **ऋद्धीर्दृष्ट्वा** 'अहो! धर्मस्य फलं साक्षादुपलभ्यते। तस्मादहमपि करोमि धर्ममिति' **लोभाद्** भोगाभिष्वङ्गरूपात् **सन्निवर्तमाने** षष्ठी-सप्तम्योरर्थं प्रत्यभेदात् सम्यग् निवर्त्तमानस्य **बोधव्या शोधिः पञ्चकादिका मासलघुपर्यन्ता**। तद्यथा राजानं स्फीतिमन्तमुपलभ्य 'अहो धर्मप्रभावतः कथमेष स्फीतिमान्? तस्मान्न त्यजामि धर्ममि'ति निवर्तमानस्य पञ्चरात्रिन्दिवानि शोधिः, युवराजं दृष्ट्वा निवर्तमानस्य दशरात्रिन्दिवानि, अमात्यं दृष्ट्वा पञ्चदश, पुरोहितं विंशतिः, कुमारं पञ्चविंशतिः, कुलपुत्रं मासलघुकमिति ॥१२३७॥

**चोएती कुलपुत्ते, गुरुगतरं रायाणो य लहुगतरं।**
**पच्छित्तं किं कारण, भणियं? सुण चोयग! इमं तु ॥ १२३८ ॥**

**चोदयति** परः- **किं कारणं** केन कारणेन **कुलपुत्रे**ऽल्पर्द्धिके दृष्टे निवर्तमानस्य **गुरुकतरं प्रायश्चित्तं भणितं** दर्शितम्?, **राज्ञो** महर्द्धिकस्य दर्शनात् प्रतिनिवर्तमानस्य

**लघुकतरम्**? अत्र सूरिराह-**चोदक**! येन कारणेनेत्थं प्रायश्चित्तनानात्वं तत्कारण**मिदं** वक्ष्यमाणं **शृणु** ।।१२३८॥

एतदेवाह—

**दीसइ धम्मस्स फलं, पच्चक्खं तत्थ उज्जमं कुणिमो।**
**इड्ढीसु पयणुवीसु वि, सज्जंते होति नाणत्तं ॥ १२३९ ॥**

**दृश्यते** खलु **धर्मस्य फलं प्रत्यक्षं** साक्षात्तस्मात्तत्र धर्मे वय**मुद्यमं कुर्मः**। एव**मृद्धिषु** राजप्रभृतिसम्बन्धिषु **प्रतन्वीष्वपि** यथाक्रमं हीयमानहीयमानतरास्वपि सज्यते सङ्गमुपयाति। यथा यथा चाल्पाऽल्पतरास्वपि ऋद्धिषु सङ्गमुपपद्यते तथा तथा लक्ष्यते तीव्रा तीव्रतरा तस्य भोगासक्तिरित्युक्तेन प्रकारेण **भवति नानात्वं** प्रायश्चित्तनानात्वमिति। [१]अपरे त्वियं भावविशोधिरिति प्रतिपन्नाः।। १२३९ ॥

सम्प्रति क्षेत्रतः शोधिमभिधित्सुराह—

---

१. **चूर्णिकार इत्यर्थः-पु. प्रे. पार्श्वभागे॥**

**खेत्ते निवपहनगरद्दारे उज्जाणे परेण सीमऽतिक्कंते।**
**पणगादी जा लहुओ, एएसु य सनियत्तंते ॥ १२४० ॥**

**क्षेत्रे** क्षेत्रविषया एतेभ्यः **सन्निवर्तमाने एएसुत्ति** गाथायां सप्तमी पञ्चम्यर्थे। केभ्यः **सन्निवर्त्तमाने?** इत्यत आह-**निवपहे**त्यादि, अत्रापि सप्तमी पञ्चम्यर्थे, ततोऽयमर्थः:— **नृपपथात्** , **नगरद्वारात्, उद्यानात्** , **परतः** सीम्नोऽर्वाक्, तथा सीम्नः, **सीमातिक्रमतः**। किंप्रमाणा शोधिः? अत आह - **पञ्चकादिका यावल्लघुको** मासः, इयमत्र भावना- राजपथान्निवर्त्तमानस्य पञ्चरात्रिन्दिवानि, नगरद्वारान्निवर्तमानस्य दश, उद्यानात्पञ्चदश, उद्यानात्परतः सीम्नोऽर्वाक् निवर्तमानस्य विंशतिरहोरात्राः, सीम्नो भिन्नमासः, सीमानमतिक्रम्य मासलघु ॥१२४०॥

सम्प्रति कालतः शोधिमाह—

**पढमदिणनियत्तंते, लहुओ दसहि सपदं भवे काले।**
**संजोगे पुण एत्तो, दव्वे खेत्ते य काले य ॥ १२४१ ॥**

यदि **प्रथमे दिवसे निवर्तते** ततस्तस्मिन् प्रथमदिवसे निवर्तमाने **लघुको** मासलघु प्रायश्चित्तम्। एवं यावद् **दशभिर्दिवसैः स्वपदं** दशमं प्रायश्चित्तं भवति। तद्यथा-द्वितीये दिवसे निवर्तमानस्य मासगुरु, तृतीये दिवसे चतुर्मासलघु, चतुर्थे दिवसे चतुर्मासगुरु, पञ्चमे षड् लघु, षष्ठे षड् गुरु, सप्तमे छेदः, अष्टमे मूलं, नवमेऽनवस्थाप्यं, दशमे पाराञ्चितमिति, एषा **काले** कालविषया शोधिः। भावतो वक्ष्यमाणा। सम्प्रत्यत उर्ध्वं **द्रव्ये क्षेत्रे काले** च यः **संयोगः** तस्मिन् वक्ष्ये।। १२४१॥

प्रतिज्ञातमेव निर्वाहयति—

**दव्वस्स य खेतस्स य, संजोगे होइमा पुण विसोही।**
**रायाणं रायपहे, दट्ठुं जा सीमतिक्कंते ॥ १२४२॥**

**पणगादी जा मासो, जुवरायं निवपहादि दट्ठूणं।**
**दस राइंदियमाई, मासगुरु होइ अंतम्मि ॥ १२४३ ॥**

**द्रव्यस्य च क्षेत्रस्य च संयोगे** सम्बन्धे पुनरियं वक्ष्यमाणा **भवति विशोधिः।**

तामेवाऽऽह— **रायाण**मित्यादि, एषा हि राजादिकं द्रव्यं, नृपपथादिकं[च] क्षेत्रमधिकृत्योच्यते, इतीयं द्रव्य-क्षेत्रसंयोगजा विशोधिः। तत्र यदि **राजानं राजपथे दृष्ट्वा** निवृत्तस्ततः तस्य पञ्चकं पञ्चरात्रिन्दिवं प्रायश्चित्तम्। एवं क्षेत्रं राजपथमादि[१] कृत्वा राज्ञ्येव द्रव्ये **पञ्चकादि** प्रायश्चित्तं क्रमेण तावद् वक्तव्यं **यावत्** क्षेत्रतः **सीमातिक्रान्ते** राज्ञि प्रायश्चित्तं याव**न्मासः**। तद्यथा— नगरद्वारे राजानं दृष्ट्वा निवर्तमानस्य दश रात्रिन्दिवानि, उद्यानान्निवर्तमानस्य पञ्चदश, उद्यानस्य सीम्नश्चान्तराद् विंशतिकं, सीम्नो निवर्तमानस्य पञ्चविंशतिकं, सीमातिक्रान्तं राजानं दृष्ट्वा निवर्तमानस्य मासलघु। **युवराजं** द्रव्यं **नृपपथादि** क्षेत्रगतं **दृष्ट्वा** निवर्तमानस्य **दशरात्रिन्दिवादिकं** प्रायश्चित्तं क्रमेण तावद्वक्तव्यं याव**दन्ते मासगुरु भवति**। तच्चैवं— राजपथे युवराजं दृष्ट्वा निवर्तमानस्य दश रात्रिन्दिवानि, नगरद्वारे पञ्चदश, उद्याने विंशतिः, उद्यानसीम्नोरपान्तराले पञ्चविंशतिः, सीम्नि मासलघु सीमातिक्रमे मासगुरु ॥१२४३॥

**सचिवे पन्नरसादी, लघुकं तं वीसमादि उ पुरोहे।**
**अंतम्मि उ चउगुरुगं, कुमारे भिन्नादि जा छाउ (छलहु) ॥ १२४४ ॥**

गाथा १२४०-१२४५ पश्चाद्वलने प्रायश्चित्त-नानात्त्वम्

१. °मादिं कृत्वा राज्ये च द्रव्ये - पु. प्रे. ॥



For Private and Personal Use Only

**सचिवे** राजपथादिषु क्रमेण **पञ्चदशादि** चतुर्लघुपर्यन्तं, तद्यथा— राजपथे सचिवं दृष्ट्वा निवर्त्तमानस्य पञ्चदशरात्रिन्दिवानि, नगरद्वारे विंशतिः, उद्याने पञ्चविंशतिः, उद्यानसीम्नो-रन्तराले मासलघु, सीम्नि मासगुरु,सीमाऽतिक्रमे चतुर्मासलघु। तथा **पुरोधसि विंशत्यादि** प्रायश्चित्त**मन्ते** च **चतुर्गुरुकम्** । तद्यथा— राजपथे पुरोधसं दृष्ट्वा निवर्त्तमानस्य विंशतिरहोरात्राः, नगरद्वारे पंचविंशतिः, उद्याने मासलघु, उद्यानसीम्नोरपान्तराले मासगुरु, सीम्नि चतुर्मासलघु, सीमातिक्रमे चतुर्मासगुरु, **कुमारे भिन्नमासादि** यावत् षड् लघु, तद्यथा— राजपथे कुमारं दृष्ट्वा निवर्त्तमानस्य भिन्नो मासः, पञ्चविंशतिरहोरात्रा इत्यर्थः, नगरद्वारे मासलघु, उद्याने मासगुरु, उद्यानसीम्नोरपान्तराले चतुर्मासलघु, सीम्नि चतुर्मासगुरु, सीमातिक्रमे **षणमासलघु** ॥१२४४॥

**कुलपुत्ते मासादी, छग्गुरुगं होइ अंतिमं ठाणं ।**
**इत्तो य दव्वकाले, संयोगमिमं तु वोच्छामि ॥ १२४५॥**

**कुलपुत्रे मासादि** मासलघ्वादि प्रायश्चित्तं क्रमेण तावद् द्रष्टव्यं यावद**न्तिमं स्थानं**

**षड्गुरुकं भवति,** तद्यथा— राजपथे कुलपुत्रं दृष्ट्वा निवर्तमानस्य मासलघु, नगरद्वारे मासगुरु, उद्याने चतुर्लघु, उद्यानसीम्नोरपान्तराले चतुर्गुरु, सीम्नि षण्मासलघु, सीमातिक्रमे षण्मासगुरु, तदेवं द्रव्य-क्षेत्रसंयोग उक्तः। **इत** ऊर्ध्वं **द्रव्ये** च **काले** च **संयोगमिमं** वक्ष्यमाणं **वक्ष्यामि** ।।१२४५॥

यथाप्रतिज्ञातमेव निर्वाहयति—

**रायाणं तद्दिवसं, दट्ठूण नियत्ते होति मासलहुं।**
**दसहिं दिवसेहिं, सपयं जुयरण्णादि अतो वोच्छं ॥ १२४६ ॥**



**राजानं दृष्ट्वा तस्मिन् दिवसे** यदि प्रति**निवर्तेत,** न तु अवधावनानन्तरं तत्क्षणमेव तदा तस्य **मासलघु** प्रायश्चित्तम् , एवं क्रमेण तावद्वक्तव्यं याव**द्दशभिर्दिवसैः स्वपदं** दशमं प्रायश्चित्तं भवति। तद्यथा-द्वितीये दिवसे राजानं दृष्ट्वा निवर्त्तमानस्य मासगुरु, तृतीये दिवसे चतुर्मासलघु, चतुर्थदिवसे चतुर्मासगुरु, पञ्चमे षण्मासलघु, षष्ठे षण्मासगुरु, सप्तमे छेदः, अष्टमे मूलं, नवमेऽनवस्थाप्यं, दशमे पाराञ्चितम्। साम्प्रत**मत** उर्ध्वं **युवराजादि**मधिकृत्य **वक्ष्यामि**।।१२४६॥

प्रतिज्ञातमेव करोति—

**मासगुरू चउलहुया, चउगुरु छल्लहुय छग्गुरुकमादी।**
**नवहि य अट्ठहिं सत्तहि, छहिं पंचहिं चेव चरमपयं ॥ १२४७ ॥**

युवराजा-ऽमात्य-पुरोहित-कुमार-कुलपुत्रेषु यथाक्रमं प्रथमदिवसे **मासगुरु-चतुर्लघु चतुर्गुरु-षट्लघु-षट्गुरुकादि** कृत्वा यथाक्रमं **नवभिरष्टभिः सप्तभिः षड्भिः पञ्चभिश्च** दिवसैश्चरमं **चरमपदं** पाराञ्चितं वक्तव्यम्। तद्यथा— प्रथमे दिवसे युवराजं दृष्ट्वा निवर्तमानस्य मासगुरु, द्वितीये दिवसे चतुर्मासलघु, तृतीये दिवसे चतुर्मासगुरु, चतुर्थे दिवसे षण्मासलघु, पञ्चमे दिवसे षण्मासगुरु, षष्ठे छेदः, सप्तमे मूलम् , अष्टमेऽनवस्थाप्यं, नवमे पाराञ्चितम्। तथा अमात्यं दृष्ट्वा प्रथमे दिवसे निवर्त्तमानस्य चतुर्मासलघु, द्वितीये दिवसे चतुर्मासगुरु, तृतीये षण्मासलघु, चतुर्थे षण्मासगुरु, पञ्चमे छेदः, षष्ठे मूलं, सप्तमेऽनवस्थाप्यम् , अष्टमे पाराञ्चितमिति। तथा पुरोहितं दृष्ट्वा प्रथमे दिवसे निवर्तमानस्य चतुर्मासगुरु, द्वितीये षण्मासलघु, तृतीये षण्मासगुरु, चतुर्थे छेदः, पञ्चमे मूलं, षष्ठे

अनवस्थाप्यं, सप्तमे पाराञ्चितम्। तथा कुमारं दृष्ट्वा प्रथमे दिवसे निवर्तमानस्य षण्मासलघु, द्वितीये षण्मासगुरु, तृतीये छेदः, चतुर्थे मूलं, पञ्चमेऽनवस्थाप्यं, षष्ठे पाराञ्चितम्। तथा कुलपुत्रकं प्रथमे दिवसे दृष्ट्वा निवर्त्तमानस्य षण्मासगुरु, द्वितीये छेदः, तृतीये मूलं, चतुर्थे अनवस्थाप्यं,पञ्चमे पाराञ्चितमिति ॥१२४७॥

उपसंहारमाह—

**इति दव्वखेत्तकाले, भणिया सोही उ भावइणमण्णा ।**
**दंडिय१ भूणग२ संकंत३ विवण्णे४ भुंजणे दोसुं५ ॥ १२४८॥**

**इति** एवमुक्तेन प्रकारेण प्रत्येकं संयोगतश्च **द्रव्ये क्षेत्रे काले च भणिता शोधिः**। इदानीं **भावत इयमन्या** द्रव्य-क्षेत्र-कालव्यतिरिक्ता भण्यते इति वाक्यशेषः। प्रतिज्ञातमेव कुर्वन् द्वारसंग्रहमाह— **दण्डिते** राज्ञा १। **भ्रूणके** देशीपदमेतत् , बालके पुत्रादावित्यर्थः, मृते इति वाक्यशेषः २। तथा **सङ्क्रान्ते** परपुरुषं गते ३। **विपन्ने** मृते कलत्रे इति गम्यते ४। तथा **दोसुत्ति**, तृतीयार्थे सप्तमी, यथा "**तेसु तेसु अलंकिया**

**पुहवी**'' इत्यत्र, ततोऽयमर्थः-द्वाभ्यां पुरुषाभ्यां स्त्रीभ्यां वा वक्ष्यमाणस्वरूपाभ्यां **भोजने** भावतः शोधिर्भवति ५ ॥१२४८॥

तत्र ''यथोद्देशं निर्देशः'' इति प्रथमतो दण्डितादिद्वारत्रय(चतुष्टय)माह—

**दंडिय सोउ नियत्ते, पुत्तादि मए व चउलहू होंति।** दारं १। २।
**संकंत-मयाए वा, भोतिए चउगुरू होंति ॥ १२४९ ॥** दारं ३। ४।

यत्र स सम्प्रस्थितस्तत्र तानि मनुष्याणि कस्मिंश्चिदपराधे राज्ञा दण्डितानि यदि वा तेषां पुत्रादिकं किमपि मृतम् , अथवा द्वयमपीदं जातं, ततो **दण्डितान्** यदि वा **पुत्रादीन्** **मृतान**थवा उभयमपि **श्रुत्वा निवर्तते**। ततो निवृत्ते निवृत्तस्य प्रायश्चित्तं **चत्वारो लघुकाः** लघुमासा **भवन्ति** १। २ तथा **भोजिका** नाम भार्या, सा अन्यपुरुषसङ्क्रान्ता, अथवा मृता श्रुता, ततोऽन्यपुरुष**सङ्क्रान्तायां मृतायां वा भोजिकायां** निवर्तमानस्य **चत्वारो गुरुकाः** गुरुमासा भवन्ति ३। ४।।१२४९॥

सम्प्रति ''भुंजणे दोसुं''ति व्याख्यानयति—

**अह पुण भुंजेज्जाही, दोहि उ वग्गेहि तत्थ समयं तु।**
**इत्थीहिं पुरिसेहि व, तहियं आरोवणा इणमा ॥ १२५० ॥**

**अथ पुनस्तत्र** गतः सन् **द्वाभ्यां वर्गाभ्याम्**। एतदेव स्पष्टमाचष्टे **स्त्रीभ्यां पुरुषाभ्यां वा समकं** सार्धं, तुशब्दो वक्ष्यमाणसमस्तविशेषसूचकः, भुञ्जीत, **तत्र इयम**नन्तरमुच्यमाना **आरोपणा** प्रायश्चित्तम् ॥१२५०॥ तामेवाह—

**लहुगा य दोसु दोसु य, गुरुगा छम्मास लहु गुरुछेदो।**
**निक्खिवणम्मि य मूलं, जं चऽन्नं सेवए दुविहं ॥ १२५१ ॥**

**द्वयोः** चत्वारो **लघुका द्वयो**श्चत्वारो **गुरुकाः**। तथा **षण्मासलघवः** षण्मासगुरवः तथा **छेदः**, **निक्खेवणम्मि य** इत्यादि, यदा स्वयं लिङ्गं निक्षिपति परित्यजति तदा स्वयं लिङ्गस्य **मूलम्**। अथवा बलाद् लिङ्गं निक्षिपणे विड्वरे केनापि मोच्यते तदा शुद्ध इति। तथा **यच्चान्यत् सेवते** स्त्री-पुं-नपुंसकादिकं तन्निष्पन्नमपि प्रायश्चित्तं तस्य भवति। एष गाथासंक्षेपार्थः ॥१२५१॥

साम्प्रतमेनमेव विवरीषुः प्रथमतो "लहुगा य दोसु दोसु य गुरुगा" इति व्याख्यानयति—

**पुरिसे उ नालबद्धे, अणुव्वतोवासए य चउलहुगा।**
**एयासुं चिय थीसुं, अनालसम्मे य चउगुरुगा ॥ १२५२ ॥**

अत्रापि सर्वत्र सप्तमी तृतीयार्थे, **पुरुषेण नालबद्धेन,** तुशब्दो विशेषणार्थः। स चैतद्विशिनष्टि-मिथ्यादृष्टिना अथवा **अणुव्रतोपासकेन** नालबद्धेनैताभ्यां द्वाभ्यां पुरुषाभ्यां **च**- शब्दस्यानुक्तसमुच्चयार्थत्वाद्दर्शनमात्रश्रावकेण च सार्धं भुञ्जानस्य प्रायश्चित्तं **चत्वारो लघुकाः** । व्याख्यातं 'लघुगा य दोसु' इति पदम्। अधुना 'दोसु य गुरुगा' इति व्याख्यानयति **एयासुं चिय थीसुं** इति **एताभ्यामेव स्त्रीभ्यां,** किमुक्तं भवति? नालबद्धमिथ्यादृष्टिस्त्रिया नालबद्धाणुव्रतोपासकस्त्रिया वा सार्धं भुञ्जानस्य चतुर्गुरुकाः **'अनालसम्मे य चउगुरुगा'** इति अनालबद्धमिथ्यादृष्टिपुरुषेणाऽनालबद्धाणुव्रतोपासकेन वा समं भुञ्जानस्य चतुर्गुरुकाः।।११५२॥

अधुना "छम्मास लहुगुरु" इति व्याख्यानार्थमाह—

**अनालदंसणित्थिसु, दिट्ठाऽऽभट्ठपुरिसे य छल्लहुया।**
**दिट्ठित्थि पुम अदिट्ठो, मेहुण भोतीए छग्गुरुगा ॥ १२५३ ॥**

या **अनालबद्धा दर्शन**मात्रश्राविका, यश्च पूर्वं **दृष्टः** सन् तदानी**माभाषितपुरुषः**, तेन च समं भुञ्जानस्य **षड् लघुकाः**। तथा **दिट्ठित्थि**त्ति पदैकदेशे पदसमुदायोपचारात् पूर्वं या दृष्टा तदानीमाभाषिता तया दृष्टाभाषितया स्त्रिया१, तथा [1]**अदृष्टा**भाषितेन पुरुषेण २। तथा **मेहुण**त्ति मैथुनिक्या मैथुनाजीवया, वेश्यया इत्यर्थः ३। तथा **भोजिकया** भार्यया ४। एतैश्चतुर्भिः सह भुञ्जानस्य **षण्मासगुरवः** ॥१२५३॥

सम्प्रति "छेद" इति व्याख्यानार्थमाह—

**अदिट्ठाभट्ठासुं थीसुं, संभोइ संजई छेदो।**
**अमणुन्नसंजतीए, मूलं थीफाससंबंधे ॥ १२५४ ॥**

पूर्व**मदृष्टाभि**स्तदानीमा**भाषिताभिः** स्त्रीभिः सह तथा **साम्भोगिकसंयत्या**ऽपि च समं

१. अदृष्टेन पुरुषेणाऽऽभाषितेन २ तथा - वा. मो. पु. मु. ॥

भुञ्जानस्य **छेदः** । तथा **असाम्भोगिकसंयत्या** सह भोजने तथा **स्त्रीस्पर्शसम्बन्धे** च **मूलं** प्रायश्चित्तम्।। १२५४॥ साम्प्रतमत्रैव व्याख्यानान्तरमाह—

**अहवावि पुव्वसंथुय-पुरिसेहिं सद्धिं चउलहू होंति।**
**पुरसंथुयइत्थीए, पुरिसेयर दोसु वी गुरुया ॥ १२५५ ॥**

**अथवेति** प्रकारान्तरोपदर्शने, **पूर्वसंस्तुतपुरुषैः सह पूर्वसंस्तुतस्त्रिया** वा समं भुञ्जानस्य **चत्वारो लघुका** लघुमासा **भवन्ति** । एतेन 'लहुगा य दोसु' इति व्याख्यातम्। तथा **पुरुषेतराभ्यां** पुरुषस्त्रीभ्यां **द्वाभ्यामपि** सह भुञ्जानस्य **गुरुका**श्चत्वारो गुरुमासाः, अनेन 'दोसु य गुरुगा' इति व्याख्यातम्।।१२५५॥

**पच्छासंथुयइत्थीए, छल्लहु मेहुणीए छग्गुरुगा।**
**समणुण्णेयरसंजति, छेदो मूलं जहाकमसो ॥ १२५६ ॥**

**पश्चात्संस्तुतया स्त्रिया** सह भुञ्जानस्य **षड्लघवः**, **मैथुनिक्या** मैथुनाजीवया,

पण्याङ्गनया इत्यर्थः, सह भुञ्जानस्य **षड्गुरवः, समनोज्ञया** साम्भोगिक्या **संयत्या** सह भुञ्जानस्य **छेदः**, अमनोज्ञया संयत्या सह **मूलम्** ॥१२५६॥ पुनः प्रकारान्तरमाह—

**अहव पुरसंथुएतर, पुरिसित्थीअसोय-सोयवादीसु।**
**समणुण्णेयरसंजइ, अड्ढोकंतीए मूलं तु ॥ १२५७ ॥**

अस्या व्याख्या **कल्पाध्ययनचूर्णितः** कर्तव्या ॥१२५७॥

सम्प्रति यदुक्तं प्राक् "जं चऽण्णं सेवते दुविहं" ति तद्व्याख्यानार्थमाह—

**थीविग्गह किलिबं वा, मेहुण-कम्मं च चेयणमचेयं।**
**मूलोत्तर कोडिदुगं, परित्तणंतं च एमादी ॥ १२५८ ॥**

**स्त्रीविग्रहो** नाम स्त्रीशरीरं, **क्लीबो** नपुसंकम्, एतद् द्विकं यत्सेवते, अथवा **मेहुण**त्ति मैथुनं, **कम्मं**ति हस्तकर्म, अथवा **सचित्तमचित्तं** वा यत् प्रतिसेवते। यदि वा **मूलगुणविषयम् उत्तरगुणविषयं**, यदि वा उद्गम**कोटिं** विशुद्धिकोटिम् , अथवा **परित्त**मित्ति

प्रत्येकशरीरम्, **अणंतत्ति** अनन्तकायम् **एवमादि** द्विविधं द्रष्टव्यम्। आदिशब्दात् तिर्यग्योनिकं मानुषिकं वा मैथुनमित्यादिद्विकपरिग्रहः ॥१२५८॥

**एएसिं तु पयाणं, जं सेवइ पावई तमारुवणं।**
**अन्नं च जमावज्जे, पावति तं तत्थ तहियं तु ॥ १२५९ ॥**

**एतेषा**मनन्तरोदितानां स्त्रीविग्रह-क्लीबादीनां **पदानां** मध्ये **यत्सेवते तामारोपणां** तन्निष्पन्नं प्रायश्चित्तं **प्राप्नोति**। **अन्यच्च यदापद्यते** संयमविराधनाप्रत्ययं प्रायश्चित्तं **तदपि तत्र प्राप्नोति** ॥ १२५९ ॥

**तत्तो य पडिनियत्ते, सुहुमं परिनिव्ववंति आयरिया।**
**भरियं महातलागं, तलफलदिट्ठंतो चरणम्मि ॥ १२६०॥**

**ततः** तस्मात् अवधावनात् **प्रतिनिवृत्तात् सूक्ष्मं** यथा ते जानन्ति सूरयोऽस्माकमुपरि तथैव सस्नेहा वर्तन्ते इत्येवमतिकोमलेनोपायेना**चार्याः परिनिर्वापयन्ति** सुखापयन्ति येन ते सर्वमालोचयन्ति। ते चाऽऽलोचनानन्तरमेवं वदेयुः यथा चारित्रमस्माकं सर्वं गलितम्।

अस्मभ्यं व्रतानि दत्थ, एवमुक्ते सूरिभि**श्चरणे** चरणविषये **भरितं महातडाग**मिति। भरणादेव कस्मिंश्चित् प्रदेशे पालीभेदाद् गलदुदकं तत्क्षणादेव पतितेन **तालफलेन** तत्प्रदेशाऽऽपूरणान्निरुद्धोदकं **दृष्टान्तः** करणीयः। इह 'सुहुमं परिनिव्ववंती'त्युक्तं, तच्च सूक्ष्मं परिनिर्वापणं द्विविधं, तद्यथा-लौकिकं लोकोत्तरिकं च। तत्र लौकिकं यथा **रौहिणिक**चौरस्य अभयकुमारेण कृतम्। तच्चैवम्—

**राय**गिहं नगरं, तत्थ **रोहि**णितो चोरो, बाहिं दुग्गे ठितो, सो सयलं नगरं मुसति। न कोइ तं घेत्तुं सक्कति। अन्नया **वद्ध**माणसामी समोसढो। रोहिणितो भयवतो धम्मं कहेंतस्स नातिदूरेणं वोलेइ, सो वलेमाणो 'मा तित्थगरवयणं सोउं चोरियं न काहामि' त्ति कण्णे ठएइ, तस्सेवं वोलेमाणस्स कंटको पादे लग्गो। तं जाव एगेणं हत्थेणं उद्धरइ ताव तित्थगरो इमं गाहत्थं पण्णवेइ ॥ १२६० ॥

**अमिलायमल्लदामा, अणिमिसनयणा य नीरजसरीरा।**
**चउरंगुलेण भूमिं, न छिवंति सुरा जिणो कहए ॥ १२६१ ॥**

**सुरा** देवाश्चतुर्निकायभाविनोऽपि **अम्लानमाल्यदामानः**। तथा न विद्यते निमेषो येषां

ते अनिमेषे, अनिमेषे नयने येषां ते **अनिमेषनयनाः**। तथा नीरजः निर्मलं शरीरं येषां ते **नीरजःशरीराः**। **चतुरङ्गुलेन** चतुर्भिरङ्गुलै**र्भूमिं न स्पृशन्ति** इति **जिनः** सर्वज्ञः **कथयति**। अनेन सर्वतीर्थकृतामविसंवादिवचनतामावेदयति ॥१२६१॥

एवं सोउं कंटगं उद्धरित्ता पुणो कण्णे ठगेउं गतो। अन्नया सो रोहिणितो रायगिहमतिगतो रत्तिं चोरोत्ति गहितो, न य नज्जइ रोहिणितो उयाहु अन्नो वा चोरो? ततो पिट्टिउमाढत्तो भण्णइ य- 'अक्खाहि सच्चं तुमं रोहिणितो? नव? त्ति। जइ रोहिणितो सिया तो मुयामो,' एवं सो नीतिसत्थपसिद्धाहिं अट्ठारसहिं कारणेहिं एक्केक्कं काउं पुच्छिज्जइ। सो न कहेइ जहा अहं रोहिणितो चोरोत्ति। ताहे अट्ठारसमा सुहुमा कारणा करिउमाढत्तो, मज्जं पाइतो, मत्तो निच्चेयणो जातो। ताहे देवलोगभवणसरिसं भवणं काउं तत्थ महरिहे सयणिज्जे निवज्जावितो। ततो पडिबोहवेलाए इत्थिनाडए निव्वतिज्जमाणे ताहिं भण्णइ— 'तुमं देवो देवलोगे उववन्नो,' देवलोए य एसो अणुभावो-जो पुच्छितो पुव्वभवं सम्मं अक्खाति सो चिरट्ठिती देवत्ते अच्छति, जो न अक्खाति सो तक्खणं पडति, तो मा अम्हे अणाहा काहिसि सच्चं अक्खाहि, ततो रोहिणीएण तित्थयरवयणं संभरित्ता चिंतियं-अपूतिवयणा तित्थगरसामिणा भणियं-'अमिलाय' इत्यादि, इमं च सव्वं वितहं

दीसइ। ततो कयगं एयं ति भणइ- 'नाहं रोहिणितो,' ततो मुक्को। रोहिणिएण तत्थ चिंतियं-अहो एगस्स वि सामिणो वयणस्स केरिसं माहप्पं! अहं जीवियसुहआभागी जातो, जइ पुण निग्गंथं पावयणं सुणेमि तो इहलोए परलोए य सुहिओ भवामित्ति चिंतिऊण पव्वइतो। उक्तं सौक्ष्मं लौकिकं परिनिर्वापनम्। तथा चाह-

**सुहमा य कारणा खलु, लोए एमादि उत्तरे इणमो।**
**मिच्छद्दिट्ठीहि कया, किन्नुह भे तत्थ उवसग्गा? ॥ १२६२ ॥**

**सूक्ष्मा खलु कारणा** यतना **लोके, एवमादिका** एवंप्रभृतिका, आदिशब्दः प्रभूताऽन्यैवंविधदृष्टान्तसूचकः, **उत्तरे** लोकोत्तरे **इयं** वक्ष्यमाणस्वरूपा कारणा, तामेवाह— **मिथ्यादृष्टिभिः किन्नु भे** भवतस्तत्रगतस्योप**सर्गाः**? । किमुक्तं भवति? न तव वत्स! विरूपाचरणे किमपि चित्तं, केवलं यदि मिथ्यादृष्टिभिर्बलात्कारेण किमपि कारितः स्यात्। तत्र किं प्रतिसेवितं? किं वा न प्रतिसेवितम्? इति॥ १२६२॥ एवमुक्तः स यत् करोति तदाह—

**अवि सिं धरइ सिणेहो, पोराणो आओ निप्पिवासाए।**
**इइ गारवमारुहितो, कहेइ सव्वं जहावत्तं ॥ १२६३ ॥**

**अपीति** सम्भावने, सम्भावयामीत्येतत्-**सिं** ति एतेषां पौराणः पुराणायामवस्थायां भवः **पौराणः स्नेह आयातोऽ**द्यापि **निष्पिपासया** मदीयवैयावृत्त्यादिपिपासाव्यतिरेकेणापि **धरति** विद्यते, **इति** एवं **गौरवत्वमारोपितः** सन् किमेतेषां कुर्मः? जीवितमपि मदीयमेतेषामेवेति मन्वानो **यथावृत्तं** [**सर्वं**] समस्तमपि **कथयति**।।१२६३॥ एतदेव स्पष्टतरमाचष्टे—

**एवं भणितो संतो, उत्तुइतो सो कहेइ सव्वं तु।**
**जं णेण समणुभूयं, जं वा से तहि कयं तेहिं ॥ १२६४ ॥**

**एवं** पूर्वप्रदर्शितेन प्रकारेण **भणितः सन् उत्तुइतो**त्ति देशीपदमेतद् गर्वे वर्तते, ततोऽयमर्थः- अहमेव गुरूणां मान्यः, नान्य इति गौरवमारोपितः **सर्व**मेव तुरवधारणे **यदनेन** स्वयं **समनुभूतं यद्वा से** तस्य तत्र गतस्य **तैः** मिथ्यादृष्टिभिः **कृतं** तत्समस्तमेव **कथयति**॥१२६४॥ तत्र यदि सोऽगीतार्थो भवति तत इदं ब्रूते—

**ण्हाणादीणि कयाइं, देह वए मज्झ बेइ तु अगीतो।**
**पुव्वं च उवस्सग्गा, किलिट्ठभावो अहं आसि ॥ १२६५॥**

**मया स्नानादीनि** स्नानाङ्गरागादीनि **कृतानि,** तथा **पूर्वमुपसर्गात्** उपसर्गेष्वनारब्धेष्वहं **संक्लिष्टपरिमाणोऽभवम्,** उपसर्गप्रारम्भसमकालमेव पुनर्विशुद्धपरिणामो जातः, तत एतेन कारणेन **मह्यं ददत** यूयं **व्रतानि,** व्रतानि ममारोपयतेति भावः, इति **अगीतो** अगीतार्थो **ब्रूते**॥१२६५॥

एवं तेनोक्ते यदाचार्येण वक्तव्यं तदाह—

**वेसकरणं पमाणं, न होइ न य मज्जणं नऽलंकारो ।**
**साइज्जिएण सेवी, अणणुमएणं असेवी उ ॥ १२६६ ॥**

वत्स! **न वेषकरणं** न साधुवेषकरणं **प्रमाणं, न च मज्जनं, नाप्यलङ्कारः** प्रमाणं, यथाक्रममप्रतिसेवने प्रतिसेवने वा, किन्तु **साइज्जिएणत्ति** यदि स्नानादिविषये अनुमननं कृतं तेन **सेवी** प्रतिसेवनाकारी भवति। **अननुमतेन तु असेवी** अप्रतिसेवी ॥ १२६६॥

अन्यच्च—

**जो सो विसुद्धभावो, उप्पण्णो तेण ते चरित्ताया ।**
**धरितो निमज्जमाणी, जले व नावा कुंविदेण ॥ १२६७ ॥**

**योऽसौ विशुद्धभाव**स्तवोपसर्गप्रारम्भसमये **समुत्पन्नस्तेन तव चरित्रात्मा धारितः।** यथा **कुविन्देन** कोलिकेन **जले निमज्जती नौ**रिति ॥१२६७॥ तथा—

**जह वा महातलागं, भरितं भिज्जंतमुवरिपालीयं।**
**तज्जाएण निरुद्धं, तक्खणपडिएण तालेणं ॥ १२६८ ॥**

**यथे**ति दृष्टान्तोपन्यासे, **वा** इति दृष्टान्तान्तरसमुच्चये, **महातडागं भरित**मतिवर्षे पानीयेन परिपूर्णं भरितम्, अतिभरणादेव **चोपर्ये**कस्मिन् प्रदेशे **भिद्यमानपालीकं** भिद्यमानारब्धपालीकं **तज्जातेने**ति, प्राकृतत्वात्तृतीया पञ्चम्यर्थे, ततोऽयमर्थः- तस्यां पाल्यां जातस्तज्जातस्तस्मात् तालात्-तालवृक्षात् यस्मिन् क्षणे उदकगलनेन पाली भेत्तुमारब्धा **तत्क्षणे**-तस्मिन्नेव प्रदेशे **पतितेन तालेन** तालफलेनेति गम्यते, उदकं गलत् तेन **निरुद्धम्** ॥१२६८॥ एष दृष्टान्तोऽयमर्थोपनयः—

**एवं चरणतलागं, नायय उवसग्गवीचिवेगेहिं।**
**भिज्जंतु तुमे धरियं, धिइबल-वेरग्गतालेण ॥ १२६९ ॥**

**एवं** महत्तडागदृष्टान्तगतप्रकारेण **चरणमेव तडागं ज्ञातयः** स्वजनास्तैः कृता ये **उपसर्गा**स्त एव **वीचिवेगाः** कल्लोलवेगास्तैर्ज्ञातिकृतोपसर्गवीचिवेगै**र्भिद्यमानं त्वया** धृतिबलं च वैराग्यं च धृतिबलवैराग्यं, तदेव ताल अवयवे समुदायोपचारात् तालफलं, तेन **धृतिबलवैराग्यतालेन धारितं**, केवलमवधावनतः प्रायश्चित्तभाग् जातः तीर्थकराज्ञाभङ्गात् ॥१२६९॥

एतदेवाह—

**[१]पडिसेहियगमणम्मि, आवण्णो जेण तेण सो पुट्ठो।**
**संघाडग तिह वुत्थो, उवहिग्गहणे ततो विवादो ॥ १२७० ॥**

प्रतिषिद्धं खलु भगवता तीर्थकरेणावधावनानुप्रेक्षिगमनं तस्मिन् **प्रतिषिद्धे गमने** कृते,

१. गाथापञ्चकं (१२७०-१२७४) चूर्णौ १२५९ गाथानन्तरं वर्तते ॥

तथा येन कारणेन स्त्रीसेवादित **आपन्नं** प्रायश्चित्तस्थानं **तेन** कारणेन **स स्पृष्टः** कर्मबन्धेन, ततस्तद्विशोधनाय तस्मै दीयते प्रायश्चित्तम्। अथ योऽसौ द्वितीयः सङ्घाटकः प्रेषितस्तेन कियच्चिरं स प्रतीक्षणीयः? तत आह-**संघाडगे**त्यादि, **सङ्घाटकः त्र्यहं** त्रीन् दिवसान् यावत् प्रतीक्षते। इह त्र्यहग्रहणं मध्यग्रहणं 'मध्यग्रहणे चाऽऽद्यन्तयोरपि, ग्रहणमि'ति जघन्यत एकाहमुत्कर्षतः पञ्चाहमिति द्रष्टव्यम्। पञ्चाहप्रतीक्षणानन्तरं यदि स तत्र **व्युषितो** भवितुमर्हति तत **उपधिग्रहणं** कर्तव्यं, तदीय उपधिर्याचित्वा परिग्रहणीयः, **ततो विवादो**त्ति, यत्र सोऽवधावितस्ततः प्रतिनिवृत्तस्य सहायैर्यदि विवादो वक्ष्यमाणस्वरूपः क्रियते। तदा स प्रमाणयितव्य इति ॥ १२७० ॥

सम्प्रत्येतदेवोत्तरार्धं व्याचिख्यासुराह—

गाथा १२६९-१२७४ उपधेः हननम्

**[१] एगाह तिहे पंचाहए य, तो बिंति णं सहाया उ।**
**वच्चामु अणिच्छंते, भणंति उवहिंपि ता देहि ॥ १२७१ ॥**

जघन्यत **एकाहे** एकस्मिन् दिवसे मध्यमतस्**त्र्यहे**, उत्कर्षतः **पञ्चाहे** प्रतीक्षिते यदि स

१. गाथाचतुष्कं (१२७१-४) जेभा. खंभा. प्रत्योर्नास्ति ॥



For Private and Personal Use Only

निवर्तितुं नेच्छति ततः **सहायाः णं** इति तं **ब्रुवते—** कियच्चिरमस्माभिरवस्थातव्यम्? एहि **व्रजामः**। एवमुक्ते यदि सोऽभिधत्ते— 'नाहं व्रजामि' ततस्तस्मिन् प्रत्यागमन**मनिच्छति भणन्ति** यदि नागच्छसि तर्हि **उपधिमपि तावद्देहि** मा उपधेरप्युपघातो भूदिति ॥ १२७१ ॥

**न वि देमि त्ति य भणिए, गएसु जइ सो ससंकितो सुवति।**
**उवहम्मइ निस्संके, न हम्मए अप्पडिवज्जंते ॥ १२७२ ॥**

यदि उपधेर्याचने कृते स ब्रूते- **नापि** नैव **ददामि** उपधिमहमिति। तत एवं **भणिते** स सङ्घाटको गच्छति, 'सङ्घाडग तिह' इति व्याख्यातमधुना 'वुत्थो उवहिग्गहणे' इत्येतद्व्याख्यानयति **गएसु** इत्यादि, गतेषु तेषु सहायेषु **यदि सः सशङ्कितः** शङ्कनं शङ्कितं, सहशङ्कितं यस्य येन वा स तथा। का पुनः शङ्का? उच्यते —किमुत्प्रव्रजामि? किं वा न? इति एवंरूपशङ्कोपेतः **स्वपिति** रात्रौ, तदा स उपधिः **उपहन्यते**। अथ **निःशङ्कः** सन् स्वपिति यथा '[1]न नियमान्मयोत्प्रव्रजितव्यमि'ति तदा **नोपहन्यते**। अथ निःशङ्क उषित्वा यदि वा यस्मिन् दिने ते सहाया गतास्तद्दिवसमेवानुषित्वा यदि निवृत्त्य व्रजिकादिष्व-

**१. न - मु. आ.७ आ..६४ नास्ति ॥**

**प्रतिबध्यमान** आगच्छति। न चान्तरा रात्रौ दिवसे वा स्वपिति तदा तस्मिन्नप्यप्रतिबध्यमाने नोपहन्यते अथ स्वपिति तर्ह्युपहन्यते ॥१२७२॥

**संवेगसमावन्नो, अणुवहयं घेत्तु एति तं चेव।**
**अह होज्जाहि उवहतो, सो वि य जइ होज्ज गीयत्थो ॥ १२७३ ॥**

**तो अन्नं उप्पाए, तं चोवहयं विगंचिउं एइ।**
**अपडिबज्झंते ऊ, सुचिरेण वि हू न उवहम्मे ॥ १२७४ ॥**

संवेगो मोक्षाभिलाषस्तं समापन्नः प्राप्तः **संवेगसमापन्नः तमेव** गुरुप्रदत्तमुपधि**मनुपहतं गृहीत्वा एति** समागच्छति। **अथ भवेत्** कथमप्युपहतः, **सोऽपि च** साधुर्यदि **स्याद् गीतार्थः, ततस्तमुपहत**मुपधिं **विगंचिउं**ति परिष्ठाप्या**ऽन्यमुपधिमुत्पाद्य एति** समायाति। अथ स्यादगीतार्थस्तर्हि तेनोपधिरन्यो नोत्पादनीयः, अगीतार्थत्वेनान्योत्पादने योग्यताया अभावात्। किन्तु तेनैवोपधिना समागन्तव्यम्। समागतस्य चान्यमुपधिमाचार्याः समर्पयन्ति। प्राक्तनं च साधुभिः परिष्ठापयन्ति। सम्प्रति 'अपडिबज्झंते' इति व्याख्यानयति- **अप्प-**

**डिबज्झंते ऊ** इत्यादि, **अप्रतिबध्यमाने** कर्मकर्तर्ययं प्रयोगः, क्वचिदपि प्रतिबन्धमकुर्वति पुनः **सुचिरे**णापि प्रदीर्घेणापि कालेन **हुः** निश्चितं **नोपहन्यते** उपधिः, क्वचनापि प्रतिबन्धाकरणतः सततोद्यतत्वात् ॥१२७३॥१२७४॥

सम्प्रति ''विवादो'' इति व्याख्यानयति—

**गंतूण तेहि कहियं, स यावि आगंतु तारिसं कहए।**
**तो तं होइ पमाणं, विसरिसकहणे विवादो उ ॥ १२७५॥**

यौ सहायौ तस्य प्रेषितौ, **ताभ्यां गत्वा** गुरुसमीपं तस्य प्रतिसेवनमप्रतिसेवनं वा **कथितं, स चापि** कृतावधावनः साधुरागत्य **तादृशं कथयति, ततस्तद्भवति प्रमाणम्,** उभयेषामप्यविसंवादात्। अथ **विसदृशं कथयति** ततो विवादः। सहाया ब्रुवते- एष प्रतिसेवीति। स प्राह न प्रतिसेवीति, तत्र 'सत्यप्रतिज्ञाः खलु व्यवहाराः' इति, स एव प्रमाणीक्रियते, न सहायाः।। १२७५॥

तदेवं प्रतिसेवनामधिकृत्य विवादो दर्शितः। सम्प्रति मज्जनादिकमधिकृत्याऽऽह—

**अहवा बिंति अगीया, मज्जणमाईहिं एस गिहीभूतो ।**
**तं तु न होइ पमाणं, सो चेव तहिं पमाणं तु ॥ १२७६ ॥**

अथवेति प्रकारान्तरोपप्रदर्शने । **अगीतार्था ब्रुवते— मज्जनादिभिः** मज्जना-ऽङ्गराग-धूपाधिवासादिभिरेष **गृहीभूतो** जातः, स पुनरेवमाह-'नाहं स्नानादिकं कृतवान् , यदि वा बलादहं स्वजनैः स्नानादिकं कारितो न पुनस्तेषु स्नानादिष्वनुरागवान् जात' इति। तत्रैवम्भूते विवादे यत्ते सहाया ब्रुवते **तन्न भवति प्रमाणं,** किन्तु **स एव** तत्र प्रमाणमिति ॥१२७६॥

एतदेव प्रचिकटयिषुराह—



**पडिसेवी अपडिसेवी, एवं थेराण होइ उ विवादो।**
**तत्थ वि होइ पमाणं, स एव पडिसेवणा न खलु ॥ १२७७ ॥**

स्थविरा आचक्षते— एष **प्रतिसेवी**, स प्राह-**नाहं प्रतिसेवी। एवं स्थविरैः** सह, गाथायां षष्ठी तृतीयार्थे **विवादो भवति। तत्रापि** प्रतिसेवनाविषयेऽपि **भवति स एव प्रमाणं, न** पुनः **खलु** सहायैरुच्यमाना **प्रतिसेवना**॥१२७७॥

तेषां पुनरगीतार्थानां पुरतः सूरय एतदभिदधति—

**मज्जणगंधे परियारणादि जहऽनिच्छतो अदोसा य ।**
**अणुलोमा उवसग्गा, एमेव इमं पि पासामो ॥ १२७८ ॥**

**यथा अनिच्छतः** अनभिलषतोऽ**नुलोमा** अनुकूला **उपसर्गाः**। के ते इत्याह-मज्जनं स्नानं, गन्धः पटवासादिरूपः **परिचारणा** स्त्रिया बलात्कारेणोपभोगः, **आदि**शब्दादेवं-विधान्योपसर्गपरिग्रहः, एते यथा **अदोषाः** तद्विषयाऽनुमननाऽभावात्। **एवमिदम**प्यधिकृताऽवधावितसाधुविषयं मज्जनादि **पश्यामः**, तदनुरागाभावतो निर्दोषमिति भावः ॥१२७८॥

एतदेव भावयति—

**जह चेव य पडिलोमा, अपदुस्संतस्स होंतऽदोसा य।**
**एमेव य अणुलोमा, होंति असाइज्जणे अफला ॥ १२७९ ॥**

**यथे**ति दृष्टान्तोपन्यासे, **चेव**शब्दो दृष्टान्तदार्ष्टान्तिकयोः साम्यावधारणार्थः। यथा चैव **प्रतिलोमाः** प्रतिकूला उपसर्गाः **अप्रद्विषतः** प्रद्वेषमगच्छतो **भवन्त्यदोषाय, एवमेव** अनेनैव

प्रतिकूलोपसर्गगतेन प्रकारेण **अनुलोमा** अपि स्वजनैः क्रियमाणा मज्जनादय उपसर्गा **असाइज्जणे** अननुमनने भवन्त्यफलाः ॥ १२७९॥

अन्यच्च—

**साहीणभोगचाई, अवि महती निज्जरा उ एयस्स।**
**सुहुमो वि कम्मबंधो, न होइ उ नियत्तभावस्स ॥ १२८०॥**

**अपीति** गुणान्तरसमुच्चये, स्वजनक्रियमाणमज्जनाऽङ्गरागाद्यनास्वादनादेष **स्वाधीनभोगत्यागी** स्वाधीनभोगपरित्यागाच्चैतस्य **महती निर्जरा** पुराणकर्मनिर्जरणं प्रवृद्धप्रवृद्धतरशुभाशयसम्भवात्, न चाप्यभिनवकर्मसङ्गिलनं यत आह— **न तु निवृत्तभावस्य** अवधावनात् प्रतिनिवृत्तपरिणामस्य सतः **सूक्ष्मोऽपि कर्मबन्धो भवति,** कर्मोपचयहेतोर्दुष्टाध्यवसायस्याभावात् ॥ १२८०॥

**सूत्रम्— एगपक्खियस्स भिक्खुयस्स कप्पति इत्तरियं दिसं वा अणुदिसं वा उद्दिसित्तए वा, धारित्तए वा जहा वा तस्स गणस्स पत्तियं सिया। इति॥ २५॥**

एकः समानः पक्ष एकपक्षः, सोऽस्यास्तीति **एकपाक्षिकः**। प्रव्रज्यया श्रुतेन च स्ववर्गस्य **भिक्षोः कल्पते इत्वरां** कियत्कालभाविनीम्, इत्वरग्रहणमुपलक्षणं, यावत्कथिकां च **दिश**माचार्यत्वमुपाध्यायत्वं **वा अनुदिशं वा** आचार्योपाध्यायपदद्वितीयस्थानवर्तित्वं वाशब्दौ विकल्पार्थौ, **उद्देष्टुं वा** तस्य वा स्वयं **धारयितुं, यथा वा तस्य गणस्य प्रीतिकं स्यात्** तथा दिशमनुदिशं वा उद्दिशेत्। किमुक्तं भवति? भिन्नपाक्षिकमप्यपवादपदेन स्वगणप्रीत्याऽऽचार्यादिपदाध्यारोपितं कुर्यादिति संक्षेपार्थः॥ व्यासार्थं तु **भाष्यकृद्विवक्षुः** प्रथमतः पूर्वसूत्रेण सह सम्बन्धमाह—

**निक्खित्तम्मि उ लिंगे, मूलं सातिज्जणे य ण्हाणादी।**
**दिण्णेसु य होइ दिसा, दुविहा वि वएसु संबंधो ॥ १२८१ ॥**



यदि लिङ्गं रजोहरणं निक्षिप्तं परित्यक्तं भवति ततस्तस्मिन्**निक्षिप्ते लिङ्गे**, यदि वा लिङ्गापरित्यागेऽपि **स्नानादेः साइज्जणे** अनुमनने **मूलं** नाम प्रायश्चित्तं भवति। तस्मिंश्च मूलप्रायश्चित्तदानेन समस्तपर्यायोच्छेदतः प्रदत्तेषु **व्रतेषु द्विविधाप्या**चार्यत्वोपाध्यायत्व-स्वरूपा **दिग्** दीयते। ततोऽवधावनसूत्रान्तरं दिक्सूत्रोपन्यासः एष पूर्वसूत्रेण सहास्य सूत्रस्य

सम्बन्धः ॥ १२८१ ॥

साम्प्रतमेकपाक्षिकत्वं व्याख्यानयति—

**दुविहो य एगपक्खी, पव्वज्ज सुए य होइ नायव्वो ।**
**सुत्तम्मि एगवायण, पव्वज्जाए कुलिच्चादी ॥ १२८२॥**

**द्विविधो** द्विप्रकार **एकपाक्षिको भवति ज्ञातव्यः**, तद्यथा-**प्रव्रज्यायां श्रुते च**, तत्र **सूत्रे** सूत्रविषये एकपाक्षिक **एकवाचनः** एका समाना परस्परं वाचना यस्य स तथा, एकगुरुकुलाधीन इत्यर्थः। **प्रव्रज्यया** त्वेकपाक्षिक **एककुलवर्ती**, **आदिशब्दादेक**-गच्छवर्तिशिष्यसहाध्यायादिपरिग्रहः ॥१२८२ ॥

एतदेव स्पष्टतरमाह—

**सकुलिच्चओ पव्वज्ज-पक्खित्तो एगवायण सुयम्मि।**
**अब्भुज्जयपरिकम्मे, मोहे रोगे व इत्तरिते ॥ १२८३ ॥**

**प्रव्रज्यापाक्षिको** नाम **सकुलिच्चतोत्ति** स्वकुलसम्भवी, उपलक्षणमेतत् तेन

स्वगणसम्भवी स्वशिष्य इत्याद्यपि द्रष्टव्यं, **श्रुते** श्रुतपाक्षिकः **पुनरेकवाचनः**। इह सूत्रे इत्वरदिग्ग्रहणात् यावत्कथिक्यपि दिक् सूचिता तामुभयामपि व्याख्यानयति **अब्भुज्जय** इत्यादि, आचार्यो **अभ्युद्यतविहारपरिकर्म** कर्तुकामः, उपलक्षणमेतत्, अभ्युद्यतमरणं वा प्रतिपत्तुमना यावत्कथिकमाचार्यमुपाध्यायं वा स्थापयति- **मोहे** मोहचिकित्सां **रोगे** रोगचिकित्सां **वा** कर्त्तुकाम **इत्वरम्**। अक्षरयोजना त्वियं-अभ्युद्यतपरिकर्मणि अभ्युद्यतमरणे वा यावत्कथिकावाचार्योपाध्यायाविति शेषः। मोहे रोगे वा इत्वरौ बहुवचनं द्वित्वेऽपि प्राकृतत्वात्॥ १२८३ ॥

आचार्यश्च यावत्कथिकाचार्यस्थापने द्विविधः- सापेक्षो निरपेक्षश्च, तथा चात्र राजदृष्टान्तस्तमेवाह—

**दिट्ठंतो जह राया, सावेक्खो खलु तहेव निरवेक्खो।**
**सावेक्खो जुवनरिंदं, ठवेइ इय गच्छुवज्झायं ॥ १२८४ ॥**

**दष्टान्तो यथा राजा** तथाहि-राजा द्विविधः **सापेक्षो निरपेक्ष**श्च। तत्र यः **सापेक्षः** स जीवन्नेव **युवराजं** स्थापयति, युवराजश्च स स्थापनीयो यस्मिन्ननुरक्ता परिषत्। ततः

कालगतेऽपि राज्ञि न वैराज्यमुपजायते, किन्तु तदवस्थमेव राज्यमनुवर्तते, यस्तु निरपेक्षः स न स्थापयति युवराजं, तस्मिंश्चाऽस्थापिते राज्ञि कालगते दायादानां परस्परकलहभावतो राज्यं विनाशमाविशति। एवमाचार्योऽपि द्विविधः-सापेक्षो निरपेक्षश्च, तत्र यो गच्छसापेक्षः स जीवन्नेव गणधरं स्थापयति। तस्मिंश्च स्थापिते कालगतेऽप्याचार्ये गच्छो न सीदति। तथा चाह-**इति** एवं सापेक्षराज इव युवनरेन्द्रं सापेक्ष आचार्यो जीवन्नेवेति वाक्यशेषः, **गच्छोपाध्यायं** गच्छनायकं **स्थापयति**। यः पुनर्गच्छनिरपेक्षः सन् आचार्यं जीवन् न स्थापयति तस्मिन्कालगते परस्परकलहभावतो गच्छो विनाशमुपयाति, तस्माज्जीवतैव गणधर आचार्य उपाध्यायो वा स्थापयितव्यः ॥१२८४॥

साम्प्रतमित्वराचार्योपाध्यायस्थापनाविषयमाह—

**गणहरपायोग्गासति, पमाय अट्ठाविए व कालगते।**
**थेराण पगासंती, जावऽन्नो न ठावितो तत्थ ॥ १२८५ ॥**

गणधरस्य गणधरपदस्य प्रायोग्यो **गणधरप्रायोग्यः**, तस्या**ऽसति** अभावे, अथवा

**प्रमादतो अस्थापित** एवाचार्ये **कालगते** इत्वर आचार्यः उपाध्यायो वा स्थाप्यते। स च यैः स्थाप्यते ते **स्थविराणां** गच्छबृहत्तराणां **प्रकाशयन्ति। यावत्तत्र** मूलाचार्यपदे वा मूलोपाध्यायपदे **वाऽन्यो न च स्थापितो** भवति तावदेष युष्माकमाचार्य उपाध्यायो वा प्रवर्तक इति ॥१२८५॥

इह एकपाक्षिको द्विविध उक्तः- प्रव्रज्यया श्रुतेन च। अत्र च भङ्गचतुष्टयं, तद्यथा- प्रव्रज्यया एकपाक्षिकः श्रुतेन च १, प्रव्रज्यया न श्रुतेन २, न प्रव्रज्यया श्रुतेन ३, न प्रव्रज्यया नापि श्रुतेन ४, एतदेव भङ्गचतुष्टयं कुलादिष्वपि योजनीयम्। तथा चाह—



**[1]पव्वज्जाए कुलस्स य, गणस्स संघस्स चेव पत्तेयं।**
**समयं सुएण भंगा, कुज्जा कमसो दिसाबंधे ॥ १२८६ ॥**

**दिग्बन्धे** आचार्यपदे उपाध्यायपदे वा स्थाप्यमाने इत्यर्थः, **प्रव्रज्यायाः कुलस्य गणस्य सङ्घस्य च प्रत्येकं श्रुतेन समकं** श्रुतेन सार्धं **भङ्गान् कुर्यात्,** भङ्गचतुष्टयं प्रत्येकं योजयेदिति भावः। तत्र प्रव्रज्याया भङ्गचतुष्टयमुपदर्शितम्। इदानीं कुलस्योपदर्श्यते-

१. एषा ( १२८६ ) गाथा चूर्णौ १२८२ गाथानन्तरं वर्तते ॥

कुलेनैकपाक्षिकः श्रुतेन च १ कुलेनैकपाक्षिको न श्रुतेन २, कुलेन नैकपाक्षिकः किन्तु श्रुतेन ३, न कुलेन नापि श्रुतेन ४। एवं गणेन सङ्घेन च प्रत्येकं भङ्गचतुष्टयं भावनीयं, तत्र प्रव्रज्यां कुलं गणं चाधिकृत्य यः प्रथमभङ्गवर्ती स इत्वरो यावत्कथिको वा स्थापनीयः, तदभावे तृतीयभङ्गवर्त्ती, यदि पुनर्द्वितीयभङ्गवर्तिनं चतुर्थभङ्गवर्तिनं वा स्थापयति तदा तस्य स्थापयितुः प्रायश्चित्तं चत्वारो गुरुमासाः, न केवलमेतत् प्रायश्चित्तं किन्त्वाज्ञादयोऽपि दोषाः ॥ १२८६ ॥

तथा चाह—

**[1]आणाइणो य दोसा, विराहणा होइमेहिं ठाणेहिं ।**
**संकिय अभिणवगहणे, तस्स व दीहेण कालेण ॥ १२८७॥**

**आज्ञादय** आज्ञा-ऽनवस्थामिथ्यात्व-विराधनारूपाः **चशब्दो**ऽनुक्तप्रायश्चित्तसमुच्चये। तच्च प्रायश्चित्तं प्रागेवोपदर्शितं तथा **विराधना** गच्छस्य भेदो **भवति, आभ्यां** वक्ष्यमाणाभ्यां



१. अत्र ( १२८७ गाथास्थाने ) चूर्णौ अण्णह गाहा. इत्यवतरणं दृश्यते ॥

**स्थानाभ्यां**, ते एव दर्शयति –**शङ्किते अभिनवग्रहणे** च साधूनां, यदि **वा तस्य** स्थापयितु**र्दीर्घेन कालेन** रोगचिकित्सां मोहचिकित्सां वा कृत्वा समागतस्य शङ्कितम् ॥१२८७॥

एतदेव विभावयिषुः प्रथमत इत्वरस्य यावत्कथिकस्य च स्थापने विषयमाह—

**परिकम्मं कुणमाणे, मरणस्सऽब्भुज्जयस्स व विहारे।**
**मोहे रोगचिकिच्छा, ओहावेंते य आयरिए ॥ १२८८ ॥**

**अभ्युद्यतस्य मरणस्य** पादपोपगमनलक्षणस्य **परिकर्म** द्वादशसांवत्सरिकसंलेखनारूपं **कुर्वाणे**, यदि वा अभ्युद्यत**विहारस्य** जिनकल्पादिप्रतिपत्तिलक्षणस्य परिकर्म तपोभावनादि-लक्षणं कुर्वति यावत्कथिक आचार्यः स्थापनीयः। **मोहे** मोहचिकित्सायां **रोगचिकित्सायां** यदि वा **अवधावत्याचार्ये** इत्वर आचार्यः स्थापनीयः॥ १२८८॥

तत्र श्रुतानेकपाक्षिकेत्वराचार्यस्थापने दोषमाह—

**दुविहतिगिच्छं काऊण, आगओ संकियम्मि कं पुच्छे? ।**
**पुच्छंतु व कं इयरे, गणभेओ पुच्छणाहेउं ॥ १२८९ ॥**

श्रुतानेकपाक्षिकेत्वराचार्यस्थापने **द्विविधचिकित्सां** मोहचिकित्सां रोगचिकित्सां चेत्यर्थः, प्रदीर्घकालं **कृत्वा** समागतः सन् **शङ्किते** सूत्रे अर्थे च **कं पृच्छेत्?** नैव कञ्चनेतिभावः, स्थापिताचार्यस्य भिन्नवाचनाकत्वात्। **इतरे वा** गच्छवासिन आचार्ये मोह-चिकित्सां रोगचिकित्सां वा कुर्वति **कं पृच्छन्ति?** नैव कञ्चन, पूर्वोक्तादेव हेतोः। ततस्ते वाचनाप्रदायकमलभमाना गच्छान्तरमुपसम्पद्येरन्। गच्छान्तरोपसम्पत्तौ च **प्रश्नहेतोर्गणभेदः** स्यात् ॥१२८९॥

सम्प्रति श्रुतानेकपाक्षिकयावत्कथिकाऽऽचार्यस्थापने दोषमाह—

**न तरइ सो संधेउं, अप्पाहारो व पुच्छियं देइ।**
**अन्नत्थ य पुच्छंते, सचित्तादी उ गेण्हंति ॥ १२९० ॥**



**स** श्रुतानेकपाक्षिकः स्थापितो यावत्कथिक आचार्यो भिन्नवाचनाकत्वात् **न शक्नोति सन्धातुं** विस्मृतमालापकं दातुम्। अथवा श्रुतानेकपाक्षिकोऽल्पश्रुतोऽप्युच्यते, ततो**ऽल्पाधारः** अल्पस्य सूत्रस्यार्थस्य चाऽऽश्रय इति पृष्टः सन्नन्यं **प्रष्ट्वा**ऽऽलापकं **ददाति। अन्यत्र च**

गणान्तरे गत्वा **पृच्छति** ते गच्छान्तरवर्तिन आचार्यास्तेनोत्पादितं **सचित्तादिकं गृह्णन्ति**, "अगीतार्थानां न किञ्चिदाभाव्यम्" इति जिनवचनात्, तस्य च तेषां समीपे पृच्छनात् ॥१२९० ॥

उपसंहारमाह—

**सुयतो अणेगपक्खिं, एए दोसा भवे ठवेंतस्स।**
**पव्वज्जऽणेगपक्खिं, ठवयंते इमे भवे दोसा ॥ १२९१ ॥**

श्रुतानेकपक्षिणमित्वरं यावत्कथिकं वाऽऽचार्यं **स्थापयतः एते** अनन्तरोक्ता **दोषा भवन्ति। प्रव्रज्यानेकपक्षिणं** पुनरित्वरं यावत्कथिकं वा **स्थापयत इमे** वक्ष्यमाणा **भवन्ति दोषाः** ॥१२९१ ॥



तानेव प्रतिपिपादयिषुराह—

**दोण्ह वि बाहिरभावो, सचित्तादीसु भंडणं नियमा।**
**होइ सगणस्स भेदो, सुचिरेण न एस अम्हत्ति ॥ १२९२ ॥**

प्रव्रज्यानेकपाक्षिकेत्वर-यावत्कथिकाचार्यस्थापने **द्वयोरपि** गच्छस्य आचार्यस्य चेत्यर्थः

**बहिर्भावो** बहिर्भावाऽध्यवसायो भवति। तथाहि— योऽसौ स्थापित आचार्यः स गच्छवर्तिनः साधून् समस्तानपि परकीयान्मन्यते। साधवोऽपि च गच्छवर्तिनस्तं परमभिमन्यते। एवं परस्परं बहिर्भावाध्यवसाये सति स्थापितस्याऽऽचार्यस्य गच्छवर्तिनां च साधूनामनाभाव्यानि **सचित्तादीनि** गृह्णतां **नियमाद् भण्डनं** कलहो भवति। तथा च सति प्रवचनोड्डाहः प्राक्कल्पव्यावर्णितप्रायश्चित्तापत्तिश्च,अन्यच्च गच्छवर्तिनस्ते साधवो मन्यन्ते— सुचिरेणापि प्रभूतेनापि कालेन गच्छता **नास्माकमेष** परकीयत्वात्, उपलक्षणमेतत्, सोऽप्यभिमन्यते **सुचिरेणाप्येते** परकीया इत्येवं परस्परमध्यवसायभावतो **गणस्य** गच्छस्य **भेदो भवति**। तस्मादित्वरो यावत्कथिको वा प्रथमभङ्गवर्ती स्थापयितव्यः ॥ १२९२॥

अत्रैवापवादमाह—

**अन्नयरतिगिच्छाए, पढमाऽसति तइयभंगमित्तरियं।**
**[1]तइयस्सेव य असई, बितितो तस्सासति चउत्थो ॥ १२९३॥**

**अन्यतरचिकित्सायां** मोहचिकित्सायां रोगचिकित्सायां वाऽऽचार्यमित्वरम्, उप-



१. पढमस्सेव - जेभा. खंभा. । तइयस्सेव जे. भा. पाठान्तरम् ॥

लक्षणमेतत् अभ्युद्यतमरणप्रतिपत्तौ अभ्युद्यतविहारपरिकर्मप्रतिपत्तौ वा यावत्कथिकमाचार्यमुत्सर्गतः प्रथमभङ्गवर्तिनं स्थापयेत्। **प्रथमस्य** प्रथमभङ्गवर्तिनः सम्भवे**ऽसति** अभावे **तृतीयं तृतीयभङ्गवर्तिनमित्वरम्,** उपलक्षणमेतत् यावत्कथिकं वा स्थापयेत् । ततः सूत्रेऽर्थे च स शीघ्रं निष्पादयितव्यः। **तृतीयस्यापि** तृतीयभङ्गवर्तिनोपि **एव**शब्दो अपिशब्दार्थः। **असति** अभावे पुन**र्द्वितीयो** द्वितीयभङ्गवर्ती स्थाप्यः। **तस्यापि असति** अभावे **चतुर्थः** चतुर्थभङ्गवर्त्ती ।। १२९३ ॥

[1]तत्र योऽसौ चतुर्थभङ्गवर्ती स्थापयितव्यो भवति, स एतादृशगुणः—

**पयतीए मिउसहावं, पगतीए सम्मयं व[2] णिययं वा।**
**नाऊण गणस्स गुरुं, ठावेंति अणेगपक्खि पि ॥ १२९४ ॥**

**अनेकपक्षिणमपि** प्रव्रज्यापक्षरहितं श्रुतसमानपक्षरहितमपि प्रथम-द्वितीय-तृतीय-

१. सो पुण बितिय-चउत्थभंगिओ जो इमेरिसो सो सो तव्वो इति चूर्णौ १२९४ गाथोत्थानिका । अत्र चूर्णिप्रत्यन्तरे सो पुण ततिय-चउत्थभंगिओ इत्यपि पाठभेद-उपलभ्यते ॥ २. व णीयं ( णिययं ) वा । विणीतं वा - ला. ॥

भङ्गवर्त्यसम्भवे **प्रकृत्या** स्वभावेन न तु कपटभावतो **मृदुस्वभावम्**। अरोषणस्वभावं तथा **प्रकृत्या** स्वभावेन **सम्मतम्** अभिमतं, समस्तस्यापि गच्छस्येति गम्यते। स्वजनसम्बन्धभावतो **वा निजकम्** आत्मीयं **ज्ञात्वा गणस्य गुरुं स्थापयन्ति**।।१२९४॥

तस्य च चतुर्थभङ्गवर्तिनः सचित्तादिषु य आभवनव्यवहारस्तमभिधित्सुराह—

**साहारणं तु पढमे, बिइए खेत्तम्मि तइयसुहदुक्खे।**
**अणहिज्जंते सीसे, सेसे एक्कारस विभागा ॥ १२९५ ॥**

**प्रथमे वर्षे साधारणं,** किमुक्तं भवति? यो यावल्लभते तस्य तत्। **द्वितीये** वर्षे यत् **क्षेत्रे** तदीये लभ्यते तद्गच्छवर्तिनां साधूनां, शेषं गणधरस्य। **तृतीये** वर्षे [यत्] **समसुख**-दुःखोपगा[१] लभन्ते तत्तेषामेव गच्छवर्तिनामाभवति, शेषं गणधरस्य, चतुर्थादिषु वर्षेषु सर्वं गणधरस्य, एष आभवद्व्यवहारोऽ**नधीयाने शिष्ये**। किमुक्तं भवति? ये स्थापिताचार्यस्य समीपे न पठन्ति तान् प्रति द्रष्टव्यः, ये पुनराचार्यस्य समीपे पठन्ति तेषामेकादशविभागाः। तथा चाह— **शेषे**ऽधीयाने **एकादशविभागाः** प्रकारा आभवद्व्यवहारस्य। तानेव प्रतिपिपादयिषुराह—

---

१. °पभोगाल° वा. मो. पु. मु. ॥

**पुव्वुद्दिट्ठं तस्सा१, पच्छुद्दिट्ठं पवाययंतस्स।**
**संवच्छरम्मि पढमे, पडिच्छए जं जं तु सच्चित्तं२ ॥ १२९६ ॥**

प्रतीच्छके गच्छान्तरादध्ययनार्थमधिकृतगच्छोपसम्पदं प्रपन्ने यद् आचार्यपदस्थापनातः **पूर्वमुद्दिष्टं सचित्तम्**, उपलक्षणमेतत् , अचित्तं वा वस्त्रपात्रकम्बलादिकं **प्रथमे वर्षे** भवति सम्पद्यते तत्सर्वं **तस्य** प्रतीच्छकस्य एष प्रथमो विकल्पः १। यत्पुनराचार्यपदस्थापनातः **पश्चादुद्दिष्टं** प्रथमे वर्षे सम्पद्यते सचित्तादिकं **तत्सर्वं प्रवाचयतो**ऽधिकृतस्य स्थापिताचार्यस्याध्यापयितुः। एष द्वितीयो विकल्पः२ ॥१२९६॥

**पुव्वं पच्छुद्दिट्ठं, पडिच्छए जं तु होइ सच्चित्तं।**
**संवच्छरम्मि बितिए, तं सव्वं पवाययंतस्स३ ॥ १२९७ ॥**

आचार्यपदस्थापनातः **पूर्वं पश्चाद्वा यद् उद्दिष्टं सचित्तम्**, उपलक्षणमेतत् अचित्तं वा **द्वितीये संवत्सरे भवति** सम्पद्यते, क्व? इत्याह– **प्रतीच्छके**, गच्छान्तरादगत्य सूत्रस्यार्थस्य वा प्रतीच्छनं प्रतीच्छा, तया चरति प्रतीच्छिकस्तस्मिन् **तत् सर्वं प्रवाचयतो**ऽध्यापयितुरधि-

कृतस्थापिताचार्यस्य वेदितव्यम्। एष तृतीयो विकल्पः ३ ॥१२९७॥

**पुव्वं पच्छुद्दिट्ठं, सीसम्मि य जं तु होइ सच्चित्तं।**
**संवच्छरम्मि पढमे, तं सव्वं गुरुस्स आभवति** ४॥ **१२९८ ॥**

आचार्यपदस्थापनातः **पूर्वं पश्चाद्वा उद्दिष्टं यत्सचित्तम्**, उपलक्षणत्वादस्याचित्तं वस्त्रादिकं **शिष्ये प्रथमे वर्षे** भवति सम्पद्यते **तत्सर्वं गुरोराभवति**। एष चतुर्थो विभागः ४ ॥१२९८॥

**पुव्वुद्दिट्ठं तस्सा,**५ **पच्छुद्दिट्ठं पवाइयंतस्स।**
**संवच्छरम्मि बिइए, सीसम्मि उ जं तु सच्चित्तं**६ **॥ १२९९॥**

यत्सचित्तमचित्तं वाचार्यपदस्थापनातः **पूर्वमुद्दिष्टं** सचित्तमचित्तं वा शिष्ये द्वितीये संवत्सरे भवति सम्पद्यते तत्सर्वं **तस्य** शिष्यस्याऽऽभवति एष पञ्चमो विभागः ५। यत्पुनराचार्यपदस्थापनातः **पश्चादुद्दिष्टं सचित्त**मचित्तं वा **शिष्ये द्वितीये संवत्सरे** भवति सम्पद्यते[1] तत्सर्वं **प्रवाचयतो**ऽधिकृतगुरोराभवति, एष षष्ठो विभागः ६ ॥१२९९॥

---

१. उत्पद्यते - वा. मो. पु. ॥

**पुव्वं पच्छुद्दिट्ठं, सीसम्मि उ जं तु होइ सच्चित्तं।**
**संवच्छरम्मि तइए, तं सव्वं पवाययंतस्स७ ॥ १३०० ॥**

**यत् पूर्वं पश्चाद्वा**ऽऽचार्यपदस्थापनात **उद्दिष्टं सचित्तम्** अचित्तं वा **शिष्ये तृतीये संवत्सरे भवति** सम्पद्यते **तत्सर्वं प्रवाचयतो**ऽधिकृतगुरोराभवति, एष सप्तमो विभागः ७ ॥ १३०० ॥

**पुव्वुद्दिट्ठं तस्सा,** ८ **पच्छुद्दिट्ठं पवाययंतस्स।**
**संवच्छरम्मि पढमे, तं सिसिणीए उ सच्चित्तं९ ॥ १३०१ ॥**

आचार्यपदस्थापनातः **पूर्वमुद्दिष्टं** [यत्] **सचित्त**मचित्तं वा **प्रथमे संवत्सरे शिष्यिण्याः** शिष्याया भवति सम्पद्यते, तत्सर्वं **तस्याः** शिष्याया आभवति, एषो अष्टमो विभागः ८। यत्पुनराचार्यपदस्थापनातः **पश्चादुद्दिष्टं** सचित्तादिकं प्रथमे संवत्सरे शिष्यायाः सम्पद्यते तत्सर्वं **प्रवाचयतो**ऽधिकृतस्य गुरोराभाव्यम्। एष नवमो विभागः ९ ॥१३०१॥

**पुव्वं पच्छुद्दिट्ठं, सिस्सीए जं तु सच्चित्तं।**
**संवच्छरम्मि बितिए, तं सव्वं पवाययंतस्स१० ॥ १३०२ ॥**

**पूर्वं पश्चाद्वा यदुद्दिष्टं सचित्तम्** , उपलक्षणमेतदचित्तं वा **द्वितीये संवत्सरे शिष्यायाः** सम्पद्यते **तत्सर्वं प्रवाचयतो**ऽधिकृतस्य गुरोः, एष दशमो विभागः १० ॥१३०२॥

**पुव्वं पच्छुद्दिट्ठं, पडिच्छियाए उ जं तु सच्चित्तं।**
**संवच्छरम्मि पढमे, तं सव्वं पवाययंतस्स ११ ॥ १३०३ ॥**

**पूर्वं पश्चाद्वा यदुद्दिष्टं सचित्तम्**, उपलक्षणमेतत्, अचित्तं वा **प्रथमे वर्षे प्रतीच्छिक्याः** शिष्यायाः सम्पद्यते **तत्सर्वं प्रवाचयतो**ऽधिकृतस्य गुरोः। एष एव न्यायो द्वितीयादिष्वपि संवत्सरेषु ११ ॥१३०३॥

उक्ता एकादशापि विभागाः, साम्प्रतमुपसंहारमाह—

**जम्हा एते दोसा, दुविहेवि अपक्खिए उ ठवियम्मि।**
**तम्हा उ ठवेयव्वो, कमेणिमेणं तु आयरिओ ॥ १३०४ ॥**

**द्विविधेऽप्यपाक्षिके** श्रुतपक्षरहिते प्रव्रज्यापक्षरहिते चेत्यर्थः। **स्थापिते** आचार्ये **यस्माद्**

**एते** अनन्तरोदिता **दोषास्तस्माद् अनेना**नन्तरोदितेन "पढमाऽसति तइयभंगो[गा.१२९३] इत्यादिलक्षणेन **क्रमेण स्थापयितव्य** आचार्य इति ॥१३०४॥

अथ प्रथमभङ्गवर्ती केन विधिना स्थापयितव्यः?। उच्यते—

**[1]एयस्सेग-दुगादी, निप्फण्णा तेसि बंधइ दिसातो।**
**संपुच्छण-ओलोयण-दाणे मिलिएण दिट्ठंतो ॥ १३०५ ॥**



**एतस्य** प्रथमभङ्गवर्तिनः स्थापिताचार्यस्य **एक-द्विकादयः** एक-द्वि-त्रि-चतुरादयः शिष्या **निष्पन्ना** यदि भवन्ति ततस्**तेषां दिशः** आचार्यत्वमुपाध्यायत्वं चेत्यर्थः **बध्नाति**। तथा योऽसावाचार्यैः सन्दिष्टो यथा-एष सूत्रतो अर्थतश्च निर्माप्याऽऽचार्यपदे स्थापनीयः, तस्य स्थापितगणधरेणाचार्यपदे स्थापितस्य शिष्याणां विप्रतारणार्थं **सम्प्रच्छनं**, परैरुदन्तवहनम् **अवलोकनं** साक्षात्समीपं गत्वा संयमयात्रानिर्वहनप्रच्छनं, **दानं** वस्त्रपात्रादेः, एतेषां समाहारो द्वन्द्वः, तस्मिन्नपि कृते विपरिणामाभावे **मिलितेन** गोपालद्वयमिलितेन **दृष्टान्तो**

१. गाथा १३०५-१३१० स्थाने चूर्णौ "दोण्हं कुले" गाहा इति प्रतीकं दृश्यते ॥

वक्तव्यो-यथा द्वयोर्गोपालयोर्मिलितयोः प्रभूता धनवृद्धिरभूत्तथा युष्माकमस्माकं च मिलितानां विहरतां भूयान् ज्ञानादिलाभो भवतीति मिलितैर्विहर्तव्यमिति ॥१३०५॥

साम्प्रतमेनामेव गाथां विवरीषुरिदमाह—

**गीयमगीया बहवो, गीयत्थ सलक्खणा उ जे तत्थ।**
**तेसिं दिसाउ, वियरति सेसे जहरिहं तु ॥ १३०६ ॥**

गच्छे **बहवः** साधवो **गीयमगीया** इति गीतार्था अगीतार्थाश्च। **तत्र ये गीतार्थाः**, तत्रापि **सलक्षणा** आचार्यपदलक्षणोपेता**स्तेषां दिशः** आचार्यपदानि दत्त्वा **शेषान्** साधून् **यथार्हं** यथायो[१]ग्यं तं केचिदनुवैयावृत्त्यकरतया केचित्सामान्यतः शिष्यत्वेन **वितरति** प्रयच्छति। एतच्च तदा द्रष्टव्यं यदा प्रत्येकं बहवः शिष्याः प्राप्यन्ते, अन्यथा त्वेक एवाऽऽचार्यः स्थापनीयः, शेषाः समस्ता अपि शिष्यत्वेन सम्बध्यन्ते। तत्रापि सलक्षणानां दिशो अनुज्ञायन्ते॥ १३०६॥

एतदेव सुव्यक्तमभिधित्सुराह—

१. ॰ग्यतं केचिदनुरत्ना-धिकत्वेन केचित्सामान्यत्वेन शिष्यत्वेन - वा. मो. पु. ॥

**मूलायरि रायणितो, अणुसरिसो तस्स होउवज्झातो।**
**गीयमगीया सेसा, सज्झिल्लया होंति सीसा उ ॥ १३०७ ॥**

**मूलाचार्यो** नाम **रात्निको** रत्नाधिकः। **तस्य** मूलाचार्यस्याऽ**नुसदृशः** अनुरूपो **भवति उपाध्यायः**। **शेषास्तु** ये **गीताः** गीतार्थास्ते तस्य **सज्झिलगा** अनुरत्नाधिकाः । **अगीता** अगीतार्थाः. मकारो अलाक्षणिकः, **शिष्या भवन्ति** ॥ १३०७॥

**रायणिया गीयत्था, अलद्धिया धारयंति पुव्वदिसं।**
**अपहुव्वंत सलक्खण, केवलमेगे दिसाबंधो ॥ १३०८ ॥**

ये पुना **रात्निकाः** व्रतपर्यायेणाधिका **गीतार्थाः** श्रुतसम्पदुपेता छेदश्रुतनिष्पन्नाश्च केवलं सङ्ग्रहे उपग्रहे चाऽ**लब्धिकाः** ते **पूर्वदिशं** पूर्वाचार्यप्रदत्तां दिशम् अनुरत्नाधिकत्वलक्षणं **धारयन्ति**। न त्वाचार्यपदमुपाध्यायपदं वा तेषामारोप्यते, लब्धिहीनत्वात् । एष विधिः यावन्तः स्थापिता आचार्यास्तेषां प्रत्येकमनुगन्तव्यः। एतच्च तदा क्रियते यदा भूयांसः साधवोऽवाप्यन्ते। **अपहुव्वंत** इत्यादि, अप्रभवति प्रत्येकमाचार्याणां साधुपरिवारे भूयस्य-प्राप्यमाणे **केवलमेकस्मिन् सलक्षणे** विशिष्टाचार्यलक्षणोपेते **दिग्बन्धः** आचार्यपदाध्यारोपः

क्रियते॥ १३०८॥

एतदेवाह—

**सीसे य पहुप्पंते, सव्वेसिं तेसि होंति दायव्वा।**
**अपहुप्पंतेसु पुण, केवलमेगे दिसाबंधो ॥ १३०९ ॥**

**शिष्ये** शिष्यवर्गे प्रत्येकं प्रत्येकं **प्रभवति** परिपूर्णतया **भवति तेषा**माचार्यलक्षणोपेतानां **सर्वेषा**मपि दिशो भवन्ति **दातव्याः**। **अप्रभवत्सु** प्रत्येकं परिपूर्णतया साधुष्वप्राप्यमाणेषु **केवलमेकस्मिन्** सलक्षणतरे **दिग्बन्धः** कर्तव्यः। शेषाणां तु सलक्षणानां दिशोऽनुज्ञाप्याः ॥१३०९॥

साम्प्रतं तेष्वाचार्यपदस्थापितेषु उपकरणदानविधिमाह—

**अचित्तं च जहरिहं, दिज्जइ तेसुं च बहुसु गीएसु।**
**एस विही अक्खातो, अग्गीएसुं इमो उ विही ॥ १३१० ॥**

**तेषु** आचार्यपदस्थापितेषु **बहुषु गीतेषु** गीतार्थेषु **अचित्तं** वस्तपात्राद्युपकरणं **यथार्हं** यो

यावन्मात्रार्हस्तस्य तावन्मात्रं **दीयते, एष विधिराख्यातो** गीतार्थेषु सूत्रार्थनिष्पन्नेषु आचार्यलक्षणोपेतेषु। **अगीतेषु** अनधिगतसूत्रार्थेषु आचार्यलक्षणोपेतेष्व**यं** वक्ष्यमाणो **विधिर्द्रष्टव्यः** ॥ १३१० ॥

तमेवाह—

**अरिहं च अनिम्मायं, नाउं थेरा भणंति जो ठवितो।**
**एयं गीयं काउं, दिज्जाहि दिसं अणुदिसं वा ॥१३११ ॥**

**अर्हो** नाम-लक्षणोपेततयाचार्यपदयोग्यः परमद्यापि सूत्रे अर्थे **च** न निर्मातः, तमर्ह**मनिर्मातं ज्ञात्वा यो** गणधरस्तत्कालं **स्थापितस्तं स्थविराः** वृद्धाचार्या **भणन्ति,** यथा-एतं साधुं **गीतं** गीतार्थं **कृत्वा दद्याद्** भवान् **दिशमनुदिशं वा** ॥ १३११ ॥

**सो निम्मविय ठवितो, अच्छति जइ तेण सह[1] ततो लट्ठुं।**
**अह न वि चिट्ठति तहियं, संघाडो तो से दायव्वो ॥ १३१२ ॥**

---

१. सद्धि तो लट्ठुं - वा. मो. पु. जेभा. खंभा. ॥

योऽसावाचार्येण सन्दिष्टः यथा-एतं साधुं निर्माप्य एतस्मै दिशमनुदिशं वा दद्यात्। **स निर्मापितः** निर्माप्य चाचार्यपदे **स्थापितः**। ततः स यदि निर्मापितस्थापितस्तेन **सह तिष्ठति** विहरति। **ततो लष्टं** समीचीनम्। **अथ नैव अपि**शब्द एवकारार्थः, **न तिष्ठति तत्र** तस्य समीपे तर्हि से तस्य **सङ्घाटको दातव्यः**। यश्च पूर्वाचार्येण वैयावृत्त्यकरो दत्तः सोऽपि तेन सार्धं विहरति। तत्र ये स्थापितगणधरेणैको द्वौ त्रयो वा सहाया दत्ताः, यश्च पूर्वाचार्यप्रदतो वैयावृत्त्यकरस्तान् पाठयति। ये चाभिनवशैक्षिका उपस्थापिताः प्रव्राजितास्तेऽप्यात्मनः शिष्यत्वेन सम्बन्धनीयाः॥ १३१२॥ एवं सञ्जातपुष्टविहारः सन् अन्यत्र विहारेण गतः, तस्य तथा विहरतः शिष्यान् स स्थापितगणधरो विपरिणमयितुकामो यत्समाचरति तदुपदर्शयति—



**पेसेइ गंतुं व सयं व पुच्छे, संबंधमाणो उवहिं व देती।**
**सज्झंतिया सिं च समल्लियावि, सचित्तमेवं न लभे करेंतो ॥ १३१३ ॥**

यत्र स निर्मापितस्थापितो विहरति तत्रोदन्तवाहकान् साधून् तच्छिष्याणां **प्रेषयति**। **अथवा स्वयम**न्तराऽन्तरा **गत्वा** तान् **पृच्छति,** यथा संस्तरथ यूयं सुखेन? यद् भे भवतां

नास्ति तत् कथयत, येनाहं ददामीति; तथा तान् शिष्यानात्मनः **सम्बन्धयन् उपधिं** चान्तरान्तरा **ददाति**। तथा ये **स्वाध्यायान्तिकाः** स्वाध्यायनिमित्तं समीपस्थायिनो अनुरत्नाधिका गीतार्था इत्यर्थः। तान् तेषां निर्माप्य स्थापितानामाचार्याणां सत्कानात्मनः **स मेलापयति** संश्लेषयति 'लीङ् श्लेषणे' इति वचनात्। एवं तेन गीतार्थाः शिष्याश्च विपरिणम्यमाना निर्मापितस्थापितस्य समीपं मुक्त्वा तं स्थापितगणधरमुपसम्पद्यन्ते, स **चैवं सचित्तं** साधुवर्गलक्षणमात्मी**कुर्वन् न लभते**, व्यवहारतो न ते तस्याऽऽभवन्तीति भावः॥ १३१३॥ अथैवमपि ते विपरिणम्यमाना न विपरिणमन्ति, नापि तस्य समीपमायान्ति, ततोऽनेन दृष्टान्तेन[1] तान् सम्बन्धयति। तमेव दृष्टान्तमाह—

**गोवालगदिट्ठंतं, करेंति जइ दोन्नि भाउगा गोवा।**
**रक्खंती गोणीओ, पिहप्पिहा असहिया दो वि ॥ १३१४ ॥**
**गेलण्णे एगस्स उ, दिण्णा गोणीओ ताहे अन्नस्स।**
**इय नाऊणं ताहे, सहिया जाया दुवग्गा वि ॥ १३१५ ॥**

---

१. °न सम्बन्धयितुमाह । तमेव - खं ॥

दोण्णि गोवाला सहोयरभाउगा, भंडणं करेत्ता पत्तेयं पत्तेयं वेयणएणं गावीतो रक्खंति। अन्नया तेसिं एगो रोगी जातो, ततो तेण जाव न रक्खिया गावीतो ताव वेयणयातो परिहीणो जातो, अन्नया बितितो पडिभग्गो । सो वि तहेव परिहीणो । ततो तेहिं एगाणियस्स[१] न सोहणमिति चिंतिऊणं परोप्परं पीती कया तओ एक्को पडिभग्गो। तस्सच्चियातो गावीतो बिइतो रक्खइ। एवं इयरस्सवि। एवं तेसिं दव्वपरिवुड्ढी जाया। एवं अम्हंपि वीसुं वीसुं विहरंताणं परिहाणी भवति, तम्हा मिलिया विहरामो, जेण विउला नाणादीणं वुड्ढी हवइ। जं तुब्भं तं तुब्भं चेव, नाहं तं हरामि। एवं समल्लियावेत्ता सीसे सज्झंतिए य विपरिणामेइ तहवि सो न लहइ।

सम्प्रत्यक्षरयोजना **गोपालकदृष्टान्तं करोति। यथा- द्वौ गोपौ भ्रातृकौ तौ द्वावप्यसहितौ पृथक् पृथग्** वेतनेन **गा रक्षतः।** अन्यदा **एकस्य ग्लानत्वे गावः अन्यस्य** गोस्वामिना दत्ताः। स वेतनात्परिभ्रष्टः। एवमितरोऽपि ग्लानत्वे वेतनपरिहीनो

१. एगागियस्स - वा. मो. पु. मु. ॥

जातः। तत इति पृथक् पृथग् असंहितस्थितस्य महती द्रव्यहानिरिति **ज्ञात्वा जातौ द्वावपि सहिताविति**॥१३१४॥ १३१५॥

उपसंहारमाह —

**एवं [1]दोण्ह वि अम्हे, पिहप्पिहा तह वि विहरिमो समयं।**
**वाघातेणऽण्णोण्णे, सीसा उ परं च न भयंति ॥ १३१६ ॥**

**एवं द्वयोरपि वयं** यद्यपि पृथक् पृथक् तिष्ठामः, **तथापि समकं** संहिततया **विहरामः**, येन **व्याघाते** ग्लानत्वादिलक्षणे**ऽन्योन्यस्य** ज्ञानादिहानिर्नोपजायते, **शिष्या** वा **परं** गच्छान्तरं **न भजन्ते**। एवमपि स कुर्वाणो न लभते शिष्यान्॥ १३१६॥

**सूत्रम्— बहवे परिहारिया बहवे अपरिहारिया इच्छेज्जा एगयतो एगमासं दुमासं वा तिमासं वा चाउमासं वा पंचमासं वा छम्मासं वा वत्थए। ते अन्नमन्नं संभुंजंति, अन्नमन्नं नो संभुंजंति मासं ते, तओ पच्छा सव्वे वि एगओ संभुंजंति ॥ २६॥**

---

**१. दोण्णि वि - खं. वा. पु. भाष्यप्रतिषु च ॥**

अथास्य सूत्रस्य कः सम्बन्ध इति सम्बन्धप्रतिपादनार्थमाह—

**असरिसपक्खिगठविए, परिहारो एस सुत्तसंबंधो१।**
**काऊण व तेगिच्छं, साइज्जियमागते सुत्तं २॥ १३१७ ॥**

**असदृशपाक्षिको** नाम द्वितीयभङ्गवर्ती चतुर्थभङ्गवर्ती वा, तस्मिन् **स्थापिते** किल चतुर्गुरुर्नाम प्रायश्चित्तं **परिहारो** भवति। ततो परिहारप्रस्तावादधिकृतपरिहारिसूत्रस्योपनिक्षेपः। **एष** पूर्वसूत्रेण सहाधिकृतस्य **सूत्रस्य सम्बन्धः१**। अत्रैव प्रकारान्तरमाह **काऊण वे**त्यादि, रोग**चिकित्सां कुर्वता** मनोज्ञमौषधं मनोज्ञं वा भोजनमनुरागेणास्वादितं तत्र च प्रायश्चित्तं परिहारतपः। ततो रोगचिकित्सां कृत्वा मनोज्ञं च भोजनादिक**मास्वाद्य समागतस्य** प्रायश्चित्तं परिहारतपो भवतीति विज्ञापनार्थमधिकृतं परिहारविषयं **सूत्रम्,** एष द्वितीयः सम्बन्धप्रकारः२॥ १३१७॥

अधुना तृतीयमाह—

---

१. °हारसू° वा. पु. मु. ॥

**अहवा गणस्स अपत्तियं तु, ठावेंति होइ परिहारो।**
**एसो त्ति न एसो त्ति, ठवेज्जऊं भंडणा सगणे३ ॥ १३१८॥**

यो गणधरः स्वाभिप्रेतं गणासम्मतं गुणरहितमपि **स्थापयितु**कामोऽभिमानवशेन **एष** योग्यः, **न** पुनः **एषः** गणसम्मतो योग्यः, **इत्येवं** स्वगणे भण्डनं कृत्वा स्थापयति, तस्मिन् **गणस्य** गच्छस्य **अप्रीतिकं** यथा भवति एवं स्वाभिप्रेतमाचार्यं **स्थापयति** तस्मिन् प्रायश्चित्तं **भवति परिहारः** परिहारतपः। तत एतदर्थप्रतिपादनार्थं दिग्बन्धसूत्रानन्तरं परिहारसूत्रम्। एष तृतीयः सम्बन्धप्रकारः ३ ॥१३१८॥

सम्प्रति चतुर्थं पञ्चमं च सम्बन्धप्रकारमाह—

**परिहारो वा भणितो, न तु परिहारम्मि वण्णिया मेरा४।**
**ववहारे वा पगते, अह ववहारो भवे तेसिं५ ॥ १३१९ ॥**

**वा**शब्दः प्रकारान्तरद्योतनार्थः। अधस्तात् **परिहार उक्तो न तु** तस्मिन् **परिहारे** वोढव्ये **वर्णिता मर्यादा,** विधिरित्यर्थः। ततः परिहारविधिप्ररूपणार्थमेष आरम्भः क्रियते।

अयं च चतुर्थः सम्बन्धः प्रकारः। पञ्चममाह- **वाशब्दो**ऽत्रापि प्रकारान्तरद्योतनार्थः, व्यवहारार्थं किल **व्य**वहाराध्ययनं प्रकृतम्। ततस्तस्मिन् नदीश्रोतोवदनुवर्तमाने **प्रकृते व्यवहारे अह** एष **एतेषां** परिहारिकाणामपरिहारिकाणां च **व्यवहारो** भण्यते ५॥ १३१९॥

अनेन सम्बन्धपञ्चकेनायातस्यास्य व्याख्या—

**बहवः** प्रभूताः **परिहारिका बहवोऽपरिहारिकाः** कारणवशतः तीर्थकरोपदेशेच्छया न स्वच्छन्देच्छया **इच्छेयुः- एकत** एकत्रस्थाने **एकमासं** वा **द्विमासं वा त्रिमासं वा चतुर्मासं वा**[1] यावत्करणात् **पञ्चमासं वा षण्मासं वा वस्तुं**, तत्र **ते** तथावसन्तो **अन्योऽन्यं** परस्परमपरिहारिका इति शेषः, **सम्भुञ्जते** सर्वप्रकारैः भुञ्जते, **अन्नमन्नं न संभुंजंतित्ति** परिहारिका यावत्तपो वहन्ति तावत्ते परस्परमपरिहारिकैः परिहारिकैर्वा समं **न संभुञ्जते** न सर्वप्रकारैः भुञ्जते **मासं ते अन्नमन्नं न** सम्भुञ्जन्ति यैः षण्मासाः सेवितास्तेषां यः षण्मासोपरिवर्त्ती मासस्तं यावत्ते परिहारिकाः परस्परं परिहारिकैः सममुपलक्षणमेतत्, अपरिहारिकैर्वा सममेकत्र न सम्भुञ्जते, आलापनादीनि तु कुर्वन्ति। **तत** उपरितनमासपरि-

---

**१. वा पञ्च - वा. पु. ॥**

पूर्णीभवनानन्तरं **पश्चात् सर्वेऽपि** परिहारिका अपरिहारिकाश्च **एकतः** एकत्र स्थाने सम्भुञ्जते सर्वप्रकारैर्भुञ्जते, एष सूत्रसंक्षेपार्थः ॥

अत्र पर आह–ननु बहवः परिहारिका अपरिहारिकाश्च कथमेकत्र सम्भवन्ति? येनाधिकृतं सूत्रमुपपद्यते, तत आह—

**कारणिगा मेलीणा, बहुगा परिहारिगा भवेज्जाहि।**
**अपरीहारियभोगो, परिहारि न भुंजइ वहंतो ॥ १३२० ॥**

**बहवः पारिहारिका** एकत्र **मिलिता भवेयुः कारणिकाः**, कारणवशेनेति भावः, ततो नाधिकृतसूत्रानुपपत्तिः। तत्राऽ**परिहारिकाणा**मेकत्र परस्परं **भोगः** सम्भोगो भवति। एतावता ते अण्णमण्णं संभुंजंति इति व्याख्यातम् यस्तु **परिहारी** स परिहारतपो **वहन्** परिहारिभिरपरिहारिभिर्वा समं **न भुङ्क्ते** । एतेन अन्नमन्नं नो संभुंजंति [इति] व्याख्यातम्। पारिहारिका नाम ये परिहारतपोरूपं प्रायश्चित्तं प्रतिपन्नाः। ये पुनः परिहारतपःप्रायश्चित्तं न प्रतिपन्नास्ते अपारिहारिकाः॥ १३२०॥

तत्र परिहारतपःप्रतिपादनविधिः परिहरणविधिश्च ***निशीथाध्ययने कल्पे*** च व्यावर्णितः। यस्तु तत्र नोक्तस्तमिदानीं प्रतिपिपादयिषुराह—

**गिम्हाणं आवण्णो, चउसु वि वासासु[1] देंति आयरिया।**
**पुण्णम्मि मासवज्जणं[2] - मप्पुण्णे मासियं लहुयं ॥ १३२१ ॥**

इह **ग्रीष्म**ग्रहणेन ऋतुबद्धकालग्रहणं, तेषामृतुबद्धानां मासानां मध्ये एकमासं द्विमासं वा यावत् षण्मासं वा यत् परिहारतपः **समापन्नस्तद्वर्षारात्रे चतुर्ष्वपि** मासेषु **दीयते** अत्रार्थे च कारणं स्वयमेव वक्ष्यति । यस्तु षण्मासं परिहारतपःप्रपन्नस्तस्य **पूर्णे** षण्मासे उपरि **मासवर्जनं** मासं यावदेकत्र भोजनवर्जनम्। एतेन मासादिके परिपूर्णे पञ्चरात्रिन्दिवादि-भोजनवर्जनमुपलक्षितम्। तच्चानन्तरगाथायां स्वयमेव वक्ष्यति। यत्र यावद्भोजनं प्रतिषिद्धं, तत्र तावदपरिपूर्णे भोजनं कुर्वतः प्रायश्चित्तं **मासिकं लघु** ॥ १३२१ ॥

सम्प्रति पुण्णम्मि मासवज्जणं, इत्येतद्व्याचिख्यासुराह—

---

१. **मासेसु - खं. मु. ॥ २. ण अप्पु° पु. प्रे. ला. ॥**

**पणगं पणगं मासे, वज्जेज्जइ मासो छण्हमासाणं।**
**न य भद्द-पंतदोसा, पुव्वुत्तगुणा य तो वासे ॥ १३२२ ॥**

मासे **मासे पञ्चकं पञ्चकं** परिवर्धमानं तावद् **वर्ज्यते** यावत्**षण्णां मासाना**मुपरि **मासो** वर्ज्यते, इयमत्र भावना-यो मासिकं परिहारतप आपन्नस्तस्य मासं वहतः पूर्वोक्तविधिः आलापनवर्जनादिको वेदितव्यः। मासे तु व्यूढे उपरि पञ्चरात्रिन्दिवानि यावदालापनादीनि सर्वाणि क्रियन्ते, नवरमेकं भोजनमेकत्र वर्ज्यते। एवं यो द्वौ मासावापन्नस्तस्य दशरात्रिन्दिवानि, यस्त्रीन्मासान् तस्य पञ्चदश, यश्चतुरो मासान् तस्य विंशतिः, यः पञ्च मासान् तस्य भिन्नमासं, यावद् यस्तु षण्मासा-पन्नस्तस्य षट्सु मासेषु व्यूढेषु उपरि मासं यावदेकत्र भोजनमेकं वर्ज्यते। शेषं त्वालापनादिकं सर्वं सर्वत्र दशरात्रिन्दिवादौ क्रियते। अथ कस्मादृतुबद्धेषु मासेष्वापन्नस्यापि वर्षारात्रेस्तपो दीयते? तत आह-**न य भद्दपंत दोसा** इत्यादि, ऋतुबद्धे काले यदि परिहारतपो दीयते ततस्तस्मिन् दत्ते सति यदि मासकल्पे परिपूर्णे सति विहरन्ति तर्हि पारिहारिकाणां परितापनादि-दोषप्रादुर्भावः। अथ न विहरन्ति ततो भद्रकप्रान्तकृतदोषसम्भवः। भद्रककृता दोषा

उद्गमादिकरणं, प्रान्तकृतदोषा अतिचिरावस्थानेन चमढनादिकाः, वर्षाकाले त्वेते दोषाः प्रायो न सम्भवन्ति, सर्वदर्शनिनां वर्षाकालस्य तपोऽनुष्ठानाश्रयतया सम्मतत्वेन कस्यचिदपि विशेषतः प्रीतेर्द्वेषस्य वाऽसम्भवात्? तथा **पूर्वोक्तगुणाश्च** कल्पाध्ययनप्रतिपादिता गुणाश्च वर्षाकाले अवाप्यन्ते, **ततो वर्षासु** परिहारतपो दीयते ॥ १३२२॥

अथ के ते पूर्वोक्ता गुणाः? इति विस्मरणशीलान् प्रति तान् भूय उपदर्शयति—

**वासासु बहू पाणा, बलिओ कालो चिरं च ठायव्वं।**
**सज्झायसंजमतवे, धणियं अप्पा निओत्तव्वो ॥ १३२३ ॥**

**वर्षाकाले** सर्वतः प्रायो **बहवः प्राणास्ततो** दीर्घा भिक्षाचर्या न भवति तथा स्निग्धतया स **कालो बलिको** बलियान्, तपः कुर्वतां बलोपष्टम्भकारीति भावार्थः। तथा **चिरं च** प्रभूतं कालं चैकत्र **स्थातव्यम्** अत एव **स्वाध्याये संयमे तपसि** च **धणियं** अत्यर्थ**मात्मा नियोक्तव्यो** भवति। यत एवं तत एवंरूपप्रभूतगुणोपदर्शनतो वर्षाकाले परिहारतपःप्रतिपत्तिः कार्यते। एतेन 'गिम्हाणं आवन्नो चउसु वि वासासु देंति आयरिया' इत्यत्र [गा.१३२१] यदुक्तं कारणं स्वयमेव वक्ष्यतीति तत्समर्थितम् ॥१३२३॥

सम्प्रति षण्मासवहनानन्तरमुपरि यन्मासो भोजनमधिकृत्य वर्ज्यते तत्र कारणमाक्षेपपुरःसरमभिधित्सुराह—

**मासस्स गोण्ण नामं, परिहरणा पूतिनिव्वलणमासो।**
**तत्तो पमोयमासो, भुंजणवज्जो न सेसेहिं ॥ १३२४ ॥**

अथ षण्णां मासानामुपरि मासस्य परिहरणं भोजनमधिकृत्य कस्मात्क्रियते? उच्यते–निर्वलनार्थं प्रमोदार्थं चेति वाक्यशेषः। तथाहि–कुथितमद्यादिगन्धं मृत्तिकाभाजनं यावदद्यापि निर्वलितं न भवति, तावत् तत्र क्षीरादि न प्रक्षिप्यते, निर्वलिते तु भवति तत्र क्षीरादेः प्रक्षेपः, एवमेषोऽपि दुश्चरितदुरभिगन्धभावितो नियमादेतावता कालेन निर्वलितो भवति, नान्यथा। तथा जिनप्रवचनप्रवृत्तेः। तथा कश्चित्केनाप्यगम्यगामित्वेनालीकेनाभिशपितो राजकुले च निवेदितः, स त[1]प्तफालादिकं गृहीत्वा शुद्धः सन् मिथःसम्भाषणादिभिः प्रमोदं कृत्वा परस्परं स्वजनैः सह भुङ्क्ते, एवमेषोऽपि पारिहारिक आत्मानमपराधेन मलिनं प्रायश्चित्तेन विशोध्य मासं यावन्मिथःसम्भाषणादिभिः प्रमोदमाधाय तैः सहैकत्र भुङ्क्ते।

१. °प्तगोलादि° मो. मु. । °प्तमाषादि° वा. पु. ॥

तदेवमुक्तकारणवशाद् यतोऽन्यैः सममभुञ्जानो मासं यावदवतिष्ठते तस्मादेतस्य **मासस्य गौणं** गुणनिष्पन्नं **नाम** द्विधा। तद्यथा–**पूतिनिर्वलनमास**[१] इति **प्रमोदमास** इति। पूतिर्दुरभिगन्धस्तस्य निर्वलनं स्फेटनं तत्प्रधानो मासः पूतिनिर्वलनमासः तथा प्रमोदहेतुर्मासः प्रमोदमासः। स च मासो **भोजनेन वर्ज्यः** परिहर्त्तव्यः, **न पुनः शेषै**रालापनादिभिः ॥१३२४॥ यथा चाभ्यां मासपरिवर्जनमेवं पञ्चरात्रिन्दिवादिपरिवर्जनमपि भावनीयम्। किञ्चान्यदपि कारणमस्ति पञ्चरात्रिन्दिवादिपरिवर्जने ततस्तदभिधित्सुराह—

**दिज्जइ सुहं च वीसुं, तवसोसियस्स जं बलकरं तु।**
**पुणरवि य होइ जोग्गो, अचिरा दुविहस्स वि तवस्स ॥ १३२५ ॥**

इह यद्येकत्र भुङ्क्ते ततः सहैव स्वसङ्घाटकेनैष भुङ्क्ते, इत्यनादरबुद्ध्या **यत्तपःशोषितस्य बलवर्धनकरं** तस्य दानं न भवति, **विष्वक्** पृथग्भोजने पुनः तपःशोषितगात्रोऽयमद्यापि न मण्डल्यां भुङ्क्ते, इत्यादरबुद्धिभावतः तपसा शोषितस्य तद्बलवर्धनकरमशनादि **तत्सुखेनैव** सर्वैरपि **साधुभिर्दीयते**। तस्यापि दाने को गुणः? इत्याह–

१. °र्वलित° वा. पु. । एवमग्रेऽपि ॥

बलवर्धनकराशनादिप्रदाने **पुनरपि अचिरात्** स्तोकेन कालेन **द्विविधस्यापि तपसः** परिहारतपसः शुद्धतपसश्चेत्यर्थः **योग्यो भवति** ॥१३२५॥

**सूत्रम्— परिहारकप्पट्ठियस्स भिक्खुस्स णो कप्पइ, असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुप्पदाउं वा । थेरा य णं वाएज्जा-इमं ता अज्जो! तुमं एतेसिं देहि वा अणुप्पदेहि वा; एवं से कप्पइ दाउं वा अणुप्पदाउं वा। कप्पइ से लेवं अणुजाणावेत्तए-अणुजाणह लेवाएतं एवं से कप्पइ लेवं समासेवित्तए[1] अणुजाणावेत्तए[2] ॥२७॥**



"परिहारकप्पट्ठियस्स भिक्खुस्स" इत्यादि। अथास्य सूत्रस्य कः सम्बन्धः ? उच्यते—

**एसा वूढे मेरा, होइ अवूढे अयं पुण विसेसो।**
**सुत्तेणेव णिसिद्धे, होइ अणुन्ना उ सुत्तेण ॥ १३२६ ॥**

**एषा** अनन्तरसूत्रप्रतिपादिता **मर्यादा** स्थितिर्भवति **व्यूढे** परिहारतपसि। **अव्यूढे पुनः**

**१. समासेवित्तए - प्रतिलिपिनास्ति ॥ २. अणुजाणावेत्तए - आगम प्र. नास्ति॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिहारतपसि **अयम**धिकृतसूत्रेण प्रतिपाद्यमानो मर्यादाया **विशेषः।** एष पूर्वसूत्रेण सहाधिकृतसूत्रस्य सम्बन्धः॥ अनेन सन्बन्धेनायातस्यास्य व्याख्या-

परिहारकल्पे स्थितः परिहारकल्पस्थितः, तस्य **परिहारकल्पस्थितस्य भिक्षोर्न कल्पते अशनं पानं खादिमं स्वादिमं** वा अन्यस्मै साक्षात्स्वहस्तेन **दातुम्, अनुप्रदातुं वा** परम्परकेण प्रदातुम्, अनुशब्दस्य परम्परकद्योतकत्वात्। अत्रैवानुज्ञामाह-**थेरा य ण**मित्यादि, यदि पुनः स्थविरा णं इति वाक्यालङ्कृतौ **वदेयुः इमं** परिहारकल्पस्थितं भिक्षुम्- अहो **आर्य! त्वमेतेभ्यो देहि** परिभाजय **अनुप्रदेहि वा। एवं** स्थविरैरनुज्ञाते सति **से** तस्य कल्पते दातुमनुप्रदातुं वा। दाने अनुप्रदाने च तस्य हस्तो विकृति[१]द्रव्येण खरण्टितो भवति ततः से तस्य कल्पते। **लेपं** विकृतिं हस्तगत**मनुज्ञापयितुम्** यथा भदन्त! यूय**मनुजानीथ** लेपखरण्टितं हस्तं **लेवाए** इति समासेवितुमेवमनुज्ञापने कृते सति **से** तस्य **कल्पते लेपं** विकृतिं हस्तगतां समासेवितुम्, उपलक्षणमेतदन्यदपि यदुद्धरितं तदप्यनुज्ञातं सत् कल्पते **समासेवितुमिति** सूत्रसङ्क्षेपार्थः॥

१. विकृति प्रश्रेणिखर° वा. पु. ॥



For Private and Personal Use Only

व्यासार्थं तु भाष्यकृद् विवक्षुः प्रथमतः सामान्यत आह- **सुत्तेणेवे**त्यादि, **सूत्रेणैव** दाने अनुप्रदाने च प्रथमतो **निषिद्धे** तदनन्तरं तेनैव **सूत्रेण** दाने अनुप्रदाने च **भवत्यनुज्ञा** ॥ १३२६ ॥ एवं सङ्क्षेपतः सूत्रार्थे कथिते सत्याह—

**किह तस्स दाउ किज्जइ? चोयग! सुत्तं तु होइ कारणियं।**
**सो दुब्बलो गिलायइ, तस्स उवाएण दिंतेवं ॥ १३२७ ॥**

**किह** कथं केन प्रकारेण **तस्य** परिहारकल्पस्थितस्य भिक्षो**र्दातुं क्रियते**ऽशनादिकम्? तद्दानकरणस्य तत्कल्पविरुद्धत्वात्। अत्र सूरिराह-हे **चोदक! सूत्र**मिदं **भवति कारणिकं** कारणेन निर्वृत्तं कारणिकं, कारणमधिकृत्य प्रवृत्तमित्यर्थः। तदेव कारणमाह **सो दुब्बलो** इत्यादि, सः परिहारकल्पस्थितो भिक्षुर्दुर्बलः तपःशोषितशरीरत्वादत एव पदे पदे **ग्लायति**। तत**स्तस्या**नुकम्पनार्थमेवमने**नोपायेन** दाना-ऽनुप्रदानकारापणलक्षणेन विकृतिं स्थविरा **ददति** प्रयच्छन्ति। तत एषाऽपि परिहारकल्पसामाचारीति न कश्चिद्दोषः ॥ १३२७॥ सम्प्रति यथा तस्य दानमनुप्रदानं वा करणीयं भवति येन च कारणेन स्थविरा अनुजानते तदेतदभिधित्सुराह—

**परिमिय असति अन्नेसो, वि य परिभायणम्मि कुसलो उ।**
**उच्छूर-पडरलंभे, अगीयवामोहणनिमित्तं ॥ १३२८ ॥**

**तवसोसीयमज्झोवातओ य तब्भावितो भवे अहवा।**
**थेरा नाऊणेवं , वदंति भाएहि तं अज्जो ॥ १३२९ ॥**

इह यद्दानमनुप्रदानं वा परिभाजनमुच्यते तच्च यथा सम्भवति तथोपपाद्यते-साधुभिः सर्वैस्तपोविशेषप्रतिपन्नवर्जितैरेकत्र मण्डल्यां भोक्तव्यम्। किं कारणम्? इति चेत्, उच्यते-इह द्विविधा साधवः, लब्धिमन्तो लब्धिरहिताश्च। तत्र ये लब्धिरहितास्ते बहिर्गतास्तथाविधं प्रायोग्यं न लभन्ते, मण्डल्यां तूपविष्टानां लब्धिमत्साधुसङ्घाटकानीतपरिभाजनेन तेषामन्येषामपि च बाल-शैक्ष-वृद्ध-ग्लानादीनां प्रायोग्यं भवतीति तेषामनुग्रहाय मण्डलीबन्धकरणम्, मण्डलीबन्धे च कृते कस्यचिदजीर्णं भवति, कस्यचिद् जीर्णम्। जीर्णेऽपि च कोऽपि काश्चिद् विकृतीर्भुङ्क्ते, न सर्वाः,ततः प्रचुरविकृतिलाभे सर्वजनानुग्रहाय परिभाजनं क्रियते। तत्र स परिहारकल्पस्थितो भिक्षुः **तपःशोषितः** तपःशोषितशरीर इति तस्य विकृतिविषये **अध्युपपातः** श्रद्धा जाता। **अथवा** पूर्वं सदैव तस्यां विकृतौ **भावित** इति

तद्भावनया तस्यामध्युपपातो जातः, तत एतत्स्थविरा **ज्ञात्वा** तदनुग्रहाय **परिमिते** विकृतिलाभेऽसति असन् अविद्यमानोऽ**न्यः** परिभाजनकुशलो यः सर्वेषामौचित्येना-ऽऽपूरयति, **सोऽपि** च परिहारकल्पस्थितः **परिभाजने कुशल** इति सर्वसाधूनां वचनेन प्रकाश्यैवं वदति- अहो **आर्य !** गाथायामोकारान्तता प्राकृतलक्षणवशात्, त्वमेतेभ्यः साधुभ्यः **परिभाजय,** यदि पुनः उच्छूरं नानाविधं प्रचूरमतिप्रभूतं घृतादिलब्धं भवति तदा **उच्छूरप्रचूरलाभे अगीतव्यामोहननिमित्तं** अगीतार्था मा विपरिणमन्तु इति यद्वा तद्वा कारणं वचसा प्रकाश्य तद्व्यामोहननिमित्तमेवं ब्रुवते- आर्य! त्वं साधुभ्यः परिभाजय॥ १३२८॥ १३२९॥

**परिभाइय संसट्ठे १, जो हत्थं संलिहावए परेण २।**
**फुसइ व कुड्डे३ छड्डे४, अणणुण्णाए भवे लहुओ ५॥ १३३० ॥**

आचार्योपदेशेन **परिभाजिते** सति तस्य हस्तः **संसृष्टो** घृतादिना लिप्तो भवति, तस्मिन् संसृष्टे यदि तथैव संसृष्टेन हस्तेनावतिष्ठते तर्हि प्रायश्चित्तं मासलघु १, **यो वा हस्तं परेण संलेहापयति** तस्यापि प्रायश्चित्तं मासलघु २। अथवा **कुड्ये** हस्तं **स्पृशति** तदापि मासलघु ३, अथवा काष्ठेन निघृष्य छर्दयति तत्रापि मासलघु४। अथवाऽ**ननुज्ञातः** सन् स्वयं लेढि

हस्तं तदापि तस्य प्रायश्चित्तं **लघुको** मासः ५॥ १३३०॥

**कप्पइ य विदिन्नम्मी, चोयगवयणं च सेस सूवस्स।**
**एवं कप्पइ अप्पायणं च कप्पट्ठिती चेसा ॥ १३३१॥**

वितीर्णे अनुज्ञाते सति **कल्पते** स्वयं स्वहस्तं परिलेढुम्। इयमत्र भावना-यद्याचार्यः समादिशति त्वं स्वहस्तं घृतादिविकृतिखरण्टितं स्वयमेव लेढि, ततः स लेढि। चशब्दादन्यदपि यत्परिभाजितशेषं तदप्याचार्येणानुज्ञातं भुङ्क्ते। **चोयगवयणं चेति** अत्र नोदकवचनं यथा-कथं परिहारिकस्य विकृतेरनुज्ञापनं युक्तम्? इति। सूरिराह-**सेस सूवस्स** सूपस्य सूपकारस्य यथा शेषमाभाव्यं भवति तथा तस्यापीति भावः। एतदुक्तं भवति-यथा सूपकारः केनापि स्वामिना सन्दिष्टः-एतावत्प्रमाणैस्तन्दुल-मुद्गादिभिर्भक्तं निष्पाद्यैतावतः पुरुषान् भोजय४, एवमादेशे लब्धे साधिते भक्ते भोजितेषु च पुरुषेषु यच्छेषमुद्धरति तत्सर्वं सूपकारस्याभाव्यम् एवमाचार्योपदेशतः परिहारिकेण परिभाजिते यच्छेषमुद्धरति तत्तस्य पारिहारिकस्याऽऽभाव्यं, सूपकारदृष्टान्त उपलक्षणं, तेनाऽपूपिकदृष्टान्तोऽपि वेदितव्यः। स चैवं- केनाप्यापूपिक आदिष्टः- एतावता कणिक्कादिना द्रव्येण एतावत्प्रमाणं मण्डकादि

कर्तव्यम्। एवमादेशे लब्धे तथैव मण्डकादिके निष्पादिते शेषं यदुद्धरति मण्डकादि तद् आपूपिकस्याभवति, एवं पारिहारिकस्यापि, तत एवं तपःशोषितशरीरस्याऽऽ**प्यायन**-निमित्तमाचार्यस्य **कल्पते** अनुज्ञापनमित्यदोषः। **कल्पस्थितिरेषा** यद् ग्लायत आप्यायन-निमित्तमेवमनुज्ञापनं कर्तव्यं, येन शेषं प्रायश्चित्ततपः सुखेन वहतीति ॥१३३१॥

सूपकारदृष्टान्तमेव सविस्तरं भावयति—

**एवइयाणं भत्तं, करेहि दिण्णम्मि सेसयं तस्स।**
**इय भोइयपज्जत्ते, सेसुव्वरियं व देंतऽस्स ॥ १३३२ ॥**

एतावद्भिस्तन्दुलादिकैरेतावतां **भक्तं कुरु** इति समादेशे लब्धे निष्पादिते भक्ते **दत्ते** चोक्तप्रमाणेभ्यः पुरुषेभ्यो भोजने **यच्छेषं** तत्त**स्या**भवति, **इति** एवम् अमुना प्रकारेणाऽऽचार्यो-पदेशतः **पर्याप्ते भोजिते शेषमुद्धरितमस्य** पारिहारिकस्य परिवेषकस्याचार्यो **ददाति**॥ १३३२॥

सम्प्रति येन प्रमाणेनाऽऽचार्या उपदिशन्ति तत्प्रमाणमभिधित्सुराह—

**दव्वप्पमाणं तु विदित्तु पुव्वं, थेरा से दाएंति तयं पमाणं।**
**जुत्ते वि सेसं भवते जहा ऊ, उच्छूरलंभे तु पकामदाणं ॥ १३३३ ॥**

इहा चाऽऽचार्यैः पूर्वं द्रव्यं प्रमाणयितव्यं, यथा-इदं किं युक्तप्रमाणम्? आहोस्वित्सपरिष्ठापनम्? एवं **पूर्वं द्रव्यप्रमाणं विदित्वा** ज्ञात्वा **स्थविरा** आचार्याः **से** तस्य पारिहारिकस्य **तकत्प्रमाणं दर्शयन्ति। यथा युक्तेऽपि** युक्तप्रमाणेऽपि **शेषं भवति। उच्छूरलाभे** प्रचूरनानाविधघृतादिलाभे **प्रकामदानं** यावद् यस्मै रोचते तावत्तस्मै दीयता-मित्येवंरूपमनुज्ञाप्यते ॥१३३३॥

**सूत्रम्— परिहारकप्पट्ठिए भिक्खू सएणं पडिग्गहेणं बहियां[1] अप्पणो वेयावडियाए गच्छेज्जा। थेरा य णं वएज्जा पडिग्गाहेहि अज्जो[2]! अहंपि भोक्खामि वा पाहामि वा। एवं से कप्पइ पडिग्गाहित्तए, तत्थ णो कप्पइ अपरिहारिएणं परिहारियस्स पडिग्गहम्मि असणं वा पाणं वा खाइमं वा साइमं वा भोत्तए वा, पायए वा, कप्पइ से सयंसि वा पडिग्गहंसि सयंसि वा पलासगंसि[1] वा कमढगंसि वा सयंसि वा खुज्जगंसि वा उद्धट्टु उद्धट्टु भोत्तए वा पायए वा, एस कप्पे अपरिहारियस्स पारिहारियओ ॥ २८॥**

सूत्र २९ गाथा १३३२-१३३४ परिहारिका-परिहारिक्योः भोजनविधिः

"परिहारकप्पट्ठिए भिक्खू सएणं पडिग्गहेण"मित्यादि, अस्य सूत्रस्य पूर्वसूत्रेण सह सम्बन्धप्रतिपादनार्थमाह—

---

१. या थेराणं वे प्रति श्युब्रींग ॥ २ 'ज्जो वयं पि णं भोक्खामो वा पहामो वा- इति प्रतिलिपिपाठः ॥



For Private and Personal Use Only

**आयाणोसाणेसुं, संपुडितो एस होइ उद्देसो।**
**एगाहिगारियाणं, वारेइ अतिप्पसंगं वा ॥ १३३४ ॥**

**आदानम्** आदिः,**अवसानं** पर्यन्तः, तयोः साधर्मिकाधिकारप्रतिपादना**देष उद्देशः सम्पुटितः** सम्पुटं सञ्जातमस्येति सम्पुटितः, तारकादिदर्शनादितप्रत्ययः। इयमत्र भावना–अस्योद्देशकस्यादावन्ते च प्रत्येकं द्वे द्वे सूत्रे **सा**धर्मिकाधिकारप्रतिपादके, तत एष उद्देशकः साधर्मिकाधिकारेण सम्पुटितः, सम्पुटितत्वाच्च सम्पुटनकरणमेवास्य सूत्रस्य सम्बन्धः। अथवा एकाधिकारिकानि यानि यान्यनन्तरमुद्दिष्टानि पारिहारिकसूत्राणि तेषा**मेकाधिकारिकाणां** पारिहारिकसूत्राणां यो भक्तदानैकत्रभोजनप्रतिषेधे **अतिप्रसङ्ग**स्तं **वार-यत्य**धिकृतेन सूत्रद्वयेनेति एष पूर्वसूत्रेण सहास्य सम्बन्धः। अनेन सम्बन्धेनायातस्यास्य व्याख्या—



**परिहारकल्पस्थितो भिक्षुः स्वकीयेन पतद्ग्रहेण** प्रतिग्रहेणेति वा वसते**र्बहिरात्मन** स्वशरीरस्य **वैयावृत्त्याय** भिक्षानयनायेत्यर्थः **गच्छेत्** । **स्थविराश्च** तं तथागच्छन्तं दृष्ट्वा **वदेयुः**–अस्मद्योग्यमपि स्वपात्रके [**प्रति**]**गृह्णीयाः, अहमपि भोक्ष्ये पास्यामि वा। एवमुक्ते से** तस्य **कल्पते** स्थविरयोग्यं **प्रतिगृहीतुं, तत्र** तस्मिन् आत्मयोग्यपरि(प्रति)गृहीते सति **नो कल्पते अपरिहारिकेण** सता **पारिहारिकस्य पतद्ग्रहे अशनं पानं खादिमं स्वादिमं वा**

**भोक्तुं वा पातुं वा,** किन्तु **कल्पते से** तस्याऽपारिहारिकस्य **स्वकीये वा पतद्ग्रहे** तुम्बादिमये **स्वकीये वा पलाशके**[२] पलाशपात्रात्मके स्थाले, **स्वकीये वा कमढके, स्वकीये वा खुड्डएति,** पलाशादिपत्रमये दोण्णके उद्धट्टु उद्धट्टु इत्यवकृष्य अवकृष्य **भोक्तुं वा पातुं वा,** उपलक्षणमेतत् दुर्लभपानीयभावे कालाप्रापणे वा तत्पात्रे एव पारिहारिकेण सता अपारिहारिकेण समं कल्पते भोक्तुं वा पातुं वा। उपसंहारमाह- **एष कल्पोऽपारिहारिकस्य परिहारिकतः** पारिहारिकमधिकृत्य। एष प्रथमसूत्रसंक्षेपार्थः ॥

**सूत्रम्— परिहारकप्पट्ठिए भिक्खू थेराणं पडिग्गहेणं बहिया थेराणं वेयावडियाए गच्छेज्जा, थेरा य णं वदेज्जा-पडिग्गाहेहि अज्जो! तुमं पि एत्थ**[१] **भोयसि वा पाहसि वा। एवं से कप्पइ पडिगाहित्तए, तत्थ णो कप्पइ पारिहारिएणं अपरिहारियस्स पडिग्गहंसि असणं वा पाणं वा खाइमं वा साइमं वा भोयए वा पायए वा, कप्पइ से सयंसि वा पडिग्गहंसि सयंसि वा पलासगंसि वा सयंसि वा**

सूत्र २९ गाथा १३३२-१३३४ परिहारिका-परिहारिक्योः भोजनविधिः

---

१. °सि पाणिंसि वा उ श्युब्रीग । एवमग्रेतन सूत्रेऽपि ॥ °सि सयंसि कमण्डलंसि वा सयंसि वा खुब्भगंसि वा पाणिंसि उ आगमप्रकाशन ब्यावरपाठः ॥ एवमग्रेतनसूत्रेऽपि ॥ २. °शमये पलाशपत्रात्मके स्थाले खं. मु. ॥



For Private and Personal Use Only

**कमढगंसि सयंसि वा खुल्लगंसि[१] उद्धट्टु भोत्तए वा पायए वा। एस कप्पे पारिहारियस्स अपारिहारियाओ त्तिबेमि ॥ २९॥**

**॥ ववहारस्स बितिओ उद्देसओ समत्तो ॥**

द्वितीयसूत्रसंक्षेपार्थस्त्वयम्- **परिहारकल्पस्थितो भिक्षुः स्थविराणां पतद्ग्रहेण** वसते**र्बहिः स्थविराणां वैयावृत्त्याय** भिक्षानयनायेत्यर्थः **गच्छेत्, स्थविराश्च** तं तथागच्छन्तं दृष्ट्वा नूनं सर्वगृहेषु भिक्षाकालः समकं वर्तते ततोऽस्मद्योग्यमानीय पश्चादेष आत्मनो योग्यानयनाय प्रविष्टो न किमपि लप्स्यते इति कारणवशतो **वदेयुः- प्रतिगृह्णीयाः** त्वमप्यत्र **भोक्ष्यसे पास्यसि वा। एवमुक्ते से** तस्य **कल्पते प्रतिगृहीतुं तत्र** तस्मिन्नात्मयोग्यग्रहणे सति **न कल्पते परिहारिकेणाऽपारिहारिकस्य पतद्ग्रहेऽशनं पानं खादिमं स्वादिमं वा भोक्तुं वा पातुं वा** किन्तु **कल्पते** तस्य **स्वकीये वा पतद्ग्रहे स्वकीये वा पलाशके स्वकीये वा कमढके स्वकीये वा खुल्लके[२] भोक्तुं वा पातुं वा** उपलक्षणव्याख्यानमत्रापि द्रष्टव्यम्। **एष कल्पः पारिहारिकस्याऽपारिहारिकतोऽ**पारिहारिकमधिकृत्य **इति ब्रवीमि।** तीर्थकरो-

सूत्र ३०
गाथा
१३३५-१३३८
पारिहारिकस्य
पात्रे
भोजनविधिः

६६० (A)

---

१. खुज्जगंसि- पु. प्रे.॥ २. खुज्जके- वा. मो. पु.

पदेशतो न स्वमनीषिकयेति। सम्प्रति **निर्युक्तिभाष्यविस्तरः**-

**सपडिग्गहे परपडिग्गहे य बहि पुव्व पच्छ तत्थेव।**
**आयरियसेहऽभिग्गह, समसंडासे अहाकप्पो ॥ १३३५ ॥**

**पूर्वं** वसतेर्**बहि**र्भिक्षानयनाय निष्क्रम्य **स्वपतद्गृहे** स्वयोग्यमानीय **पश्चात्परपतद्ग्रहे** आचार्ययोग्यमानयति। अथवा पूर्वं परपतद्ग्रहे आचार्ययोग्यमानीय पश्चात् स्वपतद्ग्रहे स्वयोग्यमानयति। अथवा कारणवशतस्**तत्रैव** एकस्मिन् पतद्ग्रहे उभययोग्यमानयति। आनीते च स्थविरेण पूर्वं भुक्ते पश्चात्पारिहारिकेण भोक्तव्यम्। अथ कालो न प्राप्यते तत **आचार्यः** स्थविरः **शैक्षाभिग्रहः** पारिहारिक एतौ द्वावपि **समकम्** एककालमेकस्मिन् पतद्ग्रहे भुञ्जाते। तत्र च **सण्डासो**पलक्षितः शुनकमांसदृष्टान्तो वक्तव्यः। एष **यथाकल्पो** यथावस्थिता सामाचारी॥ १३३५॥ साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतः 'सपडिग्गहे य बहि पुव्व पच्छ' इति व्याख्यानयति—

**कारणिय दोन्नि थेरो, सो व गुरू अहव केणई असहू।**
**पुव्वं सयं व गेण्हइ, पच्छा घेत्तुं व थेराणं ॥ १३३६ ॥**

अशिवादिकारणवशतो **द्वौ** आचार्य-पारिहारिकौ **कारणिकौ** जातौ, किमुक्तं भवति ? अशिवादिकारणवशतः शेषसाधून् देशान्तरे प्रेष्य तावेव केवलावेकत्रस्थानस्थितौ, तत्र योऽसौ **गुरुः** स **स्थविर** इति कृत्वा **अथवा केनापि** रोगेण ग्रस्त इति भिक्षामटितु**मसहः** असमर्थः। यः पुनस्तस्य सहायः स परिहारतपःप्रतिपन्नो वर्तते। ततस्तत्रेयं सामाचारी-पारिहारिकः **पूर्व**मात्मीयेन पतद्ग्रहेणा-ऽऽत्मनो योग्यमानीय भुक्त्वा आत्मीयं पतद्ग्रहं स्थापयित्वा **पश्चा**त्स्थविरसत्कं पतद्ग्रहं **गृहीत्वा स्थविराणां** योग्यं गृहीतुमटति। अथवा पूर्वं स्थविरसत्कं पतद्ग्रहं कृत्वा स्थविरयोग्यमानीय स्थविराणां समर्प्य पश्चादात्मीयेन पतद्ग्रहेण हिण्डित्वाऽऽत्मना भुङ्क्ते॥ १३३६॥

अत्र च परस्यावकाशमाह—

**जइ एस सामायारी, किमट्ठ सुत्तं इमं तु आरद्धं?।**
**सपडिग्गहेतरेण व, परिहारी वेयवच्चकरो ॥ १३३७ ॥**

**यदि** नाम **एषा सामाचारी,** यथा-**परिहारी** पारिहारीकः **स्वपतद्ग्रहेण इतरेण वा** आचार्यपतद्ग्रहेण यथाक्रमं स्वस्याऽऽचार्यस्य च **वैयावृत्त्यकर** इति ततः इदं **सूत्रं** सूत्रद्वयं

**किमर्थमारब्धम्**? सूत्रोक्तस्यार्थस्याऽसम्भवात्। आचार्यः प्राह-न सूत्रोक्तार्थासम्भवः, कारणतः सूत्रद्वयस्य पतितत्वाद् ॥१३३७॥ कानि कारणानि यद्वशादिदं सूत्रद्वयं पतितम्? अत आह—

**दुल्लहदवं पडुच्च व, तवखेयवियं समं व सति काले ।**
**चोयग! कुव्वंति तयं, जं वुत्तमिहेव सुत्तम्मि ॥ १३३८ ॥**

हे **चोदक दुर्लभं द्रवं** पानीयं **प्रतीत्य,** यदि वा **तपसा खेदितं** पारिहारिकम्, अथवा **समकम्** एककालं सर्वगृहेषु **सति** भिक्षा**काले** आचार्य-पारिहारिकौ **तत् कुर्वतो यदुक्तमिहैव सूत्रे**। तथाहि- स पारिहारिकः तपसा खेदितः सन् आत्मनः स्थविरस्य चार्थाय द्वौ वारौ भिक्षामटितुमसमर्थः ततस्तं पारिहारिकं 'स्वकीयेन पतद्ग्रहेणात्मनो अर्थाय हिण्डित्वा पश्चात् स्थविराणामर्थाय स्थविरपतद्ग्रहेण हिण्डिष्ये' इति बुद्ध्या सम्प्रस्थितं स्थविरा असमर्थं ज्ञात्वा ब्रुवते 'अस्माकमपि योग्यमात्मीयेन पतद्ग्रहेण प्रतिगृह्णीयाः' तत उपरि एकस्मिन् वा पार्श्वे स्थविरयोग्यं गृह्णाति। गृहीते च तथा तस्मिन् स्थविरस्ततः समाकृष्य समाकृष्य भुङ्क्ते, एषा स्थविरस्य सामाचारी। पारिहारिकस्य पुनरियं-तं पारिहरिकं 'स्थविराणां पतद्ग्रहं गृहीत्वा स्थविरस्यार्थाय हिण्डित्वा पश्चाच्चात्मनो अर्थाय हिण्डिष्ये' इति बुद्ध्या सम्प्रस्थितं दृष्ट्वा गृहादिकं परिमितं ज्ञात्वा स्थविरा भाषन्ते 'आत्मनोऽप्यर्थायास्मदीय एव पात्रे प्रतिगृह्णीयाः' एवं सन्दिष्टः

सन् स तथैव गृहीत्वा समागतः, ततः स्थविरपतद्ग्रहादात्मीये पतद्ग्रहे पलाशभाजने कमढके वा समाकृष्य समाकृष्य भुङ्क्ते। एषा पारिहारिकस्य सामाचारी। एतावता 'तवखेयवियं' इति भावितम्। सम्प्रति 'समं व सति काले' इति भाव्यते-यत्र ग्रामे नगरे वा तौ स्थविर-पारिहारिकाववस्थितौ तत्र सर्वगृहेषु समकालं भिक्षाकालोऽजनिष्ट,तं स्थविरा ज्ञात्वा 'मा द्वितीयं वारं प्रविष्टः सन् एष न लभेत' इति सम्प्रस्थितं भाषन्ते एकत्रैवाऽऽत्मनो मम च योग्यं गृह्णीया इति । तत्र चोभयोरपि भोजनेऽनन्तरो विधिः> सम्प्रति 'दुल्लहदवं पडुच्चवे'ति भाव्यते, तद्भावनया च तत्थेव 'आयरिया सेहभिग्गहसम' [गा.१३३५] इति भाव्यमानं द्रष्टव्यं-तत्र ग्रामे नगरे वा यत्तेनापि मृग्यमाणं स्तोकं पानीयं लभ्यते ततः पारिहारिकपतद्ग्रहस्य स्थविरपतद्ग्रहस्य च प्रक्षालनाय पानीयं न पूर्यते। तत एतद् ज्ञात्वा स्थविरास्तं पारिहारिकं सन्दिशन्ति एकस्मिन्नेव पतद्ग्रहे द्वयोरपि योग्यं गृह्णीथाः। एवं सन्दिष्टे पारिहारिकस्येयं सामाचारी तस्मिन् पतद्ग्रहे स्थविरयोग्यं यत् प्रायोग्यं भक्तं तद् विष्वग् गृह्णाति द्वितीये पार्श्वे आत्मयोग्यम्, अथवाऽऽत्मयोग्यमधस्ताद् गृह्णाति स्थविरयोग्य-मुपरिष्टात्, एवं गृहीत्वा वसतावागच्छति। तत्र चाचार्यभोजनविधिः- तस्यैवेकस्य पतद्ग्रहस्य एकस्मिन् पार्श्वे उपरि वा यदाचार्ययोग्यं गृहीतं तस्मिन्नाचार्ये भुक्ते, पश्चात्पारिहारिको यदन्यस्मिन् पार्श्वे अधस्ताद्वाऽऽत्मयोग्यं गृहीतं तत् भुङ्क्ते, अथ यावत्स्थविरो भुङ्क्ते [स्वयं च] पश्चाद्भुङ्क्ते तावत्सूरोऽस्तमुपयाति ततो द्वावपि

समकं भुञ्जाते। एतावता 'सम'त्ति सम्भावितम्॥ १३३८॥ एतदेव व्याचिख्यासुराह—

**पासं उवरि व्व गहियं, कालस्स दवस्स वा वि असतीए।**
**पुव्वं भोत्तुं थेरा, दलंति समगं च भुंजंति ॥ १३३९ ॥**

**द्रवस्य** पानीयस्य **असति** अभावे एकस्मिन् **पार्श्वे उपरि वा** यद् **गृहीत**माचार्ययोग्यं तत्पूर्वं **स्थविरा भुक्त्वा** पश्चाच्छेषं पारिहारिकाय **ददति। कालस्य** द्वयोः क्रमेण भोजनकालस्याऽसति **समकं वा** एककालं तौ **भुञ्जाते।** सम्प्रति सण्डासोपलक्षितशुनकमांसदृष्टान्तभावना क्रियते-यथा कोऽप्यलर्केण शुना खादितः, स यदि तस्यैव शुनकस्य मांसं खादति, ततः प्रगुणीभवति, इत्यनेन प्रकारेण शुनकमांसं खादितुकामः 'कथमहं सर्वास्पृश्यं शुनकमांसं स्पृशामि? इति सन्दंशकेन गृहीत्वा मुखे प्रक्षिपति, एवं खाद्यते । स च पारिहारिकोऽपि तत् कारणत एकस्मिन् पार्श्वे उपरि वा गृहीतं स्थविरसत्कं जुगुप्समान इव तत् परिहरन् आत्मीयं समुद्दिशति ॥१३३९॥

***॥ इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां द्वितीयोद्देशकः समाप्तः ॥***

**॥ द्वितीयोद्देशके ग्रंथाग्रं ३०१३ ॥ ॥ एवं सर्वसङ्ख्यया ग्रंथाग्रं १३८९१ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥
॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ तृतीय उद्देशकः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तो द्वितीयोद्देशकः। सम्प्रति तृतीय आरभ्यते, तत्र चेदमादि सूत्रम्—

**सूत्रम्—भिक्खू य इच्छेज्जा गणं धारित्तए भगवं च से अपलिच्छिण्णे एवं से नो कप्पइ गणं धारित्तए, भगवं च से पलिच्छिन्ने एवं से कप्पइ गणं धारित्तए ॥ १ ॥**

अथास्य सूत्रस्य कः सम्बन्धः ? तत आह—

**तेसिं चिय दोण्हंपि, सीसाऽऽयरियाण पविहरंताणं।**
**इच्छेज्ज गणं वोढुं, जइ सीसो एस संबंधो ॥ १३४० ॥**

**तयोरेव शिष्याऽऽचार्ययोः** कारणवशतो **द्वयोरपि** केवलयोः **प्रविहरतोर्यदि शिष्यो गणं वोढुं** धारयितु**मिच्छेत्** ततः तस्य विधिर्वक्तव्यः, तद्विधिप्रतिपादनार्थमिदं सूत्रमिति। **एष** पूर्वसूत्रेण सहास्य सूत्रस्य **सम्बन्धः** ॥१३४०॥



For Private and Personal Use Only

प्रकारान्तरेण सम्बन्धमेवाह—

**तेसिं कारणियाणं, अन्नं देसं गया य जे सीसा ।**
**तेसाऽऽगंतुं कोई, गणं धरेज्जाह वा जोग्गो ॥ १३४१ ॥**

अथवेति प्रकारान्तरे। **तयोः** आचार्य–पारिहारिकयोः **कारणिकयोः** कारणवशतः तथास्थितयोर्ये **अन्यं देशं गताः शिष्यास्तेषां** मध्यात्**कोऽपि** भिक्षुः **योग्यः समागत्य गणं धारयेत्** ततस्तद्विधिप्रतिपादनार्थमधिकृतसूत्रारम्भः ॥१३४१॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**भिक्षुः**, चशब्द आचार्यपदयोग्यानेकगुणसमुच्चयार्थः, **इच्छेद् गणं धारयितुम्। भगवांश्च से** तस्य भिक्षोर**परिच्छदः** परिच्छदरहितः, परिच्छदश्च द्विधा–द्रव्यतो भावतश्च, तत्र द्रव्यतः परिच्छदः शिष्यादिपरिवारः। भावतः सूत्रादिकम्। तत्र भगवानाचार्योऽपरिच्छदो द्रव्यतः भावतः पुनर्नियमात् सपरिच्छदः, अन्यथाऽऽचार्यत्वायोगात्, चशब्दात् भिक्षुश्च द्रव्यतोऽपरिच्छदो, भावतः सपरिच्छदः परिगृह्यते। **एवं से** इत्यादि, एवममुना प्रकारेण से तस्य

**न कल्पते गणं धारयितुम्,** एवंशब्दो विशेषद्योतनार्थः, स चामुं विशेषं द्योतयति-आचार्ये द्रव्यतोऽपरिच्छदे भिक्षोः सपरिच्छदस्य अपरिच्छदस्य वा न कल्पते गणं धारयितुमिति, **भगवांश्च से** तस्य द्रव्यतोऽपि परिच्छन्नः परिच्छदोपेतः, चशब्दात्सोऽपि च द्रव्यतोऽपि **परिच्छन्न**स्तत **एवं से** तस्य **कल्पते गणं धारयितु**मिति॥ अमुमेव सूत्रावयवं **भाष्य**कारो व्याख्यानयति—

**थेरे अपलिच्छन्ने, अपरिच्छन्ने सयं पि चगहणा।**
**दव्वाछन्नो थेरो, इअरो पुण वा भवे दोहिं ॥ १३४२ ॥**

**स्थविरो** नाम आचार्यः, असावेव पूजावचनेन भगवत्शब्देनोच्यते। भगवानिति महात्मनः संज्ञा। स स्थविरो **अपरिच्छन्नः** परिच्छदरहितः। **चग्रहणात्** चशब्दोपादानाद् भिक्षुरपि **स्वयमपरिच्छन्नः**। तत्र **स्थविरो अपरिच्छन्नो द्रव्यतः** परिवाररहितो द्रष्टव्यः, भावतः पुनर्नियमात्सपरिच्छदः। **इतरः शिष्यः पुनर्द्वाभ्या**मपि वा द्रव्य-भावाभ्यामपरिच्छन्नो **भवति**। तत्र भावतोऽपरिच्छन्नो नियमादयोग्य एव। इतरस्तु द्रव्यतोऽपरिच्छदो भावतः सपरिच्छदो योग्यः। अत्राचार्ये द्रव्यतोऽपरिच्छदे किं सर्वथा भिक्षोर्गणं धारयितुं न कल्पते, उताऽस्ति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कश्चित्कल्पनाप्रकारः ? अस्तीति ब्रूमस्तथा चाह—

**नोकारो खलु देसं, पडिसेहयती कयाइ कप्पेज्जा।**
**ओसन्नम्मि उ थेरे, सो चेव परिच्छओ तस्स ॥ १३४३ ॥**

"एवं से नो कप्पइ" इत्यत्र **नोशब्दो** देशवचनत्वात् **देशं प्रतिषेधय**ति। तेन **कदाचित्कल्पेता**पि, कदा कल्पते ? इति चेदत आह- **अवसन्ने** आचार्ये। इयमत्र भावना— यद्याचार्यो भावतः सूत्राद्युपेतस्तपःसंयमोद्यतस्ततस्तस्मिन् द्रव्यतोऽपरिच्छदे न कल्पते। अथ चेदवसन्नस्तर्हि तस्मिन् द्रव्यतोऽपरिच्छदे सपरिच्छदे वा कल्पते। **खलु**शब्दः विशेषणार्थः। स चैतद्विशिनष्टि— यो भावतः सपरिच्छदस्तस्य कल्पते, न शेषस्य। सपरिच्छदे चावसन्ने आचार्ये गणं धारयति शिष्ये य आचार्यस्य **परिच्छदः** परिवारः **स एव तस्य** शिष्यस्य भवति व्यवहारतस्तस्याऽऽभवनात्, इतरस्य तु न किमप्याभवति, शिथिलत्वाद्। इह परिच्छद-विषया चतुर्भङ्गिका। तद्यथा-द्रव्यतोऽपरिच्छन्नो भावतश्चापरिछन्नः १, द्रव्यतोऽपरिच्छन्नो भावतः परिच्छन्नः २, द्रव्यतः सपरिच्छदो भावतोऽपरिच्छदः ३, द्रव्यत सपरिच्छदो भावतश्च सपरिच्छदः ४। तत्र चतुर्थभङ्गवर्ती शुद्धः, शेषास्त्वशुद्धाः, एष सूत्रार्थः॥ १३४३ ॥



For Private and Personal Use Only

अधुना निर्युक्तिविस्तरः-

**भिक्खू इच्छा गणधारए, अपव्वाविते गणो नत्थि।**
**इच्छा तिगस्स अट्ठा, महातलागेण ओवम्मं ॥ १३४४ ॥**

**भिक्षोरिच्छा गणं धारयितुं**, स च **गणः** स्वयम**प्रव्राजिते नास्ति**, तस्मात् स्वयं साधवः प्रव्राजनीयाः। अथवा यद्यपि स्वयमप्रव्राजने गणो नास्ति तथाऽपि यदाऽवसन्न आचार्यो जातो भवति तदा योऽसावाचार्यस्य गणः स एव तस्य भवति। **इच्छा** च गणं धारयितुं **त्रिकस्य** ज्ञानादिरत्नत्रयस्या**र्थाय**, न तु पूजा-सत्कारनिमित्तमत्रार्थे **औपम्यम्** उपमा **महातडाकेन**। किमुक्तं भवति ? पद्मसरसा महातडाकेन गणपरिवर्द्धस्योपमा (धारणस्योपमा) कर्तव्या। सा चाग्रे भावयिष्यते। एष **निर्युक्तिगाथासङ्क्षेपार्थः** ॥१३४४ ॥

व्यासार्थं तु **भाष्यकृद्विवक्षुः** प्रथमत इच्छानिक्षेपमाह—

**जो जं इच्छइ अत्थं, नामादी तस्स सा हवइ इच्छा।**
**नामम्मि जं तु नामं, इच्छति नामं च जस्सिच्छा ॥ १३४५ ॥**

**यो** नाम **यमर्थं नामादि**लक्षण**मिच्छति, तस्य सा भवति इच्छा,** यो नामेच्छति तस्य नामेच्छा, स्थापनामिच्छति स्थापनेच्छा, एवं द्रव्येच्छादिकमपि भावनीयम्। इच्छायाश्च निक्षेपः षोढा। तद्यथा- नामेच्छा, स्थापनेच्छा, द्रव्येच्छा, क्षेत्रेच्छा, कालेच्छा, भावेच्छा। तत्र नामेच्छामभिधित्सुराह-**नामम्मी**त्यादि, नाम्नि, नामविषया इच्छा इयं **यन्नाम** यद्देवदत्तादिकमात्मन इच्छति, देवदत्तादिकस्य नाम्न इच्छा नामेच्छेति भावः। अथवा **यस्य इच्छे**ति **नाम** सा, नाम-नामवतोरभेदोपचाराद् नाम चासौ इच्छा च नामेच्छा ॥ १३४५ ॥

स्थापनेच्छामाह—

**एमेव होइ ठवणा, निक्खिप्पइ इच्छए व जं ठवणं।**
**सामित्ताई जहसंभवं, तु दव्वादिसुं भणसु ॥ १३४६ ॥**

**एवमेवा**नेनैव नामगतेन प्रकारेण **भवति स्थापना** स्थापनेच्छा, अतिदेशोक्तमेव[१] आह— या इच्छा **निक्षिप्यते** सा, स्थापना चासाविच्छा च स्थापनेच्छेति व्युत्पत्तेः स्थापनेच्छा। अथवा यां[२] **स्थापनामिच्छति** सा स्थापनेच्छा, स्थापनाया इच्छा स्थापनेच्छेति व्युत्पत्ते :।

---

**१. °क्तमेव यदिच्छतनि°पु. प्रे. ॥ २. यत् स्था° पु. प्रे.॥**

द्रव्येच्छा द्विधाआगमतो नोआगमतश्च। तत्र आगमत इच्छापदार्थज्ञाता तत्र चानुपयुक्तः। नोआगमतस्त्रिधा-ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्। तत्र ज्ञशरीर-भव्यशरीरे प्राग्वत्। तद्व्यतिरिक्ता यद् द्रव्यमिच्छति। सा च त्रिधा सचित्तद्रव्येच्छा अचित्तद्रव्येच्छा मिश्रद्रव्येच्छा। तत्र सचित्तद्रव्येच्छा त्रिधा द्विपद-चतुष्पदा-ऽपदभेदात्। तत्र द्विपद-सचित्तद्रव्येच्छा-यत् स्त्रियमिच्छति पुरुषमिच्छति इत्येवमादि। चतुष्पदसचित्तद्रव्येच्छा यदश्वमिच्छति गावमिच्छतीत्यादि। अपदसचित्तद्रव्येच्छा आम्रस्येच्छा मातुलिङ्गस्येच्छेत्यादि। अचित्तद्रव्येच्छा सुवर्णेच्छा हिरण्येच्छेत्यादि। मिश्रद्रव्येच्छा-सुवर्णाद्यलङ्कारविभूषितस्य द्विपदादेरिच्छा। अथवा **द्रव्यादिषु** द्रव्य-क्षेत्र-कालेषु **यथासम्भवं स्वामित्वादि** स्वामित्व-करणा-ऽधिकरणानि **भणतः**, स्वामित्वादिभिः प्रकारैर्द्रव्य-क्षेत्र-कालेच्छा वक्तव्या इति भावः।

तत्र स्वामित्वेन द्रव्येच्छा यथा आत्मनः पुत्रमिच्छति पुत्रस्य पुत्रमिच्छति इत्यादिका, करणेन यथा मद्येनाऽभ्यवहृतेन स्तैन्येच्छा कामेच्छा वा जायते इत्यादि। अधिकरणेन यथा-सुप्रस्तारितायां शय्यायां स्थितस्य कामेच्छा समुत्पद्यते। क्षेत्र-कालावचेतनौ, ततो न तयोः स्वयं स्वामित्वेन इच्छा भवति, ततः करणाऽधिकरणाभ्यां तत्र योजना। तत्र [1]क्षेत्रे [करणेन]

१. यत् स्था° पु. प्रे. मु.॥

यथा- सुन्दरेण क्षेत्रेण लब्धेन क्रीडनेच्छा[१] प्लवनेच्छा वा जायते, अधिकरणेन यथा- गृहे स्थितस्य भोगेच्छा कामेच्छा वा, सद्गुरुकुलवासे सम्यगनुष्ठानेच्छा वा समुपजायते इत्यादि। काले करणेन यथा यौवनकालेन धनेच्छा कामेच्छा वा जायते इत्यादि। अधिकरणे[न] यथा हेमन्ते रात्रौ शीतेन पीडितः सूरोद्गमकालमिच्छति। भावत इच्छा द्विधा-आगमतो नोआगमतश्च। तत्रागमत इच्छापदार्थज्ञाता, तत्र चोपयुक्तः '**उपयोगो भावनिक्षेपः**' इति वचनात् ॥ १३४६ ॥

नोआगमत आह—

**भावे पसत्थमपसत्थिया य, अपसत्थियं न इच्छामो।**
**इच्छामो य पसत्थं, नाणादीयं तिविहमिच्छं ॥ १३४७ ॥**

नोआगमतो **भावत** इच्छा द्विधा-**प्रशस्ता अप्रशस्ता च**। मकारोऽलाक्षणिकः। तत्राज्ञानादिविषया इच्छा **अप्रशस्ता,** [तां **नेच्छामः**]प्रशस्ता **ज्ञानादिविषया,** तां **त्रिविधामिच्छामिच्छामः** ॥ १३४७ ॥

गाथा १३४६-१३४९ इच्छा-स्थापना-गण शब्दानां निक्षेपाः

६६७ (A)

---

१. °च्छा वपनेच्छा वा - वा. मो. पु. मु. ॥

सम्प्रति गणस्य निक्षेपमभिधित्सुराह—

**नामाइगणो चउहा, दव्वगणो खलु पुणो भवे तिविहा।**
**लोइयकुप्पावयणिओ, लोउत्तरिओ य बोधव्वो ॥ १३४८ ॥**

**नामादिरूपो गणश्चतुर्धा** चतुष्प्रकारः। तद्यथा-नामगणः, स्थापनागणो, द्रव्यगणो भावगणश्च। तत्र यस्य गण इति नाम स नामगणः। गणस्य स्थापनाऽक्ष-वराटकादिषु स्थापनागणः। **द्रव्यगणो** द्विधा-आगमतो नोआगमतश्च। तत्रागमतो गणशब्दार्थज्ञाता तत्र चानुपयुक्तः,नोआगमतस्त्रिधा ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्। तत्र ज्ञशरीर-भव्यशरीरे प्राग्वत्, तद्व्यतिरिक्त**स्त्रिधा,** तद्यथा- **लौकिकः कुप्रावचनिको लोकोत्तरिक**श्च ॥ १३४८ ॥

एतेषां त्रयाणामपि प्रतिपादनार्थमाह—

**सचित्तादिसमूहो, लोगम्मि गणो उ मल्ल-पोरादि।**
**चरकादिकुप्पवयणे, लोगोत्तरओसन्नऽगीयाणं ॥ १३४९ ॥**

श्री व्यवहार-सूत्रम् तृतीय उद्देशकः ६६८ (A)

**सचित्तादिसमूहः** सचित्तसमूहो अचित्तसमूहो मिश्रसमूहश्च द्रव्यगणः। तत्र सचित्तसमूहो यथा **मल्लगणः**, तथा पुरे भवः **पौरस्तस्य** गणः पौरगणः। अचित्तसमूहो यथा शस्त्रगणः। मिश्रसमूहो यथा सुवर्णालङ्कारभूषितो मल्लगणः पौरगणो वा। **कुप्रावचने** द्रव्यगणो यथा **चरकादिः** चरकादिगणः। चरकः परिव्राजकः, आदिशब्दात् पाण्डुराङ्गादिपरिग्रहः। **लोकोत्तरिको** द्रव्यगणः **अवसन्नाऽगीतार्थानां** समूहः। किमुक्तं भवति? पार्श्वस्थादिगणः, यदि वा प्रवचनविडम्बकः कुमतप्ररूपकगणः अथवा अगीतार्थगणो लोकोत्तरिको द्रव्यगण इति ॥ १३४९ ॥

भावगणो द्विधा–आगमतो नोआगमतश्च। तत्राऽऽगमतो ज्ञाता तत्र चोपयुक्तः। नोआगमतो आह—

गाथा १३५०-१३५५ भावगण स्वरूपम् ६६८ (A)

**गीयत्थउज्जुयाणं, गीयपुरोगामिणं वऽगीयाणं।**
**एसो खलु भावगणो, नाणादितिगं च जत्थत्थि ॥ १३५० ॥**

**गीतार्थानामुद्युक्तानां** शक्त्यनुपगूहनेन संयमे प्रवर्तमानानामथवा **अगीतानामपि** अगीतार्थानामपि, अपिशब्दो लुप्तोऽत्र द्रष्टव्यः, **गीतपुरोगामिनां** पुरोगामिगीतार्थनिश्रितानां

समूहो नोआगमतो भावगणः। **एष खलु** अनन्तरोदितो **भावगणो** नोआगमतो भावगणः। अथवा किं बहुनोक्तेन ? **यत्र ज्ञानादित्रिकमस्ति** स नोआगमतो भावगणः ॥ १३५० ॥

**भावगणेणऽहिगारो, सो उ अपव्वाविए न संभवति।**
**इच्छातियगहणं पुण, नियमणहेउं तओ कुणइ ॥ १३५१ ॥**

**भावगणेन** नोआगमतो भावगणेन **अधिकारः** प्रयोजनम्। **स च** भावगणो यथोक्तरूपः स्वय**मप्रव्राजिते नास्ति,** तस्मात् स्वयं साधवः प्रव्राजनीयाः, ते परिवारतया कर्तव्याः। अथवा प्रमाद्यत्याचार्ये यः परिवारः स तस्य परिवारः। यथा सकः निर्युक्तिकारो द्वारगाथाया**मिच्छात्रिकग्रहणं नियमन हेतुं करोती**त्युक्तं तत्र किं नियमयति ? सूरिराह—

*नियमेइ निज्जरनिमित्तमेव न उ पूयमाइअट्ठाए।*
*धारेइ गणं जइ पहु, महातलागेण सामाणो ॥*

निर्जरानिमित्तमेव गणं धारयति, न तु पूजादिनिमित्तम्। स च गणं धारयन् यतिप्रभुर्महातडागेन समानो भवति ॥ १३५१ ॥

महातडागेन समानतामेव भावयति—

**तिमिमगरेहिं न खुब्भति, जहंबुनाहो वियंभमाणेहिं।**
**सो च्चिय महातलागो पफुल्लपउमं व जं अन्नं ॥ १३५२ ॥**

**यथाम्बुनाथस्तिमि-मकरैर्विजृम्भमाणैर्न क्षुभ्यति,** न च स्वस्थानाच्चलति, **स एव** चाम्बुनाथ इह **महातडागम्,** तथा विवक्षणात्। अथवा समुद्रात् **यदन्यत्प्रफुल्लपद्मं** महासरस्तन्महातडागम् ॥१३५२॥

उपनयमाह—

**परवादीहिं न खुब्भति, संगिण्हंतो गणं च न गिलाइ।**
**होती य सयाभिगमो, सत्ताण सरोव्व पउमड्ढो ॥ १३५३ ॥**

तिमि-मकरैरम्बुनाथ इव **परवादिभिराक्षिप्यमाणो न क्षुभ्यति। न च गणं संगृह्णन्** यथौचित्येनानुवर्तमानो **ग्लायति, यथा वा सरः पद्माढ्यं सत्त्वानां सदाभिगमं भवत्येवं** सदा सत्त्वानामभिगमः साधुः प्रभुर्भवति ॥ १३५३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एयगुणसंपउत्तो, ठाविज्जइ गणहरो उ गच्छम्मि।**
**पडिबोहादीएहि य, जइ होइ गुणेहिं संजुत्तो ॥ १३५४ ॥**

**एतेन**-समुद्रतुल्यतारूपेण पद्मसर:[1]समानता**गुणेन** वा **सम्प्रयुक्तो गच्छे गणधरः स्थाप्यते**। स चैतद्गुणसम्प्रयुक्तस्तदा भवति **यदि प्रतिबोधादिभिर्**वक्ष्यमाणलक्षणै**र्गुणैर्युक्तो भवति**। तत्र प्रतिबोधादयो गुणाः प्रतिबोधकादिदृष्टान्तेभ्यो भावनीया इति॥ १३५४ ॥

तानेव प्रतिबोधकादीन् दृष्टान्तानुल्लिङ्गयति—

**पडिबोहग१ देसिय२ सिरिघरे३ य निज्जामगे४ य बोधव्वे।**
**तत्तो य महागोवो५, एमेया पडिवत्तिओ पंच ॥ १३५५ ॥**

**प्रतिबोधकः** सुप्तोत्थापकः१, **देशकः** मार्गदेशी२, **श्रीगृहीकः** भाण्डागारनियुक्तः३, **निर्यामकः** समुद्रे प्रवहणनेता ४। **तथा महागोपो**ऽतीवगोरक्षणकुशलः ५ **एवमेता** अनन्तरोदिताः **पञ्च प्रतिपद्यते**ऽधिकृतोऽर्थ आभिरिति प्रतिपत्तयः उपमाः ॥ १३५५ ॥



---

**१. पद्माढ्यसरः वा. मो. पु. मु. ॥**

For Private and Personal Use Only

तत्र प्रतिबोधकोपमां भावयति—

**जह आलित्ते गेहे, कोइ पसुत्तं नरं तु बोहेज्जा।**
**जरमरणादिपलित्ते, संसारघरम्मि तह उ जिए ॥ १३५६ ॥**

**यथा आ**–समन्ततो **दीप्ते प्रदीप्ते गृहे कोऽपि** परमबन्धुः **प्रसुप्तं नरं प्रबोधयेत्तथा संसारगृहे जरामरणादिप्रदीप्ते जीवान्** अप्रतिबुद्धान् भावसुप्तान् प्रबोधयति स स्थापनीयो गणधरो देशितस्तीर्थकरैः। उक्तः प्रतिबोधकदृष्टान्तः ॥ १३५६ ॥

सम्प्रति देशकादिदृष्टान्तमाह(न्तानाह)—

**बोहेइ अपडिबुद्धे, देसियमाई एव वि जोएज्जा।**
**एयगुणविप्पहीणे, अपलिच्छन्ने य न धरेज्जा ॥ १३५७ ॥**

**बोहेइ अपडिबुद्धे** इति पूर्वगाथाव्याख्यायां व्याख्यातम्१, एवं **देशिकादीनपि** दृष्टान्तान् **योजयेत्**। तांश्चैवं–यो ग्रामादीनां पन्थानमृजुकं क्षेमेण प्रापयति स देशक इष्यते, एवं ज्ञानादीनामविराधनां कुर्वन् यो गच्छं परिवर्धयति स गणधरः स्थापनीयः न शेषः २।

श्रीगृहिकदृष्टान्तभावना- यथा यो रत्नानि सुनिरीक्षितानि[1] करोति स श्रीगृहे नियुज्यते, एवं यो ज्ञानादीनामात्म- संयमयोश्चाविराधनया गणं परिवर्धयति स तादृशो गणस्य नेता कर्तव्यः३। निर्यामकदृष्टान्तभावना- यथा निर्यामकस्तथाकथञ्चनापि प्रवहणं वाहयति यथा क्षिप्रमविघ्नेन समुद्रस्य पारमुपगच्छति, एष एव च तत्त्वतो निर्यामक उच्यते, शेषो नामधारकः। एवं य आचार्यस्तथाकथञ्चनापि गच्छं परिवर्धयति यथा क्षिप्रमविघ्नेनात्मानं च गच्छं च संसारसमुद्रस्य पारं नयति, स तत्त्वतो गणधरः, शेषो वै नाममात्रपरितुष्टः ४। महागोपदृष्टान्तभावना-यो गोपो गाः श्वापदेषु विषमेषु वा प्रदेशेष्वटव्यां वा पतन्तीर्वारयति, वारयित्वा च क्षेमेण स्वस्थानमानयति स महागोप उच्यते, एवमाचार्योऽपि यो गणमस्थानेषु प्रत्यन्तदेशादिषु विहारिणं वारयति पूर्वाभ्यासप्रवृत्तानि च प्रमादस्खलितान्यपनयति स तादृशो गणपरिवर्धकः करणीयः न शेषः ५। अथवा प्रतिबोधको नाम गृहचिन्तक उच्यते, यो गृहं चिन्तयन् यो यत्र योग्यस्तं तत्र व्यापारयति, तत्र व्याप्रियमाणं च प्रमादतः स्खलन्तं निवारयति स गृहचिन्तक उच्यते। एवं यः स्थापितो यो यत्र योग्यस्तं तत्र नियुङ्क्ते। नियुक्तांश्च प्रमादतः स्खलतः शिक्षयति स

१. सुरक्षितानि - खं ॥

स्थापनीयो गणधरपदे, नेतर इति। **यश्चैतद्गुणविप्रहीणः** प्रतिबोधादिगुणविकलो यश्च द्रव्यतो भावतश्च **अपरिछन्नः** परिच्छदहीनः स गणं **न धारयेत्**। न स गणधरपदे स्थापनीय इति भावः ॥ १३५७॥

**दोहि वि अपलिच्छन्ने, एक्केक्केणं व अपलिच्छन्ने य।**
**आहरणा होंति इमे, भिक्खुंमि गणधरंतम्मि ॥ १३५८ ॥**

द्रव्यतोऽपरिच्छन्नो भावतश्चापरिच्छन्न इत्यादि चतुर्भङ्गी प्रागेवोपदर्शिता। तत्र **भिक्षौ गणं धारयति द्वाभ्यामपि** द्रव्यतो भावतश्चेत्यर्थः **अपरिच्छन्ने** परिच्छदरहिते, अनेन प्रथमभङ्ग उपात्तः। **एकैकेन** वा **अपरिच्छन्ने** भावतोऽपरिच्छन्ने द्वितीयभङ्गवर्तिनि, द्रव्यतोऽपरिच्छन्ने तृतीयभङ्गवर्तिनि **इमानि** वक्ष्यमाणानि **आहरणानि** उदाहरणानि भवन्ति ॥ १३५८ ॥

तान्येवाह—

**भिक्खू कुमार१वियरय, झामण२ पंती३ सियालरायाणो४।**
**वित्तत्थजुद्धअसती ५, दमग६ भयग-दामगाईया७ ॥ १३५९ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भिक्षौ** द्रव्यभावाभ्यामपरिच्छन्ने गणं धारयति **कुमार**दृष्टान्तः१। **वियरए** लघुश्रोतोरूपः, **झामण** वनदवे द्वितीयो दृष्टान्तः२, तृतीयः **पङ्कि**दृष्टान्तः३, चतुर्थः **शृगालराज**दृष्टान्तः। पञ्चमो **वित्रस्ते**न सिंहेन सह **युद्धस्याभावो** दृष्टान्तः ५, एते पञ्च दृष्टान्ताः अप्रशस्ताः प्रथमभङ्गवर्तिनि, प्रशस्ताश्चतुर्थभङ्गे। द्वितीये **द्रमक**दृष्टान्तस्तृतीयभङ्गवर्तिनि **भृतकस्य** सतो **दामकादि**परिग्रहो दृष्टान्तः ७। अत्राऽऽदिशब्दात् **मयूराङ्ग**चूलिकादिपरिग्रहः ॥ १३५९ ॥

तत्र कुमारदृष्टान्तभावनार्थमाह—

**बुद्धी-बलपरिहीणो, कुमार पच्चंत डमरकरणं तु।**
**अप्पेणेव बलेणं, गेण्हावण सासणा रन्ना ॥ १३६० ॥**

एको राज**कुमारः**, **बुद्धिबलपरिहीनः** हस्त्यादिबलपरिहीनश्चेति भावः। एतेन द्रव्य-भावपरिच्छदरहितत्वमाख्यातम्। स **प्रत्यन्त**देशे स्थितः **डमरं**-देशविप्लवं करोति। ततो दायादेन **राज्ञा** तं बुद्धि-बलपरिहीनं ज्ञात्वा **अल्पेनैव** स्तोकेनैव **बलेन** दण्डप्रेषणेन **ग्रहापणं** तस्य राज्ञः कृतम्। ग्रहणानन्तरं च **शासना** कृता, ग्राहयित्वा स विनाशित इति भावः ॥ १३६० ॥



For Private and Personal Use Only

अत्रैवोपनयमाह—

**सुत्तऽत्थअणुववेतो, अगीयपरिवार गमणपच्चंतं।**
**परतित्थिकओहावण, सावगसेहादवण्णो उ ॥ १३६१ ॥** दारं १।

एवं **सूत्रेण अर्थेन चानुपपेत**:-असम्पन्नः अनेन भावतोऽपरिच्छन्नतामाह। **अगीतपरिवारो** अगीतार्थपरिवृतः अनेन द्रव्यतोऽपरिच्छन्नत्वमुक्तम्। स **प्रत्यन्तं** देशं प्रति **गमनं** विधाय आचार्यत्वं करोति। स च तथा आचार्यत्वं विडम्बयन् **परतीर्थिकैः** परिज्ञाय निष्पृष्टव्याकरणः क्रियते। तदनन्तरं **श्रावकाणामपभ्राजना**, यथा— विडम्बिता यूयम्, न भवदीयो धर्मः शोभनः, तथा च भवदाचार्यः पृष्टः सन् न किमप्युत्तरं ददाति, किन्त्वसमञ्जसं प्रलपतीति; तथा **शिष्या** अपि तैर्विपरिणम्यन्ते, एवं च जायते महा**नवर्णः** शासनस्य। तदेवं यत इमे दोषास्तस्माद् द्रव्य-भावपरिच्छदरहितेन न भिक्षुणा गणो धारयितव्यः॥ १३६१॥

गतं कुमारद्वारम्। अधुना वियरयदृष्टान्तमाह—

**वणदव सत्तसमागम, वियरे सिंहस्स पुंच्छ डेवणया।**
**तं दिस्सं जंबूएण- वि वियरे छूढामिगाईया ॥ १३६२ ॥**

वियरयो नाम तनुश्रोतोरूपो जलाशयः, स च षोडशहस्तविस्तारो नद्यां महागर्तायां वा तस्याऽऽकुञ्चः, त्रिहस्तविस्तारस्तस्य प्रवेशः[1], मध्ये[2] वेण्टम्। अन्नया अडवीए वणदवो जातो, सो सव्वतो समन्ता डहंतो वच्चइ। ताहे मिगादयो सत्ता तस्स वणदवस्स भीया परिधावंता वेंटं पविट्ठा। तत्थ वि सो वणदवो डहंतो आगच्छति। तत्थ य सीहो पविट्ठो आसि। ते य मिगादयो भीया चिंतंति एत्थ वि वेंटे एस वणदवो पविसइत्ति डज्झियव्वंति। ततो ते सीहं पायवडिया विण्णवेंति- तुम्हे अम्हं मिगराया, तो नित्थारेहि, सीहेणं भणितं पुच्छे मम धणियं लग्गह। ते लग्गा। ततो सीहेण प्लुतं कयं। सोलसहत्थे वित्थडं वियरयं सह मिगाइहिं डीणं। अन्नया पुणो वणदवो जातो। तहेव मिगादयो तत्थ पविट्ठा। ततो एक्को सियालो सीहेण उत्तारियपुव्वो चिंतेइ 'अहं पि सीहो विव उत्तारेहामि'त्ति मिगादयो भणति ममं पुच्छे धणियं लग्गह। ते लग्गा। तेण सियालेण प्लुतं कयं। वियरए सह मिगाइएहिं पडिओ। सव्वे विणट्ठा ते। एवं अद्धाणाइआवतीसु य गीयत्थेणं बियए पए जयणानिसेवणाए



---

१ प्रदेशमध्ये - मु.। २. मध्येऽवटम् - वा.मो.पु. ।

गच्छं नित्थारियं पासित्ता अगीयत्थो चिंतेइ— सव्वत्थ वि एवमायरियव्वं ति, एवं मन्नंतो निक्कारणे बितियपदेण गच्छेण समं विहरइ। सो तहा विहरंतो नरगाइभववियरए अप्पाणं गच्छं च पाडेइ। एष भावार्थः।

अधुना अक्षरार्थो विव्रियते-**वनदवे** जाते **सत्त्वानां** मृगादीनां वियरयपरिवृत्ते वेंटे **समागमः**। तेषां **सिंहस्य पुच्छे** लग्नानां सिंहेन सह व्यपरजसः- लघुश्रोतोरूपस्य जलाशयस्य **डेपनं** लङ्घनम्, **ततो** तद् **दृष्ट्वा जम्बूकेनाप्य**न्यदा तत्कर्तुमारब्धम्। तेन च तथाकर्तुमशकुनवता ते **मृगादयस्तस्मिन् व्यपरजसि छूढा** क्षिप्ताः ॥ १३६२ ॥

एष दृष्टान्तः, सम्प्रति दार्ष्टान्तिकयोजनामाह—

**अद्धाणादिसु एवं, दट्ठुं सव्वत्थ एव मन्नंतो।**
**भववियरयं अगीतो, पाडे अन्ने वि पवडंतो ॥ १३६३ ॥** दारं २।

**अध्वादिष्वापत्स्वेवं** द्वितीयपदेन यतनानिषेवनातो गच्छं निस्तारयन्तं **दृष्ट्वा अगीतो**ऽगीतार्थः '**सर्वत्रैव**माचरितव्यम्' इति **मन्यमानो** निष्कारणमयतनया द्वितीयपदेन गच्छं

परिपालयन् **भववियरय**मिति, द्वितीया प्राकृतत्वात् सप्तम्यर्थे, नरकादिभवरूपे व्यपरजसि प्रपतन् **अन्यानपि** स्वगच्छवासिनः **पातयति**। गतं व्यपरजोद्वारम् ॥ १३६३॥

अधुना पङ्क्तिद्वारमाह—

**जंबुक कूवे चंदे, सीहेणुत्तारणा य पंतीए।**
**जंबुकसपंतिपडणं, एमेव अगीय-गीयाणं ॥ १३६४ ॥** दारं ३।

एगया जेट्ठामूलमासे सियाला तिसिया अद्धरत्ते कूवतडे ठिया कूवं पलोयंति। तत्थतो जोण्हाए उदए चंदबिंबं पासंति चिंतेति य- चंदो कूवे पडितो। तत्थ य सिहो आगतो चिट्ठति। ततो तेहिं सियालेहिं सीहो विण्णवितो—तुमं मिगाहिवती, एस वि गहाहिवती कूवे पडितो, एयस्स गुणेणं अम्हे दिवसभूयाए रत्तीए सुहं निरुव्विग्गा वियरामो। ततो जुज्जसि तुमं गहाहिवतिमुत्तारिउं, सीहो भणति- 'पंतीए ममं पुंछे लगित्ता ओयरह। अंतिल्लस्स चंदो लग्गिहिति ताहे सव्वे प्लुतेनोत्तारेहामि'त्ति। ततो ते पंतीए सीहपुच्छे लग्गा कूवमज्झे उत्तिण्णा। सीहेण प्लुतं काउं सव्वे उत्तारिया उवरि गगणे चंदं पासेंति कूवतले य आलोलिते उदए चंदं अपासमाणा उत्तारियं ति मन्नंति।

अन्नया चंदं तहेव पासेत्ता सीहेण उत्तारियपुव्वो सियालो एवं चिंतेति। अहमवि सीहो इव उत्तारेहामि, एवं चिंतित्ता सो सियालो भणति- 'पंतीए ममं पुच्छे लग्गित्ता ओयरह'। ते ओत्तिण्णा। सीयालेण उत्तारेहामिति प्लुतं कयं। ततो असमत्थेत्ति तेहिं पुच्छेलग्गेहिं सह कूवे पडितो, तत्थेव मतो। एवमद्धाणादीसु आवईसु गीयत्थेणं बितियपदे जयणानिसेवणाए इत्यादि उपनयः पूर्ववत्। एष भावार्थः।

अधुनाऽक्षरार्थः-एकदा **जम्बूकाः** कूपतटे मिलितास्तैः **कूपे** कूपमध्ये **चन्द्रो** दृष्टः। तस्मिन् दृष्टे तदुद्धरणाय सिंहपुच्छे विलग्नानां **पङ्क्त्या** प्रविष्टानां शृगालानां **सिंहेनोत्तारणा** कृता। तद् दृष्ट्वा अन्यदा एकेन जम्बूकेन सिंहोत्तारितपूर्वेण तथा कर्तुमारब्धम्। ततस्तस्य **जम्बूकस्य सपङ्क्तिकस्य** कूपे **पतनम्। एवम**नेनैव दृष्टान्तद्वयोक्तेनैव प्रकारेणा**गीत-गीतयो**र्भवकूपे गच्छेन सह पतनं तत उत्तारणं च गच्छस्य परिभावनीयमिति ॥ १३६४ ॥

गतं पङ्क्तिद्वारम् ३। इदानीं शृगालराजद्वारमाह—

**नीलीराग खसद्दुम, हत्थी सरभा सियाल तरच्छा[1] उ।**
**बहुपरिवार अगीते विब्बुयणोहावण परेहिं ॥ १३६५ ॥**

---

१. ऋच्छगओ - पु. प्रे. ॥

एक्को सियालो रत्तिं घरं पविट्ठो, घरमाणुसेहिं चेतितो निच्छुभिउमाढत्तो। सो सुणगाईहिं पारद्धो। नीलीरागरंजणे पडितो। किह वि ततो उत्तिन्नो नीलवण्णो जातो, तं अन्ने [हत्थी] सरभ-तरक्ख-सीयालादी पासिउं भणंति— को तुमं एरिसो ? सो भणति— अहं सव्वाहिं मिगजातीहिं **खसदुमो** नाम मिगराया कतो, ततो अहं एत्थमागतो पासामि ताव 'को मं न नमति ?' ते जाणंति अपुव्वो एयस्स वण्णो, अवस्सं एस देवेहिं अणुग्गहिओ। तओ भणंति- 'अम्हे तव किंकरा, संदिसह किं करेमो ?' खसदुमो भणति-हत्थि वाहणं देह, दिन्नं, विलग्गो वियरति। अन्नया सीयालेहिं उन्नइयं ताहे खसदुमेण तं सीयालसभाव-मसहमाणेणमुन्नइयं। ततो हत्थिणा सो सीयालो त्ति नाउं सोंडाए घेत्तुं मारितो। एवं कोइ अगीयत्थो अगीयत्थपरिवारं लभित्ता पच्चंतं देसं गंतुं अहं आयरिओ त्ति पगासेइ सो कहिंचि विउसेहिं पेयालितो जाव 'न किंचि जाणति' एवं तेण अप्पा ओहामितो। एष भावार्थः।

अधुनाक्षरार्थः— नील्याः सम्बन्धी रागो यस्य स **नीलीरागः** शृगालः **खसद्रुमो** नाम मृगराजो जातः। तस्य **हस्तिनः शरभाः शृगालाः**, उपलक्षणमेतत्, **तरक्षादयश्च**[1] परिवारः,

१. ऋक्षादयश्च पु. प्रे. ॥

सोऽन्यदा कस्यापि शृगालस्योन्नदनमाकर्ण्य शृगालोन्नदितकमभूदिति उन्नदितवान्। ततः 'शृगालोऽयम्' इति ज्ञात्वा हस्तिना मारित इति शेषः। एवमगीतार्थ**बहुपरिवारे अगीते** अगीतार्थे विहरति 'बहुश्रुतोऽहमाचार्यः' इति बहुजनविश्रुतं विब्रुवाणे पृष्टव्याकरणासमर्थतया **परेभ्यः** स्वपक्षवर्तिभ्यः परपक्षवर्त्तिभ्यश्चा**पभ्राजना** भवति ॥ १३६५ ॥

अथवा अयमन्य उपनयः—

**सेहादीकज्जेसु व, कुलादिसमितीसु जंपउ अयं तु।**
**गीएहिं विस्सुयं तो, निडोहणमपच्चतो सेहे ॥ १३६६॥** दारं ४

वाशब्द उपनयान्तरसूचकः। **शैक्षकादिकार्येषु कुलादिसमितिषु** कुल-गण-सङ्घसमवायेषु श्रावकाः सिद्धपुत्राश्च ब्रुवते- **अयमेव तुः** एवकारार्थः, बहुश्रुतः **जल्पतु** व्यवहारनिर्णयं करोतु। यथा- कस्याऽऽभवति? ततस्तेनाव्यवहारमुक्तम्। तच्च **गीतै** र्गीतार्थै**र्विश्रुतष्ट्र** ततस्तै**र्निहोडण**मिति निहेठितम्, यथा- अगीतार्थ एष न जानाति व्यवहारमिति शेषः। **ततः शैक्षे** प्राकृतत्वात् षष्ठ्यर्थे सप्तमी बहुवचने एकवचनम्, शैक्षकाणाम्, उपलक्षणमेतत्, श्रावकाणां सिद्धपुत्राणां च तद्वचस्य**प्रत्ययो** जातः, चिन्तयन्ति च- एष एतावन्तं

कालमस्माभिर्गीतार्थः संभावित इति ॥ १३६६ ॥

गतं शृगालराजद्वारम् ४ सम्प्रति 'वित्तत्थ जुद्ध असति' [गा. १३५९]त्ति द्वारं व्याचिख्यासुराह—

**एक्केक्क एगजाती, [1]पतिदिण समस देवकूवपडिबिंबं।**
**सिंहे पुच्छक एज्जण, कूवम्मि य डेव उत्तरणं ॥ १३६७ ॥**

**एमेव जंबुगो वी, कूवे पडिबिंबमप्पणो दिस्सा।**
**डेवणय तत्थ मरणं, समोयारो गीय-अगीयाणं ॥ १३६८ ॥** दारं ५।



एगो सीहो, सो हरिणजातीणं लुद्धो दिवसे दिवसे हरिणं मारेऊण खाति, तओ हरिणेहिं विण्णवितो किं मिगराय! तुमं हरिणजातीण एक्कयाण परिनिविट्ठो ? तो पसायं करेहि सव्वमिगजातीणं, वारएणं पइदिवसमेक्केक्कं मिगं खाहि। सीहेणं चिंतियं-जुत्तमेस भणइ, ततो सव्वे मिगा मेलिता, सिंहेण भणिया तुब्भे कुलजुत्तीए (जुत्तत्ताए) आत्मीयकुलौचित्येनेत्यर्थः-

१ पतिदिणसम एव देव॰ ला. ॥

सव्वमिगजातीणं वारएणं पइदिवसं मम सट्ठाणट्ठियस्स एगं पेसेज्जाहि। तेहिं अब्भुवगयं, ततो ते मिगा तहेव पेसेंति। अन्नया ससगजातीए वारए ससगा संपसारेंति, मन्त्रयन्तीत्यर्थः- को वच्चउ अज्ज सीहसगासे? तत्थ एगो वुड्ढससगो भणति- अहं वच्चामि, जो सव्वेसिं मिगाणं संतिं काउं एमित्ति सो चलिओ। अंतराले मारुयकूवसरिसं कूवं दट्ठुं उस्सूरे सीहसगासमागतो, ताहे सिहेण भणियं- 'किं रे? तुमं उस्सूरे आगतोसि' ससगो भणति- अहं पए आगच्छंतो संतो अन्नेण सिहेण रुद्धो जहा- कहि य वच्चसि ? ततो मए सब्भावो कहितो। ताहे सो भणति- को सो अन्नो ? न होइ सो मिगरायाइत्तस्स अहिगारी, अहं मिगराया। ततो मए भणियं- जइ अहं तस्स मिगरायस्स सगासं न जामि तो सो रुट्ठो सव्वे ससगा उच्छादेहिति। तम्हा जामि तस्स सगासं, कहेमि सब्भावं, ततो जो तुम्हं बलितो होहिति तस्स अम्हे आणं काहामो। ताहे अहं तेण भणितो- वच्च, कहेहि, आगच्छ मम सगासं जति ते सत्ती अत्थि, ततो सीहो भणति- 'दंसेहि ममं तं सिंहं', ततो ससओ सीहेण सममागम्म अगडं दुरत्थो चेव दंसेति। भणति य- एत्थ सो पविट्ठो चिट्ठति। जइ न पत्तियसि तो तुमं उग्गज्ज जेण सो वि उग्गज्जेइ। ततो तेण उग्गज्जियं, उग्गज्जपडिसद्दो उट्ठितो। ततो मुहुत्तं अच्छइ जाव न पुणो कोवि उग्गज्जइ। ताहे सीहो चिंतेइ- नूणं मम भएण वित्तत्थो तो न गज्जइ निप्फिडइ वा। तं एत्थेव कूपे पविसित्ता मारेमि त्ति पडितो

अपेक्खमाणो चिंतेति- नूणं निलुक्को। ताहे सीहो गज्जइ रोक्किरइ य। ततो चिंतेइ- न जुज्झिउकामो मए समं। एवं जुद्धासतीए सीहो प्लुतं काउं उत्तिण्णो। एवं गीयत्थस्सवि जइवि छलणा भवति तहावि सो जाणगत्तणेण अप्पाणं विसोहेइ।

तहा एगो जंबुगो। सो भमंतो कह वि कूवतडे समागतो। कूवे पाणियं पलोइयं, दिट्ठं अत्तणो पडिबिंबं। ततो उन्नयइ ताहे उच्छलितो पडिसद्दो। तं सोउं एस मे हक्कारइ त्ति राभसियाए पडितो 'तं पमाणं प्लुतं काउमसमत्थो' त्ति तत्थेव मतो एवमगीयत्थो छलितो न सक्केइ अप्पाणं पच्चुद्धरिउं इति तस्स गणो न दायव्वो, एष भावार्थः।

अधुनाक्षरार्थविवरणम्। सर्वा मृगजातयो मिलित्वा **प्रतिदिवसमेकैकमेकस्या जातेः** सिंहस्य स्थानस्थितस्य समर्पयन्ति। अन्यदा शशकस्य वारको जातः। सोऽपान्तराले **देवकूपप्रतिबिम्बं** मरुकूपसदृशमतीवोण्डं कूपं दृष्ट्वेत्यर्थः, चिरात् सिंहसकाशमागतः। ततः **सिंहे** सिंहस्य **पृच्छा** कस्माच्चिरादागतः? तस्यान्यसिंहकथनम्। तत स प्राह- क्व तिष्ठति सोऽन्यसिंहस्तस्य कूपकथनं तत **एज्जण**त्ति सिंहस्य कूपसमीपागमनं तदनन्तरं पूर्वप्रकारेण **कूपे डेपनम्** आत्मनः प्रतिक्षेपः। ततः प्लुतेनो**त्तरणम्**।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एवमेवे**त्यादि, एवमेव यथा प्रवृत्त्यैवेत्यर्थः। **जम्बूकोऽ**पि कूपे **प्रतिबिम्बमात्मनो दृष्ट्वा डेपनकं** प्रतिक्षेपणमात्मनः कृतवान्। **ततस्**तस्य मरणम्। एवं **समवतारः** उपनयो यथाक्रमं **गीतार्थाऽगीतार्थयोः** कर्तव्यः। स च प्रागेव कृत इति ५॥ १३६७-६८ ॥

साम्प्रतमेतान्युदाहरणानि यं भङ्गमाश्रित्योपदर्शितानि तत्र योजयति—

**एए उदाहरणा दव्वे, भावे य अपलिच्छन्नम्मि।**
**दव्वेण अपलिच्छन्ने, भावे अपलिच्छन्न होंति इमे ॥ १३६९ ॥**

**एतान्य**नन्तरोदितानि **पञ्चाप्युदाहरणानि** अप्रशस्तानि **द्रव्ये भावे च** सप्तमी प्राकृतत्वात्तृतीयार्थे द्रव्येन भावेन **चापरिच्छन्ने** प्रथमभङ्गवर्तिनि वेदितव्यानि। प्रशस्तानि चतुर्थभङ्गे द्रव्यतो भावतश्च, परिच्छन्ने इति वाक्यशेषः। **द्रव्येणापरिच्छन्ने,**अनेन द्रव्यतो अपरिच्छन्नः भावतः परिच्छन्न इति द्वितीयभङ्गः सूचितः। तत्र तथा **भावे** सप्तमी तृतीयार्थे भावेनाऽ**परिच्छन्ने**ऽनेन द्रव्यतः परिच्छन्नो भावतोऽपरिच्छन्न इति तृतीयभङ्ग उपात्तः, तत्र भावतः **इमे** वक्ष्यमाणे उदाहरणे ॥ १३६९॥

तत्र प्रथमतो द्वितीयभङ्गे प्राह—

गाथा १३६९-१३७० गणधारण योग्याऽयोग्यत्वे दृष्टान्तादिः ६७७ (A)

**दमगो वइया खीरघडि खट्ट चिंता य कुक्कुडिप्पसवो।**
**धणपिंडण समणेतरिं ऊसीसग भिंदण घडीए ॥ १३७० ॥**

एगो दमगो गोउलं गतो। तत्थ गोउलिएहिं दुद्धं पाइतो। अन्ना य से दुद्धस्स भरिया घडिया दिण्णा। सो तं घेत्तूण घरं गतो खट्टाए ऊसीसमूले ठवेउं निवन्नो चिंतिउमाढत्तो— एयाए दहियघडियाए कल्ले कुक्कुडीतो किणिस्सामि। ताहे पसवो होहिति तं पसवं विक्केहामि, ततो तं मूलं वड्ढीए पउंजेहामि। एवं सुबहुं धणं पिंडित्ता कुलीणं समाणेतरकुलप्पसूयं कण्णं परिणित्ता आणेहामि। ताहे सा कुलमदेण ऊसीसएणं सेज्जं चडिहिति, ततो हं 'किं ऊसीसएणं सेज्जं चडिसि'? त्ति पण्हीए आहणिस्सामि ति पादो उच्छूढो। तेण सा घडिया भग्गा।

अक्षरयोजना त्वियम्-**द्रमकः** रङ्कः, स **व्रजिका**यां गोकुले गतः। तेन दुग्धपानानन्तरं **क्षीर**भृता घटिका लब्धा। सा गृहं गतेन **खट्वा**या उच्छीर्षकमूले स्थापिता। तत**श्चिन्ता**ऽभूत्। किंविषया? इत्यत आह- **कुक्कुट्यः** क्रेतव्याः। तदनन्तरं तासां प्रबन्धेन **प्रसवः**। पुनस्तस्य मूल्येन विक्रयः ततो वृद्धिप्रयोगेन **धनपिण्डनं** कृत्वा **समणेतरि**मिति समानां

**समान**कुलप्रसूता**मितरा**मसमानकुलप्रसूतां कन्यां परिणीय तां कुलमदेनो**च्छीर्षकेण** चटन्तीं पादेनाहनिष्यामीति दुग्ध**घटिकायाः भिन्दन**मकार्षीत् ॥ १३७० ॥

अत्रोपनयमाह—

**पव्वावइत्ताण बहू य सिस्से, पच्छा करिस्सामि गणाहिवच्चं।**
**इच्छा विगप्पेहिं विसूरमाणो, सज्झायमेवं न करेइ मंदो ॥ १३७१ ॥** दारं ६

**बहून् शिष्यान् प्रव्राज्य पश्चात्करिष्यामि गणाधिपत्यम्, एवमिच्छाविकल्पैः स मन्दो** नित्यकालं विसूरयन् **स्वाध्यायं न करोति,** सूत्रार्थपौरुषीं न करोतीत्यर्थः। ताश्चाकुर्वाणः पूर्वगृहीतान् सूत्राऽर्थान् नाशयति यथा स द्रमको दुग्धघटिकां नाशितवान् ६॥ १३७१ ॥

सम्प्रति तृतीयभङ्गे उदाहरणमाह—

**गावीतो रक्खंतो, घेच्छं च भत्तीए पड्डिया तत्तो।**
**वोड्डुंते गोवग्गे, होहिंति य वच्छिगा तत्थ ॥ १३७२ ॥**

**तेसिं तु दामगाइं, करेमि मोरंगचूलियाओ य।**
**एवं तु तइयभंगे, वत्थादी पिंडणमगीते ॥ १३७३ ॥** दारं ७।

एगो गोवो। सो गावीओ रक्खंतो चिंतेति- अहं गोरक्खणमोल्लेण पड्डियातो गहिस्सामि। ततो से पवड्ढमाणो गोवग्गो भविस्सति। तम्मि य पवड्ढमाणे गोवग्गे वच्छिगाओ बहुयाओ होहिंति, ततो करेमि तासिं जोग्गाइ[दामगाइं] मोरंगचूलियाओ य। एवं चिंतित्ता सो तहा पकरेति। एवमगीयत्थो वि भावेणापलिच्छन्नो तइयभंगिल्लो बहुगो मे परिवारो भविस्सइ' त्ति वत्थादीणि बहूणि पिंडेति-

अक्षरयोजना त्वेवम्-**गोरक्षन्** गोपालोऽचिन्तयत् **भृत्या** मूल्येन **पद्रिकाः अभिनवप्रसूता गा** ग्रहीष्यामि। ततो मे प्रवर्धमानो गोवर्गो भविष्यति। तत्र तस्मिन् प्रवर्धमाने गोवर्गे वत्सिका भविष्यन्ति। ततस्तासां योग्यानि दामकानि करोमि मयूराङ्गचूलिकाश्च मयूराङ्गमय्यश्चूलिका आभरणविशेषरूपाः। एवं चिन्तयित्वा स तथा प्रकृतवान्। अत्रोपनयमाह— **एवं तु** एवमेव तुरेवकारार्थः, **तृतीयभङ्गे** वर्तमानस्य **अगीते** अगीतार्थस्य **वस्त्रादिपिण्डन**मवगन्तव्यम्। अस्य यद्यपि परिवारो नास्ति तथा वस्त्रादिषु लब्धिरस्तीति द्रव्यतः परिच्छन्नत्वमङ्गीकृत्य तृतीयभङ्गे इत्युक्तम् ॥ १३७२-७३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्य दोषानाह—

**ताइं बहूइ पडिलेहयंतो, अद्धाणमाईसु य संवहंतो।**
**एमेव वासम्मऽतिरित्तगं से, वातादिखोभो य सुए य हाणी॥ १३७४॥**

**तानि** वस्त्रादीनि **बहूनि** प्रतिदिवसमुभयकालं **प्रतिलेखयन्,** अप्रतिलेखने प्रायश्चित्तापत्तेः, **अध्वादिषु** अध्वनि-मार्गे, आदिशब्दाद्वसत्यन्तरसङ्क्रमणादौ च **संवहन्** श्राम्यति, श्रमाच्च ग्लानत्वम्, ग्लानत्वे च संयमविराधना सूत्राऽर्थहानिश्च। **एवमेव** अनेनैव प्रकारेण **वर्षास्वपि** दोषा वाच्याः। केवलं से तस्य उभयकालं तानि प्रतिलेखयतः **अतिरिक्तकम्** अतिरेकेण **वातादिक्षोभो** भवति। तथा च सति सुदीर्घं **श्रुते** सूत्रस्य चशब्दादर्थस्य च **परिहाणिः** ॥१३७४॥

अत्र परस्यावकाशमाह—

**चोदेति न पिंडेति य, कज्जे गिण्हति य जो सलद्धीओ।**
**तस्स न दिज्जइ किं गणो?, भावेण उ जो असंछन्नो ॥ १३७५ ॥**



For Private and Personal Use Only

**नोदयति** परोः यथा- **यः सलब्धिको भावेन** च **योऽसञ्छन्न** परिच्छदरहितो **न** पूर्वमेव वस्त्रादीनि **पिण्डयति,** किन्तु **कार्ये** समुत्पन्ने **गृह्णाति, तस्य किं** कस्मात्कारणाद् गणो **न दीयते**? प्रागुक्तदोषासम्भवात्॥ १३७५ ॥

अत्र सूरिराह—

**चोयग! अप्पभु असती, पूया पडिसेह निज्जर तलाए[1]।**
**संतं से अणुजाणति, पव्ववए-तिण्णि इच्छा से ॥ १३७६ ॥**

हे **चोदक**! स भावतोऽपरिच्छन्नः **अप्रभुः** अगीतार्थः तस्मात्तस्मै गणो न दीयते। एतौ तृतीयभङ्गवर्त्तिनि आक्षेप-परिहारौ **असतित्ति** यस्य गणो नास्ति तस्य तृतीयभङ्गपरिवर्त्तिन आक्षेप-परिहारौ, अभिधातव्याविति वाक्यशेषः। तथा **पूयत्ति** पूजार्थे गणो ध्रियते इति कस्यापि वचनं तस्य **प्रतिषेधो** वक्तव्यः, किन्तु निर्जरार्थे गणो धारणीय इति वाच्यम्, निर्जरार्थं व्यवसिताः केचित् पूजामपीच्छन्ति। तत्र **निर्जरार्थं** गणं धारयतः पूजामपि प्रतीच्छत

१ तलाए। अणुजाणति पव्वइए जहन्नओ तिण्णि इच्छा से - खं ॥

आचार्यस्य यथा न दोषस्तथा **तडागं** दृष्टान्तत्वेन वक्तव्यम्। तथा यो भावतः परिच्छन्नः शिष्यो लब्धिमांश्च स **सन्तं** परिवारं **से** तस्य आत्मीयस्याऽऽचार्यस्या**नुजानाति**। कियन्तम्? इत्याह— जघन्यत**स्त्रीन्प्रव्रजितान्** किमुक्तं भवति?— जघन्यतस्त्रयः प्रव्रजिता अवश्यं दातव्याः। **इच्छा सेत्ति** इच्छा वा से तस्याऽऽचार्यस्य। इयमत्र भावना— आचार्य आत्मनो यथेच्छया त्रीन्वा बहुतरान्वा सर्वान् वा प्रव्रजितान् गृह्णातीति ॥ १३७६ ॥

एष गाथासङ्क्षेपार्थः, व्यासार्थं तु **भाष्यकृद्** विवक्षुः प्रथमतः ''चोयग अप्पभु'' त्ति पदं व्याख्यानयति—



**भण्णइ अविगीयस्स हु, उवगरणादीहि जइ वि संपत्ती।**
**तह वि न सो पज्जत्तो, करीलकायो व्व वोढव्वे ॥ १३७७ ॥**

चोदकेनाऽऽक्षेपे प्रागुक्ते कृते सति प्रतिवचनं **भण्यते। अविगीतस्य** विशिष्टगीतार्थत्व-रहितस्य **हु** निश्चितं **यद्यपि उपकरणादी**नामुपकरणशिष्यादीनाम्, गाथायां तृतीया षष्ठ्यर्थे प्राकृतत्वात्, **सम्पत्तिः, तथापि न सः पर्याप्तः** समर्थः **वोढव्ये** उपक्षिप्ते गणभारे। किमिव?

इत्यत आह— **करीलकायो व्व** करीलो नाम वंशजातिविशेषो दुर्बलः, तन्मयी कापोतीव ॥ १३७७ ॥

कस्माद्गणभारवहने न समर्थः ? यत आह—

**न य जाणइ वेणइयं, कारावेउं न यावि कुव्वंति।**
**तइयस्स परिभवेणं, सुत्तऽत्थेसुं अपडिबद्धा ॥ १३७८ ॥**

**च:** यस्मादर्थे। यस्मान्न **जानाति** विनय एव **वैनयिकम्, विनयादिभ्यः[ मलय० त० पा० ?]** इति स्वार्थे इकण्प्रत्ययः, "**अतिवर्तन्ते स्वार्थिकप्रत्ययाः प्रकृति-लिङ्ग-वचनानि**" इति वचनाद् विनयशब्दस्य पुंस्त्वेऽपि प्रत्यये समानीते नपुंसकलिङ्गता, तच्छिष्यान् **कारयितुम्,** अगीतार्थत्वात्। न च तस्य पार्श्वे सूत्रमर्थो वा, भावतोऽसञ्छन्नत्वात्। ततः सूत्रार्थाभ्यां गाथायां सप्तमी तृतीयार्थे प्राकृतत्वाद् अप्रतिबद्धाः सन्तः शिष्याः परिभवमेव केवलं मन्यन्ते, जन्मनो निष्फलीभावात्। तेन च **परिभवेन** तस्य **तृतीयस्य** तृतीयभङ्गवर्तिनो वैनयिकं कारयितुं जानन्तोऽपि **न चापि** न चैव ते शिष्या विनयं **कुर्वन्ति**। तस्मान्न तृतीयभङ्गवर्ती गणधारणयोग्यः ॥ १३७८ ॥

साम्प्रतम् "असति" त्ति पदं व्याख्यानयन् द्वितीयभङ्गगतावाक्षेपपरिहारावाह—

**बियभंगे पडिसेहो, जं पुच्छसि तत्थ कारणं सुणसु।**
**जइ से होज्ज धरेज्जा, तदभावे किंनु धारेउ? ॥ १३७९ ॥**

**तं पि य हु दव्वसंगह-परिहीणं परिहरंति सेहादी।**
**संगहरिए य सयलं, गणधारीत्तं कहं होइ? ॥ १३८० ॥**

**यत् पृच्छसि** त्वम्, यथा— **द्वितीयभङ्गे** द्वितीयभङ्गवर्तिनो गणधारणे कस्मात्**प्रतिषेधः** कृतः ? **तत्र कारणमिदं शृणु**। तदेवाह— **यदि से** तस्य गणो **भवेत्** ततो **धारयेत्, तदभावे** गणाभावे **किन्नु धारयेत्** ? नैव किञ्चिदिति भावः, ततो गणाभावादेव **तस्य** गणधारणे प्रतिषेधः ॥१३७९॥ अपि च— **तं पि य हु** इत्यादि, तमपि च भावयेत्। **सञ्छन्नमपि हुः** निश्चितमलब्धिकतया **द्रव्यसङ्ग्रहपरिहीनं** वस्त्र-पात्राद्युपकरणसङ्ग्रहरहितं **शैक्षादयः** शैक्षिकाः, आदिशब्दाद् मुनिवृषभादिपरिग्रहः, **परिहरन्ति,** वस्त्राद्यभावे तेषां सीदनात्। ततः **संग्रहमृते** विना **सकलं** परिपूर्णं **गणधारित्वं कथं भवति**? नैव भवतीति भावः। तदभावाच्च

तस्य तत्प्रतिषेधः। इदमलब्धिकमधिकृत्योक्तम्। यदि पुनर्द्वितीयभङ्गवर्त्यपि वक्ष्यमाणगुणैरुपेतो भवति ततोऽनुज्ञाप्येतापि गणधारी, दोषाभावात् ॥ १३८० ॥

तथा चाऽऽह—

**आहार-वत्थादिसु लद्धिजुत्तं, आदेज्जवक्कं च अहीणदेहं।**
**सक्कारभाजं समइममम्मि लोए, पूयंति सेहा य पिहूजणो य ॥ १३८१ ॥**

**आहारवस्त्रादिषु लब्धियुक्तम्, आदेयवाक्यम्, अहीनदेहं** परिपूर्णदेहावयवम्, तथा **मतिमति लोके सत्कारभाजम्** विद्वज्जनपूज्यमित्यर्थः, **शैक्षकाः पूजयन्ति।** पाठान्तरम्—'सक्कारहज्जम्मि इमम्मि लोए' तत्रायमर्थः— सत्कारेण ह्रियते- आक्षिप्यते इति सत्कारहार्योऽयं यतो लोकः। तत एवम्भूतेऽस्मिन् लोके आहारवस्त्रादिषु लब्धियुक्तमित्यादिगुणैः शैक्षकाः पूजयन्ति **पृथग्जनश्च** बहुमन्यते। ततः स तादृशो गणधारी कर्तव्यः ॥ १३८१ ॥

सम्प्रति "पूया-पडिसेह" [गा. १३७६] इति पदे व्याख्यानयन्नाह—

**पूयत्थं नाम गणो, धारिज्जते एवं[1] ववसितो सुणतो।**
**आहारोवहि-पूयाकारण न गणो धरेयव्वो ॥ १३८२ ॥**

**पूजां** प्राप्नुयामित्येव**मर्थं नाम गणो ध्रियते** इत्येवं कश्चिद् **व्यवसितः** अभ्युपगतवान्। एतावता पूजा[2] इत्यंशो व्याख्यातः। अत्राऽऽचार्यः प्राह— **शृणुत** यदर्थं गणो ध्रियते। तत्र परोक्तप्रतिषेधमाह—**आहारोपधिपूजाकारणेन** उत्कृष्टः आहारः, शोभन उपधिर्महती पूजा स्यादिति कारणतः अत्र विभक्तिलोपः प्राकृतत्वात्, **न गणो धारयितव्यः**, एतावता 'प्रतिषेधः' इति विवृतम् ॥ १३८२॥

किमर्थं तर्हि गणो धारयितव्य? इत्यत आह—

**कम्माण निज्जरट्ठा, एवं खु गणो भवे धरेयव्वो।**
**निज्जरहेतुववसिया, पूयं पि य केइ इच्छंति ॥ १३८३ ॥**

**एवमनेन** कारणेन **खु** निश्चितं **भवति गणो धारयितव्यः**, यदुत— **कर्मणां**

१ एव - मु.प्रे.ला. ॥ २ पूया इ० वा. मो. पु. मु.॥

ज्ञानावरणीयादीनां **निर्जरार्थम्,** मोक्षायैव तत्त्ववेदिनां प्रवृत्तेः, आहारादीनां चैहिकत्वात्। केवलं **केचित्** स्थविरकल्पिकाः **निर्जराहेतोः** गणधारणं **व्यवसिताः पूजामपि** वक्ष्यमाण-लक्षणा**मिच्छन्ति**। किमुक्तं भवति ?— यद्यपि नाम तत्त्वतः कर्मनिर्जरणनिमित्तं गणो ध्रियते तथापि पूजामेष प्राप्नुयादिति पूजानिमित्तमपि तस्य गणधारणमनुज्ञाप्यते॥ १३८३॥

पूजामेवाह—

**गणधारिस्साऽऽहारो, उवकरणं संथवो य उक्कोसो।**
**सक्कारो सीस-पडिच्छएहिं गिहि-अन्नतित्थीहिं ॥ १३८४ ॥**

**गणधारिणः** सत उत्कृष्ट **आहार, उत्कृष्टमुपकरणम्,** उत्कृष्टः **संस्तवः** सतां गुणानां प्रख्यानम्, तथा **शिष्यैः प्रातीच्छकैर्गृहिभिरन्यतीर्थिकै**श्चोत्कृष्टः **सत्कारः** उपध्यादिभिः पूजनं क्रियते। ततः पूजानिमित्तमपि तस्य गणधारणानुज्ञापनम् ॥ १३८४ ॥

संस्तवं व्याख्यानयति—

**सुत्तेण अत्थेण य उत्तमो उ, आगाढपण्णेसु[1] य भावियप्पा।**
**जच्चन्निओ यावि विसुद्धभावो, संते गुणेवं पविकत्थयंते॥ १३८५ ॥**

**सूत्रेणार्थेन च** एष **उत्तमः** प्रधानः, परिपूर्णस्य सूत्रस्यार्थस्य चावदातस्यास्य सम्भवात्। तथा आगाढा प्रज्ञा येषु शास्त्रेषु व्याप्रियते, न या काचन, तान्या**गाढप्रज्ञानि** शास्त्राणि तेषु **भावितात्मा,** तात्पर्यग्राहितया तत्रातीवनिष्पन्नमतिरिति भावः। तथा जात्या- सकलजन-प्रशस्ययाऽन्वितः- युक्तो **जात्यान्वितः**। तथा विशुद्धः स्व-परसंसारनिस्तारणैकतानतया अवदातो भावः-अभिप्रायो यस्य स **विशुद्धभावः, एवं सतो गुणान्** गणधारिणः शिष्या अपरे च प्रकर्षतो हर्षातिरेकलक्षणतो **विकत्थयन्ते** श्लाघन्ते। ॥ १३८५ ॥

एवं च पूज्यमाने आचार्ये पूजकानां यो गुणस्तमुपदर्शयति—

**आगम एवं बहुमाणितो उ, आणा थिरत्तं च अभावितेसु।**
**विणिज्जरावेणइया य निच्चं, माणस्स भंगो वि य पुज्जयंते ॥ १३८६ ॥**

गाथा १३८२-१३८६ गणधारकस्य पूजनादिः



---

१. आगाढप्रज्ञः श्रुतभावितात्मा च इति विशेषणद्वयमपि संभाव्यतेऽतिः।

For Private and Personal Use Only

**पूज्यमाने** आचार्ये पूजकैरा**गमः बहुमानितः** बहुमानविषयीकृतो भवति। आगमस्य तत्रस्थत्वात्। तथा भगवतामर्हता**माज्ञा** परिपालिता भवति। भगवतां हि तीर्थकृतामियमाज्ञा—यदुत गुरोः सदा पूजा कर्तव्या। तथा चोक्तम्—

*जहाऽऽहियग्गी जलणं नमंसे, नाणाहुती-मंतपयाभिसित्तं।*
*एवाऽऽयरियं उवचिट्ठएज्जा अणंतणाणोवगतो वि संतो* ॥ [**द.वै.अ.**९ उ.१.गा.११]

तथा गुरुविनयकरणेन ये नाद्यापि भावितास्तेष्व**भावितेषु** क्रियमाणपूजादर्शनतः **स्थिरत्व**मुपजायते। तथा **वैनयिकी**र्विनयनिमित्ता **विनिर्जरा** कर्मनिर्जरणं **नित्यं** सदा सततं भवति, गुरुविनयस्य सदा कर्तव्यत्वात्। तथा **मानस्य** अहङ्कारस्य **भङ्गोऽपि** च कृतो भवति। एते पूजकानां गुणाः ॥ १३८६ ॥

सम्प्रति निर्जरार्थमेव गणधारणं व्यवसितस्य पूजामपीच्छतः आचार्यस्य दोषाभावे **यस्तडागदृष्टान्त**स्तं संभावयति।

**लोइयधम्मनिमित्तं, तडागखाणावियम्मि पउमादी।**
**न विगरहियाऽणुभोत्तुं, एमेव इमं पि पासामो ॥ १३८७ ॥**

केनापि **लौकिकीं** श्रुतिमाकर्ण्य **धर्मनिमित्तं तडागं खानितम्**, तस्मिंश्च तडागे **पद्मादीनि** समुत्पन्नानि। वर्षारात्रे चापगते यत्र यत्र पानीयं शुष्यति तत्र तत्र धान्यं वापयति। तत्र यथा पद्मादीनि **अनुभवितुं** भोक्तुं गृह्यमाणान्यपि न तस्य **विगर्हितानि** भवन्ति, लोके तथा सम्मतत्वात्। **एवमेवानेनैव** प्रकारेण **इदमपि** गणधारणं **पश्यामः**। निर्जरार्थमाचार्याणां गणधारणमुक्तप्रकारेण पूजानिमित्तमप्यदोषायेति भावः ॥ १३८७॥



सम्प्रति "संतं से"[गा.१३७६]इत्यादि पश्चार्धं व्याख्यानयति—

**संतम्मि उ केवइओ, सिस्सगणो दिज्जती ततो तस्स।**
**पव्वाविते समाणे, तिन्नि जहण्णेण दिज्जंति ॥ १३८८ ॥**

भावपरिच्छन्नस्य शिष्यस्य **सति** विद्यमाने परिवारे तेन **तस्य** आचार्यस्य **ततः** गणधारणानुज्ञापनानन्तरं **कियान् शिष्यगणो** दीयताम्? अत्रोत्तरम्— **प्रव्राजिते** शिष्यगणे

**सति तत्र त्रयो जघन्येन दीयन्ते,** उत्कर्षतो बहुतरकाः सर्वे वा इति वाक्यशेषः ॥१३८८॥

अथ किं कारणं जघन्यतस्त्रयोऽवश्यं दातव्या? इत्यत आह—

**एगो चिट्ठति पासे, सन्ना-आलत्तमादिकज्जत्था।**
**भिक्खादि वियार दुवे, पच्चयहेउं व दुन्नि भवे ॥ १३८९ ॥**

**एकः पार्श्वे** समीपे **संज्ञा**-पुरीषोत्सर्गः, **आलप्त**मालपनं कस्याप्याचार्यः कारयेदित्यादि-**कार्यार्थं तिष्ठति। द्वौ च भिक्षायाम्, आदि**शब्दादौषधानयनादौ **विचारे** च बहिर्भूमौ गच्छतः। यदि वा सूत्राऽर्थसंवाद**प्रत्ययहेतोर्द्वौ** भवेताम्॥ १३८९॥

सम्प्रति प्रागुक्तायामेव चतुर्भङ्ग्यां विशेषं वक्तुकाम आह—

**दव्वे भाव पलिच्छद, दव्वे तिविहो उ होइ चित्तादी।**
**लोइय लोउत्तरितो, दुविहो वावारजुत्तियरो ॥ १३९० ॥**

**परिच्छदो** द्विविधः- **द्रव्ये भावे** च। तत्र **द्रव्ये** द्रव्यपरिच्छदस्त्रि**विधो भवति चित्तादि**

सचित्तो अचित्तो मिश्रश्च। एष त्रिविधोऽपि द्रव्यपरिच्छदो भूयो द्विविधः-**लौकिको लोकोत्तरिकश्च**। तत्र लौकिकः सचित्तः त्रिविधो द्विपद-चतुष्पदा-ऽपदभेदात्। अचित्तो हिरण्यादिः। मिश्रः सचित्ताऽचित्तसमवायेन। लोकोत्तरिकः सचित्तो द्रव्यपरिच्छदः शिष्यादिः, अचित्त उपधिः, मिश्रः सचित्ताऽचित्तसमवायतः। तत्र लौकिको लोकोत्तरिकश्च द्रव्यपरिच्छदो **द्विधा**। तद्यथा— **व्यापारयुक्तः, इतरः** व्यापाराऽयुक्तः ॥ १३९० ॥

तत्र लौकिके व्यापारयुक्ते च निदर्शनमाह—

**दो भाउया विरिक्का, एक्को पुण तत्थ उज्जुतो कम्मे।**
**उचितभतिभत्तदाणं, अकालहीणं च परिवड्ढी ॥ १३९१ ॥**

**द्वौ भ्रातरौ**। तौ परस्परं **विरिक्तौ** धनं विरिच्य पृथक् पृथग् जातावित्यर्थः। **तत्र** तयोर्द्वयोर्मध्ये **पुनरेकः** कृषिं कुर्वन् **कर्मणि उद्युक्तः** व्यापारयुक्तः। किमुक्तं भवति ? स्वयं कर्म करोति, भृतकांश्च कारयति। **भृतकानां** चाकालपरिहीनां **उचितां** परिपूर्णां **भृतिं** मूल्यं ददाति, **अकालपरिहीनं च** परिपूर्णं भक्तम्। एवं च तस्य व्याप्रियमाणस्य कृषेः **परिवृद्धिर**जायत साधुवादश्च ॥ १३९१ ॥

**कयमकयं व न जाणइ, न य उज्जमए सयं न वावारे।**
**भतिभत्तकालहीणे, दुग्गहि किसीए परिहाणी ॥ १३९२ ॥**

द्वितीयो व्यापारयुक्तो भृतकैः किं कर्म **कृतम्**? किं वा **न कृतम्**? इति **नैव जानाति** स्वयमपरिभावनादन्यतश्चाप्रच्छनात्। **न च स्वयं** कर्मकरणायो**द्यच्छति, न** वा मध्ये स्थित्वा भृतकान् **व्यापारयति। भृति-भक्ते** च भृतकानां **कालहीने** ददाति। किमुक्तं भवति ? भृतिमपरिपूर्णां ददाति कालहीनां च, एवं भक्तमपि। तत एवं **दुर्गृहीतायाः** कृषेस्तस्य **परिहानि**रभूदसाधुवादश्च ॥१३९२॥

सम्प्रति लोकोत्तरिकं द्रव्यपरिच्छदे व्यापारयुक्तमाह—

**जो जाए लद्धीए, उववेओ तत्थ तं निजोएंति।**
**उवकरणसुए अत्थे, वादे कहणे गिलाणे य ॥ १३९३॥**

यो **यया लब्ध्या उपपेतः** युक्तो वर्तते, **तत्र तं नियोजयन्ति** सूरयः। तद्यथा— **उपकरणे**

इति उपकरणोत्पादनलब्धियुक्तमुपकरणोत्पादने, **सुते** इति सूत्रपाठलब्ध्युपेतं सूत्रपाठे, **अर्थ**ग्रहणसलब्धिकमर्थग्रहणे वादलब्धिसमन्वितं पर**वादिमथने, धर्म**कथनलब्धिपरिकलितं **धर्मकथने,** ग्लानप्रतिचरणपटीयांसं **ग्लानप्रतिजागरणे** ॥ १३९३ ॥

**जह जह वावारयते, जहा य वावारिया न हीयंति।**
**तह तह गणपरिवुड्ढी, निज्जरवड्ढी वि एमेव ॥ १३९४ ॥**

**यथा यथा** तत्तल्लब्ध्युपेतान् तत्तत्कर्मणि **व्यापारयति,** यथा **यथा च व्यापारिता न हीयन्ते** देश-काल-स्वभावौचित्येन व्यापारणात् **तथा तथा गणस्य** गच्छस्य **परिवृद्धि**र्भवति। **निर्जरावृद्धिरप्येवमेव,** निर्जराऽपि तथा तथा परिवर्द्धते इति भावः। एतद् व्यतिरिक्तो व्यापाराऽयुक्तः, तस्य गच्छपरिहानिः न च निर्जरेति ॥ १३९४॥

सम्प्रति भावपरिच्छदमाह—

**दंसण-नाण-चरित्ते, तवे य विणए य होइ भावम्मि।**
**संजोगे चउभंगो, बिइए नायं वइरभूती ॥ १३९५ ॥**

**दर्शनं** क्षायोपशमिकादिभेदभिन्नं सम्यक्त्वम्, **ज्ञानं** मतिज्ञानादि, **चारित्रं** सामायिकादि, **तपः**अनशनादि, **विनयः** ज्ञानविनयादिः, एषः **भावे** भावतः परिच्छदः। अनयोश्च द्रव्य-भावपरिच्छदयोः **संयोगे चतुर्भङ्गी**। तद्यथा-द्रव्यतोऽपरिच्छन्नो भावतश्चापरिच्छन्न इत्यादि। तत्र द्रव्यतोऽपरिच्छन्नो भावतः परिच्छन्नः इत्येवंरूपे **द्वितीये** भङ्गे **ज्ञातमुदाहरणं वज्रभूतिः**? ॥ १३९५ ॥

तदेवाह—

**भरुकच्छे नहवाहण, देवी पउमावती वइरभूती।**
**ओरोह कव्वगायण, कोउय निवपुच्छ देविगमो ॥ १३९६ ॥**

**कत्थं? ति निग्गतेसे, सयमासण एस चेव चेडिकहा।**
**विप्परिणाममदाणं, विरुवपडिवाररहिए य ॥ १३९७ ॥**

**भरुकच्छे** नयरे **नहवाहणो** नाम राया। तस्स **पउमावती** देवी। तत्थ य नयरे **वइरभूती**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयरिओ महाकई अपरिवारो रूवेण य मंदरूवो अतीव किसो। तस्स कव्वं अंतेउरे गिज्जति। सा य पउमावती देवी तेण कव्वेण हयहियया कया चिंतेइ- जस्सेयं कव्वं कहमहं तं पेच्छिज्जा ? ततो रायं अणुण्णवित्ता दासी-दास संपरिवुडा महरिहं पण्णागारं औचित्येन ढौकनीयं घेत्तुं वइरभूतिस्स वसहिं गता। तं बारड्डियं पासित्ता वइरभूती सयमेव भिसियं घेत्तुं निग्गतो। पउमावईए भणियं- कहिं वइरभूती आयरितो ? वइरभूतिणा आयरिएण भणितं- बाहिं गतो, दासीए सन्नियं- एस चेव वइरभूती ताहे विरागं गया। चिंतेइ- य दिट्ठा सि कसेरुमती ? अणुभूया सि कसेरुमती ? पीयं ते पाणिययं वरं तुह नामं न दंसणयं। अत्र **क**सेरुमती नाम नदी, तस्याः प्रसिद्धिरतीव नवरं न प्रसिद्ध्यनुरूपं तस्याः पानीयमिति क्षेपः। ताहे तं पण्णागारदिण्णं ठवियं 'एतं आयरियस्स दिज्जासि' त्ति गया।

सम्प्रत्यक्षरघटना- **भरुकच्छे नभोवाहनो** नाम राजा। तस्य **पद्मावती देवी**। तत्र **वज्रभूति**राचार्यः। **अवरोधे** अन्तःपुरे तत्**काव्यगानम्, कौतुकेन नृपं पृष्ट्वा देव्या**स्तद्वसतौ **गमः** तदनन्तरं पृच्छा- **कुत्र** वज्रभूतिराचार्यः ? तस्य प्रत्युत्तरम् बहिर्निर्गतः। स चाऽऽचार्यः परिवाराभावात् **स्वयमासनं** गृहीत्वा मध्याद्बहिरागतः। चेट्या **दास्याः कथा** कथनम्—**एष**



For Private and Personal Use Only

**एव** वज्रभूतिः। ततो **विपरिणामः।** विपरिणामाच्च साक्षा**ददानं विरूपे परिवाररहिते** च तस्मिन्नाचार्ये। एतेनैतदावेदितम्- यः परिवारवानपि रूपेण विरूपः सोऽपि द्रव्यपरिच्छदेन अपरिच्छन्नः, यतो यद्यपि तस्य परिवारोऽस्ति तथापि योऽधस्ताद् द्रव्यपरिच्छदो वर्णितस्तस्य मूलमाकृतिः, तदभावे तस्याभावात्॥ १३९६-९७॥

तथा चाह—

**मूलं खलु दव्वपलिच्छयस्स सुंदेरिमोरसबलं च।**
**आकितिमतो हि नियमा, सेसा वि हवंति लद्धीतो ॥ १३९८ ॥**

समस्तस्यापि प्रागुक्तस्य **द्रव्यपरिच्छदस्य मूलं खलु सौन्दर्यमौरसं च बलं** हृदयबलिष्ठता, सर्वव्यापारेषु दाक्ष्यमिति भावः। कुतः ? इति चेद्, अत आह-**हिः** यस्मा**दाकृतिमतः** सतो **नियमात् शेषा अपि लब्धयो** वस्त्रादिविषया भवन्ति, न त्वाकृतिविरहितस्य तथा प्रत्यक्षत एव दर्शनात्। ततः 'आकृतिरहितोऽपि द्रव्यपरिच्छदरहितः' इति न तस्यापि गणधारणानुज्ञा ॥१३९८॥

सम्प्रति वक्ष्यमाणग्रन्थसम्बन्धनार्थमाह—

**जो सो उ पुव्वभणितो, अपभू सो उ अविसेसिओ तहियं।**
**सो चेव विसेसिज्जइ, इहइं सुत्ते य अत्थे य ॥ १३९९॥**

"जोऽसो 'चोयग ? अप्पभु' [गा.१३७६]इत्यादिना ग्रन्थेन **अप्रभुः पूर्वं भणितः स तत्राऽविशेषित एवोक्तः। इह** अस्मिन् प्रस्तावे पुनः **स एव** अप्रभुः **सूत्रेऽर्थे च विशिष्यते,** सूत्रतोऽर्थतश्च तस्याप्रभुत्वं चिन्त्यते इति भावः ॥ १३९९॥

तदेवाह—

**अबहुस्सुए अगीयत्थे, दिट्ठंता सप्पसीस-वेज्जसुए।**
**अत्थविहूण धरंते, मासा चत्तारि भारिया ॥ १४०० ॥**



अत्राऽ**बहुश्रुता-ऽगीतार्थ**पदाभ्यां भङ्गचतुष्टयम्। तद्यथा—अबहुश्रुतोऽगीतार्थ इति प्रथमो भङ्ग १, अबहुश्रुतो गीतार्थः २,बहुश्रुतोऽगीतार्थः ३,बहुश्रुतो गीतार्थः ४। तत्र यस्य **निशीथादिकं** सूत्रतोऽर्थतो वा न गतं स प्रथमभङ्गः १। यस्य पुनर्निशीथादिगतौ सूत्राऽर्थौ विस्मृतौ स

द्वितीयभङ्गः २। यः पुनरेकादशाङ्गधारी अश्रुतार्थः स तृतीयभङ्ग ३। सकलकालोचित-सूत्रार्थोपेतश्चतुर्थः ४। तत्र अबहुश्रुते अगीतार्थे वा एतेनाऽऽद्यं भङ्गत्रयमुपात्तम्। तस्मिन् गणं धारयति **दृष्टान्तौ सर्पशीर्षकं वैद्यसुतश्च**। इयमत्र भावना—आद्यानां त्रयाणां भङ्गानामन्यतरो यदि गणं धारयति ततः स सह गणेन विनश्यति, यथा सर्पशीर्षकं वैद्यपुत्रो वा। एतत् दृष्टान्तद्वयं यथा **कल्पा**[१]ध्ययने तथा भावनीयम्। **अत्थविहूणे**त्यादि, अर्थविहीने अगीतार्थे इत्यर्थः, अर्थग्रहणमुपलक्षणम्, तेन अबहुश्रुते इत्यपि द्रष्टव्यम्, तस्मिन् अर्थविहीने सूत्रविहीने वा गणं **धारयति**, उपलक्षणमेतत्, निसृजति वा प्रायश्चित्तं **चत्वारः भारिया** इति गुरुका **मासाः** ॥ १४०० ॥



एतदेव स्पष्टतरमाह—

**अबहुस्सुते अगीयत्थे, निसिरए वा वि धारए व गणं।**
**तद्देवसियं तस्स उ, मासा चत्तारि भारिया ॥ १४०१ ॥**

१. कल्पभाष्ये गा. ३२४६ तः ३२६० पर्यन्तगाथासु सर्पशीर्ष-वैद्यपुत्रयोः दृष्टान्तौ द्रष्टव्यौ ॥

**अबहुश्रुतोऽगीतार्थो वा यदि गणं निसृजति धारयति वा** स्वयम्। किमुक्तं भवति? आद्यानां त्रयाणां भङ्गानामन्यतरो यदि गणं गीतार्थस्य अगीतार्थस्य वा निसृजति स्वयं वाऽऽद्यानां त्रयाणां भङ्गानामेकतरः सन् यदि गणं धारयति एकं द्वौ वा दिवसौ, उत्कर्षतः सप्तरात्रिन्दिवानि ततस्**तद्दैवसिक**स्तेषां सप्तानां दिवसानां निमित्ततस्**तस्य** गणं निस्रष्टुर्धारयितुर्वा प्रायश्चित्तं **चत्वारो मासा गुरुकाः** ॥१४०१॥

**सत्तरत्तं तवो होई, ततो छेदोपधावती।**
**छेदेणऽछिन्नपरियाए, ततो मूलं ततो दुगं ॥ १४०२ ॥**

अन्यद् अन्यतः **सप्तरात्रं** यावद्गणस्य निसर्जने धारणे वा प्रायश्चित्तं **तपो भवति। ततः** तपःप्रायश्चित्तपरिसमाप्त्यनन्तरं तपःक्रमेण **च्छेदः प्रधावति। छेदेन** चेन्न **छिन्नः पर्यायो** भवति ततोऽ**च्छिन्नपर्याये** तस्मिन् **मूलं** दीयते,। **ततो**ऽप्यतिक्रमे अन्तिमं **द्विक**मनवस्थाप्य-पाराञ्चितलक्षणम्। इयमत्र भावना- प्रथमसप्तदिवसानन्तरमन्यानि चेत् सप्त दिनानि गणं निसृजति धारयति वा स्वयं ततः प्रायश्चित्तं षड् लघु, ततोऽप्यन्यानि सप्तदिनानि चेत्ततः षड्गुरु, तदनन्तरमप्यन्यानि चेत् सप्तदिनानि ततश्चतुर्गुरुकच्छेदः, ततोऽप्यन्यसप्तदिवसातिक्रमे

षड्लघुकच्छेदः, तदनन्तरमप्यन्यसप्तदिवसातिवाहने षड्गुरुकच्छेदः। एतावता कालेन यदि पर्यायो न छिन्नस्ततस्त्रिचत्वारिंशत्तमे दिवसे गणं धारयतो निस्त्रष्टुर्वा प्रायश्चित्तं मूलम्। चतुश्चत्वारिंशत्तमे दिवसे अनवस्थाप्यम्, पञ्चचत्वारिंशत्तमे पाराञ्चितम्। तदेवं यत इत्थं प्रायश्चित्तं ततो न वर्तते आद्यानां त्रयाणां भङ्गानामेकतरः स्थापयितुम्। कः पुनर्गणधरः स्थापयितव्यः? इति चेत्, उच्यते- शुद्धः ॥१४०२॥

अथ कोऽसौ शुद्ध इति शुद्धलक्षणमाह—

**जो सो चउत्थभंगो , दव्वे भावे य होइ संछन्नो।**
**गणधारणम्मि अरिहो, सो सुद्धो होइ नायव्वो ॥ १४०३ ॥**

**योऽसौ** चतुर्थभङ्गः **चतुर्थभङ्ग**वर्ती कोऽसौ? इत्याह—**द्रव्ये भावे च यो भवति सञ्छन्नः**, द्रव्यपरिच्छदविशेषैर्भावपरिच्छदविशेषैः परिकलित इति भावः। तथा आचार्यलक्षणोपेततया यो **गणधारणे योग्यः स शुद्धो भवति ज्ञातव्यः** ॥ १४०३॥

'स च परीक्षया ज्ञातुं शक्यते' इति तत्परीक्षामाह—

**सुद्धस्स य पारिच्छा, खुड्डय१ थेरे२ य तरुण३ खग्गूडे ४।**
**दोमादिमंडलीए, सुद्धमसुद्धे५ ततो पुच्छा६ ॥ १४०४ ॥** दारगाहा।

**शुद्धस्य परीक्षा** कर्तव्या। कस्मिन् विषये? इत्यत आह— **क्षुल्लके स्थविरे तरुणे खग्गूडः** स्वभावाद्वक्राचारस्तस्मिंश्च, तथा **द्वयोरादिमण्डल्योः** । एताभिः परीक्षाभिर्यदि निर्वर्टितस्ततः **शुद्धः**। इतर**स्त्वशुद्धः**। शुद्धस्य च गणधरपदानुज्ञा कर्तव्या, नाशुद्धस्य। **ततः** शुद्धाऽशुद्धप्रतिपादनानन्तरं चोदकस्य **पृच्छा** उपलक्षणमेतत्, आचार्यस्य प्रतिवचनं च वक्तव्यम्। एष द्वारगाथासङ्क्षेपार्थः ॥ १४०४॥

साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतः क्षुल्लकविषयं परीक्षाविधिमाह—

**उच्चफलो अह खुड्डो, सउणिच्छावो व पोसिउं दुक्खं।**
**पुट्ठो वि होहिति न वा, पलिमंथो सारयंतस्स ॥ १४०५ ॥** दारं १।

तस्य द्रव्य-भावपरिच्छदोपेतस्य गणधरपदयोग्यतापरीक्षणाय प्रथमतः क्षुल्लको दीयते— एनं द्विविधामपि शिक्षां त्वं ग्राहय, ततः स एवमुक्तः सन् यदि चिन्तयति, यथा— **अह**त्ति एष

**क्षुल्लकः** उच्चं चिरकालभावि फलं यस्मात्सः **उच्चफलः** चिरकालेनोपकारी, 'तावता कालेन किमपि भविष्यति' इति को वेद? ततः क एनं शिक्षां ग्राहयिष्यति ?, यदि वा **शकुनिशाव**-मिव अमुं **पोषयितुं दुःखं** महता कष्टेनैष पोष्यते? पुनः पुनर्बुभुक्षाभावादिति भावः, अपि च **पुष्टोऽपि** सन्नेष मम **भविष्यति न वा?** को जानाति? अन्यच्चामुं **सारयतः** सारामस्य **कुर्वतो** मम सूत्रस्य अर्थस्य च महान् **पलिमन्थः** व्याघातः, ततो नैतस्य मे शिक्षया प्रयोजनम्, एवं चिन्तयन् यो न ग्राहयति सोऽनर्हः, तद्विपरीतोऽर्हः ॥१४०५॥ तथा यः स्थविरः 'एष प्रवचनोपग्रहकरो भविष्यति' दृढदेहो वा यथा **आर्यरक्षितपितेति** कारणतो दीक्षितस्तिष्ठति स शैक्षस्तस्य समर्प्यते— 'एनं द्विविधामपि शिक्षां ग्राहयेति' तस्मिन्समर्पिते यदि स इदं चिन्तयति—

**पुट्ठो वाऽऽसु मरिस्सति, दुराणुवत्तो न वेत्थ पडियारो।**
**सुत्तऽत्थे परिहाणी, थेरे बहुयं निरत्थं तु ॥ १४०६ ॥** दारं २।

एष प्रथमालिकादिदापनतः शिक्षाग्राहणतश्च **पुष्टी**कृतोऽपि **आशु** शीघ्रं **मरिष्यति**। **वा**शब्दश्चिन्तान्तरसमुच्चये। यदि वा वृद्धः स्वभावाद् **दुरनुवर्त्यः** दुःखेनानुवर्त्यते, **न वा अत्र** वृद्धशिक्षापने कश्चित्**प्रतीकारः**। किमुक्तं भवति ?— नास्मात् शिक्षापिताद् वृद्धात्

कश्चित्प्रत्युपकारः। अथवा वृद्धो वृद्धत्वादेव जडक्रियो जडप्रज्ञश्च, ततोऽस्य शिक्षणे मम **सूत्राऽर्थपरिहाणिः**, तदेवं **स्थविरशिक्षां** ग्राह्यमाणे **बहुकं निरर्थकमि**ति क एनं शिक्षयिष्यति ?। एवं चिन्तयित्वा यो न शिक्षां ग्राहयति सोऽनर्हः, तद्विपरीतोऽर्ह इति ॥ १४०६ ॥

तदनन्तरं योऽसौ तरुणो मेधावी तं समर्प्य भण्यते, यथा— एष मण्डलिपरिपाट्या आलापके दीयमाने सीदति। ततस्त्वमेनमव्याक्षेपेण पाठय ततः स इदं चिन्तयति—

**अहियं पुच्छति ओगिण्हए बहुं किं गुणो मि रेगेण ?।**
**होहिति य विवड्ढंतो, एसो हु ममं पडिसवत्ती ॥ १४०७ ॥** दारं ३।

एष मेधावित्वा**दधिकं पृच्छति अवगृह्णाति** चाऽवधारयति च **बहु** प्रभूतम्, तत इत्थमस्यैव सूत्रस्य अर्थस्य **चातिरेकेण** प्रदानतः अक्षणिकतया **को गुणो मम ?** नैव कश्चिदित्यर्थः, केवलं दोषो निजसूत्राऽर्थपरिगलनात्, अन्यच्च **एषः हुः** निश्चितं **विवर्धमानः** सूत्रतोऽर्थतश्च वृद्धिं गच्छन् **मम प्रतिसपत्नी** प्रतिकूला सपत्नीव च प्रतिपन्थी **भविष्यति**, ततो न कोऽप्येनं पाठयिष्यतीति यो न शिक्षयति सोऽनर्हः, तद्विपरीतोऽर्हः ॥ १४०७॥

ततः खग्गूडं दत्त्वा स भण्यते—अमुं तथा ग्राहय यथा ऋजुः सामाचारीकुशलश्च भवति। ततश्चिन्तयति—

**कोही व निरुवगारी, फरुसो सव्वस्स वामवट्टो य।**
**अविणीतो त्ति व काउं, हंतुं सत्तुं व निच्छुभती ॥ १४०८ ॥**

**क्रोधी** यदि वा **निरुपकारी** अथवा **परुषः** परुषभाषी तथा **सर्वस्य** साधुवर्गस्य **वामावर्तः** प्रतिकूलतया वर्तते, यदि वा **अविनीत इति कृत्वा** शिक्षां न ग्राहयति। अथवा आक्रुश्य **शत्रुमिव** वा **हत्वा निष्काशयति** तर्हि सोऽनर्हः, तद्विपरीतोऽर्हः ॥१४०८॥

सम्प्रति चतुर्ष्वपि जनेषु तद्विपरीततया यथाऽर्हो भवति तथा भावयति—

**वत्थाऽऽहारादीहि य, संगिण्हऽणुवत्तए य जो जुयलं।**
**गाहेइ अपरितंतो, गाहण सिक्खावए तरुणं ॥ १४०९ ॥**

**खर-मउएहऽणुयत्तति खग्गूडं जेण पडति पासेणं।**
**थामोविहारविजढो, तत्थोड्डुण म प्पणा कुणति ॥ १४१० ॥**

**यो** नाम **युगलं** क्षुल्लक-वृद्धलक्षणं **वस्त्राऽऽहारादिभिः सङ्गृह्णाति** आत्मवशीकरोति **अनुवर्तयति च**। तरुण**मपरितान्तः** परिश्रममगणयन् **ग्राहयति ग्राहणं** ग्राह्यते **शिष्य** एतदिति बाहुलकात्कर्मण्यनट्, ग्राहण**माचारा**दिश्रुतं आसेवनाऽऽशिक्षया च **शिक्षयति** ॥१४०९॥ तथा

**खग्गूडं खर-मृदुभि**र्वाक्यैस्तथा**ऽनुवर्तयति येन** सः **पाशेन पतति** 'अन्यथा गतिं न लभते' इति मन्यमानस्तद्वशीभवति। तथा यः **स्थामो**ऽपि बलवानपि सन् खग्गूडतया **विहारविजढो** भवति, विहारं न करोतीति भावः। **तत्र उड्डुण**मङ्गीकार**मात्मना करोति,** यथा-एनमहं **खरेण मृदुना** वोपायेन विहारक्रमं कारयिष्यामीति। एष एवम्भूतो योग्यः ॥ १४१० ॥

**इय सुद्ध सुत्तमंडलि दाविज्जइ अत्थमंडली चेव।**
**दोहिं पि असीयंते, देइ गणं दारं५ चोयए पुच्छा ॥ १४११ ॥**

**इति** एवमुपदर्शितेन प्रकारेण चतुर्ष्वपि जनेषु सूत्रोपदेशतः परीक्षितः सन् **शुद्धो** भवति न मनागपि दोषः, ततस्तस्य **सूत्रमण्डली** दाप्यते **अर्थमण्डली च**। एतयोश्च **द्वयोरपि मण्डल्योर्यदि न विषीदति** किन्त्वपरिश्रान्ततया गच्छवर्तिनां प्रातीच्छिकानां च

ज्ञानाद्यभिलाषिणां चित्तग्राहको वर्त्तते, ततस्तस्मिन् मूलाचार्यो **गणं ददाति**। एवमुक्ते **चोदके** चोदकस्य **पृच्छा** ॥१४११॥

का? इत्यत आह—

**चोएइ भणेऊणं, उभयच्छन्नस्स दिज्जइ गणो त्ति।**
**सुत्ते य अणुन्नायं, भयवं! धरणं पलिच्छन्ने ॥ १४१२ ॥**

**अरिहाऽणरिहपरिच्छं, अत्थेणं जं पुणो परूवेह।**
**एवं होइ विरोहो, सुत्तऽत्थाणं दुवेण्हं पि ॥ १४१३ ॥**

**चोदयति** प्रश्नयति परः, यथा—पूर्वमिदमुक्तं **उभयच्छन्नस्य** द्रव्य-भावपरिच्छदविशेष-साकल्यपरिकलितस्य **गणो दीयते**, युक्तं चैतत्, यतः **सूत्रे**ऽपि, **च**शब्दः अपिशब्दार्थे, **भगवन्! धारणं** गणधारण**मनुज्ञातं परिच्छन्ने** द्रव्य-भावपरिच्छदोपेतमात्रे॥ १४१२॥ तत एवमुक्त्वा **यदर्हानर्हपरीक्षामर्थेन** अर्थमाश्रित्य **प्ररूपयथ नन्वेवं** सति **द्वयोरपि सूत्रार्थ-योर्भवति विरोधः**, उक्तरूपस्यार्थस्याधिकृतसूत्रेणासूचनात् ॥ १४१३॥

अत्र सूरिराह—

**संति हि आयरियबिइज्जगाणि सत्थाणि चोयग सुणाहि।**
**सुत्ताणुण्णातो वि हु, होइ कयाई अणरिहो उ ॥ १४१४ ॥**

**तेण परिच्छा कीरिइ, सुवण्णगस्सेव ताव-निहसादी।**
**तत्थ इमो दिट्ठंतो, रायकुमारेहिं कायव्वो ॥ १४१५ ॥** दारं ६।

**चोदक! शृणु** मदीयं वचः— **सन्ति हि** स्फुटं तानि **शास्त्राणि** यान्या**चार्यद्वितीयकानि**। किमुक्तं भवति?— आचार्यपरम्परायातसम्प्रदायविशेषपरिकलितानि, ततो यद्यप्यर्हाऽनर्ह-परीक्षालक्षणोऽर्थः सूत्रे साक्षान्नोपनिबद्धस्तथापि "सूचनात्सूत्रम्" इति सोऽपि सूत्रेण सूचित इति सम्प्रदायादवगम्यत इति न कश्चिद्दोषः। तथा च **सूत्रानुज्ञातोऽपि हु** निश्चितं **कदाचिदनर्हो भवति**। न च सूत्रमन्यथा सर्वज्ञप्रणीतत्वात्॥ १४१४॥ **तेन परीक्षाऽपि** सूचितेति **ताप-निकषादिभिः सुवर्णस्येव** सूत्रानुज्ञातस्यापि क्षुल्लकादिभिः परीक्षा **क्रियते**। **तत्रायं** वक्ष्यमाणलक्षणो **दृष्टान्तो राजकुमारैः कर्तव्यः** ॥ १४१५॥

तमेवाह—

**सूरे १वीरे २सत्तिए ३ ववसाइ४ थिरे ५ चियाय६ धितिमंते७।**
**बुद्धी८ विणीयकरणे९, सीसे वि तहा परिच्छाए ॥ १४१६ ॥**

**निब्भय१ओरस्सबली२, अविसाइ३ पुणो करेंति संठाणं।**
**न विसम्मति५ देति६ अणिस्सितो७ य चउहा८ऽणुवती य९ ॥ १४१७ ॥**

इहाऽऽद्यगाथापदानां द्वितीयगाथापदैर्व्याख्यानम् तद्यथा—**शूरो** नाम **निर्भयः**[1], तेन कुतश्चिदपि न भयमुपगच्छति १। **वीर औरसबलवान्,** तेनाक्लेशेन परबलं जयति २। **सात्त्विको** नाम यो महत्यभ्युदये गर्वं नोपयाति, न च गरिष्ठेऽपि समापतिते व्यसने विषादम्। तथा चाह—**अविषादी,** उपलक्षणमेतत्, अगर्वी वा ३। **व्यवसायी** अनलसः उद्योगवानित्यर्थः। तथा चाह—**पुनः करोति संस्थानम्,** किमुक्तं भवति?- प्रमादतः कथञ्चिद् व्यवसाय-विकलोऽपि भूत्वा पुनः करोति संस्थानम् कर्तुमुद्यच्छति स्वोचितं व्यवसायमिति भावः ४।

---

१. ॰यः, स च कुत॰ वा. पु.॥

**स्थिरो** नाम यः उद्योगं कुर्वन्नपि न परिताम्यति, तथा चाह-**न विश्राम्यतीति** ५। **चियाय** त्ति दानरुचिः। यथौचित्यमाश्रितेभ्योऽन्येभ्यश्च **ददातीत्यर्थः** ६। **धृतिमान्** राज्यकार्याणि कुर्वन् परनिश्रामनपेक्षमाणः तथा चाह- **अणिस्सिते** इति [अनिश्रितः]७। **बुद्धि**त्ति औत्पत्तिक्यादि-बुद्धिचतुष्टयोपेतः८। **विनीतः** गुर्वादिषु विनयकारी, यथौचित्यं गुर्वादीना**मनुवर्त्तक** इत्यर्थः। **करणे** इति यद्राज्ञः कर्तव्यं तत्करणे कुशलः९। एतेषु परीक्षा क्रियते। किमेते गुणाः सन्ति न वा ? तत्र य एतैर्गुणैरुपेतो भवति स राज्ञा राज्येऽभिषिच्यते॥१४१६-१७॥[1]

[इदानीं निर्युक्तिकृदेव सर्वाणि पदानि व्याख्यानयन्नाह—]

**परवादीउवसग्गे, उप्पन्ने सूरयाए[2] संतरति १।**
**अद्धाण तेणमादी, ओरस्सबलेण संतरति ॥ १४१८॥**

१. सर्वेष्वप्यादर्शेषु [ ] एतादृक्कोष्ठकान्तर्गतो ग्रन्थसन्दर्भस्त्रुटितोऽस्ति। किञ्च - मोमो. आदर्शे १४१८-१९ गाथे उल्लिख्य तत्र ''एतयोर्गाथयोः सपातनिकं व्याख्यानं त्रुटितम्'' इति टिप्पनी लिखिता वर्तते, अतो ज्ञायते -प्राचीनकालादेव एष एतावान् ग्रन्थसन्दर्भस्त्रुटितोऽस्ति। अपि चात्रेदमवधेयम् - मो. आदर्शे १४१८-१९ गाथे लिखिते उपलभ्येते, तदन्येषु पुनः प्राचीनताडपत्रीय प्रभृतिष्वादर्शेषु पुनः एते गाथे अपि न स्त इति॥
२. सूर आवइं तर ला.। सूरयाए तं तरति- पु. प्रे.॥

अब्भुदए वसणे वा, अखुब्भमाणो उ सत्तितो होति ३।
आवति कुलादिकज्जेसु चेव ववसायवं तरति ४॥ १४१९ ॥

[ शूरः परवादिनामुपसर्गे उत्पन्ने शूरतया सन्तरति। वीरः औरस्यबलेन अध्वनि स्तेनादीन् सन्तरति। सात्त्विकः अभ्युदये व्यसने वा अक्षुभ्यो भवति। व्यवसायवान् आपदि कुलादिकार्येषु तरति।]

कायव्वमपरितंतो, काउं वि थिरो अणणुतावी उ ५।
थोवातो वि दलंतो, चियागवं दाणसीलो उ ॥ १४२० ॥

अत्र यः **स्थिरः सोऽपरितान्तः** सन् **कर्तव्यं** करोति, **कृत्वापि** च पश्चा**दननुतापी**। **त्यागवान्** नाम **दानशीलः**, स च **स्तोकादपि** स्तोकं **ददानो** गणस्य बहुमानभाग् भवति ॥ १४२० ॥

उवसग्गे सोढव्वे, झाए किच्चेसु यावि धिइमंते।
बुद्धिचउक्कविणीतो, अहवा गुरुमादिविणितो उ ॥ १४२१ ॥

**धृतिमान् उपसर्गान् सोढव्यान् ध्यायति, कृत्येष्वपि** कार्येष्वविषादं प्रवर्त्तते, **बुद्धिविनीतः** इत्यत्र इदमपि व्याख्यातम्— बुद्धि**चतुष्टयं** विशिष्टं नीतं-प्रापितमात्मनि येन स बुद्धिविनीतः, सुखादिदर्शनात्क्तान्तस्य पाक्षिकः परनिपातः। **अथवा** बुद्धित्ति बुद्धिचतुष्कोपेतः, विनीतः **गुर्वादिषु विनीतः** ॥१४२१॥

**दव्वाई जं जत्थ उ, जम्मि वि किच्चं तु जस्स वा जं तु।**
**कुव्वइ अहीणकालं, जियकरण-विणीय-एगट्ठा ॥ १४२२ ॥**

**यद्यत्र द्रव्याद्युपयोगि यस्य वा यत्र यत् कृत्यं** तत्सर्व**महीनकालं** जितकरणः **करोति** कारयति च। **जितकरणो विनीत** इति द्वावप्**येकार्थौ** तात्पर्यविश्रान्त्या। शब्दार्थस्तु परस्परं भिन्नः- जितकरणो नाम करणदक्ष उच्यते, विनीत इति विनयकरणशीलः ॥ १४२२॥

**एवं जुत्तपरिच्छाए, जुत्तो वेतेहिमेहि उ अजोग्गो।**
**आहारादि धरेंतो, तिंतिणिमाईहिं दोसेहिं ॥ १४२३ ॥**

**एवमेतैः** अनन्तरोदितैः शूरत्वादिभिर्गुणैः **युक्ता** उचिता या **परीक्षा** तया **युक्तोऽपि**

निश्रित **एभिः** वक्ष्यमाणै**र्दोषैः अयोग्यः**। तानेवाऽऽह—**आहारादि** आहारोपधि-पूजानिमित्तं गणं **धारयन् तिन्तिण्यादिभिश्च दोषै**रयोग्यः। तिन्तिणी नाम यत्र तत्र वा स्तोकेऽपि कारणे करकरायणम्। आदिशब्दाच्चलचित्तादिपरिग्रहः॥ १४२३॥

एतदेव व्याख्यानयति—

**बहुसुत्ते गीयत्थे, धरेइ आहार-पूयणट्ठाई।**
**तिंतिणि-चल-अणवट्ठिय-दुब्बलचरणा अजोग्गा उ ॥ १४२४ ॥**

बहुकालोचितं सूत्रं- आचारादिकं यस्य स **बहुसूत्रः गीतार्थः** विदितसूत्रार्थः, एतेन 'युक्तपरीक्षायुक्तोऽपि' इत्येतद् व्याख्यातम्। एवम्भूतोऽपि यो गणं **धारयति आहार-पूयणट्ठाई** इति 'उत्कृष्टो मे आहारो भविष्यति, पूजनं वा स्वपक्षतः परपक्षतश्च' इत्येवमर्थम् आदिशब्दाद् 'उपधिरन्यद्वोपकरणमुत्कृष्टं मे भविष्यति' इत्येवमर्थपरिग्रहः, सोऽयोग्यः। तथा **यस्तिंतिणः**-स्वल्पेऽपि प्रयोजने करकरायमाणः **चलः** चलचित्तः। **अनवस्थितः** स्वप्रतिपन्नार्थाऽनिर्वाही, **दुर्बलचरणः**-चारित्रविषये दुर्बलः एतेऽ**प्ययोग्याः** ॥ १४२४॥

**एवं परिक्खियम्मी, पत्ते दिज्जति अपत्ते पडिसेहो।**
**दुपरिक्खियपत्ते पुण, वारिय हावेंतिमा मेरा ॥ १४२५ ॥**



**एव**मनन्तरोदितेषु गुणेषु दोषेषु च यदि **परीक्षया** निर्वर्टितो भवति, गुणैरुपेतो दोषैश्च विप्रमुक्त इत्यर्थः, तदा स पात्रमिति कृत्वा तस्मिन्**परीक्षिते पात्रे** गणो **दीयते**। यस्तु प्रागुक्तैर्दोषैरुपेतो गुणैश्च विप्रमुक्तः सोऽपात्रमतस्तस्मिन्न**पात्रे** गणदानस्य **प्रतिषेधः**, तस्मै गणो न दातव्य इति भावः। **दुपरिक्खिय** इत्यादि, अथ कदाचित्स दुष्परीक्षितः कृतो भवेत् गणश्च तस्मै दत्तः, स च गणः सीदति, तं दृष्ट्वा अन्येऽपि गच्छवर्तिनः केचित् सामाचारीशिथिला भवितुं प्रवृत्ताः, ततः तस्मिन् दुष्परीक्षितेऽपात्रे गणे प्रदत्ते सति गणे च सीदति ये तत्र गच्छे अन्ये तीव्रधर्मश्रद्धाका न सीदन्ति तैरुपायेन [1]प्रतिबोध्य वारयितव्यः। तत्र यदि वारणानन्तर-मावृत्त्योद्यच्छति ततः समीचीनम्। अथ वारितोऽपि किञ्चित्कालमुद्यम्य पुनः **सामाचारीं हापयति** तत **इयं मर्यादा** कर्तव्या, अयं विधिः प्रयोक्तव्य इत्यर्थः ॥१४२६॥

---

१. प्रतिचोद्य - पु. प्रे.। प्रतिनोद्य मो. ॥

तमेवाऽऽह—

**दिट्ठो व समोसरणे, अहवा थेरा तहिं तु वच्चंति।**
**परिसा य घट्ट-मट्ठा, चंदण खोडी-खरंटणा य ॥ १४२६ ॥**

यत्र **समवसरणे** ज्ञायते 'आचार्योऽत्र प्रवेक्ष्यति' तत्र गच्छेऽनुलोमवचसा प्रवेशनीयः। प्रवेश्य तत्र गत्वाऽऽचार्यस्य कथयन्ति त्वं सीदन् तिष्ठसि, न चैतद्युक्तम्, तस्माद्भव्यगत्या वर्त्तस्व। **अथवा** कुलानि हिण्डमानाः **स्थविरास्तत्र** गच्छे **व्रजन्ति**। तत्र च दृष्टान्तैः **पर्षद्** असाधुपरिवाररूपा **घृष्टा**— पादघर्षणाद्, **मृष्टा** शरीरस्य केशादीनां च समारचनात्। ततस्तां तथारूपां पर्षदमवलोक्य **चन्दनखोडिदृष्टान्तेन खरण्टना** कर्तव्या। सा चैवं—

आयरिया दिट्ठंतमेगं सुणंतु— एगो इंगालदाहओ इंगालकट्ठाईणं आणणट्ठाए नदीकूलं गतो। तत्थ पासइ तडेण बुज्झमाणं गोसीसचंदणखोडिं सो तं घेत्तूण पारं ठितो। तमंतरा वणिओ पासइ, जाणइ— एसा गोसीसचंदणखोडी। ततो तेण सो भणितो किं एएण कट्ठेण तं करिस्संसि ? इंगालदाहगो भणइ—दहिऊण इंगाले घेच्छामि। वणिओ चिंतेति— जइ

एत्ताहे चेव मग्गीहामो तो बहुयं मोल्लं काहिति, ततो जाहे डहिउमाढवेहिति ताहे किणीहामि। एवं चिंतित्ता जाव वणिओ मुल्लस्स कएण घरं गंतुं एति ताव तेण दड्ढा गोसीसचंदणखोडी। वणिएण आगंतुं पुच्छितो— 'कहिं तं कट्ठं?' सो भणइ— 'दड्ढं' ति। एवं भणिएण खिंसितो— 'महाभाग! फिडितो सि ईसरियत्तणस्स'। एवं जहा सो इंगालदाहओ सो य वाणियओ ईसरियत्तणस्स चुक्को एवं तुमंपि नाणादी डहंतो निव्वाणस्स चुक्किहिसि ॥१४२६॥

एतदेवाह —

**इंगालदाहखोडी पवेसे दिट्ठा उ वाणिएणं तु।**
**जा मुल्लं आणयए, इंगालट्ठाए ता दड्ढा ॥ १४२७ ॥**

**इय चंदणरयणनिभा, पमायतिक्खेण परसुणा भेत्तुं।**
**दुविह पडिसेवसिहिणा तिरयणखोडी तुमे दड्ढा ॥ १४२८ ॥**

अङ्गारान् दहतीति **अङ्गारदाहः**, तस्य पार्श्वे गोशीर्षचन्दन**खोडी प्रवेशे** ग्रामप्रवेशे **वणिजा दृष्टा**। स च **यावन्मूल्यमानयति** तावत्तेनाङ्गारदाहके**नाङ्गारार्थं** सा खोडि**र्दग्धा** इत्यक्षरार्थः।

भावार्थस्तु प्रागेवोक्तः ॥१४२७॥

सऽाम्प्रतमुपनयमाह—

**इय चंदणे**त्यादि। **इत्ये**वममुना प्रकारेण **चन्दनरत्ननिभा** गोशीर्षचन्दनतुल्या त्रिरत्नखोडी ज्ञानादिरत्नत्रयरूपा **खोडिः प्रमाद**रूपेण **तीक्ष्णेन परशुना भित्त्वा द्विविधा या प्रतिसेवा—** मूलगुणप्रतिसेवा उत्तरगुणप्रतिसेवा चेत्यर्थः, सैव **शिखी**वैश्वानरस्तेन **त्वया दग्धा**। एवं वारितः सन् यदि निवर्तते ततः प्रायश्चित्तं दत्त्वा तस्य वर्त्तापकाः स्थविरा दातव्याः। अथ न निवर्त्तते तर्हि तस्य गणोऽपहरणीयः ॥१४२८॥ न केवलमेतेऽनर्हाः, किंत्वन्येऽपि। तथा चाह—

**एएहि अणरिहेहिं, अन्ने वि य सूइया अणरिहा उ।**
**के पुण ते? इणमो, [1]ते दीणादीया मुणेयव्वा ॥ १४२९ ॥**

**एतैः** अनन्तरोदितै**रनर्हैरन्येऽपि** खलु **सूचिता** अनर्हाः। **के पुनस्ते?** सूरिराह— **इमे** ते वक्ष्यमांणा **दीनादयो ज्ञातव्याः** ॥१४२९॥

१ ०तू - पु. प्रे. ॥

तानेवाऽऽह—

**दीणा जुंगिय चउरो, जाती१कम्मे२ य सिप्प३सारीरे४।**
**पाणा डोंबा किणिया, सोवागा चेव जातीए ॥ १४३० ॥**

**दीनाः** अनर्हाः। कस्मात्? इति चेत्, उच्यते— तेषां नन्दनाभावाद्। उक्तं च—

*दीणं दीणाभासं, दीणगतिं दीणजंपियं पुरिसं।*
*कं पेच्छसि नंदंतं, दीणं दीणाए दिट्ठीए ? ॥ [ ]*

तथा **जुङ्गिकाः** हीनाश्चत्वारोऽनर्हाः, तद्यथा-**जातौ कर्मणि शिल्पे शरीरे च**। तत्र **जातौ** जुङ्गिकाश्चत्वारः, तद्यथा— **पाणा डोम्बाः किणिकाः श्वपचाश्च**। तत्र पाणा नाम ये ग्रामस्य नगरस्य च बहिराकाशे वसन्ति तेषां, गृहाणामभावात्। डोम्बाः येषां गृहाणि सन्ति गीतं च गायन्ति। किणिकाः ये वादित्राणि परिणह्यन्ति, वध्यानां च नगरमध्येन नीयमानानां पुरतो वादयन्ति च, श्वपचाः चण्डाला ये शुनः पचन्ति, तन्त्रीश्च विक्रीणन्तीति। एते जातौ जुङ्गिताः। उपलक्षणमेतत्, तेन ये कोलिकाः, ये च हरिकेशजातयो मेयाः, ये च

वरुडादयस्तेऽपि जातौ जुङ्गिका द्रष्टव्याः ॥ १४३० ॥

सम्प्रति कर्मणि शिल्पे च तानभिधित्सुराह—

**पोसग संवर नड लंख, वाह मच्छंध रयग वग्गुरिया।**
**पडगारा य परीसह, सिप्पे सरीरे य वुच्छामि ॥ १४३१ ॥**

**पोषकाः** ये स्त्री-कुक्कुट-मयूरान् पोषयन्ति। [1]**शंवराः** [2]तानिकाशोधकाः। **नटाः** प्रतीताः, ये नाटकानि नर्त्तयन्ति। **लङ्खाः** ये वंशादेरुपरि नृत्तं दर्शयन्ति। **व्याधाः** लुब्धका। **मत्स्य**बन्धाः कैवर्ताः। **रजकाः** वस्त्रप्रक्षालकाः। **वागुरिकाः** मृगजालिकाजीविनः। एते कर्मणि जुङ्गिकाः। **पटकाराः** [3]कुविन्दादयः, चर्मकारा इत्यपरे, **परीषहाः** नापिताः। एते **शिल्पे** जुङ्गिकाः। सम्प्रति **शरीरे** 'तान् वक्ष्यामि ॥ १४३१ ॥

प्रतिज्ञातं निर्वाहयति—

---

१ संवराः - वा. पु. मु. ॥ २ स्नानिका शो॰ मो.। "संवरा ण्हाणिगा, सेसं कण्ठ्यम्" चूर्णौ ॥ ३ कुञ्चिकादयः - वा.पु. ॥

**हत्थे पाए कण्णे, नासा ओट्ठेहिं वज्जियं जाण।**
**वामणग मडभ कोढिय, काणा तह पंगुला चेव ॥ १४३२ ॥**

शरीरे जुङ्गिकां **जानीहि हस्ते** सप्तमी प्राकृतत्वात् तृतीयार्थे, एवं सर्वत्र। ततोऽयमर्थः—हस्तेन उपलक्षणमेतत्, हस्ताभ्यां वा **वर्जितम्**, एवं **पादेन** पादाभ्यां वा, **कर्णेन** कर्णाभ्यां वा, **नाशया ओष्ठेन**, **वामनकाः** हीनहस्त-पादाद्यवयवा, **मडभाः** कुब्जाः, **कौष्ठिकाः** कुष्ठव्याध्युपहताः, **काणाः** एकाक्षाः। **पङ्गुलाः** पादगमनशक्तिविकलाः। एतानपि शरीर-जुङ्गिकान् जानीहि ॥१४३२॥

**दिक्खेउं पि न कप्पंति, जुंगिया कारणे विदोसा वा।**
**अण्णायदिक्खिए वा, नाउं न करेंति आयरिए ॥ १४३३ ॥**

एते अनन्तरोदिताश्चत्वारोऽपि **जुङ्गिका दीक्षितुमपि न कल्पन्ते**, किं पुनराचार्यपदे स्थापयितुम्? इत्यपिशब्दार्थः। **कारणे** तथाविधे समुत्पन्ने **विदोषा वा** निर्दोषा वा दीक्षितुमिति सम्बध्यन्ते। अज्ञाताश्चेत्कथमपि जुङ्गिका दीक्षिता भवेयुस्ततस्तान**ज्ञातदीक्षितान्** जुङ्गिकान्

ज्ञात्वा न **कुर्वन्त्या**चार्यगुणोपेतान् **अप्याचार्यान्**, प्रवचनहीलनाप्रसक्तेः ॥ १४३३ ॥

**पच्छा वि होंति विगला, आयरियत्तं न कप्पई तेसिं।**
**सीसो ठावेयव्वो, काणगमहिसो व निन्नम्मि ॥ १४३४ ॥**

**पश्चादपि** श्रामण्यस्थिता येऽक्षिगलनादिना **विकला भवन्ति** तेषामप्या**चार्य**गुणैर्युक्ता-नामप्या**चार्यत्वं न कल्पते**। येऽप्याचार्यपदोपविष्टाः सन्तः पश्चाद्विकला जायन्ते तेषामपि न कल्पते धारयितुमाचार्यत्वम्, किन्तु तैस्तथाविकलैः सद्भिरात्मनः पदे **शिष्यः स्थापयितव्यः**। आत्मा त्वप्रकाशे स्थापयितव्यः, क इव ? इत्यत आह—**काणकमहिष इव निम्ने**। इयमत्र भावना— काणको नाम चोरित उच्यते। यथा चोरितमहिषः 'मा कोऽप्येनमद्राक्षीद्' इति हेतोर्ग्रामस्य नगरस्य वा बहिर्गर्त्तारूपे निम्ने प्रदेशे, उपलक्षणमेतद्, अतिगुपिले वा वनगहने स्थाप्यते। एवमेषोऽपि, अन्यथा प्रवचनहीलना प्रसक्तेः, आज्ञादिदोषप्रसङ्गश्च ॥१४३४॥

अथ योऽसावात्मीयः शिष्यः पश्चाद्विकलैराचार्यः स्थाप्यते, स कीदृशः ? इत्यत आह—

**गणि अगणी वा गीतो, जो व अगीतो वि आगिईमंतो।**
**लोगे स पगासिज्जइ, हावेंति न किच्चमियरस्स ॥ १४३५ ॥**

गणोऽस्यास्तीति **गणी** साधुपरिवारवान् यो वर्तते, तदभावे **अगणी वा** यः **गीतः** गीतार्थः कालोचितसूत्राऽर्थपरिनिष्ठितः, तस्याप्यभावे **यो वा अगीतार्थोऽपि आकृतिमान्** रूपेण मकरध्वजतुल्यः **स** गणधरपदे निवेश्य लोके **प्रकाश्यते,** यथा— अयमस्माकमाचार्यः नेतर इति। केवलं **इतरस्यापि** जुङ्गिकाचार्यस्य यत् **कृत्यं** तत्स्थविरा अन्येऽपि च **न हापयन्ति,** सर्वमपि कृत्यं कुर्वन्तीतिभावः ॥१४३५॥

सम्प्रत्यनर्हान् प्रतिपिपादयिषुरिदमाह—

**एयद्दोसविमुक्का वि, अणरिहा होंतिमे उ अन्ने वि।**
**अच्चाबाधादीया, तेसि विभागो उ कायव्वो ॥ १४३६ ॥**

**एतैः** अनन्तरोदितै**र्दोषैर्विमुक्ता अपि** भवन्त्यन्ये इमे **अनर्हाः**। के ते? इत्याह— **अत्याबाधादयः**। ततस्**तेषाम्** अत्याबाधादीनां **विभागः** पार्थक्येन स्वस्वरूपवर्णनं **कर्तव्यः** ॥१४३६॥

प्रतिज्ञातमेव निर्वाहयति—

**अच्चाबाधे१ अचायंते२, नेच्छई३ अप्पचिंतए४।**
**एगंपुरिसे कहं५ निंदू६काग७वंझा कहं भवे८ ॥ १४३७ ॥**

**अत्याबाधाः "अचायंते"** त्ति अशक्नुवन् **२नेच्छतीत्ति** नेच्छति अनिच्छन् ३तथा **आत्मचिन्तक** ४ एते चत्वारोऽपि पुरुषाः अनर्हाः। न केवलमेतेऽनर्हाः किन्त्वे**वेकपुरुषा**-दयोऽपि। तत्र शिष्यः प्राह—कथमेकपुरुषो भवति?५ **कथं** वा **निंदूः**? ६ कथं वा **काकी**? ७ **कथं** वा वन्ध्या?८ इति ॥१४३७॥

एवं शिष्येण प्रश्ने कृते सति सूरिः सकलविनेयजनानुग्रहप्रवृत्तः सर्वानप्यत्याबाधादीन् व्याख्यानयति—

**अच्चाबाधो बाधं, मन्नइ बितिओ धरेउमसमत्थो।**
**तइओ न चेव इच्छइ तिण्णि वि एए अणरिहातो ॥ १४३८ ॥**

अतिशयेन आबाधा यस्य सोऽ**त्याबाधः**, स गच्छस्य द्विविधेप्युपग्रहे वस्त्र-पात्रादिज्ञानाद्युपष्टम्भरूपे कर्तव्ये **बाधां मन्यते** १। **द्वितीयः** अशक्नुवन् गणं **धारयितुमसमर्थः** द्विविधमप्युपग्रहं गच्छस्य कर्तुमशक्त इत्यर्थः २। **तृतीयः अनिच्छन्** समर्थोऽप्यालस्येन गणं धारयितुं नेच्छति ३। **एते त्रयोऽप्यनर्हाः** ॥१४३८॥

आत्मचिन्तकमाह—

**अब्भुज्जयमेगयरं, पडिवज्जिस्सं ति अत्तचिंतो उ।**
**जो वा गणे वि संतो, न वहति तत्ती उ अन्नेसिं ॥ १४३९ ॥** दारं ४।

य आत्मानमेव केवलं चिन्तयन् मन्यते, यथा 'अह**मभ्युद्यतं** जिनकल्प-यथालन्द-कल्प-परिहारविशुद्धिकल्पाना**मेकतरं** विहारं **प्रतिपत्स्ये**' इति **आत्मचिन्तकः**, **यो**ऽपि **गणे**ऽपि गच्छेऽपि **सन्** तिष्ठन् **न वहति** न करोति **तत्तिमन्येषां** साधूनां सोप्यात्मचिन्तकः। एतौ द्वावप्यात्मचिन्तकावनर्हौ४ ॥१४३९॥

**एगं मग्गति सिस्सं, पण** दा. ५। **छट्ठे मरेंति विद्धसंते वा।** दा. ६।
**सत्तमयस्स वि एवं, नवरं पुण ठायए एगो ॥ १४४० ॥** दारं ७।

**पणत्ति** पञ्चमः, एकपुरुष **एकं शिष्यं मृगयते**। स ह्येवं चिन्तयति— किमप्येकमात्मनः सहायं मृगयामि येन सुखं तिष्ठामीति५। तथा **षष्ठे** निन्दूतुल्ये शिष्या **म्रियन्ते विध्वंसन्ते वा,** प्रतिभज्यन्ते चेति भावार्थः। इयमत्र भावना— यथा निन्दूमहेला यद्यदपत्यं प्रसूते तत् तन्म्रियते, एवं योऽपि यं यं प्रव्राजयति स स म्रियते, अपगच्छति वा, ततः स निन्दूरिव निन्दू ६। **सप्तमस्यापि** काकीतुल्यस्य **एवमेव** द्रष्टव्यम्। **नवरं पुनरेकः तिष्ठति।** किमुक्तं भवति?— तस्यापि यो यः शिष्यः सम्पद्यते स म्रियते विध्वंसते वा, केवलमेकस्तिष्ठति। उपलक्षणमेतत्, तेनैतदपि द्रष्टव्यम्— यस्यैकस्मिन् प्रव्राजिते सति द्वितीयविषये लब्धिरेव नास्ति स काकीव काकी, काक्यपि हि किलैकं वारं प्रसूते इति प्रसिद्धिः, वन्ध्यातुल्यः सुप्रतीत इति न व्याख्यातः। तस्येदं व्याख्यानम्— वन्ध्या किलाप्रसवधर्मा, एवं यस्य नैकोऽपि शिष्य उपतिष्ठते स वन्ध्येव वन्ध्येति ८ ॥१४४०॥

पुनरन्याननर्हान् प्रतिपिपादयिषुरिदमाह—

**अहवा इमे अणरिहा, देसाणं दरिसणं करेंतेण।**
**जे पव्वाविय तेणं, थेरादि पयच्छति गुरूणं ॥ १४४१ ॥**

**अथवेति** अनर्हाणामेव प्रकारान्तरतोपदर्शने। **इमे** वक्ष्यमाणा **अनर्हाः**। तानेवाऽऽह-**देशानां दर्शनं कुर्वता तेन ये प्रव्राजिता स्थविरादयस्तान् प्रयच्छति गुरूणाम्**। न तरुणादीन्। पूर्वं बहुवचनमनेकव्यक्त्यपेक्षयेत्यदोषः ॥१४४१ ॥

स्थविरादीनेवाऽऽह—

**थेरे१ अणरिहे सीसे२, खग्गूडे३ एगलंभिए४।**
**उक्खेवग५ इत्तिरिए६ पंथे कालगते७ इय ॥ १४४२ ॥** दारगाहा।

य: **स्थविरान्** प्रयच्छति **शिष्यान्** १ यो **वाऽनर्हान्** २ यो वा **खग्गूडान्** ३। यदि वा य **एकलम्भिकान्,** अथवा य एकं- प्रधानं शिष्यमात्मना लभते- गृह्णाति शेषांस्त्वाचार्यस्य समर्पयति। स एकलाभेन चरतीति एकलाभिकः ४। यो वा शिष्याणा**मुत्क्षेपकः**५ यश्चाऽऽचार्याणा**मित्वरिकान्** शिष्यान् करोति ६। यो वा गुरुसम्बन्धिनः शिष्यान् **पथि**

**कालगतान्,** चशब्दात् प्रतिभग्नान् कथयति ७। एते सर्वेऽप्यनर्हाः॥ १४४२॥

तत्र स्थविरादीन् व्याख्यानयति—

**थेरा उ अतिमहल्ला, अणरिहा काण-कुंटमादीया।**
**खग्गूडा य अवस्सा, एगालंभी पहाणो उ ॥ १४४३ ॥**

**तं एगं न वि देंती, अवसेसे देइ जे गुरुणं तु।**
**अहवा वि एगदव्वं, लभंति जे देइ ते गुरूणं ॥ १४४४ ॥**

**स्थविरा** नाम **अतिमहान्तः**, वयसाऽतिगरिष्ठा इत्यर्थः१। **अनर्हाः काण-कुण्टादयः**२, **खग्गूडा अवश्याः**। अयमत्र भावार्थः — योऽसौ पूर्वं परीक्षितः स देशदर्शनं कार्यते, तेन च देशदर्शनं कुर्वता यदि ये स्थविराः प्रव्राजिताः, ये च जुङ्गिकाः, ये च खग्गूडा वा तान् आचार्यस्य समर्पयति, तरुणान् अव्यङ्ग्यान् विनीतांश्चाऽऽत्मनस्तदा सोऽनर्ह इति ३। **एकलाभी** नाम यः **प्रधानः** शिष्यस्तमेकं यो **न ददाति, अवशेषांस्तु** सर्वानपि प्रव्राजितान् **गुरूणां प्रयच्छति,** अथवा येषामेक एव लाभः, यथा— यदि भक्तं लभन्ते ततो वस्त्रादीनि न

लभन्ते, अथ वस्त्रादीनि लभन्ते तर्हि न भक्तमिति, ते एकमेव लभन्ते इत्येवंशीला एकलाभिनः। तथा चाऽऽह-अथवा ये एकं द्रव्यं लभन्ते तान् शिष्यान् गुरूणां यः प्रयच्छति, उभयलब्धिकानात्मनः सम्बन्धयति सोऽप्यनर्हः ॥१४४३-४४॥

**उक्खेवेणं दो तिन्नि, वावि उवणेति सेसमप्पणो गेण्हे।**
**आयरियाणित्तरियं, बंधइ दिसमप्पणो वकति ॥ १४४५॥**

इयं किल सामाचारी— यावन्तः किल देशदर्शनं कुर्वता प्रव्राज्यन्ते तावन्तः सर्वे गुरूणां समर्पणीयाः। यस्तु प्रव्राजितान् द्विधा कृत्वा **उत्क्षेपेण** हस्तोत्पाटनेन **द्वौ त्रीन् वा** शिष्यान् गुरूणा**मुपनयति, शेषान्** सर्वानप्यात्म**ना गृह्णाति,** एषोत्क्षेपकोऽनर्हः। तथा ये केचन देशदर्शनं कुर्वता प्रव्राज्यन्ते ते सर्वेऽप्यप्यात्मन इत्वरिका बन्धनीयाः, यथा— आचार्यसमीपं गता यूयं सर्वेऽप्याचार्यस्य। यः पुनरा**चार्याणां दिशमित्वरिकां बध्नाति, आत्मनस्तु यावत्कथिकाम्,** यथा— यावत् यूयमाचार्यसमीपे तिष्ठथ तावदाचार्यसत्काः, शेषकालं ममेति, एवमित्वरिकान् करोति शिष्यान् सोऽप्यनर्हः ॥ १४४५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पंथम्मि य कालगया, पडिभग्गा वा वि तुब्भ जे सीसा।**
**एए सव्वे अणरिहा, तप्पडिवक्खा भवे अरिहा ॥ १४४६ ॥**

यो देशदर्शनं कृत्वा समागतः सन् ब्रूते— युष्माभिर्दत्ताः साधवः परिवारतया ते सर्वे **युष्माकं शिष्याः पथि कालगताः प्रतिभग्ना वा, इमे** पुनः **सर्वे** मम शिष्याः। एते स्थविरादयोऽ**नर्हाः, तत्प्रतिपक्षा भवन्त्यर्हाः**। तेषां पुनरनर्हाणामाचार्यसमीपमागतानां ये तैः प्रव्राजिताः शिष्यास्तानाचार्य इच्छापयति वा न वा गुरूणामत्रेच्छा प्रमाणम् ॥ १४४६ ॥

**एसा गीते मेरा, इमा उ अपरिग्गहाणऽगीयाणं।**
**गीयत्थपमादीण व, अपरिग्गहसंजतीणं च॥ १४४७ ॥**

**एषा** अनन्तरोदिता **मर्यादा** [१]यो गच्छस्य आचार्यस्तस्मिन् **गीते** गीतार्थे द्रष्टव्या। **इयं पुनरपरिग्रहाणा**मगीतानां तथा **गीतार्थप्रमादिनामपरिग्रहसंयतीनां च**। इयमत्र भावना— येषामाचार्योऽप्यगीतार्थस्ते अपरिग्रहाः यद्यपि नाम तेषामाचार्य परिग्राहकस्तथापि सोऽगीतार्थ इति तत्त्वतः सूत्रनीत्या ते अपरिग्रहा एव। तेषां मध्यात्कोऽप्येकोऽन्यं संविग्नं गच्छमुपसम्पन्नः

**१ यो गीतार्थ आचार्यः - मो.। योग्यस्य गीतार्थ आचार्यः- वा. पु. मु. ॥**



For Private and Personal Use Only

एष एकः१। अन्योऽवसन्नगीतार्थानां गच्छस्तेषां मध्यादेकः कश्चिदन्यं संविग्नं गच्छमाश्रितवान् एष द्वितीयः२। तथा अन्याः काश्चन संयत्यस्तासामाचार्यो नास्ति, कालकरालपिशाचेन कवलितत्वात्, केवलं ताभिरेकः क्षुल्लकः प्रव्राजित आसीत्। सोऽन्यं संविग्नं गच्छमुपसम्पन्नः३। ॥१४४७॥

एते त्रयोऽपि पूर्वगते कालिकगते वा श्रुते सूत्रार्थतदुभयैः परिपूर्णा जातास्तेषामात्मीयं गच्छमागतानां यावदाभवति तावद्वक्तव्यमिति। एतदेवाह—

**गीयत्थमगीयत्थे, अज्जाणं खुड्डुए य अन्नेसिं।**
**आयरियाण सगासे, अमुइंतेणं तु निम्माया ॥ १४४८ ॥**

**गीतार्थो** योऽवसन्नगीतार्थगच्छाद्विनिर्गतः१, **अगीतार्थो** योऽपरिग्रहगीतार्थगच्छान्निर्गतः२, आर्यिकाभिः प्रव्राजितः **आर्यिकाणां क्षुल्लकः** ३, एते त्रयोऽप्य**न्येषामाचार्याणां सकाशे अमोचित्वेन** कदाचनापि आचार्यसमीपममुञ्चन्तः **निर्माताः**, सूत्राऽर्थतदुभयज्ञा जाताः ॥१४४८॥

एतदेव स्पष्टतरमाह—

**सीसपडिच्छो होउं, पुव्वगए कालिए य निम्मातो।**
**तस्साऽऽगयस्स सगणं, किं आभव्वं? इमं सुणसु ॥ १४४९ ॥**

गीतार्थोऽगीतार्थ आर्यिकाक्षुल्लको वा अन्येषामाचार्याणां समीपे **प्रतीच्छकरूपः शिष्यो भूत्वा पूर्वगते कालिके** वा श्रुते **निर्मातः, तस्य स्वगणमागतस्य किमाभाव्यम्?** सूरिराह–इदं च वक्ष्यमाणं **शृणु** ॥ १४४९ ॥

तदेवाह—

**सीसो सीसो सीसो, चउत्थगं पि पुरिसंतरं लहइ।**
**हेट्ठा वि लभति तिन्नी, पुरिसजुगं सत्तहा होइ ॥ १४५० ॥**

**शिष्यः** स्वदीक्षितः, तस्यापि **शिष्यो** यः पौत्रकल्पः, तस्यापि **शिष्यः** प्रपौत्रकल्पः, एवंरूपं सन्तानत्रयात्मकं **चतुर्थमपि पुरुषान्तरं** पुरुषयुगं **लभते**। चतुर्थग्रहणादन्येऽपि त्रयः सूचिताः। तानेवाह–**हेट्ठा वि लहइ तिन्नी** इत्यधस्तात् त्रीणि पुरुषयुगानि **लभते,** अपिशब्दादुपर्यपि त्रीणि। इयमत्र भावना— आत्मीयमाचार्यं वर्जयित्वा यस्तस्य परिवारस्तं सर्वं लभते इदमेकं पुरुषयुगम् १ पितामहं वर्जयित्वा पितामहपरिवारं सर्वं लभते इति

द्वितीयं पुरुषयुगम् २ प्रपितामहपरिवारं सर्वं लभते इति तृतीयं पुरुषयुगं ३। एतानि त्रीण्युपरितनानि पुरुषयुगानि। साम्प्रतमधस्तनानि त्रीणि भाव्यन्ते— गुरुभ्रातृप्रव्राजितं समस्तं परिवारं लभते इत्येकं पुरुषयुगम् १, भ्रातृव्यप्रव्राजितमपि सर्वं लभते परिवारमिति द्वितीयं पुरुषयुगम्२, भ्रातृव्यप्रव्राजितैरपि प्रव्राजितान् समस्तान् लभते इति तृतीयं पुरुषयुगम् ३। तदेवमधस्तनानि त्रीणि पुरुषयुगानि त्रीण्युपरितनानीति मिलितानि षड् जातानि। तथा आत्मना ये प्रव्राजिताः पुत्रस्थानीया ये च तैः प्रव्राजिताः पौत्रस्थानीयाः ये च तैरपि प्रव्राजिता प्रपौत्रकल्पाः, एष सर्वोपि समुदाय एकं पुरुषयुगम्। इदं च षट्सु मेलितमिति **पुरुषयुगं सप्तधा भवति**। तथा चाह- **पुरिसजुगं सत्तहा होइ** ॥ १४५० ॥

एतदेव स्पष्टयति—

**मूलायरिए वज्जित्तु, उवरि सगणो उ हेट्ठिमे तिन्नि।**
**अप्पा य सत्तमो खलु, पुरिसजुगं सत्तहा होइ ॥ १४५१ ॥**

**मूलाचार्यान्** पितृ-पितामहलक्षणान् **वर्जयित्वा**ऽन्य **उपरितनः** समस्तोऽपि **स्वगण**-स्तस्याऽऽभवंति। एतेन त्रीणि पुरुषयुगान्युपात्तानि। अधस्तनान्यपि च प्रागुक्तस्वरूपाणि **त्रीणि**

पुरुषयुगानि लभते। **आत्मा** च आत्मीयश्च पुत्र-पौत्र-प्रपौत्रलक्षणः परिवारः **सप्तम** इति **पुरुषयुगं सप्तधा भवति**। भावना प्रागेवोक्ता ॥ १४५१ ॥

अत्रैव प्रकारान्तरमाह—

**अहवा न लभति उवरिं, हेट्ठुच्चिय लभइ तिण्णि तिण्णेव।**
**तिण्णऽत्तलाभ परलाभ छप्पि दासक्खरन्नायं ॥ १४५२ ॥**

**अथवेति** आभवनस्य प्रकारान्तर[ता]सूचने। यान्युपरितनानि त्रीणि पुरुषयुगानि प्रागुक्तानि, तानि **नैव लभते,** गरीयस्तया एकगुरुदीक्षितत्वेन समानतया च तेषां तदायत्तत्वायोगात्। **हेट्ठुच्चिय लभइ तिण्णि**त्ति यानि पूर्वं त्रीणि पुरुषयुगान्यधस्तनानि प्रदर्शितानि तेषां ग्रहणार्थं प्रथमं त्रीणीत्युक्तम्, **तिन्नेव**त्ति तेषां पूर्वभणितानामधस्तनानां त्रयाणां पुरुषयुगानामन्यान्यप्यधस्तनानि यानि त्रीणि पुरुषयुगानि तान्यपि लभन्ते। एतानि **षडपि** पुरुषयुगादीनि **परलाभः, त्रयः** पुत्र-पौत्र-प्रपौत्रलक्षणा **आत्मलाभः**, इदमेकं पुरुषयुगम्। सर्वमीलने सप्त पुरुषयुगानि तस्याऽऽभाव्यानि तेषां चाऽऽभवने **ज्ञात**मुदाहरणं— **दास-खरौ "दासेन मे खरो क्रीतो, दासो वि मे खरो वि मे"** ॥ १४५२ ॥

**सूत्रम्— 'भिक्खू य इच्छेज्जा गणं धारित्तए, नो कप्पइ से थेरे अणापुच्छित्ता गणं धारित्तए, कप्पइ से थेरे आपुच्छित्ता गणं धारेत्तए। थेरा य से वितरेज्जा एवं से कप्पइ गणं धारेत्तए, थेरा य से न वियरेज्जा एवं से नो कप्पइ गणं धारित्तए, जण्णं थेरेहिं अविइण्णं गणं धारेज्जा से संतरा छेओ वा परिहारो वा[१] ॥ २ ॥**

"भिक्खू य इच्छेज्जा गणं धारेत्तए नो कप्पति से थेरे अणापुच्छित्ता गणं धारित्तए" इत्यादि, अथास्य सूत्रस्य कः सम्बन्धः? तत आह—

**दुहतो वि पलिच्छन्ने, अप्पडिसेहो त्ति मा अतिपसंगा।**
**धारेज्ज अणापुच्छा, गणमेसो सुत्तसंबंधो ॥ १४५३ ॥**

**द्विधातोऽपि** द्रव्यतो भावतश्च **परिच्छन्ने** परिच्छदोपेत आचार्ये स्वयमपि च द्विधातः परिच्छन्ने गणधारणस्य **न प्रतिषेध इति** कृत्वा किमनुज्ञया स्थविराणां कार्यम्? इति बुद्ध्या **माऽतिप्रसङ्गतः** स्थविराणामना**पृच्छया गणं धारयेद्,** अतस्तत्प्रतिषेधार्थमिदं सूत्रमारभ्यते। **एषोऽ**धिकृत**सूत्रस्य सम्बन्धः** ॥ १४५३ ॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—



---

१. इतोऽग्रे "जे साहम्मिया उट्ठाए विहरंति, नत्थि णं तेसिं केइ छेए वा परिहारे वा" इत्यधिकः पाठः आगमप्रकाशन ब्यावर संस्करणे, श्युब्रींगसंस्करणटिप्पणे च॥

**भिक्षुरिच्छेद् गणं धारयितुम्,** तत्र **से** तस्य **न कल्पते स्थविरान्** गच्छगतान् वृद्धपुरुषान् **अनापृच्छ्य गणं धारयितुम्। कल्पते से तस्य स्थविरान् आपृच्छ्य गणं धारयितुम्। स्थविराश्च से** तस्य **वितरेयुः** अनुजानीयुर्गणधारणं पूर्वोक्तैः कारणैरर्हत्वात् तत **एवं** सति **से** तस्य **कल्पते गणं धारयितुम्। स्थविराश्च से** तस्य **न वितरेयु**र्गणधारणम् अनर्हत्वात्, **एवं** सति **न कल्पते गणं धारयितुम्। यः** पुनः **स्थविरैः अवितीर्ण**मननुज्ञात**गणं धारयेत्** ततः से तस्य स्वकृतादन्तरादपन्यायात् प्रायश्चित्तं **छेदो वा परिहारो वा।** वाशब्दादन्यद्वा तपः। एष सूत्राक्षरार्थः। भावार्थं भाष्यकृदाह—



**काउं देसदरिसणं, आगतअट्ठायिम्मि उवरया थेरा,**
**असिवादिकारणेहि व, न ठावितो साहगस्सऽसती ॥ १४५४ ॥**

**सो कालगते तम्मि उ, गतो विदेसं व तत्थ व अपुच्छा;**
**थेरे धारेइ गणं, भावनिसिट्ठं प[१]ऽणुग्घाया ॥ १४५५ ॥**

१. पि+अणु॰ इत्यर्थः ॥

देशदर्शननिमित्तं गतेन ये प्रव्राजितास्तान् यद्यात्मनो यावत्कथिकान् शिष्यतया बध्नाति ततस्तस्य प्रायश्चित्तं चतुर्गुरुकम्। प्रत्यागतोऽपि सन् यान् प्रव्राजयति तानपि यद्यात्मनः शिष्यतया बध्नाति तदापि चतुर्गुरुकम्। तथा **देशदर्शनं कृत्वा** तस्मि**न्नागते अस्थापिते** च तस्मिन्नाचार्यपदे **स्थविराः** तस्याऽऽचार्या **उपरताः** कालगता, यदि वा स प्रत्यागतो**ऽप्यशिवादिभिः कारणैः**, यद्वा **साधकस्य** तथाविधस्य **असति**त्ति अभावेनाऽऽचार्यपदे**ऽस्थापितः**, अत्रान्तरे चाचार्यः कालगतः. ततस्**तस्मिन् कालगते**, यदि वा **गतो विदेशं** तत्रैव विदेशे गणं धारयितुमिच्छेत्, एतेषु सर्वेष्वपि कारणेषु समुत्पन्नेषु यदि **स्थविरान्** गच्छमहतो**ऽपृष्ट्वा** यद्यपि तस्याचार्येण भावतो गणो निसृष्टोऽनुज्ञातस्तथापि स्थविरा आप्रच्छनीयाः। तत आह— **भावनिसृष्टमपि गणं धारय**ति तर्हि तस्य स्थविरानापृच्छाप्रत्ययं प्रायश्चित्तं **अनुद्घाताः** गुरुकाश्चत्वारो मासाः। उपलक्षणमेतत्, आज्ञा-ऽनवस्था-मिथ्यात्व-विराधनारूपाश्च तस्य दोषाः ॥१४५४-५५॥

**सयमेव दिसाबंधं, अणणुण्णाते करे अणापुच्छा।**
**थेरेहि य पडिसिद्धो सुद्धा लग्गा उवेहंता ॥१४५६॥**

यो नाम **स्वयमेव** आत्मच्छन्दसा 'को मम निजमाचार्यं मुक्त्वाऽन्य आप्रच्छनीयः

समस्ति'? इत्यध्यवसायतः पूर्वाचार्येणाननुज्ञात आचार्यपदे तस्याऽस्थापनात् स्थविरान् गच्छमहत्तररूपान् **अनापृच्छ्य दिग्बन्धं करोति** स **स्थविरैः प्रतिषेधनीयः**, यथा- न वर्तते आर्य! तव तीर्थकराणामाज्ञां लोपयितुम्। एवं प्रतिचोदितोऽपि यदि न प्रतिनिवर्तते तर्हि स्थविराः **शुद्धाः**, स तु चतुर्गुरुके प्रायश्चित्ते लग्नः। अथ स्थविरा **उपेक्षन्ते** तर्हि ते उपेक्षाप्रत्ययं चतुर्गुरुके **लग्नाः**। यत एवमुपेक्षायामनापृच्छायां च तीर्थकराभिहितं प्रायश्चित्तमाज्ञादयश्च दोषास्तस्मात्स्थविरैरुपेक्षा न कर्तव्या, तेन च स्थविरा आप्रच्छनीयाः।।१४५६॥

**सगणे थेराणऽसती, तिगथेरे वा तिगं वुवट्ठाति।**
**सव्वाऽसति इत्तरियं, धारेइ न मेलितो जाव ॥१४५७॥**

अथ स्वगच्छे स्थविरा न सन्ति तर्हि **स्वगणे** स्वकीयगच्छे **स्थविराणामसति** अभावे ये त्रिके कुलगणसङ्घरूपे स्थविरास्तान् **त्रिकस्थविरान्, त्रिकं** वा समस्तं कुलं वा गणं सङ्घं वा इत्यर्थः, **उपतिष्ठते**, यथा— यूयमनुजानीत मह्यं दिशमिति। अथ अशिवादिभिः कारणैर्न पश्येत् कुलस्थविरादी तत इत्थं **सर्वेषां**- कुलस्थविरादीनाम**सति**- अभावे **इत्वरिकां** दिशं गणस्य **धारयति यावत्** कुलादिभिः सह गणो मेलितो भवति ॥ १४५७॥

**जे उ अहाकप्पेणं, अणुण्णायम्मि तत्थ साहम्मी।**
**विहरंति तमट्ठाए, न तेसिं छेदो न परिहारो ॥१४५८॥**

**ये तु** साधर्मिकाः स्वगच्छवर्तिनः परगच्छवर्तिनो वा **यथाकल्पेन** श्रुतोपदेशेन **तदर्थाय** श्रुतार्थाय सूत्रार्थाना**मर्थाय** आसेवनाशिक्षायै वेत्यर्थः, **अनुज्ञाते** गणधारणे **तत्र** गच्छे **विहरन्ति**। ऋतुबद्धे काले मासकल्पेन, वर्षासु वर्षाकल्पेन **न तेषां** तत्प्रत्ययं यदेषोऽननुज्ञातो गणं धारयति इत्येतन्निमित्तमित्यर्थः, प्रायश्चित्तं **छेदः, न परिहारः,** उपलक्षणमेतत्, नान्यद्वा तपः, श्रुतोपदेशेन तेषां सूत्राद्यर्थं तत्रोपस्थापनात्। विषयलोलतया हि तस्य समीपमुपतिष्ठमानानां दोषः, न सूत्राद्यर्थमिति ॥ १४५८॥

**सूत्रम्— तिवासपरियाए समणे निग्गन्थे आयारकुसले,[1] संजमकुसले, पवयणकुसले, पन्नत्तिकुसले[2] संगहकुसले, उवग्गहकुसले अक्खयायारे, अभिन्नायारे, असबलायारे[3] असंकिलिट्ठा-यारचित्ते बहुस्सुए बहुआगमे जहन्नेणं आयारपकप्पधरे कप्पइ उवज्झायत्ताए उद्दिसित्तए ॥३॥**

१. अक्खुया °इति प्रतिलिपौ सं. १३०९ वर्षे लिखिताऽऽदर्शे. २-५ °ट्ठायारचिते- श्युब्रींगसंस्करणे। °रचरिते- श्यु° पाठभेदः॥ प्रतिलिपिमध्ये च एवमग्रेऽपि ३ °कप्पइ बहूणं समणाणं बहूणं समणीणं उप° इति प्रतिलिपि पाठः एवमग्रेऽपि।

सच्चेव णं से तिवासपरियाए समणे निग्गंथे नो आयारकुसले जाव नो उवग्गहकुसले खयायारे[1], भिन्नायारे, सबलायारे, संकिलिट्ठायारे[2], अप्पसुए अप्पागमे नो कप्पइ उवज्झायत्ताए उद्दिसित्तए ॥४॥

पंचवासपरियाए समणे निग्गंथे [ आयारकुसले जाव असंकिलिट्ठायारे ] जहन्नेणं दसाकप्पववहारधरे[3] कप्पइ आयरियउवज्झायत्ताए उद्दिसित्तए ॥ ५ ॥

सच्चेव णं से पंचवासपरियाए समणे निग्गंथे [ णो आयारकुसले जाव संकिलिट्ठायारे णो जहन्नेणं दसाकप्पववहारधरे ] नो कप्पइ आयरियउवज्झायत्ताए उद्दिसित्तए ॥ ६ ॥ अट्ठवासपरियाए समणे निग्गंथे [ आयारकुसले जाव असंकिलिट्ठायारे ] जहन्नेणं ठाण-समवायधरे कप्पइ आयरियत्ताए जाव गणावच्छेइत्ताए उद्दिसित्तए ॥७॥ सच्चेव णं से अट्ठवासपरियाए, समणे निग्गंथे [ णो आयारकुसले जाव संकिलिट्ठायारे णो जहन्नेणं ठाण-समवायधरे ] नो कप्पइ आयरियत्ताए जाव गणावच्छेइयत्ताए उद्दिसित्तए ॥८॥

सूत्र ३-८ गाथा १४५८-१४४९ आचार्योपाध्याययोग्यायोग्यत्वम्



---

१ सुया° प्रतिलि° २.°ट्ठायारचित्ते- श्युब्रींग॥ ३ दसा° आगमप्र° ॥

For Private and Personal Use Only

'तिवासपरियाए समणे निग्गंथे' इत्यादि सूत्रषट्कम्। अथास्य पूर्वसूत्रेण सह कः सम्बन्धः? तत आह—

**भावपलिच्छयस्स उ, परिमाणट्ठाए होइमं सुत्तं।**
**सुयचरणे उ पमाणं सेसा उ हवंति जा लद्धी॥१४५९॥**

द्रव्य-भावपरिच्छदोपेतः स्थविरैरनुज्ञातो गणं धारयति, तद्विपरीतो न धारयति' इति उक्तम्। **तत्रेदं सूत्रषट्कम् भावपरिच्छेदस्य परिमाणार्थं** परिमाणप्रतिपादनार्थं **भवति** वर्तते। तथा चानेन सूत्रषट्केन **श्रुते चरणे** च **प्रमाण**मभिधीयते। **शेषाश्च या लब्धय** आचार्याणामुपाध्यायादीनां च योग्याः याभिः समन्विता आचार्यतया उपाध्यायादितया वा उद्दिश्यन्ते ता अपि प्रतिपाद्यन्ते। तत्र श्रुतपरिमाणं "जहन्नेण आयारपकप्पधरे" इत्यादिना, चारित्रपरिमाणं "तिवासपरियाए" इत्यादिना, शेषपदैर्यथायोग्यं लब्धयः॥१४५९॥ अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

त्रीणि वर्षाणि पर्यायः प्रव्रज्यापर्यायो यस्य स **त्रिवर्षपर्यायः**। श्राम्यति-तपस्यतीति **श्रमणः**। स च शाक्यादिरपि भवति ततस्तद्व्यवच्छेदार्थमाह— **निर्ग्रन्थः** निर्गतो ग्रन्थाद्

द्रव्यतः सुवर्णादिरूपाद्, भावतो मिथ्यात्वादिलक्षणादिति निर्ग्रन्थः। **आचारकुशलः** ज्ञानादिपञ्चविधाचारकुशलः। तत्र कुशल इति द्विधा-द्रव्यतो भावतश्च। तत्र यः कुशं -दर्भं दात्रेण तथा लुनाति यथा न क्वचिदपि दात्रेण छिद्यते स द्रव्यकुशलः। यः पुनः पञ्चविधेनाऽऽचारेण[1] दात्रकल्पेन कर्मकुशं लुनाति स भावकुशलः। तत्र एवमत्र समासः— आचारेण- ज्ञानाद्याचारेण कुशलः- कर्मकुशच्छेदक आचारकुशलः,आचारविषये सम्यक्परिज्ञानवान् इति तात्पर्यार्थः, अन्यथा तेन कर्मकुशच्छेदकत्वानुपपत्तेः १। एवं सर्वत्र भावना[2]। संयमं सप्तदशविधं यो जानात्याचरति च स **संयमकुशलः** २। प्रवचनं- द्वादशाङ्गं गणिपिटकं सप्रकीर्णकं तद् यो जानाति स **प्रवचनकुशलः** ३। समासभावना सर्वत्र तथैव। अथवा यः कुशं लुनन् न क्वचिद् दात्रेण छिद्यते स लोके तत्त्वतः कुशलः नान्यः, तेन कुशलशब्दस्य प्रवृत्तिनिमित्तं दक्षत्वम्, तच्च यत्रास्ति तत्र कुशलशब्दोऽपि प्रवर्तते इति दक्षवाची कुशलशब्दः, तत एवं समासः आचारे ज्ञातव्ये प्रयोक्तव्ये वा कुशलो दक्ष आचारकुशलः १। एवं संयमकुशलः २। प्रवचने ज्ञातव्ये कुशलः प्रवचनकुशलः३। प्रज्ञप्तिर्नाम स्वसमय-परसमयप्ररूपणा, तत्र कुशलः **प्रज्ञप्तिकुशलः**। सङ्ग्रहणं सङ्ग्रहः, स द्विधा—द्रव्यतो भावतश्च,

---

१. °चारेण कर्मकुशलः कर्मच्छेदक- वा. मो. पु. मु. ॥ २. भावनीयम्- वा. मो. पु. मु. ॥

तत्र द्रव्यत आहारोपध्यादीनाम्, भावतः सूत्रार्थयोः। यो द्विविधेऽपि सङ्ग्रहे कुशलः **सङ्ग्रहकुशलः** ५। उप- सामीप्येन ग्रहण**मुपग्रहः**, सोऽपि द्विधा—द्रव्यतो भावतश्च। तत्र येषामाचार्य उपाध्यायो वा न विद्यते तान् आत्मसमीपे समानीय तेषामित्वरां दिशं बद्ध्वा तावद्धारयति यावन्निष्पाद्यन्ते, एष द्रव्यत उपग्रहः, "**ग्रही उपादाने**" इति वचनात्। यः पुनरविशेषेण सर्वेषामुपकारे वर्तते स भावत उपग्रहः ६। **अक्षताचारः**- परिपूर्णाचारः परिपूर्णाचारता च चारित्रे सति भवति, "**चारित्रवतो नियमतः शेषाश्चत्वारोऽप्याचाराः, शेषाचारवतश्चारित्रं स्याद् वा न वा**" [चूर्णौ] इति वचनात्, ततश्चारित्रवानित्युक्तं द्रष्टव्यम्। नन्वेषोऽप्यर्थः आचारकुशलः इत्यनेनोपात्त इति किमर्थमस्योपादानम्? उच्यते— चारित्रं खलु प्रधानं मोक्षाङ्गम्, तदपि कण्ठतो नोक्तमिति कदाशङ्काव्युदासार्थमित्यदोषः। तथा अशबलः यस्य सिताऽसितवर्णोपेतबलीवर्द इव कर्बुर आचारो विनय-शिक्षा-भाषा-गोचरादिकोऽसा**वशबलाचारः** ८। तथा अभिन्नः-न केनचिदप्यतीचारविशेषेण खण्डित आचारः- ज्ञानाचारादिको [१]यस्य **सोऽभिन्नाचारः** ९। तथा असङ्क्लिष्टः इहपरलोकाशंसारूपसङ्क्लेशविप्रमुक्त आचारो यस्य **सोऽसंक्लिष्टाचारः** १०। तथा बहु श्रुतं- सूत्रं

---

**१. यस्या सावभिन्ना° वा. पु. मु.॥**

यस्यासौ **बहुश्रुतः** ११। तथा बहुः आगमः अर्थरूपो यस्य स **बह्वागमः**१३। **जघन्येन आचारप्रकल्पधरः, निशीथाध्ययनसूत्रार्थधर** इति। जघन्यत **आचारप्रकल्प**ग्रहणादुत्कर्षतो द्वादशाङ्गविदिति द्रष्टव्यम्, सः कल्पते यो भवत्**युपाध्यायतयोद्देष्टु**मिति प्रथमसूत्रार्थः ॥३॥

**सच्चेव णं से तिवासे**त्यादि, से शब्दः अथशब्दार्थः। अथ **स एव त्रिवर्षपर्यायः श्रमणो निर्ग्रन्थो नो आचारकुशल** इत्यादि पूर्वव्याख्यानतः सुप्रतीतम् ॥४॥

एवं द्वे सूत्रे पञ्चवर्षपर्यायस्याऽऽचार्योपाध्यायत्वोद्देशविषये भावनीये। नवरम्— तत्र **जघन्येन दशाकल्प-व्यवहारधर** इति वक्तव्यम् ॥ ५-६॥

एवमेव चाष्टवर्षपर्यायस्याप्याचार्योपाध्यायगणावच्छेदित्वोद्देशविषये द्वे सूत्रे व्याख्येये। केवलं तत्र **जघन्येन स्थानसमवायाङ्ग** इति वाच्यम्, शेषं तथैव ॥ ७-८॥ एष सूत्रषट्कस्य सङ्क्षेपार्थः। अधुना **निर्युक्तिविस्तरः**। तत्र तावत्सर्वेषामेव सूत्रपदानां सामान्येन व्याख्यां चिकीर्षुरिदमाह **भाष्यकृत्**—



**एक्कारसंगसुत्त-ऽत्थधारया नवमपुव्वकडजोगी।**
**बहुसुय बहुआगमिया, सुत्तऽत्थविसारया धीरा ॥ १४६० ॥**

**एयग्गुणोववेया, सुयनिघस नायगा महा[ ज ]-णस्स।**
**आयरिय उवज्झाया पवत्ति थेरा अणुन्नाया॥ १४६१ ॥**

एकादशानामङ्गानां सूत्रमर्थं च धारयन्तीत्ये**कादशाङ्गसूत्रार्थधारकाः**। **नवमपुव्व**त्ति, अत्रापि सूत्राऽर्थधारका इति सम्बध्यते। नवमपूर्वग्रहणं च शेषपूर्वाणामुपलक्षणम्, ततोऽयमर्थः— समस्तपूर्वसूत्राऽर्थधारकाः। तथा सूत्रोपदेशेन मोक्षाविरोधी कृतः अभ्यस्तो योगः- मनो-वाक्कायव्यापारात्मकः स कृतयोगः, स येषामस्ति ते **कृतयोगिनः**। **बहुश्रुताः** प्रकीर्णकानामपि सूत्रार्थधारणात्। इह पूर्वधरा अपि तुल्येऽपि च सूत्रे मतिवैचित्र्यतोऽर्थागममपेक्ष्य षट्स्थान-पतिताः. ततः प्रभूतार्थावगमप्रतिपादनार्थमाह—**बह्वागमाः** बहुः-प्रभूत आगमः अवगमो येषां ते तथा। एतदेवाऽऽह— सूत्रार्थविशारदाः तत्तत्कालापेक्षया सूत्रेऽर्थे च विशारदाः- पण्डिताः **सूत्रार्थविशारदाः**। तथा धिया-औत्पत्तिक्यादिरूपया चतुर्विधया बुद्ध्या राजन्ते इति **धीराः** ॥१४६० ॥

**एतग्गुणो** इत्यादि। ये अनन्तरगाथायामुक्ता गुणा एतैर्गुणैरुपेता **एतद्गुणोपेताः**। श्रुतं निघर्षयन्तीति **श्रुतनिघर्षाः**। किमुक्तं भवति?- यथा सुवर्णकारस्ताप-निकष-च्छेदैः सुवर्णं

परीक्षते 'किं सुन्दरम्? अथ मङ्गलम्' इति, एवं ये स्वसमय-परसमयान् परीक्षन्ते ते श्रुतनिघर्षा इति। तथा **नायकाः** स्वामिनो **महाजनस्य** स्वगच्छवर्तिनां साधूनामिति भावः। अथवा नायकाः ज्ञानादीनां प्रापकाः तदुपदेशनात्, महाजनस्य समस्तस्य सङ्घस्य। इत्थम्भूता **आचार्या उपाध्यायाः प्रवर्तिनः स्थविरा,** उपलक्षणमेतत्, गणावच्छेदिन**श्चानुज्ञाताः** ॥१४६१॥

तदेवं सामान्यतः सर्वेषां सूत्रपदानामर्थो व्याख्यातः। सम्प्रत्येकैकस्य सूत्रस्य पदार्थो वक्तव्यः। तत्र येषां पदानां वक्तव्यस्तान्युपक्षिपन्नाह—

**आयारकुसल१संजम२, पवयण३पण्णत्ति४संगहो५वग्गहे६।**
**अक्खुय७ असबल८ अभिन्न९, असंकिलिट्ठायारसंपन्ने१० ॥ १४६२ ॥**

गाथा १४६०-१४६२ पदग्रहण-योग्यता

अत्र कुशलशब्दः पूर्वार्द्धे प्रत्येकं सम्बध्यते। ततोऽयमर्थः- **आचारकुशल**शब्दस्य१ **संयम**कुशलशब्दस्य २ **प्रवचनकुशल**शब्दस्य३ **प्रज्ञप्ति**कुशलशब्दस्य४ **सङ्ग्रह**कुशलशब्दस्य५ **उपग्रहकुशल**शब्दस्य ६ च। **अक्खुये**त्यादि, अत्राऽऽचारसम्पन्नशब्दः प्रत्येकमभिसम्बन्धनीयः— **अक्षता**चारसम्पन्नस्य अक्षताचारस्येत्यर्थः ७। एवमश**बलाचारसम्पन्न**स्य८। **अभिन्नाचारसम्पन्न**स्य ९। **असङ्क्लिष्टाचारसम्पन्नस्य** १० च व्याख्या कर्तव्या ॥१४६२॥



For Private and Personal Use Only

तत्राऽऽचारकुशलशब्दस्य व्याख्यानार्थमाह—

**अब्भुट्ठाणे१ आसण२, किंकर३ अब्भासकरण४मविभत्ती५।**
**पडिरूवजोगजुंजण६, निजोग७, पूजा जहाकमसो८ ॥ १४६३॥**

**अफरुस९ अणवल१० अचवल११,**
**मकुक्कुय१२मडंभगा१३ असीभरगा१४।**
**सहित१५समाहीय१६ उवहित१७,**
**गुणनिहि१८ आयारकुसलो ॥ १४६४ ॥** दारगाहाओ ।



आचारकुशलो नाम यो गुर्वादीनामागच्छताम**भ्युत्थानं** करोति १। **आसण**त्ति आसनप्रदानं च तेषामेव गुर्वादीनां विधत्ते, समागतानां पीठकाद्युपनयतीति भावः२। तथा प्रातरेवागत्य आचार्यान् वदति 'सन्दिशत, किं करोमि'? इति स **किङ्करः** ३। तथा **अब्भासकरण**मिति ये धर्मादच्युतास्तेषामात्मसमीपवर्तित्वकरण**मभ्यासकरणम्** ४। **अविभक्तिः** विभागाभावः, शिष्य-प्रातीच्छिकानां विशेषाकरणमिति भावः५। **पडिरूवजोगजुंजण**त्ति प्रतिरूपः खलु विनयः

कायिकादिभेदतश्चतुर्धाऽधस्तात् **पीठिकायां** [गा.....] अभिहितः, तदनुगता योगा मनोवाक्कायास्तेषां योजनं व्यापारणमवश्यकरणं[1] प्रतिरूपयोगयोजनम् ६। **नियोग**त्ति यो यत्र वस्त्राद्युत्पादने नियोक्तव्यः तत्र तस्य नियोगं करोति ७। **पूजा जहा कमसो**त्ति गुर्वादीनां यथानुरूपं क्रमशो येन पूजा क्रियते ८॥१४६३॥ **अपरुषम**निष्ठुरं, मनःप्रह्लादकृदित्यर्थः, तद्भाषते९ **अणवल**त्ति अत्र प्राकृतत्वाद् यकारलोपः, तेन अणवलया इति द्रष्टव्यम्। तत्र वलया-माया तस्याऽभावोऽवलया अकुटिलत्वमित्यर्थः १०। **अचपलः** स्थिरस्वभावः ११। **अकुत्कुचः** हस्त-पाद-मुखादिविरूपचेष्टारहितः १२। **अदम्भकः** वञ्चनानुगतवचनविरहितः १३। सीभरो नाम य उल्लपन्परं लालया सिञ्चति, तत्प्रतिषेधादसीभरः, प्राकृतत्वात् स्वार्थिकप्रत्ययविधानेन **असीभरकः**१४। एष सर्वोऽपि किल विनय इति वीर्याचारः प्रतिपादितो द्रष्टव्यः। सम्प्रति शेषाणां ज्ञानाद्याचाराणां प्ररूपणानिमित्तं पश्चार्द्धमाह— **सहिये**त्यादि, **सहितो** नाम यो यस्य ज्ञानादेरुचितः कालस्तेनोपेतः। किमुक्तं भवति ? काले स्वाध्यायं करोति, काले प्रतिलेखनादिकम् काले च स्वोचिते तप इति १५। सम्यक् आहितो यद् यस्योपधाने

१. °करणं अविभक्तयोगितया यत्र वस्त्र। °पु। करणं अविभक्तविभाग योजनं नियोगित। या यत्र वस्त्रा° वा. मु.॥

तत्करणे वा स्वाभिप्रायः **समाहितः** १६। उप समीपं ज्ञानादीनां हितः-स्थित **उपहितः** ज्ञानाद्यधिकं निर्मलं निर्मलतरमात्मनो वाञ्छन् सदैव गुरुषु बहुमानपर इति भावः १७। एवं ज्ञानाद्याचारसमन्वितो गुणनिधिर्भवति तत आह—**गुणनिधिः** गुणानामाकरः १८। एष **आचारकुशलः** ॥१४६४॥

साम्प्रतमेतदेव गाथाद्वयं विनेयजनानुग्रहाय **भाष्यकृद्व्याख्यानयति**—

**अब्भुट्ठाणं गुरुमादियाण**। दा. १। **आसणदाणं च होइ तस्सेव**। । दारं २।
**गोसेव य आयरिए, संदिसह किं करोमि? त्ति ॥ १४६५ ॥** दारं ३।

अत्र **गोसे** इति प्रातरेवेत्यर्थः ॥ १४७२१ ॥

**अब्भासकरणधम्मच्चुयाण**। दा. ४।, **अविभत्ति सीसपाडिच्छे**। । दारं ५।
**पडिरूवजोगो**। दा. ६। **जह, पीढियाए जुंजण करेति धुवं ॥ १४६६ ॥**
दारं ७।

**अत्र प्रतिरूपयोगो यथा पीठिकायां** प्राक् प्रतिरूपविनयाधिकारेऽभिहितस्तथा प्रतिपत्तव्यः। **जुंजण** इत्यस्य व्याख्यानं यद् **ध्रुव**मकालहीनं प्रतिरूपयोगान्**करोति** व्यापारयतीति भावः॥ १४६६॥

**पूयं[1] जहाणुरूवं, गुरुमादीणं करेइ कमसो उ।** दारं ८।
**ल्हादी जणणमफरुसं,**। दा.९। **अणवलया होअकुडिलत्तं ॥ १४६७ ॥** दारं १०।

अत्र **ल्हादिजनन**मिति मनःप्रह्लत्तिजनकम् ॥ १४६७॥

**अचवल थिरस्स भावो**। दा.११।, **अफंदणया य होइ अकुयत्तं**। दा. १२।
**उल्लव[2] अलालऽसीभर,** । दा. १४। **सहितो कालेण णाणादी ॥ १४६८॥** दा.१५।



---

१. अत्र भाष्यकृता "नियोग" द्वारं व्याख्यातं नास्ति ॥ २. अत्र भाष्यकृता त्रयोदशं 'अडंभंग' इति द्वारं व्याख्यातं नास्ति। अत्र— 'उल्लावेंतेण णिंति उ, सीभरा सहिय णाणदि' इति P प्रतौ पाठः, ला. संस्करणे च पाठभेदः [ लाडनू संस्करणे पृ. १४५ टि. १५ ] दृश्यते॥

अत्र **अस्पन्दनता** भण्डोचितहस्त-पादादिचेष्टाविकलता ॥ १४६८ ॥

**सम्मं आहियभावो, समाहितो** । दा.१६। **उवहितो समीवम्मि।**
**नाणादीणं तु ठितो**। दा.१७। **गुणनिहि जो आगरो गुणाणं ॥ १४६९ ॥**

दारं १८।

गाथापञ्चकमपि गतार्थम् ॥ १४६९ ॥ उपसंहारमाह—

**आयारकुसलो एसो, संजमकुसलं अतो उ वोच्छामि।**
**पुढवादि संजमम्मी, सत्तर सो जो भवे कुसलो ॥ १४७० ॥**

एषः अनन्तरमुक्तः **आचारकुशलः** १। **अत ऊर्ध्वं संयमकुशलं वक्ष्यामि**। प्रतिज्ञातमेव निर्वाहयति। **पृथिव्यादिसंयमे-**

*पुढवि१ दग२ अगणि३ मारुय४, वणस्सई५ बि६ ति७ चउ८ पणिंदि९ अज्जीवो १०।*
*पेहु११ प्पेह१२ पमज्जण१३, परिठवण१४मणो१५वई१६काए१७ ॥*

इत्येवंरूपे **सप्तदशे** सप्तदशप्रकारे **यो भवति कुशलः स** संयमकुशलः ॥ १४७० ॥

प्रकारान्तरेण संयमकुशलमाह—

**अहवा गहणे निसिरण, एसण सिज्जा निसिज्ज उवही य।**
**आहारे वि य सतिमं, पसत्थजोगे य जुंजणया ॥ १४७१ ॥**

**इंदिय-कसायनिग्गह, पिहियासवजोगझाणमल्लीणो।**
**संजमकुसलगुणनिही, तिविहकरणभावसुविसुद्धो ॥ १४७२ ॥**

**अथवे**ति संयमस्यैव प्रकारान्तरतोपदर्शने[1]। **ग्रहणे** आदाने **निसिरणे** निक्षेपणे **एषणायां** गवेषणादिभेदभिन्नायां शय्या-निषद्योप[2]ध्याहारविषयायां निषद्यायां च सम्यगुपयुक्तः संयमकुशलः। किमुक्तं भवति? य उपकरण-भाण्डमाददानो निक्षिपन्वा प्रतिलेख्य प्रमार्ज्य च गृह्णाति निक्षिपति वा। एतेन प्रेक्षासंयमः प्रमार्जनासंमयश्चोक्तः। एतद्ग्रहणादेतज्जातीयाः शेषा अप्युपेक्षादिसंयमाः सङ्गृहीता द्रष्टव्याः। तथा य **शय्यामुपधिमाहारं** च उद्गमोत्पाद-

१. ॰न्तरोप॰ पु. प्रे. एवमग्रेऽपि ज्ञेयम् ॥ २. ॰पध्यादिवि॰ खं. ॥

नैषणाशुद्धं गृह्णाति, संयोजनादिदोषरहितं च भुङ्क्ते। स्थानाद्यपि कुर्वाणः प्रत्युपेक्ष्य प्रमार्ज्य च करोति स संयमकुशलः। अत्र निषद्याग्रहणेन स्थानादि गृहीतम्। तथा य एतेषु सर्वेष्वपि संयमेषु कर्तव्येषु **स्मृतिमान्** स संयमकुशलः, '**स्मृतिमूलमनुष्ठानमवितथम्**' [ ] इति वचनात्। तथा यस्य **प्रशस्तयोग**स्य शुभमनोवाक्कायरूपस्य **योजना** व्यापारणम्, किमुक्तं भवति? अप्रशस्तानां मनोवाक्काययोगानामपवर्जनम्, प्रशस्तानां मनोवाक्काययोगानामभियोजनम् स संयमकुशलः ॥१४७१॥

तथा **इन्द्रियाणि** श्रोत्रादीनि **कषायाँश्च** क्रोधादीन् यो **निगृह्णा**ति, यथा श्रोत्रादीनि न स्वविषये व्यापारयति, श्रोत्रादिविषयप्राप्तेषु शुभाऽशुभेषु शब्दादिष्वर्थेषु राग-द्वेषौ न विधत्ते, क्रोधादीनप्युदयितुं प्रवृत्तान् निरुणद्धि, उदयप्राप्तांश्च विफलीकरोति। तथा **आश्रवाणि** प्राणातिपातादिलक्षणानि **पिदधाति। योगं** च मनोवाक्कायलक्षणमप्रशस्तनिरोधेन प्रशस्तम्। **ध्यानं** चाऽऽर्त-रौद्रपरिहारेण प्रशस्तं धर्मं शुक्लं च **आलीनः**-आश्रितः, अनिगूहितबलवीर्यतया तत्र प्रवृत्त इत्यर्थः। एष **संयमकुशलः**, कथम्भूतः सन्? इत्याह—**गुणनिधिः** संयमानुगता ये गुणास्तेषां निधिरिव, तैः परिपूर्ण इति भावः, गुणनिधिः। तथा त्रिविधेन प्रकारेण-

मनोवाक्कायलक्षणेन सुविशुद्धो मनसाप्यसंयमानभिलाषात्, भावेन च- परिणामेन सुविशुद्धो इहलोकाद्याशंसाविप्रमुक्तत्वात् **त्रिकरणभावविशुद्धः** ॥ १४७२ ॥

अस्यैव गाथाद्वयस्य व्याख्यानार्थमाह—

**गिण्हइ पडिलेहेउं, पमज्जियं तह य निसिरए यावि।**
**उवउत्तो एसणाए, सेज्ज-निसेज्जोवहाऽऽहारे ॥ १४७३ ॥**

**एएसु सव्वेसु जो उ न पम्हुस्सए उ सो सतिमं।**
**जुंजइ पसत्थमेव उ, मण-भासा-कायजोगं तु ॥ १४७४ ॥**

**सोइंदियाइयाणं, निग्गहणं चेव तह कसायाणं।**
**पाणातिवाइयाणं, संवरणं आसवाणं च ॥ १४७५ ॥**

**झाणे अपसत्थ पसत्थ, पसत्थझाणे य जोगमल्लीणो।**
**संजमकुसलो एसो, सुविसुद्धो तिविहकरणेणं॥ १४७६ ॥**

गाथाचतुष्टयमपि गतार्थम्। नवरम्- **उवउत्तो एसणाए** इत्यादि, **उपयुक्त एषणायाम्,** किंविषयायाम्? इत्याह—**शय्या-निषद्योपध्याहारे,** शय्या-उपाश्रयः, निषद्या-पीठफलकादिरूपा, स्थानादिरूपनिषद्याव्याख्यानं तु प्रागेवकृतम्। उपधिः- पात्रनिर्योगादिः, आहारः-अशनादिरूपः, एषां समाहारो द्वन्द्वः, तस्मिन् , तद्विषयायामित्यर्थः। **झाणे अपसत्थे**त्यादि, ध्यानं द्विधा-अप्रशस्तं प्रशस्तं च। अप्रशस्तमार्त्तं रौद्रं च, प्रशस्तं धर्मं शुक्लं च। तत्र **प्रशस्ते ध्याने** धर्म-शुक्लरूपे। चशब्दः भिन्नक्रमः। प्रशस्तं च **योगमालीनः सुविसुद्धो तिविहकरणेणं** ति, उपलक्षणमेतत् भावेनापि सुविशुद्धः। शेषं सुगमम् ॥१४७३-७६॥

उक्तः संयमकुशलः २। प्रवचनकुशलमाह—



**सुत्तऽत्थहेउ-कारणवागरणसमिद्धचित्तसुयधारी।**
**पोराणदुद्धरधरो, सुयरयणनिहाणमिव पुण्णो ॥ १४७७ ॥**

**धारिय-गुणिय-समीहिय- निज्जवणा विउलवायणसमिद्धो।**
**पवयणकुसलगुणनिही, पवयणअहियनिग्गहसमत्थो ॥ १४७८॥**

सूत्राऽर्थात्मकत्वात् यदि वा सूत्रयुक्तोऽर्थोऽस्मिन्निति सूत्रार्थम्, नत्वक्षरानारूढार्थमिति भावः, हेतुः अन्वयव्यतिरेकात्मकः, कारणम्-उपपत्तिमात्रम्, हेतु-कारणे व्याक्रियेते-प्रतिपाद्येते अनेनेति हेतु-कारणव्याकरणम्, **समृद्धम्** -अनेकातिशयात्मकत्वात्, **चित्रमा**श्चर्यभूतम् अनन्तगम-पर्यायात्मकत्वात्। एवंरूपं **श्रुतं** धारयतीत्येवंशीलः **सूत्राऽर्थहेतुकारणव्याकरण-समृद्धचित्रश्रुतधारी,** तथा पौराणमिव पौराणम्, यादृशमतीताद्धायामासीत् तादृशमिदानी-मप्यतिबहुलत्वेनेति भावः, दुर्द्धरं- नय-भङ्गाकुलतया प्राकृतजनैर्धारयितुमशक्यं धरतेऽर्थान् प्रवचनमिति **पौराणदुर्द्धरधरः**। तथा **श्रुतरत्नस्य निधानमिव पूर्णः** प्रतिपूर्णोऽर्थनिर्णय-प्रदानादिना॥ १४७७॥ तथा धारितं- सम्यग्धारणाविषयीकृतम्, न विप्रनष्टमिति भावः, गुणितं च- बहुशः परावर्तितम्, तथा सम्यग् ईहितं- पूर्वापरसम्बन्धेन पूर्वाऽपराव्याहतत्वेनेत्यर्थः, मीमांसितं समीहितम्। एतानि प्रवचनविशेषणानि, इत्थम्भूतेन प्रवचनेन तथा तस्यैव प्रवचनस्य निर्यापणा-मीमांसिततया निर्दोषत्वेन निश्चयनं तया, विपुला विशोधनार्थं बहूनामाचार्याणां सकाशे ग्रहणाद् वाचना विपुलवाचना, तया च समृद्धो **धारित-गुणित-समीहित-निर्यापणा-विपुलवाचनासमृद्धः**। तथा **प्रवचन**परिज्ञानानुगतानां गुणानां निधिरिव **गुणनिधिः**। किमुक्तं भवति ? प्रवचनमधीत्याऽऽत्मनो हितमाचरति, अन्येषां च हितमुपदिशतीति। तथा प्रवचनस्य

अहिताः- अवर्णभाषिणः तन्निग्रहे समर्थः **प्रवचनाहितनिग्रहसमर्थः**। पाठान्तरम्-**पवयण-हियनिग्गमसमत्थो**'' प्रवचनाय हितः प्रवचनहितः, स्वशक्त्यनिगूहनेन प्रवचनप्रभावक इत्यर्थः, निर्गमे आत्मनः परस्य च संसारान्निस्तारणे समर्थः निर्गमसमर्थः ॥१४७८॥

अत्रैव कतिपयपदव्याख्यानार्थमाह—

**नय-भंगाउलयाए, दुद्धर इवसद्द होति ओवम्मे।**
**धारियमविप्पणट्ठं, गुणियं परियत्तियं बहुसो ॥ १४७९ ॥**

**पुव्वाऽवरबंधेणं, समीहियं वाइयं तु निज्जवियं।**
**बहुविहवायणकुसलो, पवयणअहिए निग्गिण्हे ॥ १४८० ॥**

गाथाद्वयमपि गतार्थम्। नवरम्-**वाचित**माक्षेप-परिहारपूर्वकतया। सम्यग् गुरुपादान्तिके निर्णीतार्थीकृतं, **निर्यापितम्**। विपुलवाचनासमृद्ध इत्यस्य व्याख्यानम् बहुविधया वाचनया कुशलः- दक्षो **बहुविधवाचनाकुशलः** ॥१४७९-८०॥

उक्तः प्रवचनकुशलः। सम्प्रति प्रज्ञप्तिकुशलमाह—

**लोगे वेए समए, तिवग्गसुत्तत्थगहियपेयालो।**
**धम्मत्थ-काम-मीसगकहासु कहवित्थरसमत्थो ॥ १४८१ ॥**

**जीवाजीवा बंधं मोक्खं गतिरागति सुहं दुक्खं।**
**पन्नत्तीकुसल विऊ, परवादीकुदंसणे महणो ॥ १४८२ ॥**

**लोके वेदे समये** च आत्मीये प्रवचने यानि शास्त्राणि, तथा धर्माऽर्थकामा**स्त्रि-वर्ग**स्तस्मिन्नपि च यानि शास्त्राणि तेषु सूत्रार्थयोर्गृहीतं पेयालं- परिमाणं येन स **सूत्रार्थगृहीत-पेयालः**, सम्यग् विनिश्चितसूत्रार्थ इति तात्पर्यार्थः। तथा धर्मकथासु अर्थकथासु कामकथासु मिश्रकथासु च द्वि-त्रिसंयोगतो धर्मार्थकामकथासु कथयितव्यासु **कहवित्थरत्ति** विस्तरेण कथने समर्थः **धर्मार्थकाममिश्रितासु कथासु विस्तरकथाकथनसमर्थः** ॥१४८१॥ तथा **जीवमजीवं बन्धं मोक्षं गतिमागतिं सुखं दुःख**मधिकृत्य **प्रज्ञप्तौ कुशलः**। कुत? इत्याह- यतो **विदू** विद्वान्। एतदुक्तं भवति-यतो लोक-वेद-समयशास्त्राणां सम्यग्वेत्ता ततो जीवानां-नारकादिभेदभिन्नानाम्, अजीवानां धर्मास्तिकायादीनाम्, बन्धस्य मिथ्यात्वा-ऽविरति-प्रमाद-

कषाय-योगप्रत्ययकस्य, मोक्षस्य सकलकर्मांशापगमरूपस्य ज्ञानदर्शनचारित्रहेतुकस्य, तथा येन येन कर्मणा कृतेन नरकतिर्यग्देवभवेषूत्पत्तिर्भवति तद्रूपाया गतेः, येन च कर्मणा कृतेन मनुष्यभवे समुत्पत्तिः, तद्रूपाया आगतेः, तथा सुखं यथा प्राणिनामुपजायते [1]तथा सुखस्य, यथा दुःखं तथा दुःखस्य प्ररूपणायां कुशलः। तथा परवादिनो यत् कुदर्शनं तस्मिन् मथनः **परवादिकुदर्शनमथनः**, किमुक्तं भवति? परवादिनः प्रथमं भाषते, यथा- युष्माभिः कुदर्शनमग्राहि। ततस्ते असहमाना विप्रतिपद्यन्ते, तांश्च विप्रतिपद्यमानान् युक्तिभिस्तथा मथ्नाति यथा स्वदर्शनपरित्यागं कुर्वन्तीति, एष इत्थम्भूतः प्रज्ञप्तिकुशलः ॥१४८२॥

साम्प्रतमत्रैव दृष्टान्तमाह—

**पण्णत्तीकुसलो खलु, जह खुड्डगणी मुरुंडरायस्स।**
**पुट्ठो [2]कहं गणि देवा, गयं पि कालं न याणंति? ॥ १४८३ ॥**



१. तथा भूतस्य यथथ - वा. पु. मु. ॥ २. कहमिव देवा-खं। कह नवि देवा- वा. पु. भाष्यप्रतिषु च॥

तो उट्ठितो गणिवरो[1], राया वि य उट्ठितो ससंभंतो।
अह खीरासवलद्धी कहेति सो खुड्डुगगणी तो ॥ १४८४ ॥
जाहे य पहरमेत्तं कहियं न य मुणइ कालमह राया।
तो बेति खुड्डुगगणी, रायाणं एव जाणाहि ॥ १४८५ ॥
जह उट्ठिएण वि तुमे, न वि णाओ एत्तिओ इमो कालो।
इय गीय-वादियविमोहिया उ देवा न याणंति ॥ १४८६ ॥
अब्भुवगयं च रण्णा, कहणाए एरिसो भवे कुसलो।
ससमयपरूवणाए, महेति सो कुसमए चेव ॥ १४८७ ॥ दारं ४।



**प्रज्ञप्तिकुशलो** यथा **क्षुल्लकगणी** क्षुल्लकाचार्यो **मुरुण्डराजस्य**। तथा च अन्यदा तेन राज्ञा **पृष्टः** क्षुल्लकगणी **कथं** ननु **देवा गतमपि कालं न जानन्ति**॥१४८३॥ **तत** एवं पृष्टः सन् स **गणिवरः** सहसा आसनादु**त्थितः**। तमुत्थितं दृष्ट्वा राजापि **ससम्भ्रान्तः** ससम्भ्रम **उत्थितः**, ततः **अथ** अनन्तरं **स क्षुल्लकगणी** क्षीरमिवाऽऽश्रवति कथनं[2] यस्या लब्धेः सा क्षीराश्रवा, सा लब्धिर्यस्यासौ **क्षीराश्रवलब्धिः**, स इत्थम्भूतः स्वसमयानुगतं किमपि

---
१. गणधरो - वा.पु. ॥ २. कथयन् य° वा. मो. मु. ॥

**कथयति** ॥१४८४॥ **जाहे य** इत्यादि, यदा च **प्रहरमात्रं** कालं यावत्**कथितम्**, अथ च तावन्तं **कालं राजा** गतमपि **न जानाति ततो राजानं ब्रूते क्षुल्लकगणी- एव**मनेन प्रकारेण वक्ष्यमाणमपि **जानीहि** ॥१४८५॥ तदेवाऽऽह-

**जह उट्ठिएण वी**त्यादि। **यथा उत्थितेनापि त्वया न विज्ञातोऽयमेतावान् कालो** गतः। कथारसप्रवृत्तेरिति[1], एवमनेनैव प्रकारेण **गीत-वादितविमोहिता[2] देवाः** प्रभूतमपि गतं कालं **न जानन्ति** ॥१४८६॥ एतच्च **राज्ञा** तथैवाभ्यु**पगतम्**, जाता महती प्रतिपत्तिः। **ईदृशः** खलु **कथनायाः** प्रज्ञप्तेः **कुशलः**। स च तथाभूतः **स्वसमयप्ररूपणायां** नियमतः **कुसमयान् मथ्नात्येव** ॥१४८७॥

उक्तः प्रज्ञप्तिकुशलः। सम्प्रति सङ्ग्रहकुशलो व्याख्येयस्ततः सङ्ग्रहप्ररूपणार्थमाह—

**दव्वे भावे संगहो, दव्वे ऊ उक्ख-हारमादीओ।**
**साहिल्लादी भावे, परूवणा तस्सिमा होइ ॥ १४८८ ॥**



---

१. °वृत्तेनेति - वा. पु. मु. ॥ २. °दित्र वि° वा. मो. पु. मु.॥

सङ्ग्रहो द्विधा-**द्रव्ये भावे** च। तत्र **द्रव्ये उक्षादिक आहारादिकश्च**। उक्षा-बलीवर्दाः। **भावे** भावविषयः **साहाय्यादिकः**। **तस्य** साहाय्यादिकस्य भावसङ्ग्रहस्य **इयं** वक्ष्यमाणा **भवति प्ररूपणा** ॥१४८६॥

तामेवाह—

**साहिल्लवयणवायण, अणुभासण देस-कालसंभरणं।**
**अणुकंपणमणुसासण, पूयणमब्भंतरं करणं ॥ १४८९ ॥**

**संभुंजणसंभोगे, भत्तोवहि अन्नमन्नसंवासो।**
**संगहकुसलगुणनिही, अणुकरण-करावणनिसग्गो ॥ १४९० ॥**



**साहिल्लं** सहायकृत्यकरणम् **वचन**माभाषितस्य इच्छाकारभणनम्, अथवा आभिग्रहिकस्य ग्रहीतमौनव्रतस्य वचनविषये केनाप्याभाषणं कृते तस्योत्तरभणनं वचनम्। **वायण**त्ति वाचनया क्लान्ते गुरौ साधूनां ददाति वाचनम्। **अनुभाषणं** नाम आचार्येण भाषिते सति पश्चाद्भाषणम्, न पुनः प्रधानीभूयाऽऽचार्यभाषणादग्रे एव भाषते। **देश-कालसंस्मरणं** नाम अस्मिन् देशे

अस्मिन् काले च कर्त्तव्यमिदं ग्लानादीनामिति विज्ञापयन् देशे काले स्मारयत्याचार्याणां ग्लानादीन्। **अनुकम्पनं** दुःखार्तस्यानुकम्पाकरणम् बाल-वृद्धा-ऽसहान् यथादेश-कालमनुकम्पत इति भावः। **अनुशासनं** भज्यमाने वा रुष्टे वा। किमुक्तं भवति सामाचारीतः प्रतिभज्यमानान् कथञ्चिद् रुष्टान् वा यदनुशास्ति तदनुशासनम्, यदि वा यो यथोक्तकार्यपि सन् कथञ्चिन्न कुरुते तस्य यत् शिक्षणम्-'एतत्तदकृत्यम्' इति, खग्गूडान्वाऽनुशास्ति एतदनुशासनम्, **पूजनं** नाम यथाक्रमं गुर्वादीनामाहारादिसम्पादनविनयकरणम्, यदि वा ज्ञानाचारादिषु पञ्चस्वाचारेषु यथायोगमुद्यच्छतामुपबृंहणम्। **अभ्यन्तरकरणं** नाम द्वयोः साध्वोर्गच्छमेढीभूतयोरभ्यन्तरे कुलादिकार्यनिमित्तं परस्परमुल्लपतोस्तृतीयस्योपशुश्रूषोर्बहिष्करणम्। अथवा यदादिष्टः सन्नभ्यन्तरे गत्वा तद् गच्छादिप्रयोजनं ब्रूते एतदभ्यन्तरकरणम्। यदि वा तेन सह ये बाह्यभावं मन्यन्ते तानपि तथाऽनुवर्तयति यथा तं ते स्वजनमभिमन्यन्ते एतदभ्यन्तरकरणम् ॥१४८९॥ **सम्भोजनं** नाम यत्साम्भोगिकैः सह भोजनम् **सम्भोगे, भत्तोवही**ति, यद् भक्तमुपधिं वा सम्भोगयति। किमुक्तं भवति ? यद्यस्य कारकं भक्तमुपधिर्वा तत्स्वयमुत्पाद्य तस्मै ददाति, ततो गृह्णाति वा। तथा **अन्नमन्नं संवासो** इति साम्भोगिकैः सह परस्परमेकत्र वसनम्, एतानि कुर्वाणः **सङ्ग्रहकुशलः**। पुनः कथम्भूतः ? इत्याह—सङ्ग्रहानुगता ये गुणाः तेषां निधिरिव **गुणनिधिः**।

तथा **अनुकरणं** नाम यत्सीवन-लेपादि कुर्वन्तं दृष्ट्वा ब्रूते 'इच्छाकारेण तवेदमहं करिष्यामि' कुरुते च। **कारापणं** नाम-यत्स्वयंकरणे अकुशलानन्यानपीच्छाकारेण कारापयति, तस्मिन् निसर्गः स्वभावो यस्य सोऽनुकरण-**कारापणनिसर्गः**, इत्थम्भूतस्तस्य स्वभावो यदनभ्यर्थित एव करोति कारयति चेति भावः ॥१४९०॥

सम्प्रति कतिपयपदव्याख्यानार्थमाह—

**वयणे तु अभिग्गहियस्स, केणवी तस्स उत्तरं भणति।**
**वायणाए किलंते, उ गुरुम्मी वायणं देइ ॥ १४९१ ॥**

**वचने** वचनविषये आभिग्रहिकस्य गृहीता**भिग्रहस्य** प्रतिपन्नमौनव्रतस्येत्यर्थः, **केनापि** प्रश्ने कृते सति **तस्योत्तरं यद्भणति** एष वचनसङ्ग्रहकुशलः। पश्चार्द्धं सुगमम् ॥ १४९१ ॥

**साहूणं अणुभासइ, आयरिएणं तु भासिए संते।**
**सारे आयरियाणं देसे काले गिलाणादी ॥ १४९२ ॥**

अत्र **साधूना**मिति पदं पश्चाद् गाथायाः सम्बध्यते। शेषं प्रागेव व्याख्यातार्थमिति ॥१४९२॥

**दुक्खत्ते अणुकंपा, अणुसासण भज्जमाण रुट्ठे वा।**
**जो वा जहुत्तकारी, अणुसासणकिच्चमेयं तु ॥ १४९३ ॥**

इयमपि व्याख्यातार्था ॥ १४९३॥

**पूयणमहागुरूणं, अब्भंतर दोण्हमुल्लवंताणं।**
**तइयं कुणती बहिया, बेई गुरूणं च तं इट्ठो ॥ १४९४ ॥**

**पूजनं यथाक्रमं गुरूणाम्।** अभ्यन्तरकरणं **यदभ्यन्तरे द्वयोरुल्लपतोस्तृतीयमुपशुश्रूषुं बहिः करोति।** यदि वा तद्गच्छादिप्रयोजनं **इष्टः** सन्नभ्यन्तरं गत्वा **गुरूणां ब्रूते** कथयति ॥१४९४॥

**संभुंजण संभोगेण, जुज्जए जस्स कारगं भत्तं।**
**तं घेत्तुमप्पणा से देई एमेव उवहिं पि ॥ १४९५ ॥**

**सम्भोजनं** नाम यत्**सम्भोगेन योजयति** साम्भोगिकैः सहैकत्र भुङ्क्ते इति। तथा **यद्यस्य कारक**मुपकारकं **भक्तं तदात्मना गृहीत्वा तस्मै ददाति। एवमेवोपधिरपि** यो यस्योपकारकस्तं स्वयमुत्पाद्य तस्मै ददाति। एतेन "सम्भोगे भत्तोवही"[गा. १४९०] इति व्याख्यातम्। परस्परमेकत्र संवासः सुप्रतीतत्वान्न व्याख्यातः ॥ १४९५॥

**अणुकरणं सिव्वणलेवणादि अण्णभासणा उ दुम्मेहो।**
**एरिसो तस्स निसग्गो, जं भणियं एरिससहावो ॥ १४९६ ॥**

**अनुकरणं** नाम **सीवन-लेपनादि** स्वयं कञ्चित्कुर्वन्तं दृष्ट्वा इच्छाकारेणानुज्ञाप्य करोति। तथा **दुर्मेधसि** स्वयं सीवन-लेपनादिकर्तुम[1]जानति स्वयं तावत् करोत्येव, किन्त्वन्यानपि भाषते, यथा— कुरुत एतस्य महानुभागस्येति एतत्कारापणम् **ईदृशस्तस्यानु**करणे कारापणे च **निसर्गः** स्वभावः। **जं भणियं** ति, किमुक्तं भवतीत्यर्थः **ईदृशस्वभावः** अनुकरण-कारापणस्वभावः ॥१४९६ ॥

१. मनुजानाति - मु. ॥

उक्त सङ्ग्रहकुशलः। उपग्रहकुशलमाह—

**बालाऽसहवुडढेसु, संत तवकिलंत वेयणाऽऽतंके।**
**सेज्ज-निसेज्जोवहि-पाणासणभेसज्जुवग्गहिए ॥ १४९७ ॥**

**दाण-दवावण-कारावणेसु करणे य कयमणुण्णाए।**
**उवहितमणुवहितविही जाणाहि उवग्गहं एयं ॥ १४९८ ॥**

**बालाऽसह-वृद्धेषु,** तथाप्रभूतमार्गगमनतः पठनतो वा **श्रान्तेषु, तपःक्लान्तेषु,** तथा **वेदनायां** सामान्यतः शरीरपीडायां जातायाम्, **आतङ्के** च सद्योघातिनि रोगे समुत्पन्ने। **शय्या**-वसतिः **निषद्या**-पीठफलकादिरूपाः, **उपधिः**-कल्पादिरूपः, **पानं**- द्रवम्, **अशन**मोदनादि, **भैषज**मौषधम् **औपग्रहिकं**- दण्डप्रोञ्छनाद्युपकरणम्, एतेषां समाहारो द्वन्द्वः, तस्मिन् , सप्तमी षष्ठ्यर्थे, ततोऽयमर्थः- एतेषां स्वयं **दाने,** अन्यै**र्दापने,** तथा वैयावृत्त्यादेः-**कारापणे करणे च,** तथा **कयमणुण्णाए** इति परैः कृतस्यानुज्ञायां यत्प्रवर्त्तनम् तथा य **उपहितविधि**-र्यश्चा**नुपहितविधिः,** तत्रोपहितविधिर्नाम- यद् आचार्यैर्वितीर्णं तदाचार्यमनुज्ञाप्यान्येषां साधूनां-

तदन्तरेण विसूरयतां ददाति, अनुपहितविधिः-यदनुत्पन्नमुत्पाद्य ददाति। **अन्ये** तु व्याचक्षते-यद्यस्य गुरुभिर्दत्तं तत्तस्योपनयतीत्येष उपहितविधिः, यत्पुनस्तस्य गुरुभिर्दत्तं तत्सोऽन्यस्य गुरूननुज्ञाप्य ददाति एषोऽनुपहितविधिः। **एवं** सर्वमुपग्रहं [1]जानीहि ॥१४९७-९८॥

एतदेव लेशतो व्याख्यानयति—

**बालादीणेतेसिं, सेज्ज-निसेज्जोवहिप्पयाणेहिं।**
**भत्तऽन्न-पाण-भेसज्जमादीहि उवग्गहं कुणइ ॥ १४९९॥**

**देइ सयं दावेइ य, करेइ कारावए य अणुजाणे।**
**उवहिय जं जस्स गुरूहिं दिण्णं तं तस्स उवणेति ॥ १५०० ॥**

**अणुवहियं जं तस्स उ, दिन्नं तं देइ सो उ अन्नस्स।**
**खमासमणेहि दिण्णं, तुब्भं ति उवग्गहो एसो ॥ १५०१ ॥** दारं ६।

१. जानाति - पु. प्रे. ॥

**एतेषा**मनन्तरगाथाभिहितानां **बालादीनां** बालाऽसमर्थवृद्धमार्गगमनादिश्रान्त-तपःक्लान्त-वेदनार्त्त-जातातङ्कानां शय्या-**निषद्योपधिप्रदानैः** तथा **भक्तं**-मोदकाऽशोकवर्त्यादि, **अन्न**मोदनादि, **पान-भैषजे** प्रागुक्तस्वरूपे, **आदिशब्दादौपग्रहिको**पकरणादिपरिग्रहः, एतैः **उपग्रहम्** उपष्टम्भं **करोति** ॥१४९९॥

कथम् ? इत्याह—

**स्वयं** शय्यादिकं **ददाति,** अन्यैर्वा **दापयति,** तथा स्वयं वैयावृत्त्यादि **करोति** अन्यैः **कारयति** कुर्वन्तं वा अन्य**मनुजानीते**। **उवहिय**त्ति पदैकदेशे पदसमुदायोपचारादुपहितविधिरिति द्रष्टव्यम्, **यद्यस्य गुरुभिर्दत्तं** तत्तस्योप**नयती**त्येष **उपहित**विधिः ॥१५००॥ यत्पुन**स्तस्य दत्तं सोऽन्यस्मै** गुरून् अनुज्ञाप्य **ददाति,** क्षमाश्रमण! **क्षमाश्रमणैस्तुभ्य**मिदं **दत्त**म्' इत्येषोऽनुपहितविधिः। **एष** सर्वो**ऽप्युपग्रहः** ॥१५०१॥

उक्त उपग्रहकुशलः। साम्प्रतमक्षताचारादिपदानां सामान्येन व्याख्यानमाह—

**आहाकम्मुद्देसिय, ठविय रइय-कीय-कारियच्छेज्जं।**
**उब्भिण्णाहडमाले, वणीमगाजीवण निकाए ॥ १५०२॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**परिहरति असणपाणं, सेज्जोवहि पूति संकियं मीसं।**
**अक्खुयमसबलमभिन्नमसंकिलिट्ठमावासए जुत्तो ॥ १५०३ ॥**

**आधाकर्मिकं** यन्मूलत एव साधूनाधाय[1] कृतम्, **औद्देशिक**मुद्दिष्टादिभेदभिन्नम्, **स्थापितं** यत्संयतार्थं स्वस्थाने परस्थाने वा स्थापितम्। **रचितं** नाम संयतनिमित्तं कांस्यपात्रादौ मध्ये भक्तं निवेश्य पार्श्वेषु व्यञ्जनानि बहुविधानि स्थाप्यन्ते। तथा क्रीतेन क्रयेण कारितमुत्पादितं **क्रीतकारितम्। आच्छेद्यं** यद् भृतकादिलभ्यमाच्छिद्य दीयते। **उद्भिन्नं** यत्कुतपादिमुखं स्थगितमप्युद्भिद्य ददाति। **आहृतं** स्वग्रामाभ्याहृतादि। **मालत्ति** मालापहृतम्। वनीपकीभूय यः पिण्ड उत्पाद्यते स पिण्डोऽपि **वनीपकः। आजीवनं** यदाहार-शय्यादिकं जात्याद्याजीवनेनोत्पादितम्। **निकाएत्ति** 'मम एतावद्दातव्यम्' इति निकाचितम्॥१५०२॥

एतानि योऽशन-पानानि शय्योपधीश्च **परिहरति**। तथा **पूति शङ्कितं मिश्रम्**, उपलक्षणमेतत्, अध्यवपूरकादिकं च, **यश्चाऽऽवश्यके युक्तः** सोऽ**क्षताचारः अशबलाचारः**

१. °धूनां कृते कृतम् - वा. पु.मु. ॥

**अभिन्नाचारः असङ्क्लिष्टाचारः**। तत्र स्थापितादिपरिहारी अक्षताचारः। अभ्याहृतादिपरिहारी अशबलाचारः। जात्योपजीवनादि परिहरन् अभिन्नाचारः। सकलदोषपरिहारी असङ्क्लिष्टाचारः ॥१५०३॥

सम्प्रति लाघवाय [१]द्वितीयसूत्रगतानि क्षताचारादीनि पदानि व्याख्यानयति—

**ओसन्नखुयायारो, सबलायारो य होइ पासत्थो।**
**भिन्नायारकुसीलो, संसत्तो संकिलिट्ठो उ ॥ १५०४ ॥**

**अवसन्नः** आवश्यकादिष्वनुद्यमः **क्षताचारः**। तथा पार्श्वस्थः अभ्याहृतादिभोजी **शबलाचारः। कुशीलः** जात्याजीवनादिपरो **भिन्नाचारः। संसक्तः** संसर्गवशात् स्थापितादिभोजी, **सङ्क्लिष्टः** सङ्क्लिष्टाचारः ॥१५०४॥

सम्प्रत्याचारप्रकल्पधर इति पदं व्याख्यानयति—

**तिविहो य पकप्पधरो, सुत्ते अत्थे य तदुभए चेव।**
**सुत्तधरवज्जियाणं, तिग-दुगपरिवड्ढणा गच्छे ॥ १५०५॥**

---

१. सूत्रषट्कापेक्षया ( ३-८ ) द्वितीयमिति ज्ञेयम्॥

**त्रिविधः** खलु **प्रकल्पधरः**। तद्यथा **सूत्रे** सूत्रतः१ **अर्थतः२ तदुभयतश्च** ३। इयमत्र भावना-**आ**चारप्रकल्पधारिणां चत्वारो भङ्गाः। तद्यथा— सूत्रधरो नोऽर्थधरः१ नो सूत्रधरोऽर्थधरः२ सूत्रधरोप्यर्थधरोऽपि३ नो सूत्रधरो नाप्यर्थधरः४। अत्र चतुर्थो भङ्गः शून्यः, उभयविकलतया आचारप्रकल्पधारित्वविशेषणासम्भवात्। आद्यानां तु त्रयाणां भङ्गानां मध्ये यस्तृतीयभङ्गवर्ती स उपाध्याय उद्दिश्यते, यतः स उभयधारितया गच्छस्य सम्यक् परिवर्धको भवति, तदभावे **द्वितीय**भङ्गवर्त्यपि, तस्याप्यर्थधारितया सम्यक्परिवर्धकत्वात्, नत्वाद्यभङ्गवर्ती। तथा चाह—**सूत्रधरवर्जितानामा**चारप्रकल्पधारिणां **गच्छे** गच्छस्य **परिवर्धना त्रिके** तृतीयभङ्गे, तदभावे द्वितीयभङ्गे च, ततस्त एवोपाध्यायाः स्थाप्याः, न प्रथमभङ्गवर्तिनः। एवं दशा-कल्प-व्यवहारधरादिपदानामपि व्याख्या कर्तव्या॥ १५०५॥

अत्र पर आह—

**पुव्वं वण्णेऊणं, दीह परियाय संघयणसद्धं।**
**दसपुव्विए य धीरे, मज्जाररुयं परूवणया ॥ १५०६॥**

ननु पूर्वमाचार्यपदयोग्यस्य **दीर्घः पर्यायो** वर्णितः, **संहननं** चातिविशिष्टम्, **श्रद्धा** च प्रवचनविषयाऽत्युत्तमा, आगमतश्चाऽऽचार्यपदयोग्या जघन्यतोऽपि **दशपूर्विकाः** तथा **धीरा** बुद्धिचतुष्टयेन विराजमानाः, ततः एवं **पूर्वं वर्णयित्वा** यदेवमिदानीं प्ररूपयथ यथा 'त्रिवर्ष-पर्याय आचारप्रकल्पधर उपाध्यायः स्थाप्यते, पञ्चवर्षपर्यायो दशा-कल्प-व्यवहारधर' इत्यादि, सैषा **प्ररूपणा मार्जाररुतं** मार्जाररटित[1]कल्पा, यथाहि मार्जारः पूर्वं महता शब्देनाऽऽरटति पश्चादेवं शनैः शनैरारटति यथा स्वयमपि श्रोतुं न शक्नोति, एवं त्वमपि पूर्वमुच्चैः शब्दितवान्, पश्चाच्छनैरिति। सूरिराह- सत्यमेतत्, केवलं यत्पूर्वमुक्तं तद् यथोक्तं न्यायमङ्गीकृत्य, सम्प्रति पुनः कालानुरूपं प्रज्ञाप्यते इत्यदोषः। तथा चात्र पुष्करिण्यादयो दृष्टान्ताः ॥१५०६॥

तानेवाह—

**पुक्खरिणी१ आयारे, आणयणा२तेणगा य३ गीयत्थे४।**
**आयरियम्मि उ एए, आहरणा होंति नायव्वा ॥ १५०७ ॥**

गाथा १५०४-१५०९ कालपरिवर्तने दृष्टान्ताः ७२५ (A)

---

१. ° रुदिक° वा. मो. पु.।।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सत्थपरिण्णाछक्काय-अहिगम५ पिंड६उत्तरज्झाए७।**
**रुक्खे य८ वसभ९ गावो १०,**
**जोहा११ सोही य१२ पुक्खरिणी१३ ॥ १५०८॥** दारगाहाओ।

**पुष्करिणी** वापी१ **आचारे** आचारप्रकल्पस्य **आनयनम्२ स्तेनकाश्चौ**राः३ **गीतार्था**:४। एतानि चत्वार्या**हरणानि** दृष्टान्ता भव**न्त्याचार्ये ज्ञातव्यानि** ॥१५०७॥ **इमानि** च—

**शस्त्रपरिज्ञायां षट्कायाधिगमः**, षड्जीवनिका इदमेकमुदाहरणम् ५ **पिण्ड** ६ **उत्तराध्ययन** उत्तराध्ययनानि७ **वृक्षाः** कल्पद्रुमादयः८ **वृषभाः** बलीवर्दाः९ **गावः**१० **योधाः** ११ **शोधिः** १२ अत्रैव दृष्टान्तः **पुष्करिणी** १३ च। एवं सर्वसङ्ख्यया त्रयोदश आहरणानि ॥ १५०८॥

एतानि व्याचिख्यासुः प्रथमतः पुष्करिण्याहरणं भावयति—

**पुक्खरिणीतो पुव्वं, जारिसयाओ न तारिसा एण्हिं।**
**तहवि य ता पुक्खरिणीतो हवंति कज्जाइं कीरंति ॥ १५०९ ॥** दारं १।

**पूर्वं** सुषमसुषमाकाले **यादृश्यः पुष्करिण्यो** जम्बूद्वीपप्रज्ञप्तौ वर्ण्यन्ते **इदानीं न तादृश्यः, तथापि च ता** अपि **पुष्करिण्यो भवन्ति, कार्याणि** च ताभिः **क्रियन्ते** ॥१५०९॥

आचारप्रकल्पानयनाहरणमाह—

**आयारपकप्पो ऊ, नवमे पुव्वम्मि आसि सोधी य।**
**तत्तो च्चिय [1]निज्जोढुं, [2]इहाऽऽणितो सोहि किं न भवे? ॥ १५१० ॥**

दारं २।

**आचारप्रकल्पः पूर्वं नवमे पूर्वे आसीत्, शोधिश्च** ततोऽभवत्, **इदानीं** पुनः इह **आचाराङ्गे तत एव नवमात्पूर्वान्निर्यूह्यानीतः**, ततः किमेष आचारप्रकल्पो न भवति किं वा ततः **शोधिर्नोपजायते?** एषोऽप्याचारप्रकल्पः, शोधिश्चास्माद् विशिष्टा भवतीति भावः२ ॥१५१०॥

अधुना स्तेनकदृष्टान्तभावनार्थमाह—

१ निज्जूढो इहा° सर्वासु वृत्ति प्रतिषु। ला. संस्करणेपि निज्जूढो इधा° इति ॥ २. इहाऽऽणितो किं न सुद्धिभवे ? वा.पु.। इहाऽऽणितो इण्हि किं न भवे ? खं. खंभा जेभा.। इहाऽऽणितो इह [स] किं न भवे? मो.।

**तालुग्घाडिणि-ओसावणादि, विज्जाहि तेणगा आसि।**
**इण्हिं ताओ न संती, तह वि किं तेणगा न खलु? ॥ १५११ ॥** दारं ३।

पूर्वं **स्तेनकाश्चौरा विजय-प्रभवादयस्तालोद्घाटिन्यवस्वापिन्यादिभि**रुपेता आसीरन्, **ताश्च विद्या इदानीं न सन्ति, तथापि किं खलु स्तेनका न** भवन्ति? भवन्त्येव। तैरपि परद्रव्यापहरणादिति भावः ३॥१५११॥

अधुना गीतार्थदृष्टान्तं भावयति—

**पुव्वं चउदसपुव्वी, इण्हिं जहण्णो पकप्पधारी उ।**
**मज्झिमग पकप्पधारी कह[1] सो उ न होइ गीयत्थो ?॥ १५१२ ॥** दारं ४।

**पूर्वं** गीतार्थ**श्चतुर्दशपूर्वी** अभवत्, **इदानीं** स किं गीतार्थो **जघन्यः प्रकल्पधारी** निशीथाध्ययनधारी मध्यमश्च कल्पधारी न भवति ? भवत्येवेति भावः ४॥ १५१२ ॥

---

१ किं सा उ - ला. ॥

शस्त्रपरिज्ञादृष्टान्तमाह—

**पुव्वं सत्थपरिण्णा अधीय-पढियाए होउवट्ठवणा।**
**इण्हिं छज्जीवणिया किं सा उ न होउवट्ठवणा ? ॥ १५१३ ॥** दारं ५।

**पूर्वं शस्त्रपरिज्ञायाम्** आचाराङ्गान्तर्गतायाम् **अधीतायाम्** अर्थतो ज्ञातायां **पठितायां** सूत्रत **उपंस्थापनाऽ**भूत्, **इदानीं** पुनः **सा उपस्थापना किं षड्जीवनिकायां** दशवैकालिकान्तर्गतायामधीतायां पठितायां च न **भवति** ? भवत्येवेत्यर्थः ५ ॥१५१३॥

पिण्डदृष्टान्तभावनामाह—

**बितियम्मि बंभचेरे, पंचम उद्देस आमगंधम्मि।**
**सुत्तम्मि पिंडकप्पी, इह पुण पिंडेसणाए उ ॥ १५१४ ॥** दारं ६।

पूर्वमाऽऽचाराङ्गान्तर्गते **लोकविजय**नाम्नि **द्वितीये**ऽध्ययने यो **ब्रह्मचर्या**ख्यः **पञ्चम उद्देशक**स्तस्मिन् यद् **आमगन्धिसूत्रं "सव्वामगंधं परिण्णाय निरामगंधं परिव्वए"** [सूत्र-२] इति तस्मिन् सूत्रतोऽर्थतश्चाधीते **पिण्डकल्पी** आसीत्, इह इदानीं **पुनर्दशवैकालिका-**

न्तर्गतायां **पिण्डैषणाया**मपि सूत्रतोऽर्थतश्चाधीतायां पिण्डकल्पिकः क्रियते, सोऽपि च भवति तादृश इति ६॥ १५१४॥

उत्तराध्ययनदृष्टान्तं भावयति—

**आयारस्स उ उवरिं, उत्तरज्झयणाओ आसि पुव्विं तु।**
**दसवेयालिय उवरिं, इयाणि किं ते न होती उ ॥ १५१५ ॥** दारं ७।

**पूर्वमुत्तराध्ययनानि आचारस्य आचाराङ्गस्योपर्यासीरन् इदानीं दशवैकालिकस्योपरि,** तथापि **किं तानि** तथारूपाणि **न भवन्ति?** भवन्त्येवेति भावः७॥१५१५॥ वृक्षदृष्टान्त-भावनामाह—

**मत्तंगादीतरुवर, न संति इण्हिं न होंति किं रुक्खा ?।** दारं ८।
**महजूहाहिव दप्पिय, पुव्विं वसभा ण पुण इण्हिं ॥ १५१६ ॥** दारं ९।

पूर्वं सुषमसुषमादिकाले **मत्तङ्गादयो** दशविधाः **तरुवराः** कल्पद्रुमा आसीरन् , **इदानीं** ते **न सन्ति**। किन्त्वन्ये चूतादयः, ततः **किं ते वृक्षा न भवन्ति?** तेऽपि वृक्षा भवन्तीति

भावः८। वृषभदृष्टान्तभावनार्थमाह- **महजूहाहिव** इत्यादि, **पूर्वं** वृषभा महायूथाधिपा **दर्पिकाः** श्वेताः सुजाताः सुविभक्तशृङ्गा आसीरन् न **पुनरिदानीं** ते तथाभूता सन्ति किन्तु बहुवर्णा मन्दरूपतराः प्रायोऽल्पशक्तिकाश्च तथापि ते **वृषभा** भवन्ति वृषभकार्यकरणात्९ ॥ १५१६ ॥

अधुना **गोदृष्टान्तभावनार्थमाह**—

**पुव्विं कोडीबद्धा, जूहा ऊ नंदगोवमाईणं।**
**इण्हिं न संति ताइं, किं जूहा ते न होंती उ ॥ १५१७ ॥** दारं १०।

**पूर्वं नन्दगोपादीनां** गवां **यूथाः कोटीबद्धाः** कोटीसङ्ख्याका आसीरन्, **इदानीं ते** तथाभूता **न सन्ति,** किन्तु पञ्चदशादिगोसङ्ख्याकाः, ततः **किं** ते **यूथा न भवन्ति ?** भवन्त्येवेति भावः१० ॥१५१७॥

अधुना **योधदृष्टान्तभावनामाह**—

**साहस्सीमल्ला खलु, महपाणा[१] पुव्व आसि जोहा उ।**
**तत्तुल्ल नत्थिए ण्हिं किं ते जोहा न होंती उ? ॥ १५१८ ॥** दारं ११।

१. ण्णा आसिपुव्व जोहा ३ - इति गुरुतत्त्व वि. । १-१६२।

**पूर्वं योधा महाप्राणाः सहस्रमल्ला आसीरन्, इदानीं तेन तुल्या न सन्ति,** किन्त्वनन्तभागहीनाः, ततः **किं ते योधा न भवन्ति?** भवन्त्येव, कालौचित्येन तेषामपि योधकार्यकरणादिति भावः११ ॥ १५१८ ॥

शोधिदृष्टान्तमाह—

**पुव्विं छम्मासेहि परिहारेणं व आसि सोही उ।**
**सुद्धतवेणं निव्वीइयादि इण्हिं विसोही उ॥ १५१९॥** दारं १२।

**पूर्वं षड्भिर्मासैः परिहारेण वा** परिहारतपसा **शुद्धतपसा** वा **शोधिरासीत्, इदानीं निर्विकृतिकादिभिरपि विशोधिः,** पञ्चकल्याणक-दशकल्याणकादिमात्रप्रायश्चित्तदान-व्यवहारात् १२ ॥ १५१९ ॥

शोधिविषय एव पुष्करिणीदृष्टान्तमाह—

**किह पुण एवं सोही? जह पुव्विल्लासु पच्छिमासुं च।**
**पुक्खरिणीसुं वत्थाइयाणि सुज्झंति तह सोही ॥ १५२० ॥** दारं १३।

**किं** केन प्रकारेण **पुन**रत्राधुना **एवं** निर्विकृतिकादिमात्रेण **शोधिर्भ**वति ?। सूरिराह- **यथा पूर्वासु** पूर्वकालभाविनीषु **पुष्करिणी**ष्वतिप्रभूतजलपरिपूर्णासु **वस्त्राणि शुद्ध्यन्ति** स्म, एवं **पश्चिमास्व**पि अधुनातनकालभाविनीषु शुद्ध्यन्ति, **तथा शोधि**रपि पूर्वमिवेदानीमपि भवतीति १३ ॥ १५२० ॥

एवं दृष्टान्तानभिधाय दार्ष्टान्तिकयोजनामाह—

**एवं आयरियादी, चोद्दसपुव्वादि आसि पुव्विं तु।**
**एण्हिं जुगाणुरूवा, आयरिया हुंति नायव्वा ॥ १५२१ ॥**

**एव**मनन्तरोदितदृष्टान्तकदम्बकप्रकारेण यद्यपि **पूर्वमाचार्यादयश्चतुर्दशपूर्वधरादय आसीरन्** तथा**पीदानीमाचार्या** उपलक्षणमेतत् उपाध्यायादयश्च **युगानुरूपाः** दशा-कल्प-व्यवहारधरादयः तपो-नियम-स्वाध्यायादिषूद्युक्ताः, द्रव्य-क्षेत्र-काल-भावोचितयतनापरायणा **भवन्ति ज्ञातव्याः** ॥ १५२१ ॥

सम्प्रति यावत्पर्यायस्य यावन्ति स्थानानि सूत्रेणानुज्ञातानि तस्य तावन्त्यसम्मोहार्थमुपदिदर्शयिषुराह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तिवरिसे एगट्ठाणं, दोन्नि उ ठाणा उ पंचवरिसस्स।**
**सव्वाणि विकिट्ठो, पुण वोढुं चाएति ठाणाइं ॥ १५२२ ॥**

**त्रिवर्षे** त्रिवर्षपर्यायस्य **एकमे**वोपाध्यायलक्षणं **स्थान**मनुज्ञातम्, न द्वितीयमाचार्यत्वलक्षणमपि, तस्याल्पपर्यायतया प्रभूतखेदसहिष्णुत्वाभावेनाऽऽचार्यपदयोग्यताया अभावात्। **पञ्चवर्षस्य** पञ्चवर्षपर्यायस्य **द्वे स्थाने**ऽनुज्ञाते, तद्यथा-उपाध्यायत्वमाचार्यत्वं च, बहुतरवर्षपर्यायतया खेदसहतरत्वात्। '**विकृष्टः**' अष्टवर्षपर्यायः **पुनः सर्वाण्यपि स्थानानि वोढुं शक्नोति** बहुतमवर्षपर्यायत्वात्। ततस्तस्य सूत्रेणोपाध्यायत्वमाचार्यत्वं गणित्वं प्रवर्तित्वं स्थविरत्वं गणावच्छेदित्वं चानुज्ञातम् ॥ १५२२॥

अथ कथं सर्वाणि यथोक्तानि स्थानानि वोढुं शक्नोति ? तत आह—

**नोइंदि-इंदियाणि य, कालेण जियाणि तस्स दीहेण।**
**कायव्वेसु बहूसु य, अप्पा खलु भावितो तेणं ॥ १५२३ ॥**



For Private and Personal Use Only

**तस्य** अष्टवर्षपर्यायस्य **दीर्घेणाष्टवर्षप्रमाणेन कालेन नोइन्द्रिय इन्द्रियाणि जितानि** भवन्ति। **कर्तव्येषु** च **बहुष्वात्मा खलु तेन भावितो** भवति। ततो योग्यत्वात् सर्वाण्यपि स्थानानि तस्यानुज्ञातानि ॥ १५२३॥

**सूत्रम्— निरुद्धपरियाए समणे निग्गंथे कप्पइ तद्दिवसं आयरियउवज्झायत्ताए उद्दिसितए। से किमाहु भंते! अत्थि णं थेराणं तहारूवाणि कुलाणि कडाणि पत्तियाणि थेज्जाणि वेसासियाणि सम्मयाणि सम्मुइकराणि अणुमयाणि बहुमयाणि भवंति, तेहिं कडेहिं पत्तिएहिं थेज्जेहिं तेहिं वेसासिएहिं तेहिं सम्मऐहिं तेहिं सम्मुइकरेहिं तेहिं अणुमएहिं, तेहिं बहुमएहिं जं से निरुद्धपरियाए समणे निग्गन्थे कप्पइ आयरिय-उवज्झायत्ताए उद्दिसित्तए तद्दिवसं॥ ९ ॥**

सूत्र ९ गाथा १५२४-१५२६ पदप्रदाने अपवादः

निरुद्धपरियाए समणे निग्गंथे इत्यादि, अथास्य सूत्रस्य कः सम्बन्ध? उच्यते—

**उस्सग्गस्सऽववादो, होंति विवक्खो उ तेणिमं सुत्तं।**
**नियमेण विगिट्ठो पुण, तस्साऽऽसी पुव्वपरियातो ॥ १५२४ ॥**

इहोत्**सर्गस्य विपक्षः** प्रतिपक्षो भवत्**यपवादः**, **तेन** कारणेन "तिवरिसपरियाए समणे



For Private and Personal Use Only

निग्गंथे "[सू.३] इत्यादिरूपस्योत्सर्गस्येदमपवादभूतं **सूत्र**मुच्यते। अनेन सम्बन्धेनायातस्यास्य व्याख्या-

निरुद्धः विनाशितः पर्यायः व्रतपर्यायो यस्य स **निरुद्धपर्यायः श्रमणो निर्ग्रन्थः कल्पते** युज्यते **तद्दिवसं** यस्मिन् दिवसे प्रव्रज्यां प्रतिपन्नवान् तस्मिन्नेव दिवसे पूर्वपर्यायः पुनस्तस्य प्रभूततर आसीत्। तथा चाह-**नियमेण**त्यादि, **नियमेन पुनस्तस्य पूर्वपर्यायो विकृष्टो** विंशतिवर्षाण्यासीत्। ततस्तद्दिवसं कल्पते **आचार्योपाध्यायतया उद्देष्टुम्**॥ १५२४॥ अत्र शिष्यः प्राह- **से** किमाहु **भंते!** से शब्दोऽथशब्दार्थः। अथ किं कस्मात्कारणाद् भदन्त! परमकल्याणयोगिन् भगवन्त एवमाहुः, यथा- तद्दिवसमेव कल्पते आचार्यः उपाध्यायो वा उद्देष्टुम्। न खलु प्रव्रजितमात्रस्याचार्यत्वादीन्यारोप्यमाणानि युक्तानि,अगीतार्थत्वात्। अत्र सूरिराह— **अत्थि ण**मित्यादि। अस्तीति निपातः निपातत्वाच्च बहुवचनेऽप्यविरुद्धः, ततोऽयमर्थः, सन्ति विद्यन्ते णमिति वाक्यालङ्कारे, **स्थविराणा**माचार्याणां **तथारूपाणि** आचार्यादिप्रायोग्यानि **कुलानि** तेन **कृतानि** गच्छप्रायोग्यतया निवर्तितानीत्यर्थः, येन यथाकालं तेभ्य आचार्यादिप्रायोग्यं भक्तमुपधिश्चोपजायते। उपलक्षणमेतत्। तेन न केवलं तथारूपाणि कुलानि कृतानि, किन्त्वाचार्य-

बाल-वृद्ध-ग्लानादयोऽपि अनेकधा संग्रहोपग्रहविषयीकृता इति द्रष्टव्यम्। न केवलं कुलानि तथारूपमात्राणि कृतानि किन्तु **पत्तियाणि**[1]त्ति प्रीतिकराणि वैनयिकानि कृतानि। [2]**स्थेयाणि**त्ति **थेज्जानि** प्रीतिकरतया गच्छचिन्तायां प्रमाणभूतानि। अथवा स्थेयानीति किमुक्तं भवति? नैकं द्वौ वा वारौ प्रीतिकराणि कृतानि, किन्त्वनेकश इति। **वेसासियाणि**त्ति आत्मनो अन्येषां च गच्छवासिनां मायारहितीकृततया विश्वासस्थानानि कृतानि, विश्वासे भवानि योग्यानि विश्वासिकानीति व्युत्पत्तेः। अत एव **सम्मतानि** तेषु तेषु प्रयोजनेष्विष्टानि। **सम्मुदिकराणि** नाम अविषमत्वेन प्रयोजनकारीणि। सोऽपि च बहुशो विग्रहेषु समुत्पन्नेषु गणस्य सम्मुदिमकार्षीत्, सम्मुदिककृततया इष्टेष्वनिष्टेषु च प्रयोजनेषु जातेषु आनुकूल्येन मतान्य**नुमतानि**। तथा बहूनां खग्गूडवर्जानां सर्वेषामित्यर्थः मतानि **बहुमतानि भवन्ति,** तिष्ठन्ति शत्रन्तस्य स्यादिदं रूपम्, ततो यद्यस्मात् **तेषु** कुलेषु तथारूपेषु **कृतेषु** कुलेषु **प्रीतिकरेषु**। एवं **तेषु स्थेयेषु, तेषु वैश्वासिकेषु, तेषु सम्मतेषु, तेषु सम्मुदिकरेष्वि**त्यपि भावनीयम्। स **श्रमणो निर्ग्रन्थो निरुद्धपर्यायो**ऽभवत् तेन कारणेन स **कल्पते आचार्यतया उपाध्यायतया वा उद्देष्टुं तद्दिवस**मिति। एष सूत्रसङ्क्षेपार्थः

१. पीतियाणि - खं. ॥ २. स्थेकानि - खं. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ व्यासार्थं तु भाष्यकृद्विवक्षुः प्रथमतः 'से किमाहु भंते' इत्यादि एतत् पदं व्याख्यानयति—

**चोएइ तिवासादि, पुव्वं वन्नेउ दीहपरियागं।**
**तद्दिवसमेव इण्हिं, आयरियादीणि किं देह ?॥ १५२५ ॥**

**चोदयति** प्रश्नयति परः यथा- **पूर्वं त्रिवर्षादिकं दीर्घं पर्यायं वर्णयित्वा किमिदानीं तद्दिवसमेव आचार्यादीनि** भावप्रधानोऽयं निर्देश आचार्यत्वादीनि **दत्थ?** ॥ १५२५॥

अत्र सूरिराह—

**भण्णति तेहि कयाइं, वेणइयाणं तु उवहि-भत्ताइ।**
**गुरु-बाला-ऽसहुमादी[1], अणेगकारेहुवग्गहिया ॥ १५२६ ॥**

**भण्यते** अत्रोत्तरं दीयते। **तैराचार्यादिपदयोग्यैर्वैनयिकानां** विनयमर्हन्तीति वैनयिका आचार्यादयस्तेषां **कृतानि** उत्पादितानि **उपधि-भक्तानि**। किमुक्तं भवति ?-तथारूपाणि स्थविराणां तैर्वैनयिकानि कुलानि कृतानि, येन तेभ्यो यथाकालमुपधिर्भक्तं चोपजायते। इति

१. 'मादीय णेगकारेह' जेभा. खंभा.। 'मादीय णेगपगारेहु' वाभा. ॥



For Private and Personal Use Only

एतेन "अत्थि णं थेराणं तथारूवाणि कुलाणि कडाणि" ति व्याख्यातम्। न केवलं तैस्तथारूपाणि कुलानि कृतानि, किन्तु **गुरु-बाला-ऽसहादयः**, आदिशब्दाद् वृद्धग्लानादि-परिग्रहः, **अनेकप्रकारैरुपगृहीताः** सङ्ग्रहोपग्रहाभ्यामुपष्टम्भे नीताः ॥ १५२६ ॥

'पत्तियाणी'ति सुप्रतीतत्वान्न व्याख्यातम्, 'थेज्जाणी'त्यत्र द्वितीयं व्याख्यानमाह—

**ताइं पीतिकराइं असइं अदुवत्ति होंति थेज्जाइं।**
**वेसिय अणवेक्खाए, जिम्हजढाइं ति विस्संभो ॥ १५२७ ॥**

**अथवे**ति प्रतीतप्रथमव्याख्यानापेक्षया व्याख्यानान्तरोपदर्शने **स्थेयानीति तानि** कुलानि नैकं द्वौ वा वारौ **प्रीतिकराणि** कृतानि किन्त्व**सकृदि**ति। तथा **वैश्वासिका**नीति कोऽर्थः? **अनपेक्षया** स्व-परविशेषाकरणेन प्रभूततराणां संविभागेनेत्यर्थः, **व्येष्याणि** विशेषतः एषणीयाभिलषनीयानि कृतानि, यतस्तानि जिह्मजढानि जिह्म माया तया रहितानि कृतानीति तेषु विस्रम्भः विश्वासः विस्रम्भस्थानत्वाच्च व्येष्याणीति ॥ १५२७ ॥

'सम्मुइकराणी'ति व्याख्यानार्थमाह—

**सव्वत्थ अविसमत्तेण, कारगो होइ सम्मुदी नियमा ।**
**बहुसो य विग्गहेसुं अकासि गणसम्मुदिं सो उ ॥ १५२८ ॥**

**सर्वत्र** सर्वेषु प्रयोजनेषु यो **नियमाद् अविषमत्वेन** अकुटिलतया **कारको भवति** सः **सम्मुदित्ति** पदैकदेशे पदसमुदायोपचारात् सम्मुदिकरः। तान्यपि कुलानि तेन तथारूपाणि कृतानि, न केवलं तेन कुलानि सम्मुदिकराणि कृतानि, किन्तु **सो**ऽपि **तु**शब्दोऽपिशब्दार्थः, **बहुशः** बहुभिः प्रकारै**र्विग्रहेषु** समुत्पन्नेषु तदुपशमनतः **गणस्य** गच्छस्य **सम्मुदिमकार्षीत्**। शेषाणि तु पदानि सुप्रतीतत्वान्न व्याख्यातानि ॥ १५२८ ॥

**थिर परिचियपुव्वसुतो, सरीरथामावहारविजढो उ।**
**पुव्विं विणीयकरणो, करेइ सुत्तं सफलमेयं ॥ १५२९ ॥**

**स्थिरो** नाम- अचपलः, परिचितं पूर्वस्मिन्-पूर्व पर्याये श्रुतं यस्य स **परिचितपूर्वश्रुतः**, यदि वा प्रत्यागतस्यापि स्वाभिधानमिव परिचितं पूर्वं-पूर्वपठितं यस्य स तथा ततः पूर्वपदेन विशेषणसमासः।

तथा शरीरस्य स्थाम प्राणस्तस्यापहारः- अपलपनं तेन **विजढः**-रहितः **शरीरस्थामापहाररहितः**। किमुक्तं भवति ?-पूर्वं न तेन तथा शारीरं बलं वैयावृत्त्य-वाचनादिषु परिहापितमिति। तथा **पूर्वं** पूर्वपर्याये विनीतानि-विशेषतः संयमयोगेषु नीतानि करणानि मनोवाक्कायलक्षणानि येन स **विनीतकरणः** संयमयोगादिकं सर्वं तेन पूर्वमपरिहीनं कृतमिति भावः। य ईदृशः पूर्वमासीत् स **एतत्सूत्रं सफलं करोति**। ईदृशस्य तद्दिवसमाचार्यत्वमुपाध्यायत्वं वा उद्दिश्यते, न शेषस्य, ततो न कश्चित्पूर्वाऽपरविरोध इति भावः ॥ १५२९॥

**किह पुण तस्स निरुद्धो, परियातो होज्ज तद्दिवसितो उ ?।**
**पच्छाकडसावेक्खो, सण्णाईहिं बलानीतो ॥ १५३० ॥**

**कथं** केन प्रकारेण **तस्य** पूर्वः **पर्यायो निरुद्धः** कथं वा **तद्दैवसिक**स्तद्दिवसभावी **पर्यायोऽभवत् ?**। अत्रोत्तरमाह- **पच्छकडे**त्यादि, **स्वज्ञातिभिः** स्वकीयैः स्वजनैः **सापेक्षः** गच्छसापेक्षः सन् **बलान्नीतः पश्चात्कृतः** सोऽभूत्,अतः सर्वं सर्वपृष्टमभूत् ॥ १५३०॥

एतदेव प्रपञ्चयन्नाह—

**पव्वज्जअप्पपंचम, कुमारगुरुमादि उवहि ते णयणं।**
**निज्जंतस्स निकायण, पव्वइते त तद्दिवसपुच्छा ॥ १५३१ ॥**

राजा कोप्यमात्यपुरोहितसेनापतिश्रेष्ठिसहितो राज्यमनुशास्ति। एतेषामेकैकः पुत्रस्तत्र राजपुत्रो राज्ञा राजा भविष्यतीति संभावितः, अमात्यपुत्रो अमात्येनामात्यत्वे, पुरोहितपुत्रः पुरोहितेन पुरोहितत्वे, सेनापतिपुत्रः सेनापतिना सेनापतित्वे, श्रेष्ठिपुत्रोऽपि श्रेष्ठिना श्रेष्ठित्वे। ते पञ्चापि सह क्रीडन्ति। अन्यदा कुमारो राजपुत्र आत्मपञ्चमो अमात्यपुरोहितसेनापतिश्रेष्ठिपुत्रैः सहेत्यर्थः प्रव्रज्यामग्रहीत्। सर्वे च ते अतीव बहुश्रुता जाताः, ग्रहणशिक्षां आसेवनाशिक्षां चातिशिक्षितवन्तः। कुलानि च प्रीतिकरादिरूपाणि कृतानि। आचार्येण च ते गुर्वादयः सम्भावितास्तद्यथा-राजपुत्र आचार्यपदे, अमात्यपुत्र उपाध्यायत्वे, पुरोहितपुत्रः प्रवर्तित्वे, सेनापतिपुत्रः स्थविरत्वे, श्रेष्ठिपुत्रो गणावच्छेदित्वे सम्भावितः। राजादीनां चान्ये पुत्रा न विद्यन्ते, ततस्ते सूरिसमीपमागत्य विज्ञपयन्ति, यथा— नयाम एतान् स्वस्थानम्, पश्चादेतैरेव सह समागत्य वयं प्रव्रजिष्यामः। एवमुपधिना मातृस्थानेन विज्ञप्य ते तेषां **नयनम**पहरणं कुर्वन्ति। तस्य च राजकुमारस्याऽऽ**त्मपञ्चमस्य नीयमानस्या**ऽऽचार्यो **निकाचनं** करोति,

यथा- सम्यक्त्वे नियमतोऽप्रमत्तेन भवितव्यम्। अत्र शिष्यस्य **पृच्छा-** भूयः **प्रव्रजिते** सति राजकुमारादौ किमिति **तद्दिवसं** यस्मिन् दिवसे प्रव्रज्यां प्रतिपन्नाः तस्मिन्नेव दिने आचार्यादि-पदस्थापनम्? अत्रोत्तरं वक्तव्यमिति गाथार्थः ॥१५३१॥

इह उपधिना तेषां नयनमुक्तम्। सम्प्रति प्रकारान्तरेणापहरणमाह—

**पियरो व तावसादी, पव्वइउमणा उ ते फुराविंति।**
**ठविता रायादीसुं, ठाणेसुं ते जहाकमसो ॥ १५३२ ॥**

**पितरो वा** तेषां **तापसादयः** तापसादिरूपतया **प्रव्रजितुमनसः तान्** राजपुत्रादीन् **फुराविंति**त्ति देशीपदमेतत्, अपहारयन्ति। इत्थं च नीताः सन्तस्ते स्वपितृभि**र्यथाक्रमं राजादिषु स्थानेषु स्थापिताः** ॥१५३२॥

**नीया वि फासुभोजी, पोसहसालाए पोरुसीकरणं।**
**धुवलोयं च करेंती, लक्खणपाढे य पुच्छंती ॥ १५३३ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जा तत्थऽमूढलक्खा रिउकाले तीए एक्कमेक्कं तु।**
**उप्पाएऊण सुयं, ठाविय य ताहे पुणो एंति ॥ १५३४ ॥**

**नीता अपि** ते राजकुमारादयः **प्रासुकभोजिनः। पौषधशालायां** प्रतिदिवसं **पौरुष्याः**-सूत्रपौरुष्या अर्थपौरुष्याश्च **करणम्, ध्रुवमवश्यं लोचं च ते कुर्वन्ति,** ब्रह्मचर्यं च परिपालयन्ति। नवरम्- **लक्षणपाठकान्** ते **पृच्छन्ति,** यथा कस्या महेलाया ऋतुकाले गर्भो लगति इति? एवं पृष्ट्वा यासां महेलानां लक्षणपाठका भणन्ति यथा-एतासामृतुकाले नियमाद् गर्भो लगिष्यतीति। ततो **या ऋतुकाले अमूढलक्षा** ऋतुकालस्य स्वस्य ज्ञात्री **तस्यामात्मीयायामैकैकं** वारं गत्वा बीजं निक्षिपन्ति। एवं च आत्मीयमात्मीयं **पुत्रमुत्पाद्य** यदा यो राज्यादिसमर्थो जायते तदा तं स्वस्थाने **स्थापयित्वा पुनरागच्छन्तीति** ॥ १५५३३-३४॥

**अब्भुज्जयमेगयरं, पडिवज्जिउकाम थेरऽसति अन्ने।**
**तद्दिवसमागते ते ठाणेसु ठवंति तेसेव ॥ १५३५ ॥**

यस्मिन् दिवसे ते प्रत्यागतास्तस्मिन्नेव दिवसे स्थविराः आचार्याः **अभ्युद्यतमेकतरं** विहारं जिनकल्पिकविहारं परिहारविशुद्धिविहारं यथालन्दकल्पविहारं वा **प्रतिपत्तुकामाः**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थविरत्वात्, अन्यश्च गणधारणे समर्थस्तादृशो न विद्यते, ततस्तद्दिवसमागतान् तान् राजकुमारादीन् **तेष्वेव** आचार्यत्वादिषु **स्थानेषु स्थापयन्ति**।॥ १५३५॥

"पव्वइते तद्दिवसपुच्छा" [गा.१५३१] इति यदुक्तं तत्र तामेव पृच्छां भावयति—

**कह दिज्जइ तस्स गणो, तद्दिवसं चेव पव्वइयस्स।**
**भण्णइ तम्मी ठविए, होंती सुबहू गुणा उ इमे ॥ १५३६ ॥**

**कथं तस्य** राजकुमारस्य **प्रव्रजितस्य तद्दिवसमेव** यस्मिन् दिने प्रव्रज्या प्रतिपन्ना तस्मिन्नेव दिने **गणो दीयते?**। अत्र सूरिराह-**भण्यते** अत्रोत्तरं दीयते— **तस्मिन् स्थापिते सुष्ठु**- अतिशयेन **बहवो गुणाः** इमे वक्ष्यमाणा **भवन्ति**।। १५३६॥

तानेवाह—

**साहू विसीयमाणो, अज्जा गेलण्ण भिक्ख उवगरणे।**
**ववहारइत्थियाए, वाए य अकिंचणकरे य ॥ १५३७ ॥**



For Private and Personal Use Only

**एते गुणा हवंती, तज्जायाणं कुटुंबपरिवुड्ढी।**
**ओहाणं पि य तेसिं, अणुलोमुवसग्गतुल्लं तु ॥ १५३८ ॥**

**साधुर्विषीदन्** तान् तथाभूतान् दृष्ट्वा स्थिरो भवति। **आर्यिका** अपि तेषु यथाभूतेषु स्थापितेषु स्वचेतसि स्थिरा उपजायन्ते, **गेलण्ण**त्ति ग्लानत्वे साधूनामौषधं सुलभं भवति। वैद्योऽपि तेषां प्रभावतोऽनुकूलां क्रियां करोति, यथा एते राजादिपुत्राः, तेषां चामी शिष्या इति। तथा **भिक्षा उपकरणम**पि साधूनामतिसुलभम्, **ववहारो इत्थियाए** इति स्त्रिया अपहृतायास्तेषां भयतो व्यवहारो लभ्यते। इयमत्र भावना- काचित् रूपवती कुमारश्रमणी केनापि राज्ञा गृहीता स्यात्, ततस्तेषां गतानां भयेन सा मुच्यते इति। **वादे च** तद्गौरवात्साधवोऽपरिभूता भवन्ति। **अकिंचणकरे य**त्ति योऽपि कश्चित् साधूनां प्रत्यनीकः सोऽपि तेषां राजादिकुमारप्रव्रजितानां भयतो न किञ्चित् करोति। अथवा अकिञ्चनानां साधूनां यदि कथमपि केनाप्यर्थजातेन प्रयोजनमुपजायते तर्हि तत् सर्वं लोकः प्रायोऽप्रार्थित एव करोति ॥१५३७॥ तदेव**मेते** अनन्तरोदिता **गुणाः तज्जातानां** राजादिजातानां यतोऽतस्ते निरुद्धपर्यायाः प्रत्यागताः प्रव्राजिताः तद्दिवस एवाचार्यादिपदेषु स्थाप्यन्ते। अयं च गुणः **कुटुम्बपरिवृद्धि**र्गच्छ-

परिवृद्धिस्तथाहि- यदि नामैते तथाभूतं राज्यादिकमपहाय धर्मं समाचरन्ति, किं वयमपि तुच्छेषु भोगेषु सज्जामः इति निष्क्रामन्ति, ततो भवति गच्छस्य महती वृद्धिः। यदपि **तेषामवधावनम्** उत्प्रव्राजनं तद**प्यनुलोमोपसर्गतुल्यम्**। किमुक्तं भवति? यथा कस्यापि साधोः कश्चिदनुलोमान् उपसर्गान् प्रकृतवान् स चैवं चिन्तयति- यदि परमनेनोपायेनाहं मुच्ये, नान्यथा, तत एवं विचिन्त्याशठभावः स परिषेवते, स च तथाकृतपरिषेवनोऽप्यशठभाव इत्यखण्डचारित्र इति व्यवह्रियते। एवमन्येऽप्यखण्डचारित्रा एव तत्त्वतो मन्तव्याः।।१५३८॥

एतदेव लेशतो व्याख्यानयन्नाह—

**साहूणं अज्जाण य , विसीयमाणाण होंति थिरकरणं।**
**जइ एरिसा वि धम्मं, करेंति अम्हं किमंग पुणो? ॥ १५३९ ॥**



**साधूनामार्यिकाणां च विषीदतां स्थिरकरणं भवति**। तथाहि— केचित्साधवो भोगेषु विषीदन्तस्तान् दृष्ट्वा एवं चिन्तयन्ति- **यदि** ते ताव**दीदृशा अपि** विपुलराजादिका अमी देवकुमारिकाप्रख्याभिरपि निजमहेलाभिरुपसर्ग्यमाणा **धर्मं कुर्वन्ति,** न पुनर्निजं ब्रह्मचर्यं परिभ्रंशितवन्तः, अत एवैते तद्दिवस एवाऽऽचार्यादिपदेषु स्थापिताः, **किमङ्ग पुनरस्माभिः**

सुतरां धर्मः समाचरणीयः विभवादिपरिभ्रष्टत्वादिति। आर्यिका अपि चिन्तयन्ति- यदि तावदीदृशाः खल्वस्माकं बान्धवाः सम्पन्नाः, कथममन्दपुण्या एतेषां मुखमपि निरीक्षन्ते? [इति] न सीदन्ति। खल्वेतादृशधीरपुरुषपरिगृहीता आर्यिकाः, केवलमपरिभूताः सदा वर्तन्ते ॥१५३९॥

**किं च भयं गोरव्वं, लोया बहुमाणं च कुव्वंति।**
**गेलण्णोसहमाई, सुलभं उवकरणभत्तादी ॥ १५४० ॥**

किंच तत्र तेषु राजकुमारादिष्वाचार्यादिपदेषु स्थापितेषु **लोका भयं गौरवं बहुमानं च कुर्वते।** ग्लानत्वे च भवत्यौषधादिकं **सुलभम्, उपकरणं भक्तादि** च ॥१५४०॥

**संजतिमादीगहणे, वंवहारे[1] होइ दुप्पधंसो उ।**
**तग्गोरव्वा वादे हवंति अपराजिया एव ॥ १५४१ ॥**

**संयत्यादीनामादिशद्वात्** तथाविधक्षुल्लकादिपरिग्रहः, **ग्रहणे** अपहारे **भवत्यसौ** राजकुमारादिदुष्प्रधृष्यः तथा **तद्गौरवात् वादे भवन्ति** साधवो**ऽपराजिता एव** ॥१५४१॥

१. ववहारो- पु. प्रे. ॥

**पडिणीय अकिंचकरा, होति अवत्तव्व अट्ठजाए य।**
**तज्जायदिक्खिएणं, होइ विवड्ढी वि य गणस्स ॥ १५४२ ॥**

**प्रत्यनीकाः अकिञ्चित्करा भवन्ति। अर्थजाते च** समुत्पन्ने कश्चिदपि **वक्तव्यो न** भवति। किन्तु सर्वोऽप्यप्रार्थित एव यथौचित्यं करोति, तथा तेन **तज्जातेन** राजादिजातेन तद्दिवस एवाचार्यादिपदस्थापितेन **गणस्य गच्छस्य विवृद्धिर्भवति**। शेषं सुप्रतीतत्वान्न व्याख्यातम् ॥ १५४२॥

**सूत्रम्— निरुद्धवासपरियाए समणे निग्गंथे कप्पइ आयरियउवज्झायत्ताए उद्दिसित्तए समुच्छेयकप्पंसि। तस्स णं आयारपकप्पस्स देसे अवट्ठिए,[१] से य अहिज्जिस्सामित्ति अहिज्जेज्जा, एवं से कप्पइ आयरिय-उवज्झायत्ताए उद्दिसित्तए से य अहिज्जिस्सामित्ति नो अहिज्जेज्जा, एवं से नो कप्पइ आयरियउवज्झायत्ताए उद्दिसित्तए तद्दिवसं ॥ १० ॥**

---

१. अहिज्जिए देसे नो अहिज्जिए - इति प्रतिलिपिपाठः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'निरुद्धवासपरियाए समणे निग्गंथे' इत्यादि। अस्य सम्बन्धमाह—

**अपवदितं तु निरुद्धे, आयरियत्तं तु पुव्वपरियाए।**
**इमं तो पुण अववादो, असमत्तसुयस्स तरुणस्स ॥ १५४३ ॥**

निरुद्धे विनाशिते पूर्वपर्याये सत्याचार्यत्वमपवदितं प्रव्रज्यादिवस एवाचार्यत्वमनुज्ञातमनन्तरसूत्रे। अयमनेन सूत्रेणाभिधास्यमानः **पुनरपवादोऽसमाप्तश्रुतस्य तरुणस्य**, किमुक्तं भवति? अल्पवर्षपर्यायस्याप्यसमाप्तश्रुतस्यापि चापवादतो गणधरत्वमनुज्ञायते। ततोऽनेनाप्यपवादाभिधानतो भवति पूर्वसूत्रेणास्य सम्बन्धः॥ १५४३ ॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या–

निरुद्धो विनाशितो वर्षपर्यायो यस्य स **निरुद्धवर्षपर्यायः**। एतदुक्तं भवति– त्रिषु वर्षेष्वपरिपूर्णेषु यस्य निरुद्धः पूर्वपर्यायः, यदि वा पूर्णेषु त्रिषु वर्षेषु [अ]समाप्तश्रुतस्य निरुद्धवर्षपर्याय इति **श्रमणो निर्ग्रन्थः कल्पते आचार्योपाध्यायतया** आचार्यतया उपाध्यायतया वा **उद्देष्टुम्**। क्व? इत्याह– **समुच्छेदकल्पे** आचार्ये कालगते, अन्यस्मिंश्च



For Private and Personal Use Only

बहुश्रुते लक्षणसम्पूर्णे असति। तस्य च आचार्यतया उपाध्यायतया वोद्देष्टुं[१]मभिप्रेतस्य **आचारप्रकल्पस्य निशीथाध्ययनस्य देशोऽधीतो** भवति। सूत्रमधीतमर्थोऽद्यापि नाधीतः, यदि वाऽर्थो न परिपूर्णोऽद्याप्यधीत इत्यर्थः। **से य** इत्यादि, स च देशमधीतवान् 'पाश्चात्त्यं स्थितं देश**मध्येष्ये**'इति चिन्तयन् **अधीयते** तत **एवं** सति **कल्पते आचार्योपाध्यायतया उद्देष्टुं**, यदि पुनः **सोऽध्येष्ये** इति चिन्तयन्नपि **नाधीयत** इति संभाव्यते। तत **एवं** सति स **न कल्पते आचार्योपाध्यायतया उद्देष्टुम्**। एष सूत्रसङ्क्षेपार्थः॥ तत्र 'अल्पवर्षपर्यायस्याऽसमाप्तश्रुतस्य चापवादतो गणधरपदानुज्ञार्थमिदं सूत्रम्' इत्युक्तमतोऽल्पवर्षपर्यायत्वमसमाप्तश्रुतत्वं च **भाष्यकृद्** भावयति—

**तिण्णी जस्स अपुण्णा, वासा पुण्णेहि वा तिहि उ तं तु।**
**वासेहि निरुद्धेहिं, लक्खणजुत्तं पसंसंति ॥ १५४४ ॥**



**यस्य त्रीणि वर्षाणि** व्रतपर्यायतयाऽद्याप्य**परिपूर्णानि** एतस्यामवस्थायां, यदि **वा त्रिषु**

---
१. ॰ष्टुमपि तस्य-खं. वा. पु. मु. ॥

वर्षेषु परि**पूर्णेषु** तस्य **तद् निरुद्धवर्षपर्या**यत्वमभवत्; स त्रिषु पूर्णेषु वा अपूर्णेषु वा **वर्षेषु निरुद्धेषु** आचार्ये कालगते अन्यो बहुश्रुतोऽपि लक्षणसम्पूर्णो न विद्यते। स चासमाप्तश्रुतोऽपि **लक्षणयुक्तो** ग्रहणधारणसमर्थश्चेति स्थाप्यते, बहुश्रुतोऽप्यन्यो न स्थाप्यते। किन्तु सोऽसमाप्त-श्रुतोऽपि लक्षणयुक्तः इति, अत्र किं कारणम्? अत आह **लक्खणे**त्यादि, लोके वेदे समये च विशारदा नायकत्वपदाध्यारोपे **प्रशंसन्ति लक्षणयुक्तं,** नेतरं बहुश्रुतमपि, ततः स एव स्थाप्यते॥ १५४४॥

अत्र पर आह—

**किं अम्ह लक्खणेहिं, तव-संजमसुट्ठियाण समणाणं?।**
**गच्छविवड्ढिनिमित्तं, इच्छिज्जइ सो जहा कुमरो ॥ १५४५ ॥**

**किमस्माकं श्रमणानां तपः-संयमसुस्थितानां लक्षणैः?** केवलं लक्षणहीनोऽपि बहुश्रुतः स्थाप्यतां येनास्माकं स्वाध्यायवृद्धिर्भवति। आचार्य आह-**सो**ऽल्पश्रुतोऽपि लक्षणयुक्ततया गणधरपदस्थापनाया**मिष्यते गच्छविवृद्धिनिमित्तं, यथा** राज्यवृद्धिनिमित्तं राज्ये **कुमारः** ॥ १५४५॥

एतदेव भावयति—

**बहुपुत्तो नरवई सामुद्दं भणति कं ठवेमि निवं? ।**
**दोसगुण एगऽणेगे, सोविय तेसिं परिकहेइ ॥ १५४६ ॥**

कोऽपि **बहुपुत्रको नरपतिः सामुद्रं** सामुद्रिकलक्षणवेत्तारं **भणति**, यथा- **कमहं** कुमारं **नृपं स्थापयामि**? एवमुक्तः सन् **सोऽपि तेषां** कुमाराणां यस्य **दोषो गुणो** वा **एकोऽनेके** वा विद्यन्ते तस्य तत्सर्वं **परिकथयति**॥ १५४६ ॥

तत्र दोषा इमे —

**निद्धूमगं च डमरं, मारीदुब्भिक्खचोरपउराइं।**
**धण-धन्न-कोसहाणी, बलवति पच्चंतरायाणो ॥ १५४७ ॥**

**निर्धूमकं** नाम अपलक्षणं यत्प्रभावतो राज्यमनुशासति रन्धनीयमेव न भवति। **डमरं** यद्वशाद्राज्यं डमरबहुलं भवति, प्रभूतस्वदेशोत्थविप्लवोपेतमुपजायते इत्यर्थः। **मारिः**

यद्वशान्मारिदोषोपहतं, **दुर्भिक्षप्रचुरं** यद्वशाद् सर्वत्र दुर्भिक्षमुपपतति। **चोरप्रचुरं** यद्वशाद्बहवश्चौरा उच्छलन्ति। **धनहानिः** यतः सर्वत्र धनक्षयः सम्भवति, **धान्यहानिः** यत्प्रभावाद् वृष्टेपि मेघे सस्यनिष्पत्तिस्तादृशी नोपजायते। **कोशहानिः** यतः कोशक्षयः। **बलवत् प्रत्यन्तराजकं** यतो बलवन्तः प्रत्यन्तराजानः सम्भवन्ति। एते कस्याप्येकः, कस्याप्यनेके, कस्यापि सर्वे दोषाः। ॥ १५४७॥ अधुना गुणानाह—

**खेमं सिवं सुभिक्खं, निरुवसग्गं गुणेहिं उववेयं।**
**अभिसिंचंति कुमारं, गच्छे वि तयाणुरूवं तु ॥ १५४८ ॥**

**क्षेमं** नाम सुलक्षणं यद्वशात्सर्वत्र राज्ये नीरोगता, **शिवं** यतः सर्वत्र कल्याणं, **सुभिक्षं** यतः सर्वत्र सुभिक्षसम्भवः, **निरुपसर्गं** यतः सकलेऽपि देशे मारि-डमराद्युपसर्गासम्भवः। एतेऽपि गुणाः कस्याप्येकः कस्याप्यनेके कस्यापि सर्वे। तत्र यथा सर्वथा दोषापेतमधिकृतैश्च **गुणैः** सर्वैरप्युपेतं **कुमारं** राजामात्यादयो राज्येऽ**भिषिञ्चन्ति**। तथा **गच्छेऽपि तदनुरूपं** राजकुमारानुरूपं सर्वथा दोषविनिर्मुक्तमेकान्ततो गुणैरुपेतमाचार्यपदे सिञ्चन्ति ॥१५४८॥

एतदेव स्पष्टयति—

**जह ते रायकुमारा, सलक्खणा जे सुहा जणवयाणं।**
**संतमवि सुयसमिद्धं, न ठवेंति गणे गुणविहूणं ॥ १५४९ ॥**

**यथा ते राजकुमाराः सलक्षणाः** ये स्थापिताः सन्तो **जनपदानां शुभाः** कल्याणकारिणस्त एव स्थाप्यन्ते, न शेषाः, तथा सूरयोऽपि गच्छवृद्धिमपेक्षमाणाः **सन्तमपि श्रुतसमृद्धं गुणविहीनं न गणे स्थापयन्ति** ॥ १५४९ ॥

**लक्खणजुत्तो जइ वि हु, न समिद्धो सुएण तह वि तं ठवए।**
**तस्स पुण होति देसो, असमत्तो पकप्पनामस्स ॥ १५५० ॥**

**लक्षणयुक्तो यद्यपि हुः** निश्चितं **न समृद्धः श्रुतेन तथापि तं स्थापयेत् तस्य पुनर्देशो भवत्यसमाप्तः प्रकल्पनाम्नो** निशीथाध्ययनस्य ॥१५५०॥

कथं पुनर्देशोऽसमाप्तः ? इत्याह—

**देसो सुत्तमधीतं, न तु अत्थो अत्थतो व असमत्ती।**
**सगणे अणरिहगीता-ऽसतीए गिण्हेज्जिमेहिंतो ॥ १५५१ ॥**

प्रकल्पस्य द्विधा शरीरं सूत्रमर्थश्च। तत्र **देशः सूत्रमधीतं न त्वर्थः**। अथवा अर्थोऽपि कियानधिगतः केवल**मर्थतः** समाप्तिर्नाभूत्। ततो ये **स्वगणे** आचार्यलक्षणविहीनतया **गीतार्था** अपि सन्तो**ऽनर्हाः** आचार्यपदायोग्यास्तेभ्यः आचार्यपदोपविष्टः सन् अर्थं **गृह्णीयात्**। अथ स्वगणे गीतार्था न विद्यन्ते तर्हि तेषामसति अभावे **एभ्यो** वक्ष्यमाणेभ्यो गृह्णीयात् ॥१५५१ ॥

तानेवाह—

**संविग्गमसंविग्गे, सारूवियसिद्धपुत्तपच्छन्ने।**
**पंडिक्कंतअब्भुट्ठिए, असती अन्नत्थ तत्थेव ॥ १५५२ ॥**

स्वगणे गीतार्थानामभावे अन्येषां साम्भोगिकानां समसुख-दुःखानां गीतार्थानामन्तिके गत्वाऽधीते। तेषामप्यभावेऽन्यसाम्भोगिकानां गच्छं प्रविश्य पठन्ति, तेषामप्यभावे पार्श्वस्थादीनां **संविग्न**पाक्षिकाणामन्तिके, केवलं तान् संयमयोगेष्वभ्युत्थाप्य, एतावता 'संविग्ने'ति व्याख्यातम्।

अधुना ''**असंविग्गे**'' त्यादि व्याख्यायते- **असंविग्नान् सारूपिकान्** संयतरूपधारिणः **सिद्धपुत्रप्रच्छन्नान्** सिद्धपुत्रान् पश्चात्कृतांश्चाऽऽश्रयेत्। कथंभूतान्? इत्याह-**प्रतिक्रान्ता-भ्युत्थितान्** असंयमव्यापारात् प्रतिक्रान्तान् संयमं प्रत्यभ्युत्थितान् तेषाम**प्यसति** अभावे **अन्यत्र** यत्र ते न ज्ञायन्ते तत्र गत्वा तेषामन्तिके अधीते, अन्यत्र तेषामगमने **तत्रैव** पठेद् यत्र ते स्वव्यापारेण स्थिता वर्तन्ते। इयमत्र भावना-पार्श्वस्थादीनां संविग्नपाक्षिकाणामभावे ये पूर्वं संविग्ना गीतार्था आसीरन् तेषां पश्चात्कृतानां पुनः प्रतिक्रान्ताभ्युत्थितानामन्तिके गृह्णीयात्, तेषामप्यभावे संयमयोगं प्रत्यभ्युत्थितानां सिद्धपुत्राणामन्तिके, तेषामप्यभावेऽन्यत्र तान् संयतरूपकान् कृत्वा तेषामन्तिके, अन्यत्राऽगमने तत्रैव तान् तथारूपान् कृत्वा सागारिकाणामभावे तेषामन्तिकेऽधीते ॥ १५५२॥

एतदेवाह—

**सगणे व परगणे वा, मणुण्ण अण्णेसि वा वि असतीए।**
**संविग्गपक्खिवएसुं, सरूविसिद्धेसु पढमं तु ॥ १५५३ ॥**

**स्वगणे** गणधरपदानर्हगीतार्थानामन्तिके, **परगणे वा मनोज्ञे** साम्भोगिके, तदभावे **अन्येषां**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वा असाम्भोगिकानामन्तिके, तेषामप्यसति अभावे **संविज्ञपाक्षिकेषु** पार्श्वस्थादिषु **प्रथमम**मेव प्रतिक्रान्ताभ्युत्थितेषु, तेषामप्यभावे **सरूपिषु** संयतरूपिषु प्रतिक्रान्ताभ्युत्थितेषु पश्चात्कृतेषु, तेषामप्यभावे प्रथममेव सरूपिषु **सिद्धेषु** सिद्धपुत्रेषु ॥ १५५३ ॥

एतत्प्रतिक्रान्ताभ्युत्थितानधिकृत्योक्तं, तदभावेऽन्यत्र विधिमाह—

**मुंडं व धरेमाणे, सिहं व फेडंत अणिच्छ ससिहे वि।**
**लिंगेणमसागारिए ण वंदणादीणि हावेंति ॥ १५५४ ॥**

ते पश्चात्कृतादयो यदि न प्रतिक्रान्ताभ्युत्थिताः किन्तु लिङ्गतो गृहस्था वर्तन्ते तदा अन्यत्र गत्वा तान् **मुण्डं वा धरमाणान्** धारयतः कारयति, यदि पुनः सशिखाकाः सन्ति, ततः **शिखां स्फेटयति**। अथ शिखास्फेटनं ते **नेच्छन्ति** ततः **सशिखाकानपि** स्थापयित्वा इत्वरं श्रमण**लिङ्गं** तेषां समर्पयति, व्याख्यानवेलायां च चोलपट्टकं मुखपोतिकां च ग्राहयति। तेनापि तेषां तथाभूतानां पार्श्वे पठता यथाप्रतिरूपः श्रुतविनयः प्रयोक्तव्यः। तैः पुनर्वारणीयः। अथ ते अन्यत्र गमनं नेच्छन्ति तर्हि तत्रैवा**ऽसागारिके** सागारिकसम्पातरहिते प्रदेशविशेषे



For Private and Personal Use Only

लिङ्गेन रजोहरणमुखपोतिकादिना श्रमणरूपधारिणः कारयित्वा पठनीयम्। ते च तत्रापि तथा पठन्तो **न वन्दनादीनि हापयन्ति** ॥ १५५४॥

**आहार-उवहि-सेज्जा-एसणमादीसु होइ जइयव्वं।**
**अणुमोयणकारावण, सिक्खत्ति पदम्मि तो सुद्धो ॥ १५५५ ॥**

तेन तेषां समीपे पठता **आहारोपधि-शय्यानामेषणादिषु** एषण-गवेषणादिषु **भवति यतितव्यं,** तथा **अनुमोदने कारापणे** च न च करण-कारापणाऽनुमोदनदोषैः स परिगृह्यते। यतः '**शिक्षा** मयाऽस्य समीपे गृह्यते' इति द्वितीये **पदे** वर्तते **ततः** स **शुद्ध** इति। इयमत्र भावना— यदि स पार्श्वस्थः पश्चात्कृतादिः पाठयन्नात्मनः आहारोपध्यादिकमात्मनैवोत्पादयति ततः सुन्दरम् ॥ १५५५॥

अथात्मना नोत्पादयति तत आह—

**चोयइ से परिवारं, अकरेमाणं भणाति वा सड्ढे।**
**अव्वोच्छित्तिकरस्स हु, सुयभत्तीए कुणह पूयं ॥ १५५६ ॥**

**से** तस्य **परिवारं** विनय**मकुर्वन्तं नोदयति** प्रज्ञापयति। यथा- महदिदं ज्ञानपात्रम्, अतः क्रियतामस्योत्कृष्टाहारसम्पादनेन विनय इति। परिवारस्याऽभावे **श्राद्धान् वा** सिद्धपुत्रपुराणेतररूपान् **भणति** यथा-**अव्यवच्छित्तिकरस्यास्य श्रुतभक्त्या कुरुत पूजा**मिति। एतेनानुमोदन-कारापणे व्याख्याते ॥१५५६॥

सम्प्रति स्वयमुत्पादनमाहारादीनां भावयति —

**दुविहाऽसती एतेसिं, आहारादी करेति से सव्वं।**
**पणहाणीए जयंतो, अत्तट्ठाए वि एमेव ॥ १५५७ ॥**

**द्विविधस्य** प्रतिचारकस्य परिवारस्य सिद्धपुत्रादेश्चेत्यर्थः, **असति** अभावे **तेषां** पार्श्वस्थ-पश्चात्कृतादीना**माहारादिकं** स **सर्व**मात्मना **करोति**। तत्रापि स प्रथमतः शुद्धमुत्पादयति, तदलाभे **पञ्चकपरिहान्या यतमानो**ऽशुद्धमपि, पञ्चकपरिहानियतना नाम स शुद्धाऽलाभे पञ्चकप्रायश्चित्तस्थानप्रतिसेवनात उत्पादयति। तदसम्भवे दशकप्रायश्चित्तस्थानप्रतिसेवनातः, एवं तावत् यावच्चतुर्गुरुकमसम्प्राप्तः तथापि से तस्योत्पादयति। **एवमेवात्मार्थं** पञ्चकपरिहान्या

यतते। किमुक्तं भवति ?- उद्गमादिदोषत्रयशुद्धमलभमानः पञ्चकादियतनया त्रिभिरपि दोषैरशुद्धं गृह्णाति। स तथा कुर्वन्नपि ज्ञाननिमित्तं प्रवृत्तत्वात् कृतयतनाविषयपुरुषकारत्वाद् रागद्वेषविरहितत्वाच्च शुद्ध इति॥ १५५७॥

**सूत्रम्— निग्गंथस्स णं नवडहरतरुणस्स [1]आयरियउवज्झाए विसुंभेज्जा, नो से कप्पइ अणायरियउवज्झाइयाए होत्तए, कप्पइ से पुव्वं आयरियं उद्दिसावेत्ता तओ पच्छा उवज्झायं। से किमाहु भंते ! दुसंगहिए समणे निग्गंथे, तं जहा— आयरिएण उवज्झाएण य ॥ ११ ॥**

'निग्गंथस्स णं नव डहर-तरुणस्स' अथास्य सूत्रस्य कः सम्बन्धः तत आह—

**आयरियाणं सीसो, परियाओ वा वि अहिकितो एस।**
**सीसाण केरिसाण व, ठाविज्जइ सो उ आयरिओ ? ॥ १५५८ ॥**

पूर्वसूत्रे- आचार्यः स्थापनीय उक्तः, **आचार्याणां च शिष्यो** भवतीति तद्व्यक्तव्यतार्थमिदं

१. आहच्च आय° प्रतिलि° ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूत्रम्। अथवा पूर्वसूत्रेषु **पर्यायोऽधिकृतो**ऽस्मिन्नपि च सूत्रे **एष** एव पर्यायः, तथा च नव-डहर-तरुणग्रहणम्। यदि वाऽनन्तरसूत्रे य **आचार्यः** स्थापनीय उक्तः **स कीदृशानां शिष्याणां स्थाप्यते ?** इतीदमनेन सूत्रेणोच्यते ॥१५५८॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या—

**निर्ग्रन्थस्य णमिति** वाक्यालङ्कारे **नव-डहर-तरुणस्य** नवस्य डहरस्य तरुणस्य वा आचार्यसहित उपाध्याय **आचार्योपाध्यायः**, आचार्य उपाध्यायश्चेत्यर्थः, **विष्कम्भीयात्** म्रियेत, ततः **से** तस्य नव-डहर-तरुणस्या**नाचार्योपाध्यायस्य** सतः **भवितुं** वर्तितुं **न कल्पते**; किन्तु **पूर्वमाचार्यम् उद्देशाप्य** स्थापयित्वा **ततः पश्चादुपाध्यायमु**द्देशाप्य साचार्योपाध्यायस्य सतो भवितुं कल्पते। **से किमाहु भंते**? इति से शब्दोऽथशब्दार्थः अथ भदन्त! किं कस्मात्कारणात् भगवन्त एवमाहुः? सूरिराह-द्वाभ्यामाचार्योपाध्यायाभ्यां संगृहीतो **द्विसंगृहीतः श्रमणो निर्ग्रन्थः** सदा भवति। **तद्यथा-आचार्येणोपाध्यायेन** च। एष सूत्रसङ्क्षेपार्थः। व्यासार्थं तु **भाष्यकृद्विवक्षुः** नवादिशब्दानामर्थमाह—

**तिवरिसो होइ नवो, आसोलसगं तु डहरगं बेंति।**
**तरुणो चत्ता सत्तरूणमज्झिमो थेरतो सेसो ॥ १५५९ ॥**



For Private and Personal Use Only

प्रव्रज्यापर्यायेण यस्य त्रीणि वर्षाणि नाधिकमित्येष **त्रिवर्षो भवति नवः**। जन्मपर्यायेण चत्वारि वर्षाणि आरभ्य यावद् **आषोडशकं** वर्षम्, अत्राऽऽङ् मर्यादायां यथा आपाटलिपुत्राद् वृष्टो देवः, किमुक्तं भवति ? पाटलीपुत्रं मर्यादीकृत्य आराद्[1] मेघो वृष्ट इत्यर्थः। ततोऽयमर्थः- यावत् परिपूर्णानि पञ्चदशवर्षाणि षोडशाद्वर्षादर्वाक् **डहरकं ब्रुवते** समयविदः। ततो जन्मपर्यायेण षोडशवर्षाण्यारभ्य **यावच्चत्वारिंशद्वर्षाणि** तावत्**तरुणः**। ततः परं **यावत्सप्ततिरेकेन** वर्षेणोना **तावन्मध्यमः**। ततः परं सप्ततेरारभ्य **स्थविरः शेषः** ॥१५५९॥

**अणवस्सवि डहरग-तरुणगस्स नियमेण संगहं बिंति।**
**एमेव तरुणमज्झे, थेरम्मि य संगहो नवए ॥ १५६० ॥**



यः प्रव्रज्यापर्यायेण त्रिवर्षोत्तीर्णः सोऽनवक उच्यते। **तस्याऽनवकस्यापि** आस्तां नवकस्येत्यपिशब्दार्थः। डहरकः सन् तरुणको **डहरकतरुणकः**, तस्य द्वादशवर्षाण्यारभ्य यावत् पञ्चदशवर्षाणि तावदित्यर्थः; **नियमेन** संग्रहमभिनवस्थापिताऽऽचार्योपाध्यायानां **सङ्ग्रहणं ब्रुवते**, अभिनवस्थापिताचार्योपाध्यायसङ्गृहीतेन तेनाऽवश्यं वर्तितव्यमिति भावः। तथा यः

---

१. आराद् वृष्टो देव इत्यत्र- मो.। आरतो वृष्टो देव इत्यत्र- वा. पु.॥

प्रव्रज्यापर्यायेण त्रीणि वर्षाणि नाद्याप्युत्तीर्णः स नवकः, तस्मिन्नवके **तरुणे मध्यमे स्थविरे चशब्दाद्** डहरे च एवं पूर्वोक्तेनैव प्रकारेण **संग्रहं** ब्रुवते। किमुक्तं भवति ? नवकस्य वा डहरस्य वा तरुणस्य वा मध्यमस्य वा स्थविरस्य वा नवकत्वादेव नियमादभिनवाचार्योपाध्याय**संग्रहो** वेदितव्य इति ॥१५६०॥

**वा खलु मज्झिमथेरे, गीयमगीए य होइ नायव्वं।**
**उद्दिसणा उ अगीए, पुव्वायरिए उ गीयत्थे ॥ १५६१ ॥**

**वाशब्दो** विभाषायाम्। **खलु** निश्चितम् त्रिवर्षपर्यायोत्तीर्णत्वेनाऽनवके **मध्यमे स्थविरे** च प्रत्येकं **गीते अगीते च** विभाषणं नानात्वं **ज्ञातव्यम्** तदेवाह— **उद्दिसणा उ अगीते** अगीतार्थे उद्देशना। इयमत्र भावना- ये मध्यमाः स्थविरा वा त्रिवर्षपर्यायोत्तीर्णा अप्यगीतार्थास्ते नियमाद् यः स्थापितो गणधरस्तस्य शिष्या बध्यन्त इति। **गीतार्थे** पुनः स्थविरे मध्यमे च **पूर्वाचार्ये** पूर्वाचार्यसंग्रहः ये मध्यमाः स्थविरा वा गीतार्थास्ते पूर्वाचार्यदिशं धारयन्तीति ॥१५६१॥

**नव-डहर-तरुणगस्सा, विहीए विसुंभियम्मि आयरिए।**
**पच्छन्ने अभिसेओ, नियमा पुण संगहट्ठाए ॥ १५६२ ॥**

**नवश्च डहरकश्च तरुणश्च** समाहारो द्वन्द्वः। तस्य **पुनः सङ्ग्रहार्थमाचार्ये विष्कम्भिते** मृते **विधिना नियमेनान्यस्य** गणधरस्याऽभिषेकः कर्तव्यः। अविधिना अभिषेककरणे प्रायश्चित्तं चत्वारो गुरुका मासाः। कोऽत्र विधिः? इति चेत्, उच्यते- आचार्यः कालगतो न प्रकाश्यते यावदन्यो गणधरो न स्थापितः। तथा चाह-**पच्छन्ने**त्ति, आचार्ये कालगते **प्रच्छन्ने** प्रदेशे**ऽभिषेकः** करणीयः॥१५६२॥

एतदेवाह—

**आयरिए कालगए, न पगासेज्ज अट्ठविए गणहरम्मि।**
**रण्णे व अणभिसित्ते, रज्जक्खोभो तहा गच्छे ॥ १५६३ ॥**

**अस्थापिते**ऽन्यस्मिन् **गणधरे आचार्यः कालगतो न प्रकाश्यते**। अत्र दृष्टान्तो राजा। तथाहि- यथा राजा कालगतस्तावन्न प्रकाश्यते यावदन्यो नाभिषिच्यते। अन्यथा **अनभिषिक्ते राज्ञि** यथा **राज्यक्षोभो** भवति, दायादैः परस्परविरोधतः सर्वं राज्यं विलुप्यते इत्यर्थः। **तथा गच्छे**ऽप्यन्यस्मिन् अस्थापिते गणधरे यद्याचार्यः कालगतः प्रकाश्यते तदा गच्छक्षोभो भवति ॥१५६३॥

तमेवाऽऽह—

**अणाहोहावण१सच्छंद२, खित्त३ तेणा सपक्खपरक्खे ४।**
**लयकंपणा य ५ तरुणे,६ऽसारण ७ माणाऽवमाणे य ॥ १५६४ ॥**

दारगाहा।

केषाञ्चिद् '**अनाथा** वयं जाताः' **इत्यवधावनं** भवेत्। केषाञ्चित् **सच्छंद**त्ति स्वच्छन्दचारिता। अपरे केचित् **क्षिप्ताः** क्षिप्तचित्ता भवेयुः। तथा **स्तेनाः स्वपक्षे परपक्षे** चोत्तिष्ठन्ति। **लताया** इव साधूनां **कम्पनम्**। तथा **तरुणा**नामाचार्यपिपासयान्यत्र गमनम् तथा**ऽसारणा** संयमयोगेषु सीदतां पुनः संयमाध्वन्यप्रवर्तनम्। तथा **मानापमानं च** ॥१५६४॥

साम्प्रतमेतानेव दोषान् व्याचिख्यासुः प्रथमतोऽनाथा-ऽवधावन-स्वच्छन्दचारिता-क्षिप्तचित्तानि व्याख्यानयति—

**जाया मो अणाहत्ति, अण्णहि गच्छंति केइ ओहावे।**
**सच्छंदा व भमंती, केई खित्ता व होज्जाहि ॥ १५६५ ॥** दारं ३।

बाला वृद्धास्तरुणा वा केचिदगीतार्थाः 'आचार्याणां विप्रयोगे **जाता वयमनाथाः**' इति विचिन्त्य केचिदन्यत्र गच्छान्तरे **गच्छन्ति, केचिदवधावेयुः१**, तथा केचिन्मन्दधर्मश्रद्धाका गणादपक्रम्य **स्वच्छन्दा भ्रमन्ति** २। अपरे **केचिदाचार्यविप्रयोगतः क्षिप्ताः** क्षिप्तचित्ता अपगतचित्ता **भवेयुः** ३ ॥१५६५॥

स्वपक्षपरपक्षस्तेनान् लताकम्पनं चाह—

**पासत्थ-गिहत्थादी, उन्निक्खावेज्ज खुड्डगादी उ।** दारं ४।
**लयवायकंपमाणा उ, केई तरुणा उ अच्छंति ॥ १५६६ ॥**

स्वपक्षे **पार्श्वस्थादयः** परपक्षे **गृहस्थादयः**, अत्राऽऽदिशब्दात् परतीर्थिकग्रहणम्। **क्षुल्लकादीन् उन्निष्क्रामयेयुः**। किमुक्तं भवति?- पार्श्वस्थादयः क्षुल्लकादीन् विपरिणामय्य पार्श्वस्थादीन् कुर्युः, अन्यतीर्थिकाः पुनरन्यतीर्थिकान्, स्वज्ञातयो गृहस्थानिति ४। **लतेव वातेन कम्पमाना** संयमे परिषहैः **केचित् तरुणास्तिष्ठन्ति**। इयमत्र भावना-यथा पद्मलताऽन्यस्मिन्ननवष्टब्धा सती वातेन कम्पमाना तिष्ठति, एवं केचित्तरुणा गच्छेऽपि वर्तमानाः संयमे परीषहैः कम्प्यमानास्तिष्ठन्तीति ५ ॥१५६६॥

तरुणदोषमस्मारणादोषं चाह—

**आयरियपिवासाए, कालगयं सोउं ते वि गच्छेज्जा।**
**गच्छेज्ज धम्मसड्ढा वि, केइ सारेंतगस्सऽसती ॥ १५६७ ॥**

केचित्तरुणा **आचार्यपिपासया** 'नाऽऽचार्यमन्तरेण ज्ञान-दर्शन-चारित्रलाभोऽनुत्तरो भवति, तस्मादवश्यमाचार्यसमीपे वर्तितव्यम्' इत्याचार्यवाञ्छया **कालगतं श्रुत्वा तेऽप्यन्यत्र गच्छेयुः**। तथा **धर्मश्रद्धा अपि केचित्सारयितुरभावे** गच्छान्तरं गच्छेयुः ७॥ १५६७॥

मानापमानदोषमाह—

**माणिया वा गुरूणं तु, थेरादी तत्थ केइ उ नत्थि।**
**माणंतु तओ अन्नो अवमाणभया उ गच्छेज्जा ॥ १५६८ ॥** दारं ७।

**तत्र केचित्स्थविरादय** एवं चिन्तयेयुः यथा- सर्वकालं **मानिता** वयं **गुरुभिः**, अत्र गाथायां षष्ठी तृतीयार्थे प्राकृतत्वात्, **नास्ति** साम्प्रत**मन्यो**ऽस्मान् **मानयन्**; एवं चिन्तयित्वा ते**ऽपमानभयाद् गच्छेयुः** ८॥ १५६८॥

उपसंहारमाह—

**तम्हा न पगासिज्जा, कालगयं एयदोसरक्खट्ठा।**
**अण्णम्मि ववट्ठविए, ताहे पगासेज्ज कालगयं ॥ १५६९ ॥**

यस्मादेते दोषास्तस्मादेतद्दोषरक्षार्थमाचार्यं **कालगतं न प्रकाशयेत्** यदा पुनरन्यो गणधरो व्यवस्थापितो भवति, **तदा अन्यस्मिन् व्यवस्थापिते कालगतं प्रकाशयेत्** ॥१५६९॥

**सूत्रम्— निग्गंथीए णं नवडहरतरुणीए आयरियउवज्झाए[१] वीसुंभेज्जा, नो से कप्पइ अणायरिय-उवज्झाइयाए[२] होत्तए, कप्पइ से पुव्वं आयरियं उद्दिसावेत्ता तओ उवज्झायं तओ पच्छा पवत्तिणिं, से किमाहु भंते? तिसंगहिया समणी निग्गंथी, तं जहा- आयरिएणं उवज्झाएणं पवत्तिणीए य ॥ १२ ॥**

सूत्र १२ गाथा १५६६-१५७० त्रिसंगृहीता श्रमणी

"निग्गंथीए णं नव-डहर-तरुणाए आयरिय उवज्झाए" इत्यादि।

---

१. इतोऽग्रे आगमप्रकशने श्युब्रींगटिप्पणे (वि- श्युब्रींग H प्रतौ) पवत्तिणी य - इति पाठः अधिकः ॥
२. इतोऽग्रे आगमप्र. श्युब्रींग टिप्पणे च अप व (वि- श्यु. H) त्तिणियाए - इति अधिकः पाठः ॥

**निर्ग्रन्थ्याः णं** इति पूर्ववत् **नव-डहर-तरुणायाः** नवाया डहरायास्तरुण्या वा इत्यर्थः। आचार्योपाध्यायः समासोऽत्र पूर्ववत्, **आचार्योपाध्यायः** उपलक्षणमेतत्, प्रवर्त्तिनी च **विष्कम्भीयात्** म्रियेत, ततः **से** तस्या **अनाचार्योपाध्यायायाः**, उपलक्षणमेतत्, प्रवर्तिनी-रहितायाश्च **नो कल्पते भवितुं** वर्तितुं, किन्तु **पूर्वमाचार्यमुद्देशाप्य ततः** पश्चादुपाध्यायं **ततोपि पश्चात्प्रवर्तिनीम्** एवं साचार्योपाध्याय-प्रवर्तिनीकाया भवितुं कल्पते। **से किमाहु** इत्यादि। अथ **भदन्त! किं** कस्मात्कारणात् भगवन्त एवमाहुः? सूरिराह—त्रिभिः सङ्गृहीता **त्रिसङ्गृहीता श्रमणी निर्ग्रन्थी** सदा भवति। **तद्यथा-आचार्येणोपाध्यायेन प्रवर्तिन्या च**। एष सूत्रसङ्क्षेपार्थः। अत्राऽऽक्षेप-परिहारौ वक्तव्यौ॥ तत्रायमाक्षेपः किं कारणं ननु त्रिसंगृहीता निर्ग्रन्थी भवति? तत्राऽऽचार्योपाध्यायसङ्ग्रहे गुणानुपदर्शयति—

**दूरत्थम्मि वि कीरइ, पुरिसे गारवभयं सबहुमाणं।**
**छंदे य अवट्टंती, चोएउ जे सुहं होइ ॥ १५७० ॥**

**दूरस्थेऽपि पुरुषे** स्वपक्षेण परपक्षेण च **क्रियते गौरवं भयं सबहुमानं** चेत्यर्थः। इयमत्र भावना-यद्यपि नाम आचार्य उपाध्यायो वा संयतीनां दूरे वर्तते तथापि दूरस्थस्यापि पुरुषस्य

गौरवेण भयेन वा न कोऽपि संयतीनामपन्यायं करोति, किन्तु स्वपक्षे परपक्षे च तासु बहुमानो जायते। तथा संयती प्रवर्तिन्याः **छंदे अवर्तमाना चोदयितुं** शिक्षयितुं **जे** इति पादपूरणे, **''जे पादपूरणे''** इति वचनात् **सुखं भवति**। किमुक्तं भवति ?- आचार्योपाध्यायभयतो न काचिदपि संयती आचारक्षतिमाचरति, यापि काचिदाचरति सापि प्रवर्तिन्या सावष्टम्भं शिक्ष्यते। अथ शिक्ष्यमाणापि न प्रतिपद्येत ततः प्रवर्तिनी ब्रूते- आचार्यस्योपाध्यायस्य वाऽहं कथयिष्यामि। ततः सा भीता प्रवर्तिन्या उपपाते तिष्ठति। एते आचार्योपाध्यायसङ्ग्रहे गुणाः ॥ १५७० ॥

सम्प्रति प्रवर्तिनीसङ्ग्रहे गुणानाह—

**मिहोकहाझं[1]ट्टरविट्टरेहिं, कंदप्पकीडा-बउसत्तणेहिं।**
**पुव्वाऽवरत्तेसु य निच्चकालं, संगिण्हते णं गणिणी [2]सहीणा ॥१५७१ ॥**

**मिथःकथा** परस्परं भक्तादिविकथाकरणं, **झट्टरविट्टरं** नाम-तेषु तेषु गृहस्थप्रयोजनेषु कुण्टलविण्टलादिषु वा प्रवर्तनम्, एताभ्याम्। **कन्दर्पक्रीडा** कन्दर्पोद्रेकजननी कायवाक्चेष्टा। **बकुशत्वं** शरीरोपकरणविभूषाकरणं एताभ्यां च, तथा **पूर्वरात्रे अपररात्रे च गणिन्याः** प्रवर्तिन्याः

१. सट्टरविट्टरेहिं- मो.। सट्टरवट्टरेहिं- खंभा. जेभा.। वट्टरसट्टरेहिं- वाभा.॥ २. साहीणा- मु.॥

**स्वाधीना** सती **सङ्गृह्यते** रक्ष्यते। तस्मात् प्रवर्तिनीसंग्रहोऽपि साध्व्याः श्रेयान्॥ १५७१॥

एतदेव विभावयिषुर्लोकेपि स्त्रियास्त्रिविधं संग्रहमाह—

**जाया पितिवसा नारी, दिन्ना नारी पतिव्वसा।**
**विहवा पुत्तवसा नारी, नत्थि नारी सयंवसा ॥ १५७२ ॥**

**जाता** सती **नारी पितृवशा** पितुरायत्ता भवति, **दत्ता** परिणीता सती **नारी पतिवशा** भर्तुरायत्ता। **विधवा** मृतपतिका **नारी पुत्रवशा**। एवं च सति **नारी नास्ति** कदाचनापि **स्वयंवशा** ॥ १५७२॥

अमुमेवार्थं प्रकारान्तरेणाऽऽह—

**जायं पि य रक्खंती, माता-पिति-सासु-देवरा दिण्णं।**
**पितिभातिपुत्तविहवं, गुरुगणिगणिणी य अज्जं पि ॥ १५७३ ॥**

**जातामपि** नारीं **रक्षतः मातापितरौ**। **दत्तां** परिणीतां रक्षन्ति मातृ-पितृ-**श्वश्रू-देवर**-भर्त्रादयः। देवरग्रहणं श्वशुर-भर्त्रादिरुपलक्षणम्। **विधवां** पुनः **पिता भ्राता पुत्रो** वा। यदि

जीवन्ति पित्रादयस्तर्हि सर्वेऽपि रक्षन्ति। एव**मार्यिकामपि गुरु**राचार्यो **गणी** उपाध्यायः **गणिनी** प्रवर्तिनी च रक्षन्ति ॥१५७३॥

**एगाणिया अपुरिसा, सकवाडं परघरं तु नो पविसे।**
**सगणे व परगणे वा, पव्वतिया वी तिसंगहिया ॥ १५७४ ॥**

यथा भर्त्राद्यधीना नारी **एकाकिनी अपुरुषा** भर्त्रादिपुरुषरहिता **सकपाटं परगृहं न प्रविशति**। एवं **प्रव्रजितापि त्रिसङ्गृहीता** आचार्योपाध्यायप्रवर्तिनीसङ्गृहीता **स्वगणे परगणे वा** एकाकिनी न गच्छति ॥१५७४॥

**आयरियउवज्झाया, सययं साहुस्स संगहो दुविहो।**
**आयरिय-उवज्झाया, अज्जाण पवत्तिणी तइया ॥ १५७५ ॥**

सङ्गृह्णातीति सङ्ग्रहः, सङ्ग्राहक इत्यर्थः। **साधोः सततं** सर्वकालं **सङ्ग्रहः** संग्राहको **द्विविधः आचार्योपाध्यायौ**। **आर्यिकाणां** त्रिविधः। तद्यथा- **द्वावाचार्योपाध्यायौ तृतीया**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्रवर्तिनी** ॥१५७५॥

अत्रैवापवादमाह—

**बितियपदे सा थेरी, जुण्णा गीया य जइ खलु हविज्जा।**
**आयरियादीतिण्ह वि, असतीए न उद्दिसावेज्जा ॥ १५७६ ॥**

**द्वितीयपदे** अपवादपदे **सा** प्रव्रजिता **स्थविरा** वयसा वृद्धा **जीर्णा** चिरकालप्रव्रजिता, **गीता** उत्सर्गापवादसामाचारीकुशलतया गीतार्था **यदि** खलु **भवेत्** तत **आचार्यादीनाम्** आचार्योपाध्याय-प्रवर्तिनीनां **तिसृणामप्यभावे न** सङ्ग्राहकमाचार्यमुपाध्यायं प्रवर्तिनीं वा **उद्देशापयेत्,** दोषासम्भवात् ॥१५७६॥



**सूत्रं —भिक्खू य गणाओ अवकम्म मेहुणं पडिसेवेज्जा, तिण्णि संवच्छराणि तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा, तिहिं संवच्छरेहिं वीइक्कंतेहिं चउत्थगंसि संवच्छरंसि पट्ठियंसि उट्ठियंसि[१] ठियस्स**

---

**१. उट्ठियंसि आगम प्रकाशने नास्ति। श्युब्रींग-संस्करणे H प्रतौ उवट्ठियंसि पाठः एवमग्रेऽपि ॥**

For Private and Personal Use Only

**उवसन्तस्स उवरयस्स पडिविरयस्स निव्विगारस्स एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥ १३॥**

"भिक्खू य गणाओ अवक्कम" इत्यादि, अथास्य सूत्रस्य कः सम्बन्धः ? तत आह—

**नवतरुणो मेहुण्णं, कोई सेवेज्ज एस संबंधो।**
**अब्बंभरक्खणादिव, संगहो एत्थ वि स एव ॥ १५७७ ॥**
**अपरियाए वि गणो, दिज्जइ वुत्तं ति मा अतिपसंगा।**
**सेवियमपुण्णपज्जय, दाहिंति गणं अतो सुत्तं ॥ १५७८ ॥**

पूर्वसूत्रे नवतरुणादिकः साधुरुक्तः, तत्र **कोऽपि नवतरुणो** मोहोदयवशाद् **मैथुनं सेवेत,** कृतमैथुनसेवाकस्य च यथाचार्यत्वादिकमुद्देष्टव्यं तथानेन सूत्रेण प्रतिपाद्यते **इत्येष सूत्रसम्बन्धः**। अथवा अयं सम्बन्धः- **अब्रह्मरक्षणादेर्हेतोः** अब्रह्मरक्षणादिनिमित्तं **सङ्ग्रह** आचार्यादिकोऽनन्तरसूत्रेऽभिहितः। **अत्रापि सूत्रे स एव** सङ्ग्रहोऽभिधीयते इति ॥ १५७७॥

अथवा पूर्वतरेषु सूत्रेषु **अपर्यायेऽपि गणो दीयते इत्युक्तं,** तद्दिवस एवाचार्यादि-

पदानुज्ञानात् तत एतत् श्रुत्वा मा **अतिप्रसङ्गान्मैथुनं सेवित्वा अपूर्णे पर्याये गणं दास्यन्ति** तत एतन्निवारणार्थमिदं सूत्रम् ॥ १५७८॥ अनेन सम्बन्धेनाऽऽयातस्याऽस्य व्याख्या-

**भिक्षुर्गणात् अपक्रम्य मैथुनं प्रतिसेवेत** ततस्तस्य **त्रीणि संवत्सराणि** यावत्**तत्प्रत्ययं** मैथुनसेवाप्रत्ययं **न कल्पते आचार्यत्वमुपाध्यायत्वं, यावत्**करणात्प्रवर्तित्वं स्थविरत्वमिति परिग्रहः, **गणावच्छेदित्वं वा उद्देष्टुम्,** अनुज्ञातुम्। नापि तस्य कल्पते स्वयं **धारयितुं,** किन्तु **त्रिषु संवत्सरेषु व्यतिक्रान्तेषु चतुर्थे संवत्सरे प्रस्थिते** प्रवर्तितुमारब्धवति तच्च प्रस्थितत्वमभिमुखीभवनमात्रेऽपि भवति तत आह- **उत्थिते** प्रवर्त्तमाने **स्थितस्य** वर्तमानस्य, किं विशिष्टस्य सतः? इत्याह-**उपशान्तस्य** उपशान्तवेदोदयस्य तच्चोपशान्तत्वं प्रवृत्तिनिषेधादवसीयते तत आह— **उपरतस्य** मैथुनप्रवृत्तेः प्रतिनिवृत्तस्य। तच्च प्रतिनिवृत्तत्वं दाक्षिण्य[1]भयादिमात्रतोऽपि भवति तत आह— मैथुनेच्छाप्रातिकूल्येन विरतः **प्रतिविरतः** तस्य। तदपि च प्रतिविरतत्वं विकारादर्शनतो लक्ष्यते तत आह— **निर्विकारस्य** लेशतोऽपि मैथुनाभिलाषहेतुकविकाररहितस्य। एवम्भूतस्य **से** तस्य **कल्पते आचार्यत्वं यावद् गणावच्छेदित्वं वा उद्देष्टुं वा धारयितुं वा** एष सूत्रसंक्षेपार्थः, व्यासार्थं तु भावतो **भाष्यकृदाह—**

---

१. °ण्यवशादिमा° वा. पु. मु.॥

**दुविहो साविक्खियरो, निरवेक्खो उदिण्णे जाअऽणापुच्छा[1] १।**
**जोगं च अकाऊणं २, जो व सदेसादि[2] सेवेज्जा३ ॥ १५७९ ॥**

**द्विविधो** द्विप्रकारः खलु मैथुनसेवकः। तद्यथा- **सापेक्ष इतरश्च**। इतरो निरपेक्षः। तत्र **निरपेक्षो य उदीर्णे** वेदे **याति** अपगच्छत्य**नापृच्छया**१, **यो वा** यतिः **योगं** यतनया योग**मकृत्वा** यदि वा **सदेश्यादिकां[3] सेवेत**३। एष त्रिविधोऽपि निरपेक्षः, गुरुतीर्थकरापेक्षारहितत्वात् ॥१५७९॥

**सावेक्खो उ उदिण्णे, आपुच्छे गुरुं तु सो जति उवेहे।**
**तो उ गुरुगा भवंती, सो य अणापुच्छ जइ गच्छे ॥ १५८० ॥**

यदि(यः) पुनः **उदीर्णे** उदयप्राप्ते मोहे, उदिते वेदे इत्यर्थः, **गुरुमापृच्छ**ति स **सापेक्षः**। सह अपेक्षा गुर्वपेक्षा यस्यास्ति स सापेक्ष इति व्युत्पत्तेः। तत्राऽऽपृच्छायां **यदि स** गुरुः **उपेक्षते** उपेक्षां कुरुते **तत**स्तस्य प्रायश्चित्तं चतु**र्गुरुका** भवन्ति। **स च** साधुर**नापृच्छ्य** गुरुं **यदि** याति तर्हि तस्यापि प्रायश्चित्तं चतुर्गुरुकाः ॥१५८०॥



१. जातऽणा॰ ला. ॥ २. स वेसादि- ला.॥ ३. स वै॰ मु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा च पृच्छा त्रीन् वारान् कर्तव्या तथा चाह—

**अहवा सइ दो वा वी, आयरिए पुच्छ अकडजोगी वा।**
**गुरुगा तिण्णि उ वारे, तम्हा पुच्छेज्ज आयरिए ॥ १५८१ ॥**

**अथवा सकृद्** एकवारं **यद्याचार्यान् पृच्छति** तथापि प्रायश्चित्तं चतुर्गुरुकाः। अथ **द्वौ** वारौ आपृच्छति न तृतीयमपि वारं तदाऽपि चतुर्गुरुकाः। अथवा वारत्रयपृच्छायामपि कृतायां यदि **अकृतयोगी** यतनायोगमकृत्वा गच्छति तदानीमपि **चतुर्गुरुकाः**। यत एवमेकं द्वौ वा वारावपृच्छायां प्रायश्चित्तं **तस्मात् त्रीन् वारान् आचार्यान् पृच्छेत्**, लोकेऽपि तथादर्शनात् ॥१५८१ ॥

तथा चाह—

**बंधे य घाते य पमारणे य, दंडेसु अन्नेसु य दारुणेसु।**
**पमत्तमत्ते पुण चित्तहेउं लोए वि पुच्छंति उ तिण्णि वारे ॥ १५८२ ॥**



For Private and Personal Use Only

राज्ञा **बंधे** आदिष्टे, यदि वा **घाते** प्रहारे, अथवा **प्रमारणे** कुमरणमारणे **अन्येषु च दण्डेषु** हस्त-पादच्छेदादिषु **दारुणेष्वादिष्टेषु लोके त्रीन् वारान्** राजा **पृच्छ्यते**। किमर्थम्? इत्यत आह-**पमत्तमत्ते पुण चित्तहेउं** इति **प्रमत्तेन** व्याक्षिप्तेन यदि वा मद्यपानेन **मत्तेनाऽऽदिष्टं** भवेत्, पश्चादुपशान्तस्य **पुनश्चित्त**मुपजायते, यथा 'मा मार्यताम्' इति, वारत्रयमनापृच्छायां स रुष्येत् 'किमिति स मारितः?' इति। एवं यथा राजा लोकेऽपि त्रीन्वारान् पृच्छ्यते तथाऽऽचार्योऽपि ॥ १५८२ ॥

**आलोइयम्मि गुरुणा, तस्स चिकिच्छा विहीए कायव्वा।**
**निव्वीतिगमादीया, नायव्वा कमेणिमेणं तु ॥ १५८३ ॥**



**आलोचिते** वारत्रयपृच्छायां कृतायां **गुरुणा** आचार्येण **तस्य** उदितवेदस्य साधो**र्विधिना चिकित्सा कर्त्तव्या**। सा चिकित्सा **निर्विकृतिकादिका क्रमेणानेन** वक्ष्यमाणेन **ज्ञातव्या**।।१५८३॥

तमेव क्रममाह—

**निव्वीयं ओम तवे, वेयावच्चे तहेव ठाणे य।**
**आहिंडणे य मंडलि, चोयगवयणं च कप्पट्ठी ॥ १५८४ ॥**

प्रथमतो **निर्विकृतिकं** कारयितव्यः। तत्र यदि निर्विकृतिकं तपः कुर्वतो नोपशाम्यति वेदस्तर्हि निर्विकृतिकेनाऽ**वमौदर्यं** कारयितव्यः, तथाप्यनुपशाम्यति **तप**श्चतुर्थादिकं कार्यते, तथाप्यतिष्ठति **वैयावृत्त्यं** कारणीयः, वैयावृत्त्येनाप्यतिष्ठति **स्थानेन** ऊर्ध्वस्थानेन तिष्ठति, तथाप्यनुपशाम्यति **आहिण्डनं** कार्यते देशहिण्डकानां सहायो दीयते इत्यर्थः। तत्र यदि पथपरिश्रमेणोपशान्तो भवति वेदस्ततः सुन्दरम्, अथ नोपशाम्यति ततो यदि स बहुश्रुतस्तर्हि स सूत्र**मण्डलीं** अर्थमंडलीं च दाप्यते। अत्रार्थे **चोदकवचनं**, यथा किमर्थं स मण्डली दाप्यते। सूरिराह-दृष्टान्तोऽत्र **कप्पट्ठी** इति कूलवधूः।

एगो सेट्ठी। तस्स पुत्तो धणोवज्जणनिमित्तं देसंतरं गतो। भारिया सेट्ठीसमीवे मुक्का। सा य सुहभोयण-तंबोल-विलेवण-मंडण-पसाहणरया घरवावारमकुणंती अन्नया उम्मत्तिया जाया दासचेडिं भणइ - पुरिसं मग्गेह। तीए सेट्ठिणो कहियं। तेण चिंतियं- जावज्जवि न विणस्सइ ताव चिंतेमि उवायं, सेट्ठिणी भणिया-कलहं काऊण तुमं गच्छ, जेणेसा घरवावारे

छुब्भति। अन्नहा विणस्सिहिति। एवं सामत्थेऊण अन्नया सेट्ठी घरमागओ। आभोक्खं मग्गइ। सा न देइ। ततो सेट्ठिणा महतो कलहो कतो। सा य पिट्टिऊण निस्सारिया। सा य वहू कलहसद्दं सोऊण तत्थागया सेट्ठिणा भणिया-पुत्तिवहूए! तुमं घरसामिणी, का एसा? ता तुमे अज्जप्पभिति सव्वो वावारो कायव्वो। सा तहेव करेउमारद्धा। तओ तीए वावारवाउलाए भोयणमवि वियालवेलाए, कुतो मंडणपसाहणादियं?। दासचेडीए भणियं मग्गितो चिट्ठति पुरिसो, कया मेलिज्जइ? तीए भणियं-मरणस्स वि मे अवसरो नत्थि, कुतो पुरिसस्स ?

एवं यथा तस्या गृहव्यापारव्यापृततया वेदोपशान्तिरभूत्। तथास्यापि सूत्रमण्डल्यादिव्यापारव्यापृततया कदाचिद्वेदोपशान्तिः सम्भाव्यते ततः सूत्रमण्डलीम् अर्थमण्डलीं च दाप्यत इति ॥ १५८४॥

**एवं पि अठायंते, अट्ठाणादेक्कमेक्क-तिगवारा।**
**वज्जेज्ज सचित्ते पुण, इमे उ ठाणे पयत्तेणं ॥ १५८५ ॥**

**एवमपि** सूत्रमण्डल्यादिदापनतोऽपि **अतिष्ठति** वेदोदये **अस्थाने** वेश्यापाटके स्थविरैः

सह वसतिं गृह्णाति। तत्राऽऽलिङ्गन-चुम्बनादि दृष्ट्वा यदि शुक्रपुद्गलविनिर्गमे वेद उपशाम्यति ततः सुन्दरम्। एवं **त्रीन् वारान्।** तथाप्यतिष्ठति यत्र प्रतिशब्दाः श्रूयन्ते तत्र शब्दप्रतिबद्धायां वसतौ स्थविरैः सममवतिष्ठति। तत्र यदि परिचारणाशब्दमाकर्ण्य निबिडाध्यवसायभावतः शुक्रपुद्गलक्षरणे उपशाम्यति ततः सुन्दरम्। एवमत्रापि त्रीन् वारान्। तथाप्यनुपशान्तौ दूष्य-पलाशपत्रान्तरितमेकं द्वौ त्रीन् वारान् हस्तकर्म करोति। तथाप्यनुपशाम्यति कृत्रिमायां तिर्यग्योनावचित्तायामेकं द्वौ त्रीन् वारान् मैथुनकर्म समाचरति। तथाप्यनुपशान्तौ मनुष्ययो-नावचित्तायां, तथाप्यतिष्ठति **सचित्ते** वक्ष्यमाणविधिना सञ्चरति। तत्र सचित्ते **पुनरिमानि** वक्ष्यमाणानि **स्थानानि** प्रयत्नतो **वर्जयेत्**।। १५८५॥

तान्येवाह—

**सदेससिस्सिणी सज्झंतिया सिस्सिणी कुलगणे य।**
**संघे य कुलकन्नगा य विहवा, वहुगा य तहा सलिंगेणं ॥ १५८६ ॥**

**सदेशा** समानदेशजा **सिस्सिणी** स्वहस्तदीक्षिता **सज्झंतिया** भगिन्यादिका। तथा **शिष्यिणी कुले गणे संघे च**। किमुक्तं भवति?- समानकुलवर्तिनी समानगणवर्तिनी

समानसङ्घवर्तिनी च। **कुलकन्यका विधवा** च प्रतीता। **वधूका** लघुकुलवधूका। एताः परिहरेत्। अपरिहरतः प्रायश्चित्तम्। तथा **स्वलिङ्गेन** न सेवेतान्यथा तत्रापि प्रायश्चित्तम् ॥१५८६॥

तथा चाह—

**लिंगम्मि उ चउभंगो पढमे भंगम्मि होइ चरिमपयं।**
**मूलं चउत्थभंगे, बितिए ततिए य भयणा उ ॥ १५८७ ॥**

**लिङ्गे** लिङ्गविषये **चतुर्भङ्गी**। तद्यथा— स्वलिङ्गेन स्वलिङ्गवर्तमानां सेवते १, स्वलिङ्गेनाऽन्यलिङ्गे २, अन्यलिङ्गेन स्वलिङ्गे३, अन्यलिङ्गेनान्यलिङ्गे४, तत्र **प्रथमे भङ्गे** सेवमानस्य **भवति** प्रायश्चित्तं **चरिमपदं** पाराञ्चितलक्षणम्। **चतुर्थे भङ्गे** अन्यलिङ्गेनाऽन्यलिङ्गे इत्येवंरूपे सेवमानस्य **मूलं** नाम प्रायश्चित्तम्। **द्वितीये तृतीये** च भङ्गे भावनायां **भजना** विकल्पना, क्वचित् किञ्चित् प्रायश्चित्तम् ॥१५८७॥

तामेव विवक्षुः प्रथमभङ्गगतामपि भावनामाह—

**सलिंगेण सलिंगे सेवंते चरमं तु होति बोद्धव्वं।**
**सलिंग अन्नलिंगे देवी कुलकण्णगा चरिमं।।१५८८॥**

**स्वलिङ्गेन स्वलिङ्गे** वर्तमानां यदि **सेवते** तदा तस्य भवति बोद्धव्यं प्रायश्चित्तं **चरमं** पाराञ्चितरूपम्। **स्वलिङ्गेनान्यलिङ्गे** इत्येवंरूपे द्वितीये भङ्गे यदि सेवते **देवीं** राजाग्रमहिषी-मुपलक्षणमेतत्, अन्यां वा राजस्त्रियं **कुलकन्यकां** वा, गाथायां विभक्तिलोपः प्राकृतत्वात्, तदा प्रायश्चित्तं **चरमं** पाराञ्चितम्।।१५८८॥

**नवमं तु अमच्चीए, विहवीए कुलच्चियाए मूलं तु।**
**परलिंगेण सलिंगे, सेवंते होइ इणमो तु ॥ १५८९ ॥**

स्वलिङ्गेन **अमात्याया** अमात्यभार्यायाः सेवने प्रायश्चित्तं **नवमम्** अनवस्थाप्यं, **विधवायाः कुलच्चियाए** इति कुलवध्वा, उपलक्षणमेतत्, अन्यस्याश्चाविशेषितायाः प्राकृतस्त्रियाः सेवने **मूलं** पुनर्व्रतारोपणं प्रायश्चित्तमुक्तम्। [उक्ता] द्वितीयभङ्गे भजना, तृतीये [तां] विवक्षुरिदमाह- **परलिङ्गेन स्वलिङ्गे** वर्त्तमानां **सेवमानस्य भवति इयं** वक्ष्यमाणा भजना॥ १५८९॥

तामेवाह—

**सदेस सिस्सणीए, सज्झंति कुलच्चियाए चरमं तु।**
**नवमं गणच्चियाए, संघच्चियाए य मूलं तु ॥ १५९० ॥**

**सदेशायाः** समानदेशोद्भवायाः, तथा **शिष्यिण्याः** स्वहस्तदीक्षितायाः, **सज्झंती** भगिनी तस्याः। **कुलच्चियाए** इति समानकुलवर्तिन्याः सेवने **चरमं** पाराञ्चितं प्रायश्चित्तम्। समान-**गणवर्तिन्याः** सेवने **नवमम्** अनवस्थाप्यं, समान**सङ्घवर्तिन्याः मूलम्**॥ १५९०॥

सम्प्रति चतुर्थभङ्गभावनामाह—

**परलिंगेण परम्मि उ, मूलं अहवावि होइ भयणा उ।**
**एएसिं भंगाणं, जयणं वोच्छामि सेवाए ॥ १५९१ ॥**

**परलिङ्गेन परे** परलिङ्गे वर्त्तमानां यदि सेवते तदा **मूलम्। अथवा भवत्येतेषां भङ्गानां भजना** विकल्पना, क्वचिद्भङ्गे द्वितीयपदेन सेवा कर्तव्या क्वचिन्नेत्यर्थः। तत्र यस्मिन् भङ्गे सेवा कर्तव्या तत्र **सेवायां** स्त्रीसेवायां **यतनां वक्ष्यामि**॥ १५९१॥

तामेवाह—

**तत्थ तिगिच्छाए विहिं, निव्वीतियमादियं अइक्कंते।**
**उवभुत्तथेरसहितो, अट्ठाणादीसु तो पच्छा ॥ १५९२ ॥**

**तत्र चिकित्सायां विधिं निर्विकृतिकादिकमतिक्रान्ते** ततः **पश्चाद् ये उपभुक्ता** उपभुक्तभोगाः **स्थविरास्तैः सहितः** समेतः **अस्थानादिषु** वेश्यापाटकादिरूपेषु वसतिं गृह्णाति। तत्र च विधिः प्रागेवोक्तः॥ १५९२ ॥

तथाप्यनुपशान्तौ

**अट्ठाण सद्दहत्थे, अच्चित्ततिरिक्खभंगदोच्चेण।**
**एगदुगतिण्णिवारा, सुद्धस्स उवट्ठिए गुरुगा ॥ १५९३ ॥**

**अस्थाने** वेश्यापाटके यत्र परिचारणाशब्दाः श्रूयन्ते तत्र **शब्दहस्ते** प्रविचारणाशब्दपूर्णे उपभुक्तभोगस्थविरैः सह तिष्ठति, तत्रापि विधिः स एव प्रागुक्तः। तथाप्यतिष्ठति कृत्रिमायां

**तिर्यग्योनावचित्तायां** मैथुनकर्म एकं द्वौ त्रीन् वारान् करोति। तथाप्यनुपशान्तौ कृत्रिमायां मनुष्ययोनौ, तथाप्यतिष्ठति **भंगदोच्चेणं**ति द्वितीयेन भङ्गेन स्वलिङ्गेन परलिङ्गे इत्येवंरूपेण स्वगण एव स्थितेन शून्यगृहे शून्यदेवकुलिकायां वा निरपायेऽपवादपदतः प्राकृतायाः स्त्रिया भृतिप्रदानतः, तत्र प्रवेशितायां **एकं द्वौ त्रीन् वारान्** मैथुनमाचरति। ततः **शुद्धस्योप**शान्तवेद-स्याकरणाय **उपस्थितस्य** अभ्युत्थितस्य, गाथायां सप्तमी षष्ठ्यर्थे, प्रायश्चित्तं चत्वारो **गुरुकाः**। ॥ १५९३ ॥

**सूत्रम्— गणावच्छेदए गणावच्छेयत्तं अनिक्खिवित्ता मेहुणधम्मं पडिसेवेज्जा, जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥१४ ॥**

''गणावच्छेदए गणावच्छेयत्तं'' इत्यादि, **गणावच्छेदको गणावच्छेदकत्वमनिक्षिप्य मैथुनधर्म्मं** मैथुनप्रकारं **प्रतिसेवते, तस्य यावज्जीवं** यावत्प्राणधारणं करोति तावत् तत्**प्रत्ययं** गणावच्छेदकत्वमनिक्षिप्य यन्मैथुनधर्मप्रतिसेवनं तत्कारणं **न कल्पते आचार्यत्वं वा उपाध्यायत्वं वा** प्रवर्तित्वं वा स्थविरत्वं [**गणावच्छेदत्वं**] वा **उद्देष्टुमनुज्ञातुं** स्वयं **वा धारयितुम्**, इदमेकं सूत्रं, द्वितीयमाह—

**सूत्रम्—गणावच्छेइए गणावच्छेयत्तं निक्खिवित्ता मेहुणधम्मं पडिसेवेज्जा, तिण्णि संवच्छराणि तस्स तप्पत्तियं नो कप्पति आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा।**

**तिहिं संवच्छरेहिं वीतिक्कंतेहिं चउत्थगंसि संवच्छरंसि पट्ठियंसि उट्ठियंसि ठियस्स उवसंतस्स उवरयस्स पडिविरयस्स निव्वियारस्स एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥१५॥**

"गणावच्छेदए गणावच्छेयत्तं निक्खिवित्ता" इत्यादि, **गणावच्छेदको गणावच्छेदकत्वं निक्षिप्य** गुरुसमक्षं मुक्त्वा **मैथुनधर्मं प्रतिसेवते,** तस्य **त्रीणि संवत्सराणि यावत् तत्प्रत्ययं न कल्पते आचार्यत्वं वा यावद् गणावच्छेदकत्वं वा उद्देष्टुं वा** अनुज्ञातुं स्वयं वा **धारयितुम्। त्रिषु संवत्सरेषु व्यतिक्रान्तेषु चतुर्थे संवत्सरे प्रस्थिते उपस्थिते स्थितस्य** वर्तमानस्य **उपशान्तस्य उपरतस्य प्रतिविरतस्य निर्विकारस्य एवं से** तस्य **कल्पते आचार्यत्वं वा यावत् गणावच्छेदिकत्वं वा उद्देष्टुं वा धारयितुं वा।** अत्र पदानामर्थभावना

भिक्षुसूत्रे इव निरवशेषा द्रष्टव्या। यथा च द्वे सूत्रे गणावच्छेदके उक्ते, तथा आचार्योपाध्यायेऽपि तथा चाऽऽह—"एवं आयरिय-उवज्झाए वि" एवं गणावच्छेदके इव आचार्योपाध्यायेऽपि द्वे सूत्रे, ते चैवं—

**सूत्रम्—आयरियउवज्झाए आयरियउवज्झायत्तं अनिक्खिववेत्ता मेहुणधम्मं पडिसेवेज्जा, जावज्जीवाए तस्स तप्पतियं नो कप्पइ आयरियत्तं वा जाव गणावच्छिेदियत्तं वा उद्दिसित्तए वा धारित्तए वा।। १६॥**

**आयरियउवज्झाए आयरियउवज्झायत्तं निक्खिववेत्ता मेहुणधम्मं पडिसेवेज्जा, तिन्नि संवच्छराणि तस्स तप्पत्तियं नो कप्पति आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा। तिहिं संवच्छरेहिं वीतिक्कंतेहिं चउत्थगंसि संवच्छरंसि पट्ठियंसि उट्ठियंसि ठियस्स उवसंतस्स उवरयस्स पडिविरयस्स निव्वियारस्स एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥ १७॥**

अस्य सूत्रद्वयस्याप्यर्थो गणावच्छेदकसूत्रद्वयवद्भावनीयः। अत्र भाष्यकारः प्राह—

**एमेव गणायरिए-ऽनिक्खिवणा नवरि तत्थ णाणत्तं।**
**अयपालगसिरिघरिए, जावज्जीवं अणरिहाउ ॥ १५९४॥**

**एवमेव** अनेनैव प्रकारेण भिक्षुसूत्रमिवेत्यर्थः। **गणे** गणावच्छेदके **आचार्ये** आचार्योपाध्याये प्रत्येकं सूत्रद्विक**मनिक्षेपण**निक्षेपणविषयं भावनीयम्। **नवरं तत्र** तेषु चतुर्षु सूत्रेषु मध्ये अनिक्षेपणायाम् अनिक्षेपणाविषये गणावच्छेदकसम्बन्धिन्याचार्योपाध्यायसम्बन्धिनि च सूत्रे **नानात्वमिदम्**। तदेवाह-**अजापालकेन श्रीगृहकेन** च दृष्टान्तेन गणावच्छेदकाचार्योपाध्याया **यावज्जीव**माचार्यपदाना**मनर्हाः** ॥ १५९४ ॥

तत्राऽजापालकदृष्टान्तमाह—

**अइयातो रक्खंतो, अयवालो दट्ठु तित्थजत्तीओ।**
**कहि वच्चह? तित्थाणिं, बेती अहगंपि वच्चामि ॥ १५९५ ॥**

**छड्डेऊण गयम्मी, सावज्जाईहि खइयहिय-नट्ठा।**
**पच्चागतो दविज्जइ, न लभति य भतिं न विय ताओ ॥ १५९६ ॥**

कोइ भईए अजियाओ रक्खति। तेण अडवीए अयाओ चारयंतेण व रक्खंतेण कप्पडियादी दिट्ठा गंगं संपट्ठिया, तेण पुच्छियं- 'कहिं वच्चह?' ते भणंति 'गंगं'। ततो सो ताओ अजाओ छड्डित्ता तेहिं समं गंगं गतो। ताओ अजाओ सुण्णातो[त्ति] काओ वि सावज्जेहिं खइयातो कातो तेणेहिं हरियातो कातो विनट्ठाओ। सो य गंगाए ण्हाएत्ता पडिआगतो। पुणो रक्खामित्ति अजातो मग्गति। ताहे सो बंधित्ता लोगेण अयाणं मोल्लं दवावितो, भती न लद्धा, न य पुणो लभति मग्गंतो वि अयातो रक्खिउं॥

अक्षरयोजना त्वेवम्-**अजापालो अजा रक्षन् तीर्थयात्रिकान्** कार्पटिकान् **दृष्ट्वाऽप्राक्षीत् क्व व्रजथ** यूयम् ? तेऽवोचन् **तीर्थानि**। स **ब्रूते- अहमपि व्रजामि**। एवमुक्त्वा तस्मिन् अजा**स्त्यक्त्वा** गते **श्वापदादिभिः खादितहृतनष्टाः** काश्चिदजाः श्वापदैः खादिताः,काश्चित् स्तेनैरपहृताः, अपरा नष्टाः, नंष्ट्वा स्वगृहमागताः। स च गङ्गायां स्नात्वा **प्रत्यागतः** सन् अजामूल्यं दाप्यते, **न च लभते भृतिं, नापि** पुनरजा रक्षितुमिति॥ १५९५॥ १५९६॥

**एवं सिरिघरीए वी, एवं तु गणादिणो वऽणिक्खित्ते।**
**जावज्जीवं न लभते, तप्पत्तीयं गणं सो यं ॥ १५९७ ॥**

सूत्र १८ गाथा १५९७-१५९८ भिक्षोः पदयोग्या-ऽयोग्यता

**एवम**जापालक इव **श्रीगृहिकोऽपि** द्रष्टव्यः। स चैवं— कोइ सिरिघरिओ भतीए सिरिघरं पालेइ। अन्नया तेण केइ गंगं संपट्ठिता दिट्ठा, पुच्छिया- 'कहिं वच्चह?' तेहिं कहियं- 'गंगाए'। ततो सो अणापुच्छित्ता तेहिं समं गंगं गतो। पच्छा सिरिघरं सुन्नं लोगेण विलुत्तं। सो गंगाए ण्हाएत्ता पडियागतो पुणो रक्खामित्ति सिरिघरं[1] मग्गति, ताहे सो सिरिघरसामिणा बंधित्ता जं सिरिघरे पणट्ठं तं दवावितो, न य पुणो लभति रक्खिउं मग्गंतो वि। एष दृष्टान्तः। अत्रोपनयमाह— एवं तु इत्यादि। **एवमेव तुः** अवधारणे **गणादिकस्य अनिक्षिप्ते** अनिक्षेपे कृते, भावे क्तप्रत्ययविधानात् तत्प्रत्ययं गणाद्यनिक्षेपेण मैथुनसमाचरणप्रत्ययं स गणावच्छेदकादिः **यावज्जीवं न लभते गण**मिति।।१५९७॥

तदेवमनिक्षेपविषये सूत्रद्विके दृष्टान्तद्विकमुक्तम्। एतदेव दृष्टान्तद्विकं निक्षेपविषयेऽपि सूत्रद्विके योजनीयम्।। तच्चैवं—

अन्नो अजापालगो अजातो रक्खति, तेण कप्पडियादी अन्नया गंगं संपट्ठिया दिट्ठा।

---

१. 'घरमेति। ताहे - वा. पु. मु.॥

तेण पुच्छिया 'कहिं वच्चह?' तेहिं कहियं 'गंगाए वच्चामो'। ततो तेण गंगं गंतुकामेण अजातो अजासामियाणं निक्खित्ता, अन्नो वा अप्पणो ट्ठाणे अजापालगो कतो, ततो गंगं गतो। गंगाए ण्हाएत्ता पडियागतो। तेण पुणो रक्खामित्ति अजा मग्गिया, लद्धा॥

तहा कोइ सिरिघरितो सिरिघरं पालति। अन्नया तेण गंगं संपट्ठिया केइ दिट्ठा, आपुच्छिया, कहियं 'गंगाए वच्चामो', सो गंगं गंतुकामो सिरिघरसामिस्स कहेत्ता अप्पणो वा ठाणे अण्णं पच्चइयं सिरिघरियं ठवित्ता गतो, गंगाए ण्हाएत्ता पडिआगतो। पुणो लद्धं सिरिघरं। एवं यो गणावच्छेदक आचार्योपाध्यायो वा गणावच्छेदकत्वादिकं निक्षिप्य मैथुनधर्मं प्रतिसेवते, स संवत्सरत्रयातिक्रमे लभते पुनराचार्यत्वादिकमिति।।



**सूत्रम्— भिक्खू य गणाओ अवकम्म [1]ओहायइ तिण्णि संवच्छराणि तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा, तिहिं संवच्छरेहिं वीइक्कंतेहिं चउत्थगंसि संवच्छरंसि उट्ठियंसि ठियस्स उवसंतस्स उवरयस्स पडिविरयस्स निव्वियारस्स, एवं से कप्पइ आयरियत्तं वा जाव**

---

१. ओहाणुप्पेही गच्छेज्ज तिन्नि-प्रतिलिपि पाठः, एवमग्रेऽपि ॥

**गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा** ॥१८॥ "भिक्खू य गणातो अवकम्मे" त्यादि। अथास्य सूत्रस्य कः सम्बन्धः? तत आह—

**जा तिन्नि अठायंते, सावेक्खो वच्चए उ परदेसं।**
**तं चेव उ ओहावण, जं उज्झति दव्वलिंगं तु ॥ १५९८ ॥**

**यावत् त्रीन्** वारानपवादतो द्वितीयभङ्गे स्त्रीसेवायामपि कृतायां **न तिष्ठति** वेदोदये पुनरेष्यामि, मा च ज्ञास्येऽहमिति निक्षिप्य प्रच्छन्नमवधावामीति यस्यापेक्षास्ति स **सापेक्षः**, स्वदेशपरिहरणार्थं **परदेशं व्रजति**। 'तत्र सुखं लिङ्गविवेकेन प्रतिसेविष्यामि' इति बुद्ध्या। एतदेव चावधावनं यल्लिङ्गविवेकबुद्ध्या गमनम्। तथा चाह— **तं चेव य** इत्यादि, **तदेव अवधावनं यद् द्रव्यलिङ्गं** रजोहरणादिकमुज्झति 'मा प्रवचनस्योड्डाहो भूद्' इति कृत्वा॥ १५९८॥ ततः पूर्वं सूत्रपञ्चकानन्तरमिदमवधावनसूत्रपञ्चकम्। तद्यथा प्रथमं भिक्षुसूत्रं१ तदनन्तरं गणावच्छेदकसम्बन्धिनी क्रमेणानिक्षेपणनिक्षेपणविषये द्वे सूत्रे २।३ ताभ्यामप्यनन्तरमाचार्योपाध्यायविषये क्रमेणाऽनिक्षेपण-निक्षेपणविषये द्वे सूत्रे ४। ५॥

सूत्रम्-गणावच्छेइए गणावच्छेइयत्तं अनिक्खिवित्ता ओहाएज्जा जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥१९॥

गणावच्छेइए य गणावच्छेइयत्तं निक्खिवित्ता ओहाएज्जा, तिण्णि संवच्छराणि तस्स तप्पत्तियं नो कप्पति आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा।

तिहिं संवच्छेरेहिं वीतिक्कंतेहिं चउत्थगंसि संवच्छरंसि पट्ठियंसि उट्ठियंसि ठियस्स उवसंतगस्स उवरयस्स पडिविरयस्स निव्वियारस्स एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेदियत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२०॥

आयरिय-उवज्झाए आयरिय-उवज्झायत्तं अनिक्खिवित्ता ओहाएज्जा, जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणाच्छेदियत्तं वा उद्दिसित्तएवा धारेत्तए वा ॥२१॥

आयरिय-उवज्झाए आयरिय-उवज्झायत्तं निक्खिवित्ता ओहाएज्जा, तिण्णि

**संवच्छराणि तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा। तिहिं संवच्छरेहिं वीतिक्कंतेहिं चउत्थगंसि संवच्छरंसि पट्ठियंसि उट्ठियंसि ठियस्स उवसंतस्स उवरयस्स पडिविरयस्स निव्वियारस्स, एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा॥२२॥**

अक्षरगमनिका सूत्रपञ्चकस्यापि तथैव। अनिक्षेपणसूत्रद्विके गणावच्छेदकादयः पूर्ववद्-जापालक-श्रीगृहिकदृष्टान्ताभ्यां यावज्जीवमाचार्यपदानामनर्हाः। निक्षेपणसूत्रद्विके ताभ्यामेव दृष्टान्ताभ्यां प्रागुक्तप्रकारेण संवत्सरत्रयातिक्रमेऽर्हाः॥ सम्प्रति भिक्षुसूत्रस्यानिक्षेपणसूत्रद्विकस्य च मैथुनसूत्रादापृच्छनविधौ यतनायां च यो विशेषस्तमभिधित्सुराह—

**एमेव बितियसुत्ते, बियभंग निसेवियम्मि वि अठंते।**
**ताहे पुणरवि जयती, निव्वीतियमादिणा विहिणा ॥ १५९९ ॥**

**एवमेव** अनेनैव प्रकारेण, भिक्षुमैथुनसूत्रे इवेत्यर्थः **द्वितीयसूत्रे** भिक्ष्ववधावनसूत्रे उपलक्षणमेतत् निक्षेपणसूत्रद्विके च **द्वितीयभङ्गेन** प्रागुक्तस्वरूपेण **निषेवितेऽपि** मैथुने **अतिष्ठति** वेदोदये ततः **पुनरपि निर्विकृतिकादिना विधिना यतते** ॥१५९९॥

**जइ तह वि न उवसामेई ताहे जयति चउत्थभंगेण।**
**पुव्वुत्तेणं विहिणा, निग्गमेण नवरि नाणत्तं ॥ १६०० ॥**

**यदि तथापि** पुनरपि निर्विकृतिकादिना विधिना [**नोपशाम्यति तदा**] चतुर्थ**भङ्गेन** परलिङ्गेन परलिङ्गे इत्येवंरूपेण **यतते**। **नवरं**-द्वितीयभङ्गाच्चतुर्थभङ्गे **निर्गमने नानात्वं** विशेषः। तथाहि— **पूर्वोक्तेन विधिना** द्वितीयवारमपि स्त्रीसेवानन्तरं भूयो निर्विकृतिकादिके विधौ कृते यदि नोपशाम्यति वेदस्तत्र परदेशे गन्तव्यम् ॥१६००॥

तत्र च गमने इयं यतना—

**उम्मत्तो व पलवते, गतो वि आणेत्तु बज्झई सिढिलं।**
**भाविते वसभा मा णं, बंधह नासेज्ज मा दूरं ॥ १६०१ ॥**

स परदेशं गन्तुमना उन्मत्तकवेषं करोति। **उन्मत्तक** इव बहु असम्बद्धं **प्रलपति**, उन्मत्तक इवेतश्चेतश्च गच्छति। **गतोऽपि** च वृषभैः **आनीय शिथिलं बध्यते**। एवं चोन्मत्तकरूपतया प्रलपन् पलायमानो वा तथा बाल-शैक्षकादीन् साधूनज्ञान् भावयति, यथा ते जानते

'सत्यमयमुन्मत्तक एव' इति। एवं **भाविते** साधुजने तान् बध्नतो **वृषभा** ब्रुवते- **मा गाढमेनं बध्नीथ मा** बन्धनस्योद्वेगतो नष्टः सन् **दूरं नंक्ष्यति,** पश्चाद् मार्गयद्भिरपि न लप्स्यते ॥१६०१ ॥

**गुरु आपुच्छ पलायण, पासुत्तमिगेसु अमुगदेसंति।**
**मग्गण वसभाऽदिट्ठे, भणंति मुक्कामो सोसस्स ॥ १६०२ ॥**

रात्रौ **मृगेषु** अज्ञेषु बाल-शैक्षकादिषु **प्रसुप्तेषु गुरुम्** आचार्यमापृच्छ्य **'अमुकं देशं** गच्छामि' इति **पलायते।** प्रभाते च वृषभा ब्रुवते नष्टः स पिशाचः, न दृश्यते इति **मार्गयामस्ततो वृषभाः** कैतवेन चिरं मार्गयित्वा तस्मिन्न**दृष्टे** वसतावागत्य **भणन्ति** 'नष्टः स पिशाचो न क्वापि दृष्ट इति **मुक्ताः स्मः** छुट्टा वयं' **शोषस्य** तद्गवेषणाद्यायासस्य।। १६०२॥

तेन च परदेशं गच्छता यानि स्थानानि परिहर्तव्यानि, तान्यभिधित्सुराह—

**विहरण वायण खमणे, वेयावच्चे गिहत्थ धम्मकहा।**
**वज्जेज्ज समोसरणं, पडिवयमाणो हियट्ठीओ ॥ १६०३ ॥**

**हितार्थिकः** प्रवचनविराधनाया आत्मन उड्डाहस्य च संरक्षणपरायणो यत्र **विहरणो**ति साधुत्वेन विहृतवान्, यत्र वा **वाचना** दत्ता, यत्र च **क्षपणक**त्वमकार्षीदातापना वा कृता, येषु च गच्छेषु **वैयावृत्त्यं** कृतं ते यत्र विहरन्ति, यत्र च **गृहस्थत्वेन** स्थितवान्, यत्र वा **धर्मकथा** प्रबन्धेनानेकशः कृता, यत्र वा रथयात्रादिनिमित्तमनेकेषामाचार्याणां **समवसरणं** मेलापकः। एतानि स्थानानि **प्रतिपतन्** प्रतिसेवितुकामो वर्जयेत् ॥१६०३॥

**गंतूण अन्नदेसं, वज्जित्ता पुव्ववण्णिए देसे।**
**लिंगविवेगं काउं, स सड्ढि किढी पण्णवित्ताणं ॥ १६०४ ॥**

**गत्वा अन्यदेशं** परदेशं **वर्जयित्वा पूर्ववर्णितान्** अनन्तरगाथोपात्तान् **देशान् लिङ्गविवेकं कृत्वा** आत्मीयमाचारभाण्डं समस्तमपि क्वचिन्निक्षिप्यान्यलिङ्गं गृहिलिङ्गं वा गृहीत्वा **सड्ढि**त्ति अविरतसम्यग्दृष्टिका यथाभद्रिका वा **प्रज्ञाप्य** सम्भोगोचितरीत्या बोधयित्वा **किढी**त्ति कृष्यते संभोगाय प्रतिरिक्ते स्थाने नीयते॥ १६०४॥

तदभावे विध्यन्तरमाह—

**पणपण्णिगादि किढीसु, किंचि अदेंतो उ अहव अदसादी।**
**अपयाए अंतोछग्गुरु बाहिं तू चउगुरुनिसेगे ॥ १६०५ ॥**

**सपया अंतो मूलं छेदो पुण होइ बाहिरनिसेगे।**
**अणुपुव्विं पडिसेवइ, वज्जंतो सदेसमादीणि ॥ १६०६ ॥**

पञ्चकपर्दादयः पण्यं यस्या एकवारप्रतिसेवने सा **पञ्चपण्यका, आदिशब्दाद्** दशपण्यिकादिपरिग्रहः, तासु कृष्टासु प्रतिरिक्तं स्थानं नीतासु प्रतिसेवनां करोति। कथम्भूतः सन्? इत्याह— **किञ्चित् अददानः**। एतच्चाविरतसम्यग्दृष्टिकाया यथाभद्रिकाया वा विषये द्रष्टव्यम्। सा हि लज्जातो न किञ्चिदपि याचते। अथ पञ्चपण्यिकादिका भाटीं विना नेच्छति प्रतिसेवनां, तत आह-**अथवा** भाटीं विनाऽनिच्छायां **अदशादीनि** वस्त्राणि प्रयच्छति। प्रथमतोऽदशानि ददाति, तान्यनिच्छन्त्या योग्यान्यपि तस्या दीयन्ते। सा च प्रतिसेवितुमिष्यमाणा द्विधा सम्भवति- अप्रजा सप्रजा च, अनपत्या सापत्या चेत्यर्थः। तत्रा**ऽप्रजाया** ग्रामस्याऽ**न्तर्**यदि शुक्र**निषेकं** करोति ततः प्रत्यागतस्य प्रायश्चित्तं **षड् गुरु**। अथ **बहिः** तत**श्चतुर्गुरु**। अथ **सप्रजाया** ग्रामस्याऽ**न्तः** करोति ततो **मूलम्,** अथ **बहि**स्तर्हि **छेदः**। तथा आनुपूर्व्या क्रमेण

प्रथमतो भार्टीं विना, तदभावे भाट्यापीत्यर्थः। अथवा प्रथमतो बहिस्तदसम्भवेऽन्तरपि प्रतिसेवते, वर्जयन् सदेशादिकाः समानदेशशिष्यिण्यादिकाः ॥ १६०६ ॥

**फासुपडोयारेणं, न यऽभिक्खनिसेव जाव छम्मासा।**
**चउगुरु छम्मासाणं, परतो मूलं मुणेयव्वं ॥ १६०७ ॥**

स च तत्र तथा तिष्ठन् **प्रासुकप्रत्यवतारेण** तिष्ठति, यथाशक्ति अशनादिकं स्नानादिकं च अप्रासुकं वर्जयतीत्यर्थः। **न च अभीक्ष्णनिषेवणम्** अभीक्ष्णप्रतिसेवनां करोति। स च तथा प्रतिसेवमानो **यावत् षण्मासा**स्तावद्यदि तिष्ठति, ततः प्रत्यागतस्य षण्मासेभ्य आरतो वा प्रतिनिवृत्तस्य प्रायश्चित्तं **चतुर्गुरु,** षण्णां मासानां **परतः** प्रतिनिवृत्तस्य **मूलं ज्ञातव्यम्**॥ १६०७॥

**आगंतु अन्नगणे, सोहिं काऊण वूढपच्छित्तो।**
**सगणाऽऽगममुब्भामे दरिसेती ताहे अप्पाणं ॥ १६०८ ॥**

एवं मोहचिकित्सां कृत्वा तत्पूर्वनिक्षिप्तमाचारभाण्डमादाय **अन्यगणे आगत्य** प्रविश्य **शोधिं कृत्वा** आलोचनां प्रदाय यत्प्रायश्चित्तं लभते तत् तत्रैव वहति। ततो **व्यूढप्रायश्चित्तः**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन् **उद्भ्रामे** उद्भ्रामकभिक्षाचरग्रामे **स्वगणागमः** स्वगणसम्बन्धिनां साधूना**मागमस्तेषामात्मानं दर्शयति?** किमुक्तं भवति उद्भ्रामकभिक्षाप्रचुरे ग्रामे ये स्वाचार्यसम्बन्धिनः साधवो भिक्षाचर्यार्थमागतास्तेषामात्मानमुपदर्शयति। तं दृष्ट्वा यः परुषयति, तस्य प्रायश्चित्तं चतुर्गुरुकाः। किन्तु तैर्गत्वा सूरिभ्यः कथनीयं- दृष्टोऽस्माभिः स पूर्वनष्ट इति। यच्च तेनोक्तं तदपि कथनीयम् ॥ १६०८॥

किं तेनोक्तम्? इत्यत आह—

**बेति य लज्जाए अहं, न तरामि गंतु गुरुसमीवं तु।**
**न य तत्थ जं कयं मे, निग्गमणं चेव सुमरामि ॥ १६०९ ॥**

आत्मनि साधूनामुपदर्शिते स तान् साधून् प्रति **ब्रूते- लज्जया अहं गुरुसमीपं गंतुं न शक्नोमि, न च तत्र** वसतौ **यन्मया कृतं** तत्स्मरामि, केवलं **निर्गमनमेव स्मरामि** ॥१६०९॥

**तेहिं निवेइए गुरुणो, गीया गंतूण आणयंति तयं।**
**मिगपुरतो उ खरंटण, वसभ निवारेति मा भूओ ॥ १६१० ॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं **तैः** साधुभि**र्गुरोर्निवेदिते** गुर्वादेशेन **गीता** गीतार्था वृषभा इत्यर्थः, गत्वा **तकं** साधु**मानयन्ति**। आनीतस्य च तस्य तेषां **मृगाणां** [1]बालशैक्षकाणां **पुरतः** कैतवेन गुरुणा **खरण्टना** कर्तव्या। यथा- 'क्रियायां क्रियमाणायां किमर्थं त्वं नष्टः? यदि कथमप्यनर्थे अपतिष्यत् ततः कुगतावगमिष्यदिति'। एवं गुरुणा कैतवेन खरण्टनायां कृतायां **वृषभास्तं निवारयन्ति**- वत्स! **मा भूय** एवं कार्षीरिति, पृच्छन्ति च मृगपुरतः तां वार्ताम् ॥ १६१० ॥

कथमित्याह—

**कत्थ गतोऽणापुच्छा?, साहुकिलिट्ठा तुमं विमग्गंता।**
**मा णं अज्जो! वंदह, तिण्णि उ वरिसाणि दंडो से ॥ १६११ ॥**

'त्व**मनापृच्छ्य कुत्र गतः? क्लिष्टाः** खलु **त्वां विमार्गयन्तः साधवः**'। स प्राह— 'न स्मरामि भगवन्! कथमहं नष्टः? कुत्र वा गतः? केवलं कर्मोपशमेन स्वस्थीभूतो जानामि स्म, यथा अहं विनिर्गत इति, ततो युष्मत्पादान्तिकमागतः'। तत आचार्यैः साधवो वक्तव्याः **मा आर्या** अमुं साधुं **त्रीन् संवत्सरान् वन्दध्व**मेष अस्य साधो**र्दण्डः** ॥१६११ ॥



---

**१. बालशैक्षणिकाणां- पु. प्रे. मु. ॥**

For Private and Personal Use Only

**तिण्हं समाण पुरतो, होयरिहो पुणो निव्वियारो उ।**
**जावज्जीवमणरिहा, इणमन्ने उ गणादीणं ॥ १६१२ ॥**

**तिसृणां समानां** संवत्सराणां **परतः** पुनर्यदि **निर्विकार**स्ततो भवत्य**र्हो गणादीनां** गणावच्छेदकत्वादीनां पदानाम्, शेषास्तु सूत्रोक्ता अनिक्षिप्तगणादयोऽनर्हाः। **इमे अन्ये गणादीनां** गणावच्छेदकत्वादिपदानां **यावज्जीवमनर्हाः** ॥१६१२॥

तानेवाह—

**पढमोऽनिक्खित्तगणो१, बितितो पुण होइ अकडजोगि त्ति २।**
**ततितो जम्म सदेसे ३, चउत्थओ विहारभूमीओ ४॥ १६१३॥**

**पंचमो निक्खित्तगणो, कडजोगी जो भवे सदेसम्मि ५।**
**जइ सेवंति अकरणं, पंचण्ह वि बाहिरा हुंति ॥ १६१४ ॥**

**प्रथमोऽनिक्षिप्तगणः१। द्वितीयः पुनर्भवति अकृतयोगी** यतनायोगमकृतवान्२। **तृतीयो** जन्माधिकृत्य **स्वदेशे**ऽकृत्यसेवी ३। **चतुर्थो विहारभूमौ** स्वविहारभूमावकार्यसेवी४ ॥१६१३॥

**पञ्चमो निक्षिप्तगणः कृतयोगी**, कृतयतनायोगोऽपि सन् **यः स्वदेशे भवत्य**कार्यसेवीत्यादि। तथा चाह–**जइ सेवंती**त्यादि। **यदि पञ्चापि अकरणम्** अकरणीयं मैथुनमित्यर्थः, **सेवन्ते** तदा ते **पञ्चापि** पञ्चानामपि आचार्यादिपदानां **बाह्या भवन्ति** ॥ १६१४॥

एतदेवाह—

**आयरियमाइयाणं, पंचण्हं जज्जिय अणरिहा उ।**
**चउगुरु य सत्तरत्तादि जाव आरोवण धरेंते ॥ १६१५ ॥**

**आचार्यादीनां पञ्चानामपि** पदानां **यावज्जीवमनर्हाः**। **चउगुरु य** इत्यादि, यदि पुनस्तेषामनर्हाणामपि यो गणं निसृजति तेषामन्यतमो वा यो धारयति तदा तस्योभयस्यापि **सप्तरात्रं** तस्मिन् गणं **धारयति** आरोपणं प्रायश्चित्तं चत्वारो गुरुकाः, आदिशब्दादन्यसप्तदिनातिक्रमे षड्लघुकः। तदनन्तरमन्यसप्तदिनानन्तरं षड्गुरुकः। तदनन्तरमन्यसप्तदिनातिक्रमे चतुर्गुरुकच्छेदः, ततः सप्तदिवसातिक्रमे षड्लघुकच्छेदः, ततोऽप्यन्यसप्तदिवसातिक्रमे षड्गुरुकच्छेदः। एतावता कालेन यदि पर्यायो न च्छिन्नस्ततस्त्रिचत्वारिंशत्तमे गणं निस्रष्टुर्धारयतश्च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलं प्रायश्चित्तं, चतुश्चत्वारिंशत्तमे दिवसेऽनवस्थाप्यं, पञ्चचत्वारिंशत्तमे पाराञ्चितमेवं **तावदारोपण**मिति ॥ १६१५ ॥

**अहव अनिक्खित्तगणाइएसु चउसुंपि सोल उ भंगा।**
**चरमे सुत्तनिवातो, जावज्जीव अणरिहा सेसा ॥ १६१६ ॥**

**अथवेति** प्रकारान्तरे, **अनिक्षिप्तगणादिसु** अनिक्षिप्तगणोऽकृतयोगी जन्मतः स्वदेशेऽकृत्यसेवी विहारभूमावकृत्यकारीत्येवंरूपेषु **चतुर्षु** पदेषु **षोडश भङ्गास्ते** च प्रस्तारतोऽमी, अमीषां षोडशानां भङ्गानां मध्ये य**श्चरमो** भङ्गस्तत्र **सूत्रनिपातः** भिक्षुसूत्रस्य निक्षिप्तसूत्रद्वयस्य चावकाशः, **शेषाः** पुनः पञ्चदशस्वपि भङ्गेषु वर्तमाना **यावज्जीवमनर्हाः** ॥ १६१६ ॥

**सूत्रम्— भिक्खू य बहुस्सुए बब्भागमे बहुसो बहु आगाढागाढेसु कारणेसु माई, मुसावाई, असुई, पावजीवी[१], जावज्जीवाए— तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२३॥**



---

१. पावकम्मोवजीविया – प्रतिलिपि एवमग्रेऽपि ॥

For Private and Personal Use Only

गणावच्छेइए य बहुस्सुए बब्भागमे बहुसो बहु आगाढागाढेसु कारणेसु माई, मुसावाई, असुई, पावजीवी, जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२४॥

आयरिय-उवज्झाए य बहुस्सुए बब्भागमे बहुसो बहु आगाढागाढेसु कारणेसु माई, मुसावाई, असुई, पावजीवी, जावज्जीवाए तस्स तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२५॥

बहवे भिक्खुणो बहुस्सुया बब्भागामा बहुसो, बहु आगाढागाढेसु कारणेसु माई, मुसावाई, असुई, पावजीवी, जावज्जीवाए तेसिं तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२६॥

बहवे गणावच्छेइया बहुस्सुया बब्भागमा बहुसो बहु आगाढागाढेसु कारणेसु माइ, मुसावाई, असुई, पावजीवी, जावज्जीवाए तेसिं तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२७॥

बहवे आयरिय-उवज्झाया बहुस्सुया बब्भागमा बहुसो बहु आगाढागाढेसु कारणेसु

**माई, मुसावाई, असुई, पावजीवी, जावज्जीवाए तेसिं तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२८॥**

**बहवे भिक्खुणो, बहवे गणावच्छेइया, बहवे आयरिय-उवज्झाया बहुस्सुया बब्भागमा बहुसो बहु आगाढागाढेसु कारणेसु माई, मुसावाई, असुई, पावजीवी, जावज्जीवाए तेसिं तप्पत्तियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा ॥२९॥ सूत्रसप्तकम्,** "भिक्खू य बहुस्सुते" इत्यादि सूत्रसप्तकम्। अथास्य सूत्रस्य पूर्वसूत्रैः सह सम्बन्धमाह—



**वयअतियारे पगते, अयमवि अन्नो उ तस्स अइयारो।**
**इत्तिरियमपत्तं वा, वुत्तं इदमावकहियं तु ॥ १६१७ ॥**

पूर्वसूत्रेषु व्रतस्य मैथुनविरत्यादेरतिचारः **प्रकृतोऽ**धिकृतः, **अयमपि** चा**ऽन्यस्तस्य व्रतस्यातिचार** इति, तत्प्रतिपादनार्थमिदं सूत्रसप्तकम् अथवा पूर्वसूत्रेषु त्रीणि संवत्सराणि यावदाचार्यत्वादीनि न कल्पन्त इति वचना**दित्वरमपात्रमुक्तम्**, इदं पुनः सूत्रसप्तकेनाभिधीय-

मानमपात्रं **यावत्कथितकम्** बहुशो मायासेविनो यावज्जीवमाचार्यत्वादीनि न कल्पन्ते इति वक्ष्यमाणात् ॥ १६१७॥

**अहवा एगहिगारो, उद्देसो तइयओ उ ववहारे।**
**केरिसतो आयरिओ, ठविज्जइ केरिसो नेति? ॥ १६१८ ॥**

**अथवेति** सम्बन्धस्य प्रकारान्तरतोपदर्शने, **व्यवहारे तृतीयोद्देशकाधिकारे** यथा **कीदृश आचार्यः स्थाप्यते? कीदृशो न** ? तत्र यादृशः स्थाप्यो यादृशश्च न स्थाप्यः तादृश उक्तः, अयमन्यो न स्थाप्यत इति प्रतिपादनार्थमेष सूत्रसप्तकारम्भः॥ १६१८॥

**अहवा दीवगमेयं, जह पडिसिद्धो अभिक्खमाइल्लो।**
**सागारिसेवि एवं, अभिक्खओहावणकारी य ॥ १६१९॥**

**अथवेति** पूर्ववत् **दीपकमेतत्** सूत्रसप्तकम्, पूर्वसूत्रेष्वधिकार्थोद्दीपनार्थमिदं सूत्रसप्तकमधिकमेवार्थमुपदर्शयति— **यथाऽनेन** सूत्रसप्तकेन **अभीक्ष्णमायी** बहुशो मायावी यावज्जीवमाचार्यत्वादिषु पदेषु **प्रतिषिद्धस्तथा मैथुन**सूत्रपञ्चकमध्ये यो **भिक्षु**सूत्रे **निक्षेपण**सूत्रद्वये च

**सागारिकसेवी** मैथुनप्रतिसेवी संवत्सरत्रयातिक्रमे योग्य उक्तः। सोऽ**प्येव**मभीक्ष्ण-**सागारिकसेवी** सन् यावज्जीवं प्रतिषिद्धो द्रष्टव्यः। तस्यापि यावज्जीवमाचार्यत्वादीनि न कल्पन्ते इति भावः। तथा अवधावनसूत्रपञ्चकेऽपि यो भिक्षुसूत्रे निक्षेपणसूत्रद्वये च वर्षत्रयातिक्रमेण योग्य उक्तः सोऽपि यदि **अभीक्ष्णमवधावनकारी** भवति ततस्तस्यापि यावज्जीवमाचार्यत्वादिपदप्रतिषेधः ॥१६१९॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या-

**भिक्षुर्**बहु श्रुतं सूत्रं यस्यासौ **बहुश्रुतः**। तथा बहुः आगमोऽर्थपरिज्ञानं यस्य स **बह्वागमः**। तथा कुलप्राप्तं गणप्राप्तं सङ्घप्राप्तं वा यत्सचित्तादिकं व्यवहारेण छेत्तव्यं कार्यं तथा आगाढागाढं कारणं, तेषु **आगाढागाढेषु कारणेषु बहुषु**-प्रभूतेषु **बहुशः** अनेकप्रकारं **मायी** मायावान् **मृषावादी अशुचिः** आहाराद्यर्थमव्यवहारकारी **पापजीवी** कोण्टलाद्याजीवी तस्य **यावज्जीवं** तत्प्रत्ययं मायित्व-मृषावादित्वादिप्रत्ययं न कल्पते **आचार्यत्वं वा यावद् गणावच्छेदित्वं** वा **उद्देष्टुं वा** अनुज्ञातुं स्वयं वा **धारयितुम्**। एष प्रथमसूत्रसङ्क्षेपार्थः॥

एवं गणावच्छेदकसूत्रम् **आचार्योपाध्यायसूत्रं** च भावनीयम्। पाठोऽपि सुप्रतीतः॥



For Private and Personal Use Only

यथा च त्रीणि सूत्राणि एकत्वेनोक्तानि एवं त्रीणि सूत्राणि बहुत्वेऽपि वक्तव्यानि।। सप्तमं बहुभिक्षु-बहुगणावच्छेदि-बह्वाचार्यविषयं, तदपि तथैव। अत्र **भाष्यकृदाह—**

**एगत्त-बहुत्ताणं, सव्वेसिं तेसिमेगजातीणं।**
**सुत्ताणं पिंडेणं, वोच्छं अत्थं समासेणं ॥ १६२० ॥**

**एकत्वबहुत्वानां** [एकत्व-बहुत्वादि]सम्बन्धिनां **सर्वेषामेतेषां सूत्राणामेकजातीयानाम्** एकप्रकाराणां **पिण्डेन समासेन अर्थं वक्ष्ये,** एकजातीयतया पिण्डेनाप्युक्तौ वैविक्त्येन प्रतीतेः ॥ १६२० ॥

तत्र प्रथमत एकत्वबहुत्वविषयावाक्षेपपरिहारावाह—

**एगत्तियसुत्तेसुं भणिएसुं किं पुणो बहुग्गहणं।**
**चोयग! सुणसू इणमो, जं कारण मो बहुग्गहणं ॥ १६२१ ॥**

एकत्वेन एकवचनेन निर्वृत्तानि एकत्विकानि तेषु **एकत्विकेषु** सूत्रेषु **भणितेषु** किं **पुनर्बहु-ग्रहणं** बहुत्वविशिष्टसूत्रचतुष्टयोपादानं ? सूरिराह— **यत्कारणं** येन कारणेन **मो** इति पादपूरणे

**बहुग्रहणं** बहुत्वविशिष्टसूत्रोपादानं तत्कारणमिदं हे **चोदक! शृणु**।।१६२१॥

तदेवाह—

**लोगम्मि सयमवज्झं, होइ अदंडं सहस्स मा एवं।**
**होहिति उत्तरियम्मि, वि सुत्ता उ कया बहुकए वि ॥ १६२२ ॥**

**लोके** बहुभिरकृत्ये सेवितेऽयं न्यायः- "**शतमवध्यं, सहस्रमदण्ड्यं,**" तत **एवमौत्तरिकेऽपि** लोकोत्तरिकेऽपि व्यवहारे प्रसङ्गो **मा भूद्** इति तत्प्रतिषेधार्थं चत्वारि **सूत्राणि बहुकेऽपि** बहुवचने **कृतानि** ॥ १६२२॥

साम्प्रतमागाढागाढकारणादीनि[1] पदानि व्याचिख्यासुराह—

**कुल-गण-संघपत्तं, सचित्तादी उ कारणागाढं।**
**छिद्दाणि निरिक्खंतो, मायी तेणेव असुती उ ॥ १६२३ ॥**

१. °गाढानागाढ° पु. प्रे. ॥

सचित्तनिमित्तो अचित्तनिमित्तो मिश्रनिमित्तो वा यो व्यवहारः कुले क्षिप्तः 'यथेदं सचित्तादिकं विवादास्पदीभूतं कुलेन छेत्तव्यमिति तत्**कुल**प्राप्तम्, एवं **गण**प्राप्तं **सङ्घप्राप्तं** च भावनीयम्। तत्र यत्**सचित्तादिकं** विवादास्पदीभूतं व्यवहारेण छेद्यतया कुलप्राप्तं वा गणप्राप्तं वा संघप्राप्तं वा तत्**कारणागाढं** आगाढागाढकारणम्। तथा कथमहमेनं व्यवहारमाहाराद्युपग्रहे वर्तमानं हितेप्सितं छिन्द्याम् इति बुद्ध्या परेषां **छिद्राणि निरीक्षमाणो मायी तेनैव** मायित्वेनैव च सो**ऽशुचिः** ॥ १६२३ ॥

तमेवाशुचिं द्रव्यभावभेदतः प्ररूपयति—

**दव्वे भावे असुती, भावे आहारवंदणादीहिं।**
**कप्पं कुणति अकप्पं , विविहेहि य रागदोसेहिं ॥ १६२४ ॥**

**अशुचिर्द्विधा द्रव्यतो भावतश्च**। तत्र योऽशुचिना लिप्तगात्रो यो वा पुरीषमुत्सृज्य पुतौ न निर्लेपयति स द्रव्यतोऽशुचिः,**भावे** भावतः पुनरशुचि**राहारवन्दनादिभिर्विविधैर्वा रागद्वेषैः कल्प्यमप्यकल्प्यं करोति।** किमुक्तं भवति ?–आहारोपधि–शय्यादिनिमित्तं वन्दन-नीचैर्वृत्त्यादिना

वा तोषितः, यदि वा 'एष मम स्वगच्छसम्बन्धी स्वकुलसम्बन्धी स्वगणसम्बन्धी' इति रागतः अथवा 'न मामेष वन्दते विरूपं वा भाषितवान्' इत्यादि द्वेषतो यः श्रुतोपदेशेनाऽऽभाव्यमनाभाव्यं करोति अनाभाव्यमप्याभाव्यं सोऽव्यवहारी भावतोऽशुचिः ॥१६२४॥

एतदेव सुव्यक्तमाह—

**दव्वे भावे असुती, दव्वम्मि विट्ठमादिलित्तो उ।**
**पाणतिवातादीहि उ भावम्मि उ होइ असुती उ ॥ १६२५ ॥**

**अशुचिर्द्विधा-द्रव्ये भावे** च। तत्र **द्रव्ये विष्टादिना लिप्तः**, आदिशब्दान्मूत्रश्लेष्मादिपरिग्रहः। **भावे प्राणातिपातादिभिर्भवत्यशुचिः** ॥ १६२५॥

**तप्पत्तीयं तेसिं , आयरियादी न देंति जाजीवं।**
**के पुण ते? भिक्खु इमे, अबहुस्सुयमादिणो हुंति ॥ १६२६ ॥**

**तत्प्रत्ययं** मायावित्वादिप्रत्ययं तेषां भिक्षुप्रभृतीनां **यावज्जीवम् आचार्यादीनि** भावप्रधानोऽयं निर्देशः, आचार्यत्वादीनि **न ददति। के पुनस्ते?** तत आह-**भिक्षवः,**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपलक्षणमेतत्, गणावच्छेदकाऽऽचार्योपाध्यायाश्च सूत्रोक्ता न केवलमेते किन्त्विमे **अबहुश्रुतादयो भवन्त्याचार्यादिपदानामनर्हाः** ॥ १६२६ ॥ तानेव **निर्युक्तिकृदाह**—

**अबहुस्सुते१ य ओमे२, पडिसेवते३ अयते४ अप्पचिंते य ५।**
**निरवेक्खद६पमत्ते७ मायी, अणरिहे९ जुंगिए१० चेव ॥ १६२७ ॥**

**अबहुश्रुतः अवमः प्रतिसेवकः अयतः आत्मचिन्तकः निरपेक्षः प्रमत्तो मायी अनर्हो जुङ्गिकश्च।** एते सूरित्वादिपदानामनर्हाः ॥ १६२७ ॥

साम्प्रतमेनामेव व्याचिख्यासुराह—

**अबहुस्सुतो पकप्पो, अणहीओ१मो उ तिवरिसारेणं २।**
**निक्कारणे वि भिक्खू कारण पडिसेवि अजतो उ ३/४ ॥ १६२८ ॥**

**अब्भुज्जयनिच्छियओ-ऽप्पचिंतो५ निरवेक्खो बालमायीसु ६।**
**अन्नयर पमायजुतो, असच्चरुइ होइ मायी उ ८॥ १६२९ ॥**



For Private and Personal Use Only

**अवलक्खणा अणरिहा, अच्चाबाहादिया य जे वुत्ता९।**
**चउरो य जुंगिया खलु१०, अच्चंतिय भिक्खुणो एते ॥ १६३०॥**

**अबहुश्रुतो** नाम येन आचार**प्रकल्पो** निशीथाध्ययननामकः सूत्रतोऽर्थतश्च **नाधीतः** १। **अवमो** नाम **त्रिवर्षारतो** यस्य प्रव्रज्यापर्यायेण त्रीणि वर्षाणि नाद्यापि परिपूर्णानि भवन्तीत्यर्थः२। प्रतिसेवको नाम यो **भिक्षुः निष्कारणे** कारणाभावे**ऽपि** पञ्चकादीनि प्रायश्चित्तस्थानानि प्रतिसेवते३। **अयतो** नाम यः **कारणे** समुत्पन्नेऽयतनया **प्रतिसेवते** ४। ॥ १६२८ ॥ **आत्मचिन्तको योऽभ्युद्यतविहारमभ्युद्यत**मरणं वा प्रतिपत्तुं **निश्चितो** निश्चितवान् ५**निरपेक्षो बालादिषु** बाल-वृद्धाऽसह - ग्लानादिषु चिन्तारहितः६, प्रमत्तः पञ्चानां प्रमादानाम**न्यतरेण प्रमादेन युक्तः** ७। असत्ये मृषाभाषणे असंयमे वा रुचिर्यस्यासाव**सत्यरुचिः** स **भवति मायी,** किमुक्तं भवति-अभीक्ष्णं मायाप्रतिसेवनशीलो मायीति८,॥ १६२९॥ **अपलक्षणा** येषामाचार्यलक्षणानि न विद्यन्ते **ये** च पूर्व**मुक्ता अत्याबाधादय** एते सर्वे**ऽनर्हाः**९। **जुङ्गिका** जातिकर्म-शिल्प-शरीरभेदत**श्चतुर्धा**, एतेऽपि प्रागुक्ताः१०। **एते** सर्वेऽपि **भिक्षवोऽत्यन्त**माचार्यत्वादिपदानामनर्हाः यदि पुनरबहुश्रुतोऽपि बहुश्रुतो भवेत्, अवमोऽपि त्रिवर्षपर्यायोत्तीर्णः,

प्रतिसेवकोऽप्यप्रतिसेवकोऽयतोऽप्ययतनातः प्रतिविरतः, निरपेक्षः सापेक्षीभूतः, प्रमत्तोऽप्यप्रमत्ततामुपगतस्तदा भवन्त्येतेऽप्याचार्यत्वादिपदानां योग्याः। सम्प्रति सप्तानामपि सूत्राणां सम्भवविषयमाह—

**अहवा जो आगाढं, वंदणआहारमादिसंगहितो।**
**कप्पं कुणइ अकप्पं, विविहेहिं य रागदोसेहिं ॥ १६३१ ॥**
**मायी कुणइ अकज्जं, को मायी जो भवे मुसावाई**
**को य पुण मुसावाई असुई को पावसुयजीवी ॥ १६३२ ॥**

**अथवे**ति सूत्रव्याख्याप्रकारान्तरोपदर्शने, **यो वन्दनादिभिः** वन्दनवैयावृत्त्यादिना **आहारादिभिः** आहारोपधिशय्यादिभिः **आगाढमत्यर्थं सङ्गृहीतः** सन् **विविधैश्च रागद्वेषैः** प्रागुक्तस्वरूपैः **कल्प्यम**पि आभाव्यमपि **अकल्प्यम्** अनाभाव्यं **करोति**। स सप्तानामपि सूत्राणां विषयः **माई कुणइ** इत्यादिकः , पुनरेव**मकार्य**माभाव्यमप्यनाभाव्यमित्यर्थः करोति। एवं शिष्यस्य मायी मायावान् **को मायी**? तत आह— **यो भवेत् मृषावादी। कः पुनर्मृषावादी**? तत आह— **अशुचिः। कोऽशुचिः**? पापजीवी एतस्य व्याख्यानं

**पापश्रुतोपजीवी** कोण्टलादिशास्त्रोपजीवीत्यर्थः ॥ १६३१ ॥ ॥१६३२ ॥

**किह पुण कज्जमकज्जं, करेज्ज आहारमादिसंगहितो ?।**
**जह कम्मि वि नगरम्मी, उप्पण्णं संघकज्जं तु ॥ १६३३ ॥**

**कथं पुनराहारादिसङ्गृहीतः** सन् **कार्यमकार्यम्?** उपलक्षणमेतत्, अकार्यमपि कार्यं **करोति**?। अत्र सूरिर्निदर्शनमाह-**यथा कस्मिन्नपि नगरे** किमपि **सङ्घकार्यमुत्पन्नं** सचित्तादि-निमित्तं, वास्तव्यसङ्घस्य व्यवहारो जात इत्यर्थः। स च वास्तव्यसङ्घेन छेत्तुं न शक्यते ॥१६३३ ॥

**बहुसुयबहुपरिवारो, य आगतो तत्थं[1] कोइ आयरितो।**
**तेहिं य नागरगेहिं, सो उ निउत्तो उ ववहारे ॥ १६३४ ॥**



अन्यदा **कोऽप्याचार्यो बहुश्रुतो बहुपरिवारस्तत्र** नगरे समागतः। **स च तैर्नागरिकै**र्नगरवास्तव्येन सङ्घेनेत्यर्थः **नियुक्तो व्यवहारे** बहुश्रुतस्त्वम्, अत एनं व्यवहारं छिन्द्धि।

१. ॰त्थ एगु आ॰ खं. ॥

**नाएण छिन्ने ववहारे, कुलगणसंघेण कीरइ पमाणं।**
**तो सेविउं पवत्ता, आहारादीहि कज्जीया ॥ १६३५ ॥**

एवमुक्ते तेन **न्यायेन** श्रुतोपदेशेन **व्यवहारश्छिन्नः**, ततः **कुल-गण-सङ्घेन** स **प्रमाणं क्रियते**। एष बहुश्रुतो न च श्रुतोत्तीर्णं किमपि वदति, तस्माद् यदेष भाषते तत्प्रमाणमिति। एवं च प्रमाणीकृते तस्मिन् श्रावक-सिद्धपुत्रादयः **कार्यिकाः** तत्कार्यार्थिनः सन्तस्त-**माहारादिभिः सेवितुं प्रवृत्ताः**, स च तान्याहारादीनि दीयमानानि गृह्णाति ॥ १६३५ ॥

**तो छिंदिउं पवत्तो, निस्साए तत्थ सो उ ववहारं।**
**पच्चत्थीहिँ नायं, जह छिंदइ एस निस्साए ॥ १६३६ ॥**

**ततः** आहारादिग्रहणानन्तरं **स तत्र** नगरे **व्यवहारं निश्रया** पक्षपातेन **छेत्तुं प्रवृत्तः**। ततो ये आहारादिकं न दत्तवन्तस्ते तस्य प्रत्यर्थिनस्तैः **प्रत्यर्थिभिर्ज्ञातं यथा-एष** व्यवहारं **निश्रया छिनत्ति** ॥ १६३६ ॥

ततस्ते प्रत्यर्थिनश्चिन्तयन्ति—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



को णु हु हवेज्ज अन्नो, ? जो नाएणं नएज्ज ववहारं।
अह अन्नय समवाओ, घुट्ठो वा आयो य तत्थ विदू ॥ १६३७॥

को नु हुः निश्चितं भवेदन्यो गीतार्थो यो न्यायेन व्यवहारं नयेत्?। अथान्यदा सचित्तादिव्यवहारच्छेदार्थं सङ्घसमवायो घुष्टो घोषितः, सङ्घसमवायघोषणं च श्रुत्वा तत्र सङ्घसमवाये विदू विद्वान् सूत्रार्थतदुभयकुशलोऽन्यः प्राघूर्णकः कोऽपि समागतः ॥ १६३७॥

इह समवायघोषणामाकर्ण्य धूलीधूसरैरपि पादैरवश्यमागन्तव्यम् अन्यथा प्रायश्चित्तमित्येतदधुना प्रतिपादयति—

घुट्ठंमि संघकज्जे, धूलीजंघो वि जो न एज्जाहि।
कुल-गण-संघसमवाए, लग्गति गुरुगे चउम्मासे ॥ १६३८ ॥
जं काहिंति अकज्जं , तं पावइ सइ बले अगच्छंतो।
अण्णाइं ताव[१] ओहाणमादि जं कुज्ज तं पावे ॥ १६३९ ॥

१. ताव तोहाण॰ सर्वेष्वपि टीकादर्शेषु ॥



For Private and Personal Use Only

**घुष्टे** घोषिते **सङ्घकार्ये** सङ्घसमवाये **धूलीजङ्घोऽपि,** आस्तामन्य इत्यपि शब्दार्थः। धूल्या धूसरे जङ्घे यस्य स धूलीजङ्घः, शाकपार्थिवादिदर्शनात् मध्यपदलोपी समासः। सङ्घसमवायघोषणामाकर्ण्य प्राघूर्णकेनापि पादलग्नायामपि धूलावप्रमत्ततया त्वरितमवश्यमागन्तव्यम् इतिज्ञापनार्थं धूलीजङ्घोऽपीत्युपादानम्। **सति बले यो न आगच्छेत् कुलसमवाये गणसमवाये सङ्घसमवाये** वा स **गुरुके चतुर्मासे लगति,** तस्य गुरुकाश्चत्वारो मासाः प्रायश्चित्तमिति भावः ॥१६३८॥ न केवलमेतत् किन्त्वन्यदपि तथा चाह– **जं काहिंति** इत्यादि, **सति बले अगच्छन्** व्यवहारोच्छेदे कार्यकारणतो वाऽन्यैरन्यथाछिन्ने व्यवहारे **यदकार्यं** ते व्यवहारार्थिनः **करिष्यन्ति तत् प्राप्नोति,** तन्निमित्तमपि प्रायश्चित्तं तस्यापद्यते इत्यर्थः। **अन्यदपि** चापमानवशतो यदवधावनादि **कुर्यात् तदपि प्राप्नोति** ॥ १६३९ ॥

**तम्हा उ संघसद्दे, घुट्ठे गंतव्व धूलिजंघेण।**
**धूलीजंघनिमित्तं, ववहारो उट्ठितो सम्मं ॥ १६४० ॥**

यत एवमनागमने दोषा**स्तस्मात्सङ्घशब्दे घुष्टे** घोषिते **धूलीजङ्घेना**प्यवश्यं सति बले गन्तव्यम्। यतः कदाचिद् **धूलीजङ्घनिमित्तं व्यवहारः सम्यगुत्थितो** भवेत् , यथा प्राघूर्णको

गीतार्थो धूलीजङ्घः समागतः सन् यद् भणिष्यति तत्प्रमाणमिति ॥ १६४० ॥

**तेण य सुयं जहेसो, तेल्ल-घयादीहिं संगहीतो उ।**
**कज्जाइं नेइ वितहं, मायी पावोवजीवी उ॥ १६४१ ॥**

**तेन च** धूलीजङ्घेनाऽऽगच्छतैव कस्यापि पार्श्वे **श्रुतं यथा-एष** वास्तव्यो व्यवहारच्छेत्ता **तैल-घृतादिभिः सङ्गृहीतः** सन् **मायी** अभीक्ष्णं मायाप्रतिसेवी **पापोपजीवी** कोण्टलाद्युपजीवी **वितथम्** उत्सूत्रं **कार्याणि नयति** ॥ १६४१ ॥

**सो आगतो उ संतो, वितहं दट्ठूण तत्थ ववहारं।**
**समयेण निवारेई, कीस इमं कीरइ अकज्जं ॥ १६४२ ॥**

एवं श्रुत्वा **स समागतः सन्** तूष्णीकस्तावदास्ते यावदुत्सूत्रेण निर्दिश्यमानं व्यवहारं पश्यति तं च तथाभूतं **तत्र वितथं व्यवहारं दृष्ट्वा समयेन** सिद्धान्तेन **निवारयति,** यथा **कस्मादिदमकार्यं क्रियते ?** ॥१६४२॥ न केवलमेवं निवारयति किन्त्वेतदपि वक्ति-

**निद्धमहुरं निवायं, विणीयमविजाणएसु जंपंतो।**
**सचित्तखेत्तमीसे, अत्थधर निहोडणा विहिणा ॥ १६४३ ॥**

**सचित्त**निमित्तव्यवहारे **खेत्त**त्ति क्षेत्रनिमित्ते व्यवहारे ये दुर्व्यवहारिणस्तेषां प्रतिभेदनिमित्तं **अविजाणएसु**त्ति येऽपि च साधवो न जानन्ति यथा घृताद्यनुवृत्त्या वितथमेते व्यवहरन्ति, तेष्वविजानत्सु विज्ञाननिमित्तमेवं जल्पति- 'अहो स्निग्धो व्यवहारः'। किमुक्तं भवति?- तैलघृतादिसङ्गृहीता एवमेते अन्यथा व्यवहरन्तीति। अथ गुड-खण्ड-शर्करादिभिः गृहीता वितथव्यवहारिणः, ततो जल्पति- 'अहो! मधुरो व्यवहारः'। यदि पुनरुपाश्रयो निवातो लब्धः शीतप्रावरणानि वेति वितथं व्यवहरन्ति। तत 'अहो निवातो व्यवहारः'। अथ कृतिकर्म-विनयादिभिः सङ्गृहीतास्ततो ब्रूते - 'अहो विनीतो व्यवहारः'। एवं **स्निग्धं मधुरं निवातं विनीतं व्यवहारं जल्पन्** सो**ऽर्थधर**स्तेषां दुर्व्यवहारिणां **विधिना** सूत्रोपदेशेन **निहोडणां** निवारणां करोति ॥ १६४३॥

**एवं चेव य सुत्तं, उच्चारेउं दिसं अवहरंति।**
**अप्पावराह आउट्ट, दाण इयरे उ जाजीवं ॥ १६४४ ॥**

**एवं** निहोडणं कृत्वा एतदेवाधिकृतं **सूत्रं** सप्तसूत्रात्मक**मुच्चार्य दिशम्** आचार्यत्वादिक**मपहरन्ति** उद्दालयन्ति, अथ सोऽल्पापराधः **प्रत्यावृत्त**श्च तदा **दाण**त्ति तस्य दिक् पुनर्दीयते। **इयरे उ** इति सप्तमी षष्ठ्यर्थे इतरस्य त्वनावृत्तस्य आवृत्तस्य वा बहुदोषस्य **यावज्जीवमा**चार्यत्वादिका दिक् न दीयते।

**एवं ताव बहूसुं, मज्झत्थेसुं तु सो उ ववहरति।**
**अह होज्ज बली इयरे, तो बेइ उ तत्थिमं वयणं ॥ १६४५ ॥**

**एवम्** अनन्तरोदितेन प्रकारेण **तावद्बहुषु मध्यस्थेषु** सत्सु **सो**ऽर्थधरो **व्यवहरति। अथ भवेयुरितरे** दुर्व्यवहारिणो बहुत्वेन **बलीयांसः**। ततस्तत्रान्यथा व्यवहारच्छेदे क्रियमाणे **इदं** वक्ष्यमाणं **ब्रूते** ॥ १६४५॥

तदेवाह—

**रागेण व दोसेण व, पक्खग्गहणेण एक्कमेक्कस्स।**
**कज्जंमि कीरमाणे, किं अच्छति संघो मज्झत्थो ?॥ १६४६ ॥**

**रागेण वा एकस्य पक्षस्य ग्रहणेन द्वेषेण वा एकस्य** पक्ष[स्य] अग्रहणेन **कार्ये क्रियमाणे** वितथे व्यवहारे छिद्यमाने **किं सङ्घो मध्यस्थस्तिष्ठति?**॥ १६४६॥

**रागेण व दोसेण व, पक्खग्गहणेण एक्कमेक्कस्स।**

**कज्जंमि कीरमाणे, अण्णो वि भणाउ ता किंचि ॥ १६४७ ॥**

**रागेण व एकस्य पक्षस्य ग्रहणेन द्वेषेण वा एकस्य** पक्ष[स्य] अग्रहणेन **कार्ये क्रियमाणे ततस्तस्मात् किञ्चिदन्योऽपि भणतु** ॥ १६४७॥

**बलवंतेसेवं वा, भणाति अण्णो वि लभति को एत्थ।**

**वोत्तुं जुत्तमजुत्तं?, उताहु नवि लब्भतेऽण्णस्स? ॥ १६४८ ॥**

**बलवत्सु** सर्वेषु वा दुर्व्यवहारिषु **एवं** वक्ष्यमाणरीत्या **भणति**। तामेवाह- अत्र अस्मिन् सङ्घसमवाये **युक्तमयुक्तं वा वक्तुमन्योऽपि कश्चिल्लभते उताहोऽन्यस्य** वक्तुं **न लभ्यते?** अन्यो न लभते इत्यर्थः ॥ १६४८॥

**जति बेंति लब्भते ऊ बेहि तुमं जं तु जाणसी जुत्तं।**

**तो अणुमाणेऊणं बिंति तहिं नायतो सो उ ॥ १६४९॥**

**यदि ब्रुवते-लभ्यते**ऽन्येनापि वक्तुम्, अतस्त्वमपि **यज्जानासि** वक्तुं तद् **ब्रूहि**। तत एवमुक्ते तां पर्षद**मनुमान्य** सम्यक् क्षमयित्वा **तत्र न्यायतः स ब्रूते** ॥ १६४९॥

कथमनुमान्य? इत्यनुमानप्रकारमाह—

**संघो महाणुभागो, अहं च वेदेसिओ इहं भयवं।**

**संघसमितिं न जाणे, तं भे सव्वं खमावेमि ॥ १६५० ॥**

**सङ्घो महानुभागो** ऽचिन्त्या शक्तिरस्येति महानुभागः **अहं च वैदेशिको** विदेशवर्ती **इह** अस्मिन् स्थाने **भगवतीं सङ्घसमितिं** सङ्घमर्यादां **न जाने, ततो** युक्तमयुक्तं वा वक्तुं **सर्वं भे** भवतः **क्षमयामि** ॥ १६५०॥

यतः—

**देसे देसे ठवणा, अण्णण्णा अत्थ होइ समितीणं।**

**गीयत्थेहाऽऽइण्णा, अदेसिओ तं न जाणामि ॥ १६५१ ॥**

**समितीनां** सङ्घमर्यादानां **स्थापना गीतार्थैराचीर्णा अत्र** जगति **देशे देशेऽन्यान्या भवति**। ततोऽह**मदेशिक** इहत्यां सङ्घमर्यादां स्थापनां **न जानामि**॥ १६५१ ॥

ततः क्षमयत श्रुतोपदेशेनाहमपि किञ्चिद्वक्ष्ये—

**अणुमाणेउं संघं, परिसग्गहणं करेइ तो पच्छा।**
**किह पुण गेण्हइ परिसं?, इमेणुवाएण सो कुसलो ॥ १६५२ ॥**

एवं **सङ्घमनुमान्य** सम्यक् क्षमयित्वा ततः **पश्चात्पर्षद्ग्रहणं करोति**। शिष्यः प्राह— **कथं पुनः पर्षदं गृह्णाति**? सूरिराह— **स कुशलो** दक्षो**ऽनेनोपायेन** गृह्णाति, समीचीनामसमीचीनां वा जानाति॥१६५२॥

तमेवोपायमाह—

**परिसा ववहारिया, मज्झत्था रागदोसनीहूया।**
**जइ होंति दो वि पक्खा, ववहरिउं तो सुहं होइ ॥ १६५३ ॥**

**पर्षन्नाम व्यवहार्यौ द्वावपि पक्षौ**। तौ ब्रूते- **यदि द्वावपि पक्षौ मध्यस्थौ** भवतः। मध्यस्थता राग-द्वेषाऽकरणतो भवति, तत आह-निभृतौ निर्व्यापारौ राग-द्वेषौ ययोस्तौ **रागद्वेषनिभृतौ** क्तान्तस्य पाक्षिकः परनिपातः, सुखादिदर्शनात्। ततः **सुखं व्यवहरितुं** व्यवहरणं **भवति**॥ १६५३॥

एवं पर्षद्ग्रहणं कृत्वा ये दुर्व्यवहारिणस्तान्निक्षिपन्निदमाह—

**ओसन्नचरण-करणे सच्चव्ववहारया दुसद्दहिया।**
**चरण-करणं जहंतो सच्चव्ववहारयं जहइ ॥ १६५४ ॥**

अवसन्ने शिथिलतां गते चरणकरणे व्रतश्रमणधर्मादि-पिण्डविशोधिसमित्यादिरूपे यस्य सोऽ**वसन्नचरण-करणः**, तस्मिन् **सत्यव्यवहारता** यथावस्थितव्यवहारकारिता **दुःश्रद्धेया**। यत**श्चरण-करणं जहन्** त्यजन् **सत्यव्यवहारतामपि जहाति** ॥ १६५४॥

**जइया णेणं चत्तं, अप्पणतो नाण-दंसण-चरित्तं।**
**तइया तस्स परेसुं, अणुकंपा नत्थि जीवेसु ॥ १६५५ ॥**

**यदाऽनेनात्मनः** सम्बन्धि **ज्ञान-दर्शन-चारित्रं त्यक्तं तदा तस्य परेषु जीवेष्वनुकम्पा नास्ति,** यस्य ह्यात्मनो दुर्गतौ प्रपततो नानुकम्पा तस्य कथं परेष्वनुकम्पा भवेद्? इति भावः ॥ १६५५ ॥

**भवसयसहस्सलद्धं, जिणवयणं भावतो जहंतस्स।**
**जस्स न जायं दुक्खं, न तस्स दुक्खं परे दुहिते ॥ १६५६ ॥**

**यस्य भवशतसहस्त्रैः** कथमपि **लब्धं जिनवचनं भावतः** परमार्थतो **जहतस्त्यजतो दुःखं न जातं, न तस्य परे दुःखिते दुःखं,** यस्य ह्यात्मन्यपि दुःखिते न पीडा तस्य परे दुःखिते कथं स्यात्? इति भावः ॥ १६५५ ॥

**आयारे वट्टंतो, आयारपरूवणे असंकियओ।**
**आयारपरिब्भट्ठो, सुद्धचरणदेसणे भइतो ॥ १६५७ ॥**

**आचारे वर्तमानः** खलु **आचारप्ररूपणे अशङ्क्योऽ**शङ्कनीयो भवति, यः पुनराचार-**परिभ्रष्टः** स **शुद्धचरणदेशने** यथावस्थितचरणप्ररूपणासु **भक्तो** विकल्पितः शुद्धचरण-

प्ररूपणाकारी भवति वा न वेत्यर्थः ?॥ १६५७॥

एवं दुर्व्यवहारिणामाक्षेपे कृते ते ब्रूयुः 'वयमप्रमाणीकृता युष्माभिः ?'। ततः स गीतार्थः प्राह—

**तित्थयरे भगवंते, जगजीववियाणए तिलोगगुरू।**
**जो न करेइ पमाणं, न सो पमाणं सुयधराणं ॥ १६५८ ॥**

**तीर्थकरान् भगवतो जगज्जीवविज्ञायकान्** सर्वज्ञानित्यर्थः **त्रिलोकगुरून् यो न करोति प्रमाणं न स प्रमाणं श्रुतधराणाम्** ॥१६५८॥

**तित्थयरे भगवंते, जगजीववियाणए तिलोयगुरू।**
**जो उ करेइ पमाणं, सो उ पमाणं सुयहराणं ॥१६५९॥**

**तीर्थकरान् भगवतः जगज्जीवविज्ञायकान्** सर्वज्ञानित्यर्थः, **यस्तु करोति प्रमाणं स प्रमाणं श्रुतधराणाम्** ॥१६५९॥

एवं धूलीजङ्घेन दुर्व्यवहारिषूपालब्धेषु ते ब्रूयुरेवं सङ्घमप्रमाणीकुरुथ यूयमिति। ततः स प्राह—

**संघो गुणसंघातो, संघायविमोयगो य कम्माणं।**
**राग-द्दोसविमुक्को, होइ समो सव्वजीवाणं ॥ १६६० ॥**

**सङ्घो** नाम यो **गुणानां** मूलगुणानामुत्तरगुणानां च **सङ्घातः** सङ्घातात्मकः। गुणसङ्घातात्मकत्वादेव च **कर्मणां** ज्ञानावरणीयादीनां सङ्घाताद्विमोचयति प्राणिन इति **सङ्घातविमोचकः**। तथा **रागद्वेषविमुक्तः**, आहारादिकं ददत्सु रागाऽकारी तद्विपरीतेषु द्वेषाऽकारीत्यर्थः। अत एव **भवति समः सर्वजीवानाम्**। स इत्थम्भूतो नाप्रमाणीकर्तुं शक्यते, श्रुतोपदेशेन व्यवहरणात् ॥१६६०॥

किञ्चान्यत्—

**परिणामियबुद्धिए, उववेतो होइ समणसंघो उ।**
**कज्जे निच्छयकारी, सुपरिच्छियकारगो संघो ॥ १६६१ ॥**

पारिणामिकी चासौ बुद्धिश्च **पारिणामिकबुद्धिः**, तया **उपेतो** युक्तो **भवति श्रमणसङ्घः**। तथा कार्ये दुर्गेऽपि समापतिते यत् श्रुतोपदेशबलेन सम्यग्निश्चितं, तत्करणशीलः कार्ये **निश्चितकारी**, तथा सुष्ठु देश-काल-पुरुषौचित्येन श्रुतबलेन च परीक्षितं **सुपरीक्षितं** तस्य **कारकः सङ्घः**, न यथाकथञ्चनकारी ॥ १६६१॥

**किह सुपरिच्छियकारी, एक्कसि दो तिण्णि वावि पेसविए।**
**नवि निक्खिवए सहसा, को जाणइ नाऽऽगतो केण? ॥ १६६२ ॥**

**कथं** केन प्रकारेण **सुपरीक्षितकारी** ? उच्यते-इहार्थिना सङ्घप्रधानस्य समीपे सङ्घसमवायो याचितस्तेन चाऽऽज्ञप्तः सङ्घमेलापककारी 'सङ्घस्त्वया मेलनीयः'। तत्र च प्रत्यर्थी कुतश्चित्कारणान्नाऽऽगच्छति ततो मानुषं प्रेषणीयं, सङ्घस्त्वां शब्दयति, स नाऽऽगतस्ततो द्वितीयमपि वारं मानुषं प्रेषयति, तथापि नाऽऽगच्छति तत्राऽपरिणामिका ब्रुवते- उद्घाट्यतामेष, गीतार्थास्त्वाहुः-पुनः प्रेष्यतां गीतार्थं मानुषं, केन कारणेन नाऽऽगच्छति ?। किं परिभवेन उत भयेन ? तत्र यदि भयेन नाऽऽगच्छति ततो वक्तव्यं -'मा भैस्त्वं परित्राणकारी खलु

भगवान् श्रमणसङ्घ इति। अथ परिभवेन तत उद्घाट्यते। एवं सुपरीक्षितकारी। तथा चाह- **एकं द्वौ त्रीन् वा वारान् मानुषे प्रेषितेऽ**पि तमनागच्छन्तं **सहसा** सङ्घो न **निक्षिपति** न सङ्घबाह्यं करोति, यत एवं पर्यालोचयति-**को जानाति** न ज्ञायते इत्यर्थः, **केन** कारणेन **नाऽऽगत** इति॥ १६६२॥

**नाऊण परिभवेण, नागच्छंते ततो उ निज्जुहणा।**
**आउट्टे ववहारो, एवं सुविणिच्छकारी उ ॥ १६६३ ॥**

**परिभवेन नाऽऽगच्छति इति ज्ञात्वा** तस्मिन्ननागच्छति **ततः** सङ्घा**न्निर्यूहणा** निष्काशनं कर्त्तव्यम्। अथ शठतामपाकृत्य स प्रत्यावर्तते, प्रत्यावृत्तश्च सङ्घं प्रसादयति ततस्तस्मि**न्नावृत्ते व्यवहारो** दातव्यः। **एवं सुविनिश्चितकारी** सङ्घः ॥१६६३॥

यस्तु भीतो नागच्छति तं प्रतीदं वक्तव्यम्—

**आसासो वीसासो, सीयघरसमो य होइ मा भाहि।**
**अम्मापितिसामाणो, संघो सरणं तु सव्वेसिं ॥ १६६४ ॥**

आश्वासयतीति **आश्वासो** भीतानामाश्वासनकारी भगवान् श्रमणसङ्घः, विश्वासयतीति **विश्वासो** व्यवहारे वञ्चनाया अकर्ता, सर्वत्र समतया शीतगृहेण समः **शीतगृहसमः**। तथा मातापितृभ्यां समानो **मातापितृसमानः**, पुत्रेषु मातापितराविव व्यवहारार्थिष्वविषमदर्शी। तथा **सर्वेषां** प्राणिनां **शरणं** भगवान् **सङ्घः**। तस्मान्**मा भै**स्त्वमिति ॥१६६४॥ इदं च परिभावयन् संघोऽव्यवहारं न करोति

**सीसो पडिच्छओ वा, आयरिओ वा न सोग्गइं नेति।**
**जे सच्चकरणजोगा, ते संसारा विमोएंति ॥ १६६५ ॥**

**शिष्यः** स्वदीक्षितः, **प्रतीच्छकः** परगणवर्त्ती सूत्रार्थतदुभयग्राहकः, **आचार्यो** वाचनाचार्यादिको **न सुगतिं नयति,** किन्तु **ये सत्यकरणयोगाः** संयमानुगतमनोवाक्कायव्यापारास्ते **संसाराद् विमोचयन्ति** ॥ १६६५॥

**सीसो पडिच्छओ वा, आयरिओ वा वि एते इहलोए।**
**जे सच्चकरणजोगा, ते संसारा विमोएंति ॥ १६६६ ॥**

शिष्यः प्रतीच्छको वा आचार्यो वा एते सर्वेऽपि इहलोके, परलोके पुनः सत्यकरणयोगाः। तथा चाऽऽह- ये सत्यकरणयोगास्ते संसाराद्विमोचयन्ति ॥ १६६६ ॥

सीसो पडिच्छओ वा, कुलगणसंघो न सुग्गइं नेति।
जे सच्चकरणजोगा, ते संसारा विमोएंति ॥ १६६७ ॥

शिष्यः प्रतीच्छको वा कुलं वा गणो वा सङ्घो वा न सुगतिं नयति, किन्तु ये सत्यकरणयोगास्ते संसाराद्विमोचयन्ति ॥ १६६७॥

सीसो पडिच्छतो वा कुलगणसंघो व एते इहलोए।
जे सच्चकरणजोगा , ते संसारा विमोएंति ॥ १६६८ ॥

सुगमा ॥१६६८॥ शीतगृहसमः सङ्घ इत्युक्तं तत्र शीतगृहसमतां व्याख्यानयति—

सीसे कुलिच्चए वा, गणिच्चय संघिच्चए य समदरिसी।
ववहारसंथवेसु य, सो सीयघरोवमो संघो ॥ १६६९ ॥

**शिष्ये** स्वदीक्षिते **कुलिच्चए** वत्ति स्वकुलसम्बन्धिनि एवं **गणसम्बन्धिनि सङ्घसम्बन्धिनि** च व्यवहारे **समदर्शी** किमुक्तं भवति? शिष्याणां कुल-गण-सङ्घसम्बन्धिनां च परस्परं व्यवहारे जाते समदर्शी, तथा **संस्तवेषु** पूर्वसंस्तुतेषु पश्चात्संस्तुतेषु वाऽन्यैः समं **व्यवहारे** जाते समदर्शी, अतः **स सङ्घः शीतगृहोपमः**। यथा शीतगृहमाश्रितानां स्वपरविशेषाकरणतः परितापहारी तथा व्यवहारार्थमागतानां सङ्घोऽपि स्वपरविशेषाकरणतः परितापहारीति भावः ॥ १६६९ ॥

सम्प्रति सङ्घशब्दस्य व्युत्पत्तिमाह—

**गिहिसंघायं जहिउं, संजमसंघायगं उवगए णं।**
**णाण-चरणसंघायं संघायतो हवइ संघो ॥ १६७० ॥**

**गृहिणां** संसारिणां माता-पित्रादीनां **सङ्घातं हित्वा** परित्यज्य **संयमसङ्घातमुपगतः** सन् **ण**मिति वाक्यालङ्कारे, यो ज्ञानचरणसङ्घातं सङ्घातयति आत्मनि स्थितं करोति स **ज्ञानचरण सङ्घातं सङ्घातयन् भवति सङ्घः**, सङ्घातयतीति सङ्घ इति व्युत्पत्तेः, विपरीतस्तु सङ्घो न भवति ॥ १६७० ॥

**णाणचरणसंघायं, रागद्दोसेहि जो विसंघाए।**
**अबुहो[1] गिहिसंघायंमि ,अप्पाणं मेलितो न सो संघो ॥ १६७१ ॥**

**यो ज्ञानचरणसङ्घातं रागद्वेषैः** अनेकव्यक्त्यपेक्षया बहुवचनम् **विसङ्घातयति** विसङ्घटयति सः '**अबुधः**' मूर्खो **गृहिसङ्घाते आत्मानं** सङ्घातयति **मेलयति,** ततः **स** परमार्थतो **न सङ्घः**, ज्ञानचरणसङ्घातनलक्षणप्रवृत्तिनिमित्ताभावात् ॥ १६७१ ॥

तस्यापायरूपं फलमाह—

**णाणचरणसंघायं, रागद्दोसेहिं जो विसंघाए।**
**सो भमिही संसारं,चउरंगंतं अणवदग्गं ॥ १६७२ ॥**

**यो ज्ञानचरणसङ्घातं रागद्वेषैः विसङ्घातयति** विघट्टयति **स संसारे** चतुर्षु अङ्गेषु-नारक-तिर्यग्नराऽमरगतिरूपेष्वन्तः- पर्यन्तो यस्य स **चतुरङ्गान्तस्तं अनवदग्रं** कालतोऽपरिमाणं **भ्रमिष्यति**। तस्य च संसारं परिभ्रमतो वितथव्यवहारकारित्वेनोन्मार्गदेशनया

१. सो संघायइ अबुहो गिहिसंघायम्मि अप्पाणं- पुप्रे. ॥

तीर्थकराशातनया च बोधिरपि भवान्तरे दुर्लभा ॥ १६७२॥

तथा चाऽऽह—

**दुक्खेण लहइ बोहिं, बुद्धो वि य न लभते चरितं तु।**
**उम्मग्गदेसणाए, तित्थगरासायणाए य ॥ १६७३ ॥**

एवं वितथं हि व्यवहारं कुवर्ता **तेनोन्मार्गो देशितः**, तीर्थकरश्चाशातितः। तत **उन्मार्गदेशनया तीर्थकराशातनया** च स संसारं परिभ्रमन् **दुःखेन लभते बोधिम्। बुद्ध्वाऽपि च न लभते चारित्रम्** ॥ १६७३॥

कस्मान्न लभते? इति, अत आह—

**उम्मग्गदेसणाए, संतस्स य छायणाए मग्गस्स।**
**बंधति कम्मरयमलं, जरमरणमणंतकं घोरं ॥ १६७४ ॥**

**उन्मार्गस्य देशनया सतो मार्गस्य छादनया** स्थगनेन **बध्नाति कर्म**, किंविशिष्टम्? इत्याह— **रज** इव रजः-सङ्क्रमणोद्वर्तनाऽपवर्तनादियोग्यम्, मल इव **मलो** निधत्त-निकाचिता-

वस्थम् तथा **जरामरणान्य**नन्तानि यस्मात्तत् **जरामरणानन्तकम्,** प्राकृतत्वाद्विशेषणस्य परनिपातः, मकारोऽलाक्षणिकः, अत एव **घोरं** रौद्रम्। अतो न लभते बोधिम्, नापि चारित्रमिति॥ १६७४॥

कीदृशेन पुनर्व्यवहारः छेत्तव्यः? तत आह—

**पंचविहं उवसंपय, नाऊण खेत्त काल पव्वज्जं।**
**तो संघमज्झयारे, ववहरियव्वं अणिस्साए ॥ १६७५ ॥**

यत एवं वितथव्यवहारकरणे दोषास्ततस्तस्मात्**पञ्चविधां** ज्ञान-दर्शन-चारित्र-तपो-वैयावृत्त्यभेदतः पञ्चप्रकारा**मुपसम्पदम्, क्षेत्रं कालं प्रव्रज्यां** च **ज्ञात्वा** सङ्घमध्ये व्यवहर्तव्यम्। किमुक्तं भवति ? यः पञ्चविधायामुपसम्पदि आभवन्तमनाभवन्तं च जानाति, यश्च क्षेत्रमक्षेत्रं वा बुध्यते, क्षेत्रेऽपि च क्षेत्रिकस्य यदाभवति तद् जानाति, तथा क्षेत्रे यावन्तं कालमवग्रहोऽनुषजति तावन्तं कालमवबुध्यते, तथा प्रव्राजयितुं यो जानाति, प्रव्राजितेऽपि केनापि तस्य यद् आभवति यच्च नाऽऽभवति तद् जानाति, **तेन सङ्घमध्ये अनिश्रया** आहारादिप्रदायिषु स्वकुलसम्बन्ध्यादिषु वा रागाकरणत इतरेषामद्वेषकरणतो **व्यवहर्तव्यम्** ॥ १६७५॥

अत्र परस्याऽऽशङ्कामाह—

**उस्सुत्तं ववहरतो उ, वारितो नेव होइ ववहारो।**
**बेति जइ बहुसुएहिं, कतोत्ति तो भण्णई इणमो ॥ १६७६ ॥**

**उत्सूत्रं** सूत्रोत्तीर्णं **व्यवहरतो** बहुश्रुतस्य **बहुश्रुतैः कृतः** इति **व्यवहारो नैवान्यैर्वारित**स्ततः स प्रमाणमिति **यदि ब्रूते तत इदं भण्यते**— द्विविधाः खलु व्यवहारे छेदकाः तद्यथा— प्रशंसनीया अप्रशंसनीयाश्च ॥ १६७६ ॥

तथा चोभयानेव सनिदर्शनमभिधित्सुराह—

**तगराए नयरीए, एगायरियस्स पासे निप्फण्णा।**
**सोलस सीसा तेसिं, अव्ववहारी उ अट्ठ इमे ॥ १६७७ ॥**

**तगरायां नगर्यामेकस्याऽऽचार्यस्य पार्श्वे षोडश शिष्या निष्पन्नाः।** तेषां च मध्येऽष्टौ व्यवहारिणः, अष्टौ चाव्यवहारिणः। तत्र **अव्यवहारिणोऽष्टाविमे** ॥ १६७७ ॥

तानेवाऽऽह—

**मा कित्ते कंकडुयं१, कुणिमं२ पक्कु३त्तरं४ च चव्वायं ५।**

**बहिरं६ च गुंठसमणं७, अंबिलसमणं८ च निद्धम्मं ॥ १६७८ ॥** दारगाहा।

**मा कीर्त्तय** प्रशंसय व्यवहारिणम् कं कम्? इत्याह- **काङ्कटुकं१ कुणपं** कुणपनखं२ **पक्वम् ३ उत्तरं ४ चार्वाकं ५ बधिरं ६गुण्ठसमानं** लाटमायाविसमानम् ७ **अम्लसमानं च निर्धर्माणम्** ८ ॥१६७८॥

तत्र काङ्कटुकं कुणपं च प्रतिपादयति—

**कंकुडुओ विव मासो, सिद्धिं न उवेइ जस्स ववहारो।** दारं १।

**कुणिमनहो व न सुज्झइ, दुच्छेज्जो जस्स ववहारो ॥ १६७९ ॥** दारं २।

**यस्य व्यवहारः काङ्कटुकमाष इव न सिद्धिमुपयाति** स काङ्कटुकव्यवहारयोगात् काङ्कटुकः१। यस्य पुनर्व्यवहारो **दुश्छेद्यः** भवति, **न** च छिन्नोऽपि सर्वथा निरवशेषः

**शुद्ध्यति,** यथा कुणपे मांसे सूक्ष्मः नखः नखावयवः, स **कुणपनखा**वयवतुल्यव्यवहारकरण-योगात् कुणपः२ ॥१६७९॥

पक्कमुत्तरं चाऽऽह—

**फलमिव पक्कं पडए, पक्कस्सहवा न गच्छए पागं।**
**ववहारो तज्जोगा, ससिगुत्तसिरिव्व सन्नासे ॥ १६८० ॥**
**पक्कुल्लवभया वा, कज्जं पि न सेसया उदीरेंति। दारं ३।**
**पाएण आहतो त्ति, उत्तर सोवाहणेणं ति ॥ १६८१ ॥** दारं ४।

यस्य व्यवहारः **फलमिव पक्वं पतति,** न पुनः स्थिरोऽवतिष्ठति। **अथवा तद्योगा**त्पक्व-योगाद् व्यवहारः **पाकं न गच्छति,** यथा **चाणक्यस्य संन्यासे शशिगुप्तश्रीः** चन्द्रगुप्तस्य लक्ष्मीः। अत एव पतनेन पाका-गमनेन वा पक्वफलसदृशव्यवहारकरणात् स पक्व इति व्यवह्रियते ॥ १६८०॥

अथवा यस्य **पक्कोल्लापभयात् कार्यमपि न शेषकाः उदीरयन्ति** ब्रुवते स पक्वः। किमुक्तं भवति? पक्कपक्कानि तादृशानि स भाषते यैः भाषिताः सन्तोऽन्ये सद्वादिनस्तूष्णीका

आसते, ततः पक्कोल्लापयोगात्स पक्व इति ३। **पादेन सोपानहा आहत** इत्युत्तरसदृशोत्तरकारी **उत्तरः**। इयमत्र भावना-केनापि कश्चित्**सोपानहा** पादेनाऽऽहतः, तेन च गत्वा राजकुले निवेदितम् कारणिकैश्च स आकारितः किं त्वयैष आहतः स प्राह न मयैष आहतः, किन्तु सोपानहा पादेन। एवं सोऽपि दुर्व्यवहारं कुर्वन् गीतार्थेन सूत्रोपदेशतः उपालब्धः सन्नेतादृशैश्छलवचनैरुत्तरं ददाति, ततः कदुत्तरकरणात् स उत्तर इति ४। ॥ १६८१ ॥

सम्प्रति चार्वाकं बधिरं चाऽऽह —

**रोमंथयते कज्जं, चव्वागी नीरसं व विसनेत्तं।** दारं ५।
**कहिते कहिते कज्जे, भणाति बहिरो व न सुयं मे ॥ १६८२ ॥** दारं ६।

यथा **वृषनेत्रं** वृषभसागारिकं **नीरस**मपरो वृषभश्चर्वयति एवं यः **कार्यं रोमन्थायमाणो** निष्फलं चर्वयन् तिष्ठति स चर्वणशीलः **चार्वाकिः**५। तथा यः **कथिते कथिते कार्ये बधिर इव ब्रूते- न सुष्ठु मया श्रुत**मिति। स बधिर इव बधिरः ६ ॥ १६८२ ॥

गुण्ठसमानमम्लसमानं चाऽऽह—

**मरहट्ठ लाड पुच्छा, केरिसया लाडगुंठ साहिस्सं।**
**पावार भंडिछुभणं, दसियागणणे पुणो दाणं ॥ १६८३ ॥**

**गुंठाहिं एवमादीहिं, हरति मोहित्तु तं तु ववहारं।** दारं ७
**अंबफरिसेहिं अंबो, न नेति सिद्धिं तु ववहारं ॥ १६८४ ॥** दारं ८।

एको लाटो गन्त्र्या किमपि नगरं व्रजति। अपान्तराले च पथि **महाराष्ट्रिको** मिलितः। तेन **लाटस्य पृच्छा** कृता- **कीदृशाः** खलु **लाटाः गुण्ठाः** मायाविनो भवन्ति?। स प्राह- पश्चात्**साधयिष्यामि** कथयिष्यामि। मार्गे च गच्छतां शीतवेलाऽपगता। ततो नष्टे शीते महाराष्ट्रिकेण **प्रावारो गन्त्र्यां क्षिप्तः**। तस्य च प्रावारस्य **दशिका** लाटेन **गणिताः**। ततो नगरप्राप्तौ महाराष्ट्रिकेण प्रावारो ग्रहीतुमारब्धः। लाटो ब्रूते- किं मदीयं प्रावारं गृह्णासि ?। एवं तयोः परस्परं विवादो जातः। महाराष्ट्रिकेण लाटो राजकुले कर्षितः। विवादे लाटोऽवादीत् -पृच्छत महाराष्ट्रिकं यदि तव प्रावारस्तर्हि कथय 'कति दशा अस्य सन्ति?। 'महाराष्ट्रिकेण न कथिताः, तेन च लाटेन कथिताः' इति महाराष्ट्रिको जितः। ततो राजकुलादपसृत्य

लाटेन महाराष्ट्रिकमाकार्य प्रावारं च तस्मै दत्त्वा[१] उक्तम्- वरमित्र! यत्त्वया पृष्टं कीदृशा लाटगुण्ठा भवन्ति? इति तत्रेदृशा लाटगुण्ठाः ॥१६८३॥

**एवमादिभिः गुण्ठाभिः** मायाभिर्यो **मोहयित्वा** तं प्रस्तुतं **व्यवहारं हरति** अपनयति स गुण्ठसमानः ७। तथा येषु वचनेषूक्तेषु परस्य शरीरं चिडचिडायते तानि अम्लानि। **अम्लैः परुषैश्च** वचनैर्व्यवहारं **न सिद्धिं नयति**। सोऽम्लवचनयोगा**दम्ल** इति ॥ १६८४॥

उपसंहारमाह—

**एए अकज्जकारी, तगराए आसि तम्मि उ जुगम्मि।**
**जेहि कया ववहारा, खोडिज्जंतऽण्णरज्जेसु ॥ १६८५ ॥**

**एते** अनन्तरोक्तस्वरूपा अष्टौ **अकार्यकारिणः** दुर्व्यवहारिणः **तस्मिन् युगे तस्मिन्** विवक्षिते काले **तगरायामासीरन्। यैः कृता व्यवहारा अन्येषु राज्येषु खोद्यन्ते** ॥ १६८५॥

दुर्व्यवहारिणामिह परलोके च फलमाह—

१. दत्त्वा ब्रूते व॰ पुप्रे. मु. ॥

इहलोए य अकित्ती, परलोए दुग्गती धुवा तेसिं।
अणाणाए जिणिंदाणं जे ववहारं ववहरेंति ॥ १६८६ ॥

ये जिनेन्द्राणामनाज्ञया व्यवहारं व्यवहरन्ति, तेषामिह लोके अकीर्त्तिः परलोके ध्रुवा दुर्गतिः ॥१६८६॥

तेण न बहुस्सुतो वी, होइ पमाणं अण्णायकारिओ।
नाएण ववहरंतो, होई पमाणं जहा उ इमे ॥ १६८७ ॥

यत एवं दुर्व्यवहारिण इह लोकेऽपकीर्तिः परलोके च दुर्गतिस्तेन कारणेन बहुश्रुतोऽप्यन्यायकारी न भवति प्रमाणम्। न्यायेन पुनर्व्यवहरन् भवति प्रमाणम्। यथा इमे वक्ष्यमाणास्तगरायां तस्यैवाऽऽचार्यस्याष्टौ शिष्याः॥ १६८७॥ तानेवाऽऽह—

कित्तेहि पूसमित्तं१, वीरं२ सिवकोट्ठगं३ च अज्जासं ४।
अरहन्नग५ धम्मत्तग ६खंदिल७ गोविंददत्तं८ च ॥ १६८८ ॥

**कीर्तय** प्रशंसय सुव्यवहारकारितया **पुष्यमित्रं१ वीरं २ शिवकोष्ठकं ३ आर्यासं ४ अर्हन्नकं ५ धर्मत्वगं ६ स्कन्दिलं ७ गोपेन्द्रदत्तं च ८** ॥ १६८८ ॥

**एते उ कज्जकारी, तगराए आसि तम्मि उ जुगम्मि।**
**जेहिं कया ववहारा, अक्खोभा अण्णरज्जेसु ॥ १६८९ ॥**

**एते** अनन्तरोदिताः **तस्मिन् युगे** तस्मिन् काले **कार्यकारिणः सुव्यवहारिणस्तगराया-मासीरन्। यैः कृता व्यवहाराः अक्षोभ्याः** अचाल्या **अन्यराज्येषु** ॥१६८९॥

सुव्यवहारिणामिह-परलोके च फलमाह—

**इहलोगम्मि य कित्ती, परलोगे सोग्गती धुवा तेसिं।**
**आणाए जिणिंदाणं, जे ववहारं ववहरंति ॥ १६९० ॥**

**ये जिनेन्द्राणामाज्ञया व्यवहारं व्यवहरन्ति, तेषामिह लोके कीर्त्तिः परलोके सुगतिः ध्रुवा** ॥१६९०॥

**केरिसतो ववहारी, आयरियस्स जुगप्पहाणस्स।**
**जेण सगासोग्गहियं, परिवाडीहिं तिहिं असेसं ॥ १६९१ ॥**

'**कीदृशो** ननु **व्यवहारी** भवति?' एवं शिष्येण प्रश्ने कृते सूरिराह—**येन युगप्रधानस्याचार्यस्य, सकाशे** समीपे **तिसृभिः परिपाटीभिरशेषं** श्रुतं व्यवहारादिक**मवगृहीतम्** ॥१६९१॥

ता एव परिपाटीराह—

**मूयपारायणं पढमं१, बिइयं पदुब्भेदितं२।**
**तइयं च निरवसेसं३, जति सुज्झाति गाहगो ॥ १६९२ ॥**

**प्रथमं**[1] **मूकपारायणं** अर्थपरिसमाप्त्या पदच्छेदेन सूत्रोच्चारणम् संहितेति भावार्थः १। **द्वितीयं पदोद्भेदकं** पारायणम् पदविभाग-पदार्थमात्रकथन-पदविग्रहफला द्वितीया परिपाटीति भावः २। **तृतीयं** पारायणं **निरवशेषम्,** चालना प्रत्यवस्थानात्मिका तृतीया परिपाटीत्यर्थः

१. प्रथमं सूत्रपारा॰ वा. मो. पु.॥

३। एवं श्रुते यदि शङ्का भवति तर्हि **ग्राहकः** आचार्यः **शोधयति** परीक्षते इत्यर्थः। कथम्? इति चेत्, उच्यते— तिसृभिः परिपाटीभिः श्रुतेऽपि व्यवहारादिके ग्रन्थे सूरिणा स विचारणीयः- किं सम्यक् गृहीतं न वा? गृहीतेऽपि पुनः परीक्षणीयः— किं व्यवहारी? अव्यवहारी वा? तत्र यदि व्यवहारी तर्हि योग्यः, अथाव्यवहारी तर्हि अयोग्यः। अथवा ग्राहको नाम शिष्यः, स यदि तिसृभिः परिपाटीभिः शुद्ध्यति भावतो निःशेषसूत्राऽर्थपारगो भवति ततः स व्यवहारी क्रियते॥ १६९२॥ एतदेव व्याख्यानद्वयं विवरिषुराह—.

**गाहओ आयरिओ ऊ, पुच्छइ सो जाणि विसमठाणाणि।**
**जइ निव्वहती तहियं, ति तस्स हिययं तु तो सुज्झे ॥ १६९३ ॥**

**ग्राहकः आचार्यः**, ग्राहयतीति ग्राहक इति व्युत्पत्तेः। **स यानि विषमाणि स्थानानि** तानि **पृच्छति** तत्र **यदि निर्वहति**। किमुक्तं भवति ? **तस्य हृदयं** सम्यगभिप्रायं जानाति **ततः शुध्यति** व्यवहर्तुं व्यवहारकरणयोग्यः ॥ १६९३॥

द्वितीयं व्याख्यानमाह—

**अहवा गाहगो सीसो, तिहिं परिवाडीहिं जेण निस्सेसं।**
**गहियं गुणियं अवधारियं च सो होइ ववहारी ॥ १६९४ ॥**

**अथवा ग्राहको** नाम **शिष्यः**, 'गृह्णातीति ग्राहकः' इति व्युत्पत्ते**र्येन तिसृभिः परिपाटीभिर्निःशेषं** व्यवहारादिकं **गृहीतं** परिपाट्या प्रथमतः, पश्चाद् **गुणितं** अनेकवार-मभ्यस्तीकृतम्, **अवधारितं** तात्पर्यग्रहणतो हृदये विश्रामितम्, **स भवति व्यवहारी** ॥१६९४॥

**पारायणे समत्ते, थिरपरिवाडी पुणो उ संविग्गे।**
**जो निग्गओ वितिण्णो, गुरूहिं सो होइ ववहारी ॥ १६९५॥**

**पारायणे**[1] मूकादिलक्षणे त्रिविधे **समाप्ते**ऽपि पुनर्यः **संविग्ने** संविग्नसमीपे **स्थिरपरिपाटि**रभूत्, यश्च **गुरुभिः वितीर्ण अनुज्ञातः सन् निर्गतो** विहारक्रमेण **स भवति व्यवहारी,** न शेषः॥ १६९५॥

१. "यणसूचकादि" मो. ॥

तथा चाऽऽह—

**पडिणीय मंदधम्मो, जो निग्गतो अप्पणो सकम्मेहिं।**

**न हु सो होइ पमाणं, असमत्तो देसनिग्गमणे ॥ १६९६ ॥**

आत्मनः परेषां च प्रतिकूलः **प्रत्यनीकः**। धर्मे मन्दो **मन्दधर्मः**, राजदन्तादिदर्शनाद् धर्मशब्दस्य परनिपातः, संयमे शिथिल इत्यर्थः। तथा **य आत्मनः स्वकर्मभिः** स्वव्यापारैर्**निर्गतो** विहारक्रमेण, न तु गुरुभिरनुज्ञातः, **सः न हु** नैव **भवति प्रमाणम्, असमाप्त**श्च स भवति **देशनिर्गमने** नानादेशेषु विहारक्रमकरणे ॥ १६९६ ॥

**आयरियाद्देसा धारिएण अत्थेण गुणिय-झरिएण।**

**तो संघमज्झयारे, ववहरियव्वं अणिस्साए ॥ १६९७ ॥**

यत एवं विपक्षे दोषास्तस्मात्**सङ्घमध्यकारे**, कारशब्दोऽत्र स्वरूपमात्रे सङ्घमध्ये व्यवहर्त्तव्य**मर्थेन**। किंविशिष्टेन? इत्याह-**आचार्यादेशाद्** आचार्यकथनाद् **धारितेन,** एतेन सम्प्रदायागतत्वमावेदितम्। तथा **गुणितेन** अनेकशः परावर्तितेन **झरितेन** कश्मलक्षरणतः स्थिरतया च स्थितसारेण। एवम्भूतेनाप्यर्थेन **व्यवहर्तव्यमनिश्रया** राग-द्वेषाकरणेन अन्यथा अर्थस्य तत्त्वतो झरितत्वानुपपत्तेः ॥ १६९७ ॥

**आयरियअणादेसा, धारिएण सच्छंदबुद्धिरइएण।**

**स[1]चित्त-ऽचित्त-मीसे, जो ववहरते न सो धण्णो ॥ १६९८ ॥**

**यः सचित्ते** व्यवहा[2]रे [**अचित्ते** व्यवहारे]**मिश्र**व्यवहारे च प्रागुक्तस्वरूपे अर्थेन **व्यवहरति आचार्यानादेशाद् धारितेन** आचार्योपदेशमृते धारितेन। कथम्? इत्याह— **स्वच्छन्द-बुद्धिरचितेन** स्वेच्छया निज[3]बुद्धिकल्पितेन **न स धन्यः** श्रेयानिति ॥ १६९८॥ यतः—

**सो अभिमुहेइ लुद्धो, संसारकडिल्लगम्मि अप्पाणं।**

**उम्मग्गदेसणाए, तित्थयरासायणाए य ॥ १६९९ ॥**

**सः [ लुब्धः ] उन्मार्गदेशनया तीर्थकराणामाशातनया चाऽऽत्मानं संसारगहने अभिमुख्यति** अभिमुखं करोति, पातयतीत्यर्थः तस्मान्न स धन्यः ॥ १६९९॥

---

१. सच्चित्तखेत्तमीसे- मु. भाष्यप्रतिषु च ॥ २. °हारे क्षेत्रव्यवहारे मिश्र° खं. मु. ॥ ३. °बुद्धिकलितेन-वा.मो.पु.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधुनाऽस्यैव प्रायश्चित्तमाह—

**उम्मग्गदेसणाए, संतस्स छायणाए मग्गस्स।**
**ववहरिउमचाएंते, मासा चत्तारि भारिया ॥ १७०० ॥**

**उन्मार्गदेशनया सतो** मार्गस्य **छादनया** च व्यवहरन् गीतार्थैः प्रतिषिध्यते, प्रतिषेधिते च **व्यवहरितुमशक्नुवति** प्रायश्चित्तं **चत्वारो गुरुका मासाः** ॥ १७०० ॥

**गारवरहिएण तहिं , ववहरियव्वं तु संघमज्झम्मि।**
**को पुण गारव? इणमो, परिवारादी मुणेयव्वो ॥ १७०१॥**

**तत्रापि गौरवरहितेन सङ्घमध्ये व्यवहर्तव्यम्। किं पुनर्गौरवम्?** इति चेत्, सूरिराह -इदं वक्ष्यमाणं **परिवारादिकं** परिवारादिविषयं **ज्ञातव्यम्** ॥ १७०१ ॥

तदेवाऽऽह—

**परिवार१ इड्ढि २ धम्मकहि३ वादि ४ खमगे५ तहेव नेमित्ती ६।**
**विज्जा७ राइणियाए ८ गारवो इति अट्ठहा होइ ॥ १७०२ ॥**



For Private and Personal Use Only

**परिवार**गौरवम् १ **ऋद्धि**गौरवं २ **धर्मकथी** अहमिति गौरवं ३ **वाद्य**हमिति गौरवं ४ **क्षपको**ऽहमिति गौरवं ५ **नैमित्तिको**ऽहमिति गौरवं ६ **विद्या**गौरवं ७ **रत्नाधिकतागौरवम्** ८ **इति** एवममुना प्रकारेण **अष्टधा** अष्टप्रकारं गौरवं **भवति** ॥ १७०२ ॥

**बहुपरिवारं१ महिड्डी निक्खंतो२ वावि धम्मकहि३ वादी४।**
**जइ गारवेण जंपेज्ज, अगीतो भणणइ इणमो ॥ १७०३ ॥**

**बहुपरिवारो** १ **महर्द्धिको वा निष्क्रान्तो** २ **धर्मकथी** ३ **वादी** ४. उपलक्षणमेतत् क्षपकः ५ नैमित्तिकः ६ विद्यावान् ७ रात्निको ८ वा **यदि गोरवेणाऽगीतार्थः** सन् **जल्पेत** 'यूयमस्मान् न प्रमाणीकुरुथ? इति, तर्हि स **इदं** वक्ष्यमाणं **भण्यते** ॥ १७०३ ॥

तदेवाह—

**जत्थ उ परिवारेण, पयोयणं तत्थ भण्णिह तुब्भे।**
**इड्ढीमंतेसु तहा, धम्मकहा वायकज्जे वा ॥ १७०४॥**

**पवयणकज्जे खमगो, नेमित्ती चेव विज्जसिद्धे य।**
**रायणिए वंदणयं, जहि दायव्वं तहि भणेज्जा ॥ १७०५ ॥**

परिवारगौरववानिदं भण्यते— **यत्र** सङ्घस्य प्रेषणादिके कार्ये समुत्पन्ने **परिवारेण प्रयोजनं** भविष्यति, **तत्र यूयं भणिष्यध्वे**, तत्र प्रमाणीकरिष्यध्वे यूयम्, नात्र प्रस्तुते व्यवहारे इति भावः। **तथा ऋद्धिमत्सु** वक्तव्यम्, धर्मकथी **धर्मकथा**प्रयोजने, वादी **वादकार्ये**। इयमत्र भावना— ऋद्धिगौरवोपेतो महर्द्धिक इदमुच्यते— यदि लोकेन कृत्यं भविष्यति तदा त्वां प्रमाणीकृत्य त्वत्पार्श्वात् लोकोऽनुवर्तयिष्यते। धर्मकथी भण्यते- यदि राजादीनां धर्मः कथयितव्यो भविष्यति तदा युष्मान्वयमभ्यर्थयिष्यामः, यथा- कथय कथानकं सम्प्रति राजादीनामिति। वादी भण्यते— यदा परवादी कश्चनाप्युत्थास्यति तदा तवोपरोधः करिष्यते यथा- निगृह्णीथ कथमप्येनं वादिनमिति ॥ १७०४॥

तथा **क्षपको** नैमित्तिको विद्यासिद्धो वा **प्रवचनकार्ये** उपालम्भनीयः। यथा- क्षपक! यदा सङ्घस्य कृते देवताया प्रयोजनं भविष्यति तदा त्वां कायोत्सर्गं कारयित्वा सा आकम्पयिष्यते। **नैमित्तिको** भण्यते- यदि सङ्घस्य निमित्तेन प्रयोजनं भविष्यति तदा

त्वमप्यभ्यर्थयिष्यसे। **विद्यासिद्धो** भण्यते-यदा सङ्घस्य कार्यं विद्यया साधनीयं भविष्यति तदा त्वत्पार्श्वात्साधयिष्यते। **रात्निके** रत्नाधिके पुनरेवं भण्यते- **यत्र** पाक्षिकादिकं **वन्दनकं दातव्यं** भविष्यति **तत्र** यूयं **भणिष्यध्वे,** किमिदानीमायासं कुरुथ? इति॥ १७०५॥

एतच्च स तान् प्रति प्राह—

**न हु गारवेण सक्का, ववहरिउं संघमज्झयारम्मि।**
**नासेइ अगीयत्थो,अप्पाणं चेव कज्जं तु ॥ १७०६ ॥**

**न हु** नैव **सङ्घमध्यकारे** संघमध्ये **गौरवेण शक्यं व्यवहर्त्तुम्,** अन्यैर्जिनाज्ञाराधकैर्गीतार्थैर्निवारणात्, केवलं सोऽ**गीतार्थ**स्तथा दुर्व्यवहारं कुर्वन् **आत्मीयमेव कार्यं नाशयति**। उत्सूत्रप्ररूपणतोऽबोधि-फलनिबिडकर्मबन्धनात्॥ १७०६॥

तथा चाऽऽह—

**नासेइ अगीयत्थो, चउरंगं सव्वलोए सारंगं।**
**नट्ठम्मि उ चउरंगे, न हु सुलहं होइ चउरंगं ॥ १७०७ ॥**

**अगीतार्थो** गौरवेण व्यवहरन् अबोधिफलकर्मबन्धनाच्चतुर्णामङ्गानां समाहारः **चतुरङ्गं** मानुषत्वं[1] श्रुतिः श्रद्धा संयमे च वीर्यम् इत्येवंरूपम् , कथंभूतम्? इत्याह–**सर्वस्मिन्नपि लोके** सारमङ्गं स्वरूपं यस्य तत्सर्वलोक**साराङ्गं नाशयति। नष्टे** च तस्मिन् **चतुरङ्गे न हु** नैव भूयो **भवति सुलभं चतुरङ्गम्** निबिडकर्मणाऽनर्वाक्पारे संसारे क्षिप्तत्वात् ॥ १७०७॥

**थिरपरिवाडीएहिं, संविग्गेहिं अणिस्सियकरेहिं।**
**कज्जेसु जंपियव्वं, अणुओगियगंधहत्थीहिं ॥ १७०८॥**

स्थिराः सूत्रार्थपरिपाट्यो येषां ते **स्थिरपरिपाटीकास्तैः संविग्नैः** मोक्षाभिलाषिभिः **अनिश्रितकरैः** राग-द्वेषपरिहारतो यथावस्थितव्यवहारकारिभिः **आनुयोगिकगन्धहस्तिभिः** अनुयोगधरप्रकाण्डैः **कार्येषु जल्पितव्यम्,** न शेषैरिति ॥ १७०८॥

एतदेव भावयति—

**एयगुणसंपउत्तो, ववहरई संघमज्झयारम्मि।**
**एयगुणविप्पमुक्के, आसायण सुमहती होति ॥ १७०९ ॥**

१. "माणुसत्तं१ सुई२ सद्धा३ संजमम्मि य वीरियं" उत्तरा. ४। १।।

एतैः अनन्तरगाथोक्तैः स्थिरपरिपाटीकत्वादिभिर्गुणैः सम्प्रयुक्त **एतद्गुणसम्प्रयुक्तः सङ्घमध्ये व्यवहरति**। एतद्गुणविप्रमुक्ते पुनर्व्यवहरति **सुमहती आशातना भवति**। न केवलमाशातना, व्रतलोपश्च ॥ १७०९ ॥

तथा चाऽऽह—

**आगाढमुसावादी, बितियतईए य लोवति वए ऊ।**
**माई य पावजीवी, असुईलित्ते कणगदंडे ॥ १७१० ॥**

*इति व्यवहारभाष्ये पट्टबद्धोद्देशकस्तृतीयः परिसमाप्तः ॥३॥*

आगाढे कुलकार्ये गणकार्ये सङ्घकार्ये वा अनाभाव्यस्याऽऽभाव्यस्य आभाव्यस्य वाऽनाभाव्यस्याज्ञानतया रागद्वेषाभ्यां वा भणनाद् मृषा वदतीत्येवंशील **आगाढमृषावादी द्वितीयतृतीये** मृषावादाऽदत्तादानविरतिरूपे **व्रते लोपयति**। तत्र द्वितीयव्रतलोपो मृषावादभणनात् तृतीयव्रतलोपोऽनाभाव्यं ग्राहयतोऽनुमतिदोषभावात् तु शब्दात्शेषाण्यपि व्रतानि लोपयति, एकव्रतलोपे सर्वव्रतलोप इति वचनात्। **मायी** सूत्रमुल्लङ्घ्य शठोत्तरैर्व्यवहारकरणात्। **पापजीवी** दुर्व्यवहारकरणाय परदत्ताहाराद्युपजीवनात्। अत एवा**ऽशुचिः** मृषावादित्वादि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोषदुष्टत्वात्। अशुचित्वादेव यथा **कनकदण्डः** संज्ञालिप्तः स्प्रष्टुं न कल्पते, एवमेषोऽपि न कल्पते यावज्जीवमाचार्यत्वादिषु पदेषु स्थापयितुमिति ॥ १७१० ॥

**॥ इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां तृतीयोद्देशकः समाप्तः॥**

*तृतीयोद्देशके ग्रन्थाग्रम् २४६५ ॥*

*व्यवहारटीकापीठिकाग्रन्थाग्रम् २३५५ ॥*

*व्यवहारटीकायां सपीठिके प्रथमोद्देशके ग्रन्थाग्रम् १०८७८।*

*द्वितीये उद्देशके ग्रन्थाग्रम् ३०१३।*

*तृतीयोद्देशके ग्रन्थाग्रम् २४६५।*

*सर्वसङ्ख्यया ग्रन्थाग्रम् १६३५६ ॥*



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



પ.પૂ આચાર્યદેવશ્રી ૐકારસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



પ.પૂ આચાર્યદેવશ્રી ભદ્રસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



આરાધનારત પ.પૂ. મુનિરાજશ્રી જિનચન્દ્રવિજયજી મ.સા.ના
કર કરમળમાં સમર્પિત

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# ॥ श्री व्यवहारसूत्रम् ॥

## भाग-६ - उद्देश-१०



संपादकः आचार्य विजय मुनिचन्द्रसूरिः

For Private and Personal Use Only